आचार्य क्षेमराज ने महार्थमञ्जरी ग्रन्थ का प्रत्यभिज्ञाहृदयम् में नामोल्लेख किया है और उसकी दृष्टि की व्याख्या भी की है; अतः स्पष्ट है कि महेश्वरानन्द आचार्य क्षेमराज के पूर्ववर्ती दार्शनिक थे। क्षेमराज प्रत्यभिज्ञाहृदयम् के सूत्र ११वें में कहते हैं—श्रीमन्महार्थमञ्जरीदृष्ट्या दृगादिदेवीप्रसरणक्रमेण यद्यत् आभाति तत्तत् सृज्यते, तथा सृष्टे पदे तत्र यदा प्रशान्तनिमेषं कञ्चित् कालं रज्यति .... संह्रियते।

यह भी बात सत्य है कि महेश्वरानन्द का नाम गोरक्षनाथ भी था। यह बात उन्होंने स्वयं ही स्वीकार किया है—गोरक्षो लोकधिया देशिकदृष्ट्या महेश्वरानन्दः (परिमल)।

महेश्वरानन्द की रचनायें—महेश्वरानन्द ने अनेक पुस्तकें लिखीं; जिसमें प्रख्यात रचनाओं के नाम इस प्रकार हैं—

१. महार्थमञ्जरी
२. परिमल (महार्थमञ्जरी की टीका)
३. कुण्डलाभरणम्
४. कोमलवल्लीस्तवः
५. नखप्रलापः
६. परास्तोत्रम्
७. पादुकोयः
८. महार्थोदयः
९. संविदुल्लासः

महार्थमञ्जरी : एक संक्षिप्त परिचय

महार्थमञ्जरी का बीजात्मक मूल स्वरूप—स्वयमेव महेश्वरानन्द ने स्वीकार किया है कि महार्थमञ्जरी में प्रतिपादित विचार एवं तन्निष्ठ दृष्टि का बीज तो अन्यत्र है; मैंने तो केवल उसके अङ्कुर का पल्लवनमात्र किया है—

इह महति रहस्योन्मीलने मङ्गलाय प्रभवति मम संविद्योगिनीनां प्रसादः।

स्वप्नसमयोपलब्धा सा सुमुखी सिद्धयोगिनी देवी।
गाथाभिः सप्तत्या स्वापितभाषाभिरस्तु सम्प्रीता।।[१]
इत्थं प्राकृतसूत्रसप्ततिसमुल्लासैकसन्धायिनीं
जाग्रत्तत्क्षणनिर्विशेषस्वप्नावतीर्णां प्रतिज्ञोत्तराम्।
लोकोल्लङ्घनयोग्यसिद्धिपदवीप्रस्थानबद्धोद्यमां
कन्थाशूलकपालमात्रविभवां वन्दे तां योगिनीम्।।[२]

सारांश यह कि स्वप्न की अवस्था में योगिनी ने प्रकट होकर 'महार्थमञ्जरी' का उपदेश दिया था। महेश्वरानन्द ने उसे सत्तर गाथाओं में निबद्ध कर डाला। ग्रन्थकार इस ग्रन्थ को योगिनी-प्रसाद मानता है—

प्रभवति मम संविद्योगिनीनां प्रसादः।

इसीलिये महेश्वरानन्द ग्रन्थान्त में भी उनका नमन करते हुये कहते हैं—

कन्थाशूलकपालमात्रविभवां वन्दे तां योगिनीम्।

इस ग्रन्थोपदेश की प्राप्ति स्वप्न में होने की पुष्टि भी महेश्वरानन्द ने की है—

स्वप्नसमयोपलब्धा सा सुमुखी सिद्धयोगिनी देवी।

सम्पूर्ण ग्रन्थ इकहत्तर गाथाओं में समाप्त किया गया है, जिसमें सत्तर गाथाओं में उपदेशों का सारसंग्रह है; किन्तु ७१वीं गाथा में उपदेष्टा सिद्धयोगिनी को नमन किया गया है।

---

१. परिमल टीका २. महार्थमञ्जरी-७१ ३. परिमल

विषयानुक्रमणी

॥ श्रीः ॥

स्वोपज्ञ'परिमला'ख्यव्याख्योपेता

श्रीमन्महेश्वरानन्दप्रणीता

महार्थमञ्जरी

'भारती' भाषाभाष्योपेता

* परिमल *

नमो नालयते शुण्डां विषाणेन मृणालिने ।
प्रत्यक्कमलकन्दाय कर्णाभ्यां पर्णशालिने ॥१॥
जयत्यमूलमम्लानमौत्तरं तत्त्वमद्वयम् ।
स्पन्दास्पन्दपरिस्पन्दमकरन्दमहोत्पलम् ॥२॥
कारुण्यामृतसिन्धोरुदितमिवावर्तमीक्षणापाङ्गात् ।
मौक्तिकमयं दधाना ताटङ्कं जयति गौरवी मूर्तिः ॥३॥
स्फूर्तये विश्वशिल्पस्य श्रीशिवानन्दमूर्तये ।
नित्योन्मेषनिमेषायै निस्तुषायै नमस्त्विषे ॥४॥
यस्मादनुत्तरमहाह्रदमज्जनं मे
सौभाग्यशाम्भवसुखानुभवश्च यस्मात् ।
तत्स्वात्मचित्क्रमविमर्शमयं गुरूणा-
मोवल्लियुग्ममुदितोदितवीर्यमीडे ॥५॥
नमो निखिलमालिन्यविलापनपटीयसे ।
महाप्रकाशपादाब्जपरागपरमाणवे ॥६॥
गोरक्षो लोकधिया देशिकदृष्ट्या महेश्वरानन्दः ।
उन्मीलयामि परिमलमन्तर्ग्राह्यं महार्थमञ्जर्याम् ॥७॥
स्वक्रियाया अपि व्याख्यां स्वयमेव प्रयुञ्ज्महे ।
उपर्यप्यात्मसंरम्भसम्भोगाम्रेडनोत्सुकाः ॥८॥
यद्वा विनेयजनचित्तचमत्क्रियार्थ-
मत्रोद्यमोऽयमुदितोऽस्तु तदेतदास्ताम् ।
संक्षेपविस्तरविभागविविक्तशोभः
पुष्पाञ्जलिर्भवतु वाङ्मय एष शम्भोः ॥९॥

अवगतशिवदृष्टिप्रत्यभिज्ञार्थतत्त्व-
क्रमसरणिरहस्योल्लाससर्वस्ववेदी ।
गुरुचरणसपर्याचातुरीचिद्घनोऽहं
गहनमपि हृदन्तर्व्योम तद्व्याकरोमि ।।१०।।

इह महति रहस्योन्मीलने मङ्गलाय
प्रभवति मम संविद्योगिनीनां प्रसादः ।
अति तु कुलसपर्याबिम्बसम्बन्ध्यवन्ध्याः
सकृदपि मतिमन्तो नैनमुद्घाटयन्तु ।।११।।

स्वप्नसमयोपलब्धा सा सुमुखी सिद्धयोगिनी देवी ।
गाथाभिः सप्तत्या स्वापितभाषाभिरस्तु सम्प्रीता ।।१२।।

वर्धतां देशिकः श्रीमान् संविन्मार्गश्च वर्धताम् ।
माहेश्वराश्च वर्धन्तां वर्धतां च महेश्वरः ।।१३।।

अथ यदेतदात्मस्वरूपाविभिन्नपरमेश्वरपरामर्शोपायप्रतिपादनप्रवृत्तमभ्युपगम-सिद्धान्तस्थित्या तात्पर्यतः प्रविज्ञाद्यव(यव)पञ्चकात्मकं महार्थमञ्जर्याह्वयं महत् तन्त्रम्, अत्र सूत्रायमाणा गाथाः सप्ततिर्भवन्ति। तत्र चाद्यायां मङ्गलाचारपूर्वक-मादिवाक्योपक्षेपः। द्वितीयायां तन्त्रप्रतिपाद्यस्य वस्तुनो निर्देशः। ततस्तिसृषु स्वात्मतत्त्वे प्रमाणानुपयोगप्रपञ्चनम्। षष्ठ्यामधिकारिविभागव्यपोहः। सप्तम्यां विधिनिषेधनिष्टङ्कनम्। अष्टम्यां संसारस्वरूपनिरूपणम्। नवम्यां स्वात्मनः स्फुट-स्याऽप्यस्फुटत्वौचित्यानुशासनम्। दशम्यां विम्रष्टृस्वरूपविमर्शस्य पुरुषार्थत्वा-वस्थापनम्। ततो द्वयोर्विमर्शस्वरूपविमर्शः। ततस्त्रयोदशसु षट्त्रिंशत्तत्त्वविवेकः। षड्विंश्यामुक्तार्थं प्रति परमार्थपर्यालोचनम्। सप्तविंशतितम्यां विश्वस्य प्रकाश-विमर्शान्तर्भावोद्भावनम्। अष्टाविंश्यामेकत्रैव वस्तुनि शिवशक्तिविभागाध्यव-सानम्। एकोनत्रिंश्यां परमेश्वरस्य विश्वशरीरतया शक्त्युत्कर्षोपपादनम्। त्रिंश्यां विश्ववैचित्र्यस्य स्वात्मन्यवैकल्येनावस्थानप्रदर्शनम्। एकत्रिंश्यां प्रमात्रादित्रि-कस्याद्वैतपर्यवसायित्वोन्मीलनम्। ततो द्वयोः सत्यासत्यविभागव्युदासः। ततोऽपि द्वयोः परमेश्वरसपर्याया वैशिष्ट्यावभासनम्। ततश्च षट्सु पूज्यतया श्रीपञ्चार्थ-क्रमावमर्शः। ततश्च पञ्चसु सपर्यायाः स्वरूपनिष्कर्षः। ततोऽपि द्वयोर्देवतास्व-भावनिर्णयः। एकोनपञ्चाश्यां मन्त्रतत्त्वोद्धारः। पञ्चाश्यां वाग्वृत्तिविचारः। एक-पञ्चाश्यां मुद्रासतत्त्वोन्मुद्रणम्। द्विपञ्चाश्यां विमर्शशक्तेर्भोगापवर्गफलप्रदत्वो-ल्लिङ्गनम्। त्रिपञ्चाश्यां जीवन्मुक्त्युपपत्तिः। चतुष्पञ्चाश्यां क्षणभङ्गवादभङ्गः। पञ्चपञ्चाश्यां स्वात्मस्वरूपस्यानन्दस्पन्दतानुवर्णनम्। ततश्चतसृषु तत्त्वावबोधं प्रति स्फुट उपायोपदेशः। ततश्च षट्सु विमर्शानुप्रवेशिनां नैश्चिन्त्यनिश्चयः।

षट्षष्टितम्यां स्वात्मविमर्शस्य सद्यः सिद्धिदत्वप्रत्यायनम्। सप्तषष्टितम्यां विमर्श-लाभस्य गुरुकटाक्षाधीनत्वप्रख्यापनम्। अष्टषष्टितम्यामुक्तार्थस्य सर्वदर्शनसार-त्वसाधनम्। एकोनसप्ततितम्यां तन्त्रविस्तरस्य संग्रहेणोपन्यासः। सप्ततितम्यां व्यासादियोगिनामप्यनुत्तरार्थैकशरणत्वप्रकाशनम्। अन्त्यायां तन्त्रकृतस्तन्त्रो-पदेशहेतुप्रयोगः। इति तन्त्रार्थतत्त्वतात्पर्यार्थः।

अथ ग्रन्थो व्याख्यायते। श्रीमदनुत्तराद्वैतसिद्धिहेतोर्द्वैतप्रथासत्तत्त्वप्रत्यूहव्य-पोहदक्षं देशिकेन्द्रभट्टारकस्वातन्त्र्यमनुसन्दधानस्तन्त्रकृत् तन्त्रोपन्यासं प्रत्युपोद्-घातमुद्घाटयति—

महाप्रकाश गुरु की वन्दना

णमिऊण णिच्चसुद्धे गुळुणो चळणे महप्पआसस्स।
गट्ठइ महत्थमंजरिमिमिणं सुरहिं महेसराणंदो ॥१॥

(नत्वा नित्यशुद्धौ गुरोश्चरणौ महाप्रकाशस्य।
ग्रथ्नाति महार्थमञ्जरीमिमां सुरभिं महेश्वरानन्दः।।)

महाप्रकाश (मत्स्येन्द्रनाथ या परमशिव भट्टारक) रूप गुरु के नित्य शुद्ध चरण-युगल में नतमस्तक होकर मैं महेश्वरानन्द (महायोगज्ञानरूप) 'महार्थमञ्जरी' रूपी परिमल को ग्रन्थरूप में निबद्ध करता हूँ।।१।।

इस खलु सर्वस्यापि जनस्योपास्यतया काचिद् देवतास्त्येवेत्यत्राविप्रतिपत्तिः। केवलं तस्या नामरूपादिव्यपदेशमात्रे वैषम्यम्। सा च युक्तिपर्यालोचनायां स्वात्मसंवित्स्फुरत्तामात्रस्वरूपेति प्रकाश एव विश्वोपास्या देवतेत्यापतितम्। तस्य च महत्त्वम्—

सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया चोक्ता हृदयं परमेष्ठिनः।।

इति श्रीप्रत्यभिज्ञानीत्या सर्वसङ्कोचोल्लङ्घितया स्फुरत्तैकस्वरूपत्वम्। स च गुरुः गृणाति प्रकाशयति विश्वव्यवहारमिति निरुक्त्या सर्वानुग्राहकः। तादृक्-प्रकाशकव्यतिरेके विश्वस्यान्धबधिरतादिप्रायतापत्तेः। स च पर्यन्ततः परमशिव-भट्टारकापरपर्यायः स्वात्मरूपो महान् प्रमाता। यदुक्तं श्रीशिवसूत्रेषु—'गुरुरुपायः' इति। तस्य चरणौ ज्ञानक्रियालक्षणं स्वातन्त्र्यं चर्यते गम्यते प्राप्यते बुध्यते भक्ष्यते चाभ्यां विश्वमिति हि चरणावित्युच्येते। यदुक्तं श्रीकुब्जिकामते—

भोग्यभोक्तृषु भावेषु मिषत्स्वनिमिषत्सु च।
देशकालदिगाख्येषु स्थूलसूक्ष्मपरेषु च।।

सत्तास्फुरणकव्याप्ता गतिभक्षणयोगतः ।
कर्मणा चरणाख्येयं न तु पादतया प्रिये! ।। इति।

तृतीयस्तु चरणः साक्षाद् गुरुः स्वलक्षण एवेति द्विवचनेन व्याख्या। यदुक्तं तत्रैव—

सितो वामेऽरुणो दक्षे वराभयकरो गुरुः ।
प्रेताम्बुजगतोऽङ्कस्थरक्तशक्तिस्त्रिलोचनः ।।
पञ्चमुण्डधरः स्रग्वी हृदि ध्येयः स्मिताननः । इति।

'अयमेव सकलनिष्कलात्मा सर्वविधूननावस्थायां निर्वाणरूपस्तुरीयः पादः' इत्युपनिषत्। लौकिको व्यवहारस्तु सकलेन निष्कलेन च द्वाभ्यामेव चरणाभ्यामुपकल्प्यते। यदाहुः—

शुक्लोऽङ्घ्रिः शुक्लमाविष्टो रक्तं रक्तोऽङ्घ्रिराश्रितः ।
पित्रोरङ्घ्रिद्वयेनेदममुना जायतेऽखिलम् ।। इति।

तौ च नित्यशुद्धौ उन्मेषनिमेषविभागव्युदासेन पदार्थान्तरप्रतिबिम्बनक्षमौ। एतदेव हि परमेश्वरस्य तत् पारमैश्वर्यम्, यदन्तर्बहिश्च ज्ञानक्रियाप्रतिबिम्बनानुप्राणिताशेषविश्वविलासत्वम्। तच्च स्वातन्त्र्यस्पन्दस्फुरत्तोद्यमादिशब्दैरागमेषूद्घोष्यते। नित्यशुद्ध्या च तयोर्वक्ष्यमाणविमर्शानुप्राणितत्वं प्रत्याय्यते। यदुक्तं श्रीप्रत्यभिज्ञायाम्—

विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः ।। इति।

तौ नत्वा उत्कर्षकक्ष्यारूढतया विमृश्य। वाङ्मनःकायानां तदेकविषयीकारलक्षणः प्रह्वीभावो हि नमनम्। महाप्रकाशत्वं च परमेश्वरस्य महानुत्कर्षः। तं प्रति तदुपासकस्य प्रह्वीभावश्चेति द्वितयमपि कण्ठेनोक्तम्। यजननमस्काराद्युपन्यासमात्रे तु एकतरस्याभिधेयत्वमन्यतरस्यार्थाक्षिप्तता चेति प्रतिपत्तॄन् प्रत्युभयप्रतिपत्तिसौकर्यं न सम्भवति। अयं च महान् मङ्गलाचारो यत् परमेश्वरोत्कर्षानुस्मरणम्, यस्य च तन्त्रारम्भं प्रत्यवश्यकर्तव्यत्वम्। यदुक्तं श्रीमत्स्तोत्रावल्याम्—

सर्वाशङ्काशनिं सर्वालक्ष्मीकालानलं तथा ।
सर्वामङ्गल्यकल्पान्तं मार्गं माहेश्वरं नुमः ।। इति,
व्यापाराः सिद्धिदाः सर्वे ये त्वत्पूजापुरस्सराः । इति च।

एतेन 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते। वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च' इति महाभाष्यमर्यादया द्वित्रप्रदेशावच्छिन्नमङ्गलानामपि शास्त्राणामूरीकार्यत्वम्। किमुत प्रतिगाथानुभूयमानपरमेश्वरैश्वर्यो-

त्सवतया घनसारशकलपरिमलवत् सर्वत्रैव मङ्गल्योल्लासमुदग्रमुन्मीलयतोऽस्य महातन्त्रस्येत्यासूत्र्यते। एतच्च व्याख्यातृश्रोतृशिक्षामात्रतात्पर्यात् तन्त्रोपोद्घाते साक्षादुपनिबद्धम्, अन्यथा परमेश्वरप्रणामस्य क्रियामात्रादपि प्रत्यूहव्यपोहसिद्धेः। उक्तरूपं च परमेश्वरैश्वर्योत्कर्षानुसन्धानमनुसन्धातुस्तादात्म्यमेवोपस्थापयति। यथोक्तं श्रीशिवदृष्टौ—

> अस्मद्रूपसमाविष्टस्वात्मनात्मनिवारणे ।
> शिवः करोतु निजया नमः शक्त्या ततात्मने ।। इति।

अत एव हि नत्वेति परमेश्वरप्रणामक्रियोत्तरकालं महेश्वरानन्द इत्युक्तम्। महेश्वरानन्दो हि नाम श्रीमत्सदाशिवपर्यन्ताशेषशुद्धाशुद्धाधिकारानुप्रविष्टप्रमातृ-परम्पराप्रभावसर्वस्वाभिभावी नित्यानवच्छिन्नप्रकाशानन्दपरमार्थस्वातन्त्र्यलक्षणः परमशिवभट्टारक एव। तद्भावापन्नोऽयं तन्त्रकृदिति यावत्। तद्भावापत्तिश्च तस्य देशिककटाक्षपातशक्तिपातसौभाग्यस्य समयानुप्रवेशमङ्गमहाभिषेकसम्पत्संस्कारो-पारोहप्रक्षालितमलोपलेपत्वात्, औत्तराम्नायाद्यशेषशास्त्रार्थावबोधशिक्षाशालि-त्वात्, स्वस्य च परमेश्वरैश्वर्योत्कर्षविमर्शानुस्यूत्युपक्षीणान्तःकरणत्वाच्चेत्य-वगन्तव्यम्। यदुक्तं श्रीनिशाटने—'त्रिप्रत्ययमिदं ज्ञानम्' इति। तच्चोक्तं श्री-किरणायाम्—'गुरुतः शास्त्रतः स्वतः' इति। ततश्च 'योऽविपस्थो ज्ञाहेतुश्च', 'दानमात्मज्ञानम्' इति श्रीशिवसूत्रस्थित्या स्वयमपरोक्षितात्मीयपारमैश्वर्योल्लासस्य परानुजिघृक्षावेशवैवश्येन तन्त्रकृतस्तन्त्रोन्मीलनं प्रत्यौचित्यमासूत्र्यते। अन्यथा बाह्यशास्त्रप्रणेतृवद् विप्रलम्भकतामात्रमेव पर्यवस्येत्। यदुक्तं श्रीहंसभेदे—

> सेव्यन्ते गुरवोऽनेके ज्ञानविज्ञानभासुराः ।
> दुर्लभोऽयं गुरुर्देवि योऽहङ्कारक्षयङ्करः ।।
> तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
> येनाहङ्कारनिर्मुक्तः केवलो विदितः स्वयम् ।। इति।

बाह्यशास्त्राणां तु—

> अन्यथा देवपाण्डित्यं शास्त्रपाण्डित्यमन्यथा ।
> अन्यथा तत्पदं शान्तं लोकाः पश्यन्ति चान्यथा ।।

इति स्थित्या साक्षात् स्वात्मपरामर्शोपायत्वं न सम्भवति। यथा श्रीतन्त्रा-लोके—

> येऽप्यसाक्षादुपायेन तद्रूपं प्रविविन्दते ।
> नूनं ते सूर्यसंवित्त्यै खद्योतादीच्छवो जडाः ।। इति।

यथा च श्रीकुलकमले—

शाक्तेन तेजसा शून्यं ये मार्गं पर्युपासते ।
ते वह्निरहिते कुण्डे स्थाल्या होमं प्रकुर्वते ।। इति।

तत्र च तारतम्यं किञ्चिदालोचनीयम्। यदुक्तम्—

नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम् ।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम् ।। इति।

स च महेश्वरानन्दो महार्थमञ्जरीं ग्रथ्नाति। विश्वतदुत्तरोभयस्पन्दतया पूर्णाहम्भावस्वभावस्यार्थस्य अर्थ्यते इति व्युत्पत्त्या सर्वप्रार्थ्यस्य वस्तुनः शिवशक्त्यादिभेदप्रथाप्ररोहेऽपि पारमार्थिकाद्वैतप्रथासतत्त्वां स्फुरत्तामुपदर्शयति। ग्रन्थसन्दर्भद्वारा लोकमनुभावयतीत्यर्थः। मञ्जर्यपि हि पृथक् पुष्पभेदप्रतिभासेऽप्येकाकाराऽनुभूयते। ग्रथनं च पुष्पादेरुपेयस्यानायासग्रहणोपायतया प्रसिद्धम्। सा च सुरभिः, सर्वाभिलषणीयप्रकाशरूपसौरभास्पदत्वात्। अनेन च विश्वस्य भोग्यतयाऽवस्थापनाद् वक्ष्यमाणस्य विमर्शोपायस्यौचित्यमुन्मील्यते। यतो निर्भयभोग्यमित्येतत्तन्त्रमाम्नायते। यदुक्तं श्रीसिद्धामते—

अर्थषट्कं च दीक्षा च शिवशास्त्रमिति स्मृतम् ।
दीक्षाध्वा निर्भयो भोगशास्त्रे भैरवसंज्ञके ।। इति।

इमामिति। प्राकट्योत्कर्षादनपह्नवनीयामतिसुलभास्वादामनुन्मीलितपूर्वां चेत्यर्थः। यदुक्तं श्रीप्रत्यभिज्ञायाम्—

इति प्रकटितो मया सुघट एव मार्गो नवो ।
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा ।। इति।

अत्र च योऽयं महार्थमञ्जरीपर्यायो विश्ववैचित्र्यविलासः, स एव च वक्ष्यमाणस्य प्रत्यभिज्ञापरपर्यायस्य विमर्शस्योपायतया तन्त्रप्रतिपाद्योऽर्थः। यतः शब्दस्पर्शाद्यनुभवस्तदनुभवितृद्वारा महाप्रकाशपर्याये क्वचिन्महानुभवितरि पर्यवयति। तत्परिज्ञानं च प्रयोजनम्। तत्प्रयोजनं च विमर्शस्वरूपसिद्धिः। तस्या अपि प्रयोजनं भोगापवर्गलक्षणः स्वस्य माहेश्वर्योल्लासः। उपरि च प्रयोजनान्तरापेक्षा, तस्यैव प्राप्यतयाभिलष्यमाणत्वादनवस्थाप्रसङ्गाच्च। यच्छ्रुतिः—'आत्मलाभान्न परं विद्यते' इति। सम्बन्धश्च तन्त्रस्य प्रतिपाद्यस्य चाभिधानाभिधेयभावः। प्रतिपाद्यस्य चिद्विमर्शस्य चोपायोपेयभावः, तयोरन्योन्यं कार्यकारणभूतत्वात्। तन्त्रस्य प्रतिपत्तॄणां च सम्बन्धो गुरुपर्वक्रमात्मा व्यक्तमुपलभ्यते, नत्वा नित्यशुद्धौ गुरोश्चरणावित्युपक्रान्तत्वात्, 'देसिअकडक्खपादे' इत्युपसंहारिष्यमाणत्वाच्च। तत्त्वदृष्ट्या तु स्वात्मरूप एव सर्वोऽयं सम्बन्धः। यथा श्रीस्वच्छन्दे—

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
पूर्वोत्तरपदैर्वाक्यैसतन्त्रं समवतारयत् ।। इति।

यथा चोक्तमाचार्याभिनवगुप्तनाथपादैः—

सदाभिनवगुप्तं यत् पुराणं च प्रसिद्धिमत् ।
हृदयं तत् परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम् ।। इति।

स्वयमवगतार्थतत्त्वस्य च तन्त्रकृतः कारुण्योत्कर्षप्रवृत्तेन सर्वजनसामरस्य-लक्षणेन ताटस्थ्येन ग्रथ्नामीत्यविच्छिन्नाहम्भावस्वभावोत्तमपुरुषव्यपोहाद् ग्रथ्नातीति तन्त्रोपपादने संरम्भोद्भावने विनेयवर्गस्य तन्त्रप्रवृत्त्यौन्मुख्यं विधीयमानत्वेनार्थतः सिद्धम्। एतेन तन्त्रकृतः प्रसिद्धप्रभावस्य सम्भावनाप्रत्य-योत्पादनेन प्रतिपत्तृजनप्रवृत्त्यर्थं नामोपादानमित्यप्यासूत्र्यते। प्रतिपत्तॄणां चोक्तमर्थं प्रत्यधिकारितायां न कश्चिन्नियमः। यदुक्तं श्रीस्पन्दे—

लब्ध्वाऽप्यलभ्यमेतज्ज्ञानधनं हृद्गुहान्तकृतनिहितेः ।
वसुगुप्तवच्छिवाय हि भवति सदा सर्वलोकस्य ।। इति।

किञ्च, नत्वा गुरोश्चरणावित्यनेन श्रीचरणविद्यासङ्केतोऽप्यत्र किञ्चिदुन्मुद्र्यते। सोऽपि पर्यालोच्यमानः—

विद्येति मातृकापीठं तत् पार्थिवमुदाहृतम् ।
मण्डलं कुण्डलीपीठं तदाप्यं परिकीर्तितम् ।।
मन्त्रसंज्ञं क्रियापीठं तैजसं तत् प्रकीर्तितम् ।
ज्ञानपीठं तु मुद्राख्यं तद् वायव्यं सुरेश्वरि ।।
परेच्छामुखतो व्योम पीठत्वेनेह नादृतम् ।
तन्मूलस्योपचारस्य बाह्यस्याभावतः प्रिये ।।
चेष्टात्मको भवेद् वायुस्ततः स्यान्नतिरध्वरे ।
दीपः स्यात् तैजसस्तोयं चरुरिष्टो रसात्मकः ।।
पृथिव्या गन्धवत् पुष्पमुपचाराय पादयोः ।।

इति श्रीचरणसूत्रनीत्या श्रीपञ्चवाहक्रममेवानुप्रवेक्ष्यति, सर्वेषामपि श्रीरसान्व-यानामत्रैव तात्पर्यात्। तद्व्याख्यानवैदग्ध्यप्रकाशनं तु नात्यन्तमुपयुज्यते। नत्वेति च नतेः कण्ठोक्त्या मन्त्रमण्डलादेरपि वायुशक्तिसतत्त्वायाः स्वपरिस्पन्दनानु-प्राणनाया मुद्रायास्तन्त्रान्तरारम्भरूपोद्योगानुगुण्यात् प्राधान्यं प्रत्याय्यत इत्यल-मुपक्रम एव प्रसक्तानुप्रसक्तिकप्राचुर्येण। उपरि प्रपञ्चयिष्यमाणाशेषतन्त्रार्थसूक्ष्म-शरीरप्रायेयं गाथा। अत एवातिप्रपञ्च्यमानेयमतिप्रसङ्गाय भविष्यनीति संक्षिप्यैव व्याख्याता। उक्तार्थप्रपञ्चोपपादनं च तत्र तत्राग्रत उद्भावयिष्यते।।१।।

॥ भारती ॥

महाप्रकाश = प्रकाशात्मा परमशिवरूप विश्वगुरु, आत्मस्वरूप महागुरु। चरणौ = चरणद्वय। सुरभि = परिमल, सौरभ। ग्रथ्नाति = ग्रन्थ-प्रणयन करता है।

महेश्वरानन्द कहते हैं कि सभी लोगों का कोई न कोई उपास्य देवता है, इस विषय में तो कोई विप्रतिपत्ति है नहीं। यदि है तो उसके नाम-रूपादि व्यपदेश के विषय में है। इस दिशा में मैं मानता हूँ कि 'स्वात्मसंवित्सफुरत्तामात्रस्वरूप प्रकाश' ही विश्व के उपास्य देवता हैं—'स्वात्मसंवित्स्फुरत्तामात्रस्वरूपेति प्रकाश एव विश्वोपास्या देवत्यापतितम्।'[१]

प्रत्यभिज्ञाकारिकाकार की दृष्टि—उत्पलदेवाचार्य उस स्फुरत्तैकस्वरूप परा सत्तारूप देवता का उल्लेख इन शब्दों में करते हैं—

सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया चोक्ता हृदयं परमेष्ठिनः।।

यह 'स्फुरत्ता' समस्त सङ्कोचों को अतिक्रान्त करके स्थित है। वही 'गुरु' भी है—'स च गुरुः'।[२]

गुरु कौन है? 'गृणाति प्रकाशयति विश्वव्यवहारमिति निरुक्त्या सर्वानुग्राहकः'।[३]

नत्वा नित्यशुद्धौ गुरोश्चरणौ महाप्रकाशस्य।

गुरुतत्त्व की महिमा—(क) शिवसूत्रों में 'गुरुरुपायः' कहकर; (ख) 'शिवसूत्रविमर्शिनी' में 'गृणाति उपदिशति तात्त्विकमर्थमिति गुरुः सोऽत्र व्याप्तिप्रदर्शकत्वेन उपायः' कहकर; (ग) मालिनीविजयकार ने श्रीमालिनीविजय में 'स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः' कहकर; (घ) 'स्पन्दप्रदीपिका' में—

अगाधिसंशयाम्भोधिसमुत्तरतारिणीम् ।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम्।।

कहकर; (ङ) श्रीमन्त्रिशिरोभैरव में—'गुरोर्गुरुतरा शक्तिर्गुरुवक्त्रगता भवेत्' तथा (च) मालिनीविजय में 'शक्तिचक्रं तदेवोक्तं गुरुवक्त्रं तदुच्यते' कहकर ग्रन्थकारों ने गुरुतत्त्व का सर्वातिशायी महत्त्व प्रतिपादित किया है।

गुरु की कृपा से ही 'मातृकाचक्रसम्बोधः' (शिवसूत्र-२-७) की स्थिति प्राप्त होती है; इसलिये भावनोपनिषद् में गुरु को 'परमकारणभूता शक्ति' कहा गया है—'श्रीगुरुः परमकारणभूता शक्तिः' (भावनो.-१) और इसे ग्रन्थ के प्रथम सूत्र के रूप में उपन्यस्त किया गया है।

ऐसे ही गुरु के दोनों चरणों में—'नत्वा नित्यशुद्धौ गुरोश्चरणौ महाप्रकाशस्य' (म. मञ्जरी-१) प्रणाम करके ग्रन्थकार ग्रन्थारम्भ करता है।

१-३. परिमल

चरणौ = दोनों चरणों में। दोनों चरण क्या हैं? क्या ये मांसपिण्ड हैं? नहीं। दोनों चरण ज्ञान और क्रिया हैं।[१]

तत्त्वतः चरण हैं क्या? 'चरण' की व्याख्या इस प्रकार है—चरणौ ज्ञानक्रिया-लक्षणं स्वातन्त्र्यं चर्यते, गम्यते, प्राप्यते, बुध्यते, भक्ष्यते चाभ्यां विश्वमिति हि चरणा-वित्युच्येते।[२] अर्थात् ज्ञान एवं क्रिया के स्वरूप वाली 'स्वातन्त्र्य शक्ति' जिसके द्वारा प्राप्त की जाती है—आस्वादित की जाती है—तात्त्विक स्वरूप में जानी जाती है—अनुभूति एवं आचरण का विषय बनती है और 'विश्वोऽहम्' की अनुभूति कराती है, वही है—गुरोश्चरणौ।

कुब्जिकामतकार की दृष्टि—इस ग्रन्थ में (कुब्जिकामत में) कहा गया है—

भोग्यभोक्तृषु भावेषु मिषत्स्वनिमिषत्सु च।
देशकालदिगाख्येषु स्थूलसूक्ष्मपरेषु च॥
सत्तास्फुरणकव्याप्ता गतिभक्षणयोगतः।
कर्मणा चरणाख्येयं न तु पादतया प्रिये॥[३]

'चरणौ' कहकर द्विवचनान्त शब्द का व्यवहार क्यों किया गया? महेश्वरानन्द कहते हैं कि तृतीय चरण तो साक्षात् गुरु ही है—'तृतीयचरणः साक्षात् गुरुः स्वलक्षण एवेति द्विवचनेन व्याख्या।'[४] कहा भी गया है—

सितो वामेऽरुणो दक्षे वराभवकरो गुरुः।
प्रेताम्बुजगतोऽङ्कस्थरक्तशक्तिस्त्रिलोचनः।
पञ्चमुण्डधरः स्रग्वी हृदि ध्येयः स्मिताननः॥

औपनिषदिक दृष्टि—उपनिषद् में कहा गया है कि 'निर्वाणरूपस्तुरीयः पादः; अयमेव सकलनिष्कलात्मा सर्वविधूननावस्थायां निर्वाणरूपस्तुरीयः पादः।'

लौकिक व्यवहार तो सकल एवं निष्कल—दो चरणों से ही उपकल्पित होते हैं। कहा भी गया है—

शुक्लोऽङ्घ्रिः शुक्लमाविष्टो रक्तं रक्तोऽङ्घ्रिराश्रितः।
पित्रोरङ्घ्रिद्वयेनेदममुना जायतेऽखिलम्॥

नित्यशुद्धौ = त्रिकालात्मक शुद्धि से युक्त, सतत निर्मल, निष्कलुष, मलादिशून्य होने से स्वच्छ एवं पवित्र।

नित्यशुद्धौ = उन्मेष-निमेष के विभाग से व्युदास एवं पदार्थान्तर प्रतिबिम्बनक्षम। यही है परमेश्वर का पारमैश्वर्य—'एतदेव हि परमेश्वरस्य तत्पारमैश्वर्यम्'।[५] यह ऐश्वर्य है क्या? यह है—

१-५. स्वोपज्ञ परिमल

'यदन्तर्बहिश्च ज्ञानक्रियाप्रतिबिम्बनानुप्राणिताशेषविश्वविलासत्वम्'।[१] इसे ही स्वातन्त्र्य, स्पन्द, स्फुरत्ता एवं उद्यम आदि शब्दों द्वारा आगमों में उद्घोषित किया गया है।

नित्यशुद्ध्या = वक्ष्यमाण विमर्शानुप्राणितत्त्व द्वारा प्राप्त निर्मलता के द्वारा। ऐसा क्यों? क्योंकि—विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः।

नत्वा = नमन करके, प्रणिपात करके, उत्कर्ष कक्षा में आरूढ़ होते हुये विमर्शन करके। 'नमन' है क्या? वाणी, मन एवं शरीरों का एकविषयीकारलक्षण वाला प्रह्वीभाव।

'महाप्रकाशत्व' क्या है? परमेश्वर का महानुत्कर्ष ही महाप्रकाशत्व है—महाप्रकाशत्वं च परमेश्वरस्य महानुत्कर्षः। परमोत्कर्ष के अनुस्मरण, यजन एवं नमस्कार आदि के उपन्यास से मंगलाचरण भी सूचित है—अयं च महान् मङ्गलाचारो यत् परमेश्वरोकर्षानुस्मरणम्।[२]

स्तोत्रावलीकार की दृष्टि—

सर्वाशङ्काशनिं सर्वालक्ष्मीकालानलं तथा।
सर्वा मांगल्यकल्पान्तं मार्गं माहेश्वरं नुमः।
व्यापाराः सिद्धिदाः सर्वे ये त्वत्पूजापुरस्सराः।।

महाभाष्यकार ने भी मङ्गलाचरण की महत्ता स्वीकार करते हुये कहा है कि 'मङ्गलादीनि, मङ्गलमध्यानि, मङ्गलान्तानि च शास्त्राणि प्रथन्ते। वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च'।

योगिनियों के द्वारा उपदिष्ट प्रत्येक गाथा में पारमैश्वर्योत्सव कपूर के परिमल की भाँति सर्वत्र अनुभूयमान होती है और इसी परिमल को ग्रन्थ का स्वरूप प्रदान कर दिया गया है। यह परमेश्वर के ऐश्वर्य के उत्कर्ष के अनुसन्धायक द्वारा शिवतादात्म्य की उपस्थापना का प्रयास है—परमेश्वरैश्वर्योत्कर्षानुसन्धानमनुसन्धातुस्तादात्म्यमेवोपस्थापयति।[३]

शिवदृष्टिकार सोमानन्द की दृष्टि—

अस्मद्रूपसमाविष्टस्वात्मनात्मनिवारणे ।
शिवः करोतु निजया नमः शक्त्या ततात्मने।।

कहकर सोमानन्द ने भी शिव को नमन किया है और शिव को 'अस्मद्रूपसमाविष्ट स्वात्मा' कहा है।

महेश्वरानन्दः = परमशिवभट्टारक। 'महेश्वरानन्दो' हि नाम श्रीमत्सदाशिवपर्यन्ताशेषशुद्धाशुद्धाधिकारानुप्रविष्टप्रमातृपरम्पराप्रभावसर्वस्वाभिभावी नित्यानवच्छिन्नप्रकाशानन्दपरमार्थस्वातन्त्र्यलक्षणः परमशिवभट्टारक एव।[४]

१-४. स्वोपज्ञ परिमल

देशिक की विशेषताएँ हैं; यथा—

१. उनके कटाक्षपात से शक्तिपात होता है।

२. उनके शक्तिपात, महाभिषेक से मलों का ध्वंस होता है।

३. औत्तराम्नाय आदि शास्त्रों का अशेष अर्थाववोध प्राप्त होता है।

४. परमेश्वर के ऐश्वर्योत्कर्षविमर्श की प्राप्ति होती है।[१]

श्रीनिशाटन में कहा गया है कि ज्ञान त्रिप्रत्ययात्मक होता है—त्रिप्रत्ययमिदं ज्ञानम्। श्रीकिरणशास्त्र में कहा गया है कि गुरु से, शास्त्र से या स्वतः ज्ञान का आविर्भाव होता है—गुरुतः शास्त्रतः स्वतः। योऽविपस्थो ज्ञानहेतुश्च (शिवसूत्र) एवं दानमात्मज्ञानम् (शिवसूत्र) के द्वारा सिद्ध किया गया है कि ज्ञान का स्वरूप क्या है तथा यह भी कहा गया है कि पारमैश्वर्योल्लास का कारण परानुजिघृक्षामात्र है—पारमैश्वर्योल्लासस्य परानुजिघृक्षावेशवैवश्येन।[२]

श्रीहंसभेदकार की दृष्टि—इसी प्रसंग में श्रीहंसभेद में कहा गया है कि—

सेव्यन्ते गुरवोऽनेके ज्ञानविज्ञानभासुराः।
दुर्लभोऽयं गुरुर्देवि! योऽहङ्कारक्षयङ्करः।।
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम्।
येनाहङ्कारनिर्मुक्तः केवलो विदितः स्वयम्।।

जहाँ तक बाह्य शास्त्रों की बात है, उसके विषय में कहा गया है कि—

अन्यथा देवपाण्डित्यं शास्त्रपाण्डित्यमन्यथा।
अन्यथा तत्पदं शान्तं लोकाः पश्यन्ति चान्यथा।।

इस कारण बाह्य प्रयत्न के द्वारा स्वात्मपरामर्शरूप उपाय प्राप्त होना सम्भव नहीं होता—साक्षात् स्वात्मपरामर्शोपायत्वं न सम्भवति।[३]

तन्त्रालोककार की दृष्टि—तन्त्रालोक में कहा गया है कि—

येऽप्यसाक्षादुपायेन तद्रूपं प्रविविन्दते।
नूनं ते सूर्यसंवित्त्यै खद्योतादीच्छवो जडाः।।

तन्त्रालोककार तो कहते हैं कि साक्षात् उपाय के सामने (स्वात्मपरामर्शात्मक अनुपाय या शिवोपाय के सामने) आणवादि उपाय सूर्य के सामने रहते हुये भी जुगुनू से प्रकाश की याचना करने के समतुल्य हैं।

कुलकमलकार की दृष्टि—श्रीकुलकमल में कहा गया है कि जो लोग शाक्त तेज से शून्य मार्ग की उपासना करते हैं, वे वह्निरहित कुण्ड में आहुति डालते हैं—

१. स्वोपज्ञ परिमल २. स्वोपज्ञ परिमल ३. परिमल

शात्तेन तेजसा शून्यं ये मार्गं पर्युपासते।
ते वह्निरहिते कुण्डे स्थाल्या होमं प्रकुर्वते।।

यहाँ तारतम्य आलोचनीय है। कहा भी गया है—

नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम् ।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम्।।

इसी तारतम्य में महेश्वरानन्द ने महार्थमञ्जरी की रचना की है।[१]

विश्व एवं विश्वातीत दोनों के स्पन्द के कारण पूर्णाहंभावस्वभाव के अर्थ का जो रहस्य है, उसका यहाँ उद्घाटन किया गया है और शिव-शक्ति आदि में भेद-प्रथा के अङ्कुरित होने पर भी पारमार्थिक अद्वैत प्रथा एवं स्फुरत्ता का यहाँ प्रतिपादन किया गया है।[२]

मञ्जरी = पुष्पों की अनेकता के होने पर भी मञ्जरी में एकता है। यही 'मञ्जरी' शब्द के प्रयोग का अभिप्राय है।[३]

ग्रथ्नाति—ग्रथित करता है। यहाँ 'ग्रथन' शब्द पुष्पादिक उपेय का अनायास ग्रहण कर लेने के भाव को संकेतित करता है।[४]

सुरभिः = सुगन्ध। इसे 'सुरभि' या परिमल इसलिये कहा गया; क्योंकि जिस प्रकार प्रत्येक व्यक्ति सुगन्ध पाना चाहता है और इस प्रकार सुगन्धि सर्वाभिलषणीय है, उसी प्रकार यह ग्रन्थ सर्वाभिलषणीय होने के कारण सौरभास्पद है।[५]

इसके द्वारा विश्व का भोग्यात्मक अवस्थापन दिखाकर भी विमर्शोपाय के औचित्य को उन्मीलित किया गया है।[६] यहाँ निर्भय भोग की भी पुष्टि की गई है। 'सिद्धामत' में भी इसकी पुष्टि की गई है।

श्रीसिद्धामतकार की दृष्टि—श्रीसिद्धामत में कहा गया है कि—

अर्थषट्कं च दीक्षां च शिवशास्त्रमिति स्मृतम्।
दीक्षाध्वा निर्भयो भोगशास्त्रे भैरवसंज्ञके।।

यहाँ अपह्नवनीय विमर्शोत्कर्ष परमास्वाद उन्मीलित किया गया है।[७]

प्रत्यभिज्ञाकार की दृष्टि—प्रत्यभिज्ञाकारिका में उत्पलदेवाचार्य कहते हैं कि—

इति प्रकटितो मया सुघट एव मार्गो नवो।
महागुरुभिरुच्यतेस्म शिवदृष्टिशास्त्रे यथा।।

भाव यह कि सोमानन्दाचार्य ने 'शिवदृष्टि' नामक ग्रन्थ में जिस नव्य मार्ग को प्रकट किया है, उसी की 'प्रत्यभिज्ञाकारिका' में व्याख्या की गई है।

यहाँ 'महार्थमञ्जरी' नामक जो विश्ववैचित्र्य विलास है, वही वक्ष्यमाण 'प्रत्यभिज्ञा'

१-७. स्वोपज्ञ परिमल

का अपर पर्याय 'विमर्श' उपाय के रूप में तथा तन्त्र के प्रतिपाद्यार्थ के रूप में अङ्गीकृत है। यहाँ शब्द-स्पर्श-रूप-रस-गन्ध नामक पञ्चमहाविषयों का अनुभव महाप्रकाश के पर्यायस्वरूप किन्हीं महान् अनुभवकर्ताओं में पर्यवसित हुआ है अर्थात् पञ्च विषयों का जो अनुभव सामान्य गण स्थूल धरातल पर करते हैं, उन्हें महान् योगी सूक्ष्मतम धरातल पर करके उनकी प्रतीकात्मक अनुभूति करते हैं[१]। यही परिज्ञान हमारा प्रयोजन है।

प्रयोजन—यह प्रयोजन क्या है? यह प्रयोजन विमर्शस्वरूप की सिद्धि है—तत्परिज्ञानं च प्रयोजनम्। तत्प्रयोजनं च विमर्शस्वरूपसिद्धिः। इस प्रयोजन का भी कोई प्रयोजन है और वह है—अपने भोगापवर्गलक्षणात्मक माहेश्वर्य का उल्लास—

१. तत् प्रयोजनं च विमर्शस्वरूपसिद्धिः।

२. तस्या अपि प्रयोजनं भोगापवर्गलक्षणः स्वस्य माहेश्वर्योल्लासः।

सम्बन्ध—प्रत्येक ग्रन्थ का परापर सम्बन्ध भी रहता है। अनुबन्धचतुष्टय में सम्बन्ध भी एक तत्त्व है। यहाँ सम्बन्ध क्या है?

श्रुतियों में कहा गया है कि आत्मलाभ से बढ़कर कोई लाभ नहीं है—'आत्म-लाभान्न परं विद्यते'। सम्बन्ध क्या है? ग्रन्थ के प्रतिपाद्य का अभिधान-अभिधेयवाद ही सम्बन्ध है।

(क) अभिधान-अभिधेयवाद—सम्बन्धश्च प्रतिपाद्यस्य चाभिधानाभिधेयभावः।

(ख) उपायोपेयभाव क्या है? 'प्रतिपाद्यस्य चिद्विमर्शस्य चोपायोपेयभावः तयोरन्योन्यं कार्यकारणभूतत्वात्।

(ग) तन्त्रस्य प्रतिपत्तॄणां च सम्बन्धो गुरुपर्वक्रमात्मा[२]।

(घ) तात्त्विक सम्बन्ध—तात्त्विक दृष्टि से तो सारे सम्बन्ध स्वात्मरूपमात्र हैं—तत्त्वदृष्ट्या तु स्वात्मरूप एव सर्वोऽयं सम्बन्धः।

स्वच्छन्दशास्त्रकार की दृष्टि—

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत्॥

आचार्य अभिनवगुप्त की दृष्टि—आचार्य अभिनवगुप्त कहते हैं—

सदाभिनवगुप्तं यत् पुराणं च प्रसिद्धिमत्।
हृदयं तत् परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम्॥

परिमलकार का कथन है कि तन्त्रतत्त्वज्ञों ने जो ग्रन्थरचना की है, उसका उद्देश्य आत्म-विज्ञापन नहीं; प्रत्युत कारुण्योत्कर्ष है। इन ग्रन्थों की रचना सामरस्यलक्षणात्मक ताटस्थ्य एवं सर्वजनहिताकांक्षा से मण्डित है। परिमलकार कहते हैं कि महार्थमञ्जरी

१-२. परिमल

में 'ग्रथ्नाति' शब्द का व्यवहार क्यों किया गया?[१] इसमें 'ग्रथ्नामि' शब्द का व्यवहार क्यों नहीं किया गया? इसके पीछे भी रहस्य है। विश्व के प्रति कारुण्यभाव एवं विश्व-हिताकांक्षा ही आर्ष-साहित्य की मूल प्रेरणा है।[२]

स्पन्दकारिकाकार की दृष्टि—'स्पन्दकारिका' में कहा गया है—

लब्ध्वाऽप्यलभ्यमेतज्ज्ञानघनं हृद्गुहान्तकृतनिहिते।
वसुगुप्तवच्छिवाय हि भवति सदा सर्वलोकस्य।।

'नत्वा गुरोश्चरणौ' पद का प्रयोग करके ग्रन्थकार ने श्रीचरणविद्यासंकेत को भी उन्मुद्रित किया है। वह भी पर्यालोच्यमान है—

विद्येति मातृकापीठं तत् पार्थिवमुदाहृतम्।
मण्डलं कुण्डलीपीठं तदाप्यं परिकीर्तितम्।
मन्त्रसंज्ञं क्रियापीठं तैजसं तत् प्रकीर्तितम्।।
ज्ञानपीठं तु मुद्राख्यं तद् वायव्यं सुरेश्वरि।
परेच्छामुखतो व्योमपीठत्वेनेह नादृतम्।।
तन्मूलस्योपचारस्य बाह्यस्याभावतः प्रिये।
चेष्टात्मको भवेद् वायुस्ततः स्यान्नतिरध्वरे।।
दीपः स्यात् तैजसस्तोयं चरुरिष्टो रसात्मकः।
पृथिव्यं गन्धवत् पुष्पमुपचाराय पादयोः।। (श्रीचरणसूत्र)

महाप्रकाशात्मा परमशिव का स्वरूप

अथ तन्त्रप्रतिपाद्यमर्थतत्त्वं तत्परिज्ञानस्य प्रयोजनतयाऽन्वेष्यतां चाभिदधानस्तन्त्रकृत् तत्रैवावृत्त्या तत्प्रयोजनमात्मविमर्शस्वरूपमप्युपेयतयोपपादयति—

वड्ढउ महप्पआसो विमरिसविच्छुरिअणिच्चलुज्जोओ।
सण्णाविसेसणिण्ण अमत्तपअत्ताइ जत्थ सत्ताई ।।२।।

(वर्धतां महाप्रकाशो विमर्शविच्छुरितनिश्छलोद्योतः।
संज्ञाविशेषनिर्णयमात्रप्रवृत्तानि यत्र शास्त्राणि।।)

जिस परम तत्त्व के विषय में (यत्र) समस्त शास्त्र उसकी ओर मात्र विशिष्ट संकेत (संज्ञा) करने में ही (समर्थ) एवं प्रवृत्त हैं (उस) विमर्श शक्ति से विच्छुरित (द्योतित) एवं निर्मल ज्योतिःस्वरूप महाप्रकाश (परमशिवरूप जगद्गुरु) की महावृद्धि हो (जय हो)।।२।।

अत्र योऽयं महाप्रकाशस्तत्तत्प्रमातृप्रकाशावेशाधीनप्रकाशमानतास्वभावमात्रपारिशेष्यात् स्वरूपनिष्कर्षे क्रियमाणे—

१-२. परिमल

तत्तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ।।
नहि ज्ञानादृते भावाः केनचिद् विषयीकृताः ।
ज्ञानं तदात्मतां यातमेतस्मादवसीयते ।।

इति श्रीदेविकाक्रमस्थित्या प्रकाशैकस्वभावः षट्त्रिंशत्तत्त्वसम्पिण्डनात्मा प्रत्येकतत्त्वपर्यालोचनेऽप्यनन्तप्रकारायमाणो विश्वविलासः, स वर्धताम् उपर्युपरि स्वस्फुरत्तामनुभवतु। अयमेव महानुपायो वक्ष्यमाणस्य विमर्शस्येति यावत्। ननु शून्यतामात्रस्वभावेन मिथ्यात्वमात्रानुप्राणितव्यवहरेण वा विश्ववैचित्र्येणोपायभूतेन परमार्थभूतस्वात्मरूपविमर्शलाभ इत्येतदनौचित्योत्कर्षकाष्ठाप्राप्तिरिति माध्यमिकानिर्वचनीयवादमर्यादामाशङ्क्याह—निश्छलोद्योत इति। स्फुटप्रकाशात्मनि प्रपञ्चोद्योते न कस्यचिद् मिथ्यात्वोपपादकादेश्छलस्यावकाश इत्यर्थः। अस्त्वेवम्, तथाप्यवघातस्वेदादिवदन्यथासिद्धसान्निध्येन लोकव्यवहारेण कथमात्मविमर्शोत्पत्तिरित्याशङ्क्याह—विमर्शविच्छुरितेति। न खलु स्वसत्तामात्रेण विश्वस्यात्मविमर्शं प्रत्युपायत्वम्, अपि तु तथा तथा विमृश्यमानावस्थायामेव। तत्र च विश्वरूपस्येव तन्मिथ्यात्वादेस्तद्विपर्ययस्य च विम्रष्टव्यत्वोद्भावनाय निश्छलोद्योत इत्यस्य विमर्शविच्छुरितेत्यनेन सहैकपद्यम्। ननु यदि हि विश्वव्यवहारस्य किञ्चिन्नैयत्यं तदुपपद्येतापि नाम तस्योपायत्वम्। तच्च न सम्भवति। अद्यापि सिद्धान्तिभिर्द्रव्यगुणादयः षडिति, प्रमाणप्रमेयादयः षोडशेति, रूपवेदनादयः पञ्चेति च पृथक् पृथग् विकल्प्यमानत्वादित्याशङ्क्याह—संज्ञाविशेषेत्यादि। यत्र विश्वविलासात्मन्यर्थे काणादीयाक्षपादीयप्रभृतीनि शास्त्राणि तत्तत्परिभाषानुगुण्येन संज्ञालक्षणा ये व्यपदेशविशेषास्तन्मात्रोपक्षीणव्यापाराणि, न पुनः प्रत्यक्षादिप्रमाणोपगृह्यमाणपृथिव्यादिपदार्थपरम्परापरिस्पन्दापलापप्रगल्भानीत्याद्यवाक्यार्थः। द्वितीये तु योऽयं महाप्रकाश उक्तलक्षणोऽनवच्छिन्नः प्रमाता, यद्विमर्शः पुरुषार्थतयाऽवस्थापयिष्यते, स वर्धताम्। मायीयमलोपलेपसंस्कारोच्छेदपर्यन्तमुल्लसतु। सा च वृद्धिर्न कैवल्येन। किं तर्हि? एवमहमलौकिकः कश्चित् प्रमातेति प्रत्यभिज्ञानात्मा यो विमर्शः, तेन यद् विच्छुरणं विशेषतोऽन्यप्रकाशवैलक्षण्येन लौकिकसम्बन्धस्वभावातिक्रान्त्या तादात्म्यपर्यवसायितयोपश्लेषः, तद्वत्तया निश्छलो निर्गलितोपाधिकलङ्क उद्योतः स्फुरत्ता यस्य तादृशतया वर्धतामित्यर्थः। दर्पणादिप्रकाशानां हि प्रतिबिम्बादिप्रकाशनक्षमत्वेऽपि प्रमातृप्रकाशसापेक्षत्वादस्त्युपाधिमत्त्वम्। प्रमातृप्रकाशस्य त्वनन्यमुखप्रेक्षित्वमेवेत्यर्थः। एतदुत्तरत्रापि भविष्यति। ननु विम्रष्टव्यस्यात्मस्वरूपस्य व्यपदेशनैयत्याभावात् तद्विमर्शं प्रत्यसद्भावपर्यवसायी कश्चिद् हृदयङ्गमीभावः स्यादित्याशङ्क्याह—संज्ञाविशेषेत्यादि। यत्र

परमप्रमातृविषये व्यवह्रियमाणानि सर्वाण्यपि शास्त्राणि शिनो विष्णुर्बुद्ध इत्यादिव्यपदेशमात्रव्यापृतानि, न पुनरर्थस्वभावात्यन्तभेदोपपादनप्रवीणानि भवन्ति। तथाहि—चार्वाकास्तावद् भूतान्येव चेतयन्त इति चैतन्यविशिष्टमेव शरीरमात्मानमाचक्षते। 'असदेवेदमग्र आसीत्' इत्यभावब्रह्मवादिनः शून्यताभिमानिनो माध्यमिकाश्चानाख्याकक्ष्यायामिव स्वात्ममात्रस्फुरत्तालक्षणमात्मतत्त्वमाहुः। साङ्ख्यादयस्तु विज्ञानाकलप्रायतामस्याङ्गीकुर्वते। शब्दब्रह्मवादिनश्च पश्यन्तीपदाभिमानिनः श्रीमत्सदाशिवतत्त्वभूतमेनं मन्यन्ते। मीमांसका अपि सुखाद्युपरागयोग्यमात्मानं मन्वानाः संवित्स्वभावतामस्य नापह्नुवते। नैयायिकादयो ज्ञानादिगुणगणास्पदमेनमिच्छन्ति। सौगताः पुनर्ज्ञानलक्षणसन्तानरूपमेनं सङ्गिरन्ते। एवमन्यत्राप्यूह्यमिति श्रौताश्रौतेषु सर्वेष्वपि सिद्धान्तेषु नात्यन्तमत्र विसंवादः। किन्तु स्पृष्टास्पृष्टिकयाऽवस्थानम्, तन्निबन्धनमात्रश्च वादिनामन्योन्यकलहकोलाहलक्लेशः। तदुक्तं मयैव श्रीपादुकोदये 'अतो विश्वात्मको नाथः' इत्यारभ्य

> लोकायतानां देहात्मा शून्यात्मा शून्यवादिनाम्।
> क्षणात्मा क्षणनिष्ठानां भिन्नात्मा भेददर्शिनाम्॥
> मीमांसिनामपूर्वात्मा ब्रह्मात्मा ब्रह्मवादिनाम्।
> अद्वैतिनामभेदात्मा बहुना वा किमुच्यते॥
> आक्रीडनं च बालानां स एव परमो गुरुः।
> स एव च महार्थात्मा महार्थिकमनीषिणाम्॥ इति।

तथा च श्रीप्रत्यभिज्ञाहृदये—'तद्भूमिकाः सर्वदर्शनस्थितयः' इति। अत एव हि—

> स हि भैरवसिद्धान्तपूर्वपक्षोऽपि यन्मयः।

इति पर्यन्तपञ्चाशिकायामुक्तम्। एवं च वस्तुवृत्त्या सिद्धान्तिभिः सर्वैरपि परमेश्वरस्य विश्वात्मकत्वस्वभावमैश्वर्यमेवोद्घोष्यते। यन्मयैवोक्तं श्रीसंविदुल्लासे-

> अन्योन्यमप्रतीकारा बाध्यबाधकभावतः।
> वदिन्त तव वैश्वात्म्यं वादिविप्रतिपत्तये॥ इति।

एतदुक्तं भवति—बहुविधसिद्धान्तविकल्प्यमानान्योन्यबाध्यबाधकभावेऽपि विश्वावभासे स्तम्भकुम्भादयो भावा आपामरपण्डितं प्रत्यक्षमेवानुभूयन्त इत्यत्र न काचिद् विप्रतिपत्तिः। अनुभूयमानत्वं च तेषामनुभवनक्रियाविष्टत्वम्। सा च क्रिया सामान्यानतिलङ्घिस्वभावतया पादपच्छेदादिरिव परश्वधादिना केनचित् करणविशेषेण विना न सङ्गच्छत इत्येतत् तावदङ्गीकार्यम्। ततश्च ग्राह्यग्रहणवेलायां चक्षुराद्यवश्यम्भावः। तदुक्तं मयैव संविदुल्लासे—

अविनाशिनि मङ्गलप्रदीपे मनसि प्रज्वलिते महाप्रकाशे ।
बहिरिन्द्रियगोलकैर्गवाक्षैरविशेषादवभास्यते त्रिलोकी ।। इति।

चक्षुरादिचक्रं च बहिष्करणमात्रस्वस्पन्दास्पदत्वादविकलेन्द्रियस्यापि प्रमातुरौदासीन्याद्यवस्थास्वर्थावभासासम्भवाच्च किञ्चिदन्तःकरणमपेक्षत इत्येतदप्यवश्याभ्युपगन्तव्यम्। ततश्च मनोविमर्शस्यावर्जनीयत्वम्। तदुक्तमस्मद्गुरुभिर्मनोनुशासनस्तोत्रे—

हंसाः पतन्ति गगने प्रविसार्य पक्षौ
स्वौ सर्वदैव किल मानसराजहंसः ।
अत्यद्भुता तव गतिर्गगने परस्मिन्
विक्षेपशून्यमयपक्षयुगं विहाय ।। इति।

करणानां च कर्तृव्यतिरेके कार्यकारित्वानौचित्यात् स्वस्वभावावसादप्रसङ्गाच्च स्तम्भकुम्भादिपर्यालोचनक्रियायामन्तः कश्चित् कर्तृविशेषोऽप्यर्थत आक्षिप्यते। यदुक्तमस्मत्परमगुरुभिः श्रीसौभाग्यहृदयस्तोत्रे—

नेत्रादिजालकोपान्ते हृत्पद्मासनलीलया ।
वारं वारं त्वया देवि! रूपादि मधु सेव्यते ।।

स च वेद्यविकल्पोपरक्तत्वाद् देशकालाद्यवच्छेदमनुभवति। तदवच्छेदोल्लङ्घिना च भाव्यमलौकिकेन केनचित् प्रमातृविशेषेण, अन्यथा विश्ववैचित्र्यस्यैव विपर्ययप्रसङ्गात्। विश्वव्यवहारो ह्यवच्छिन्नानवच्छिन्नप्रमातृद्वयाङ्गीकारादृते न सङ्गच्छते। तत्राऽकल्पितः प्रमाता स्फुरत्तैकस्वभावतया वेद्यवर्गस्य प्रकाशैकार्णवीभावमुद्भावयति। कल्पितस्तु स्तम्भः कुम्भ इत्यादिभेदप्रथोपश्लेषणप्रागल्भ्यात् तत्तद्विकल्पविक्षोभस्वभावभावानां व्यवहारविभागमुद्भावयतीत्युभयावश्यम्भावौचित्यम्। एवं च ग्राह्यग्रहणवेलायामिन्द्रियादिप्रणाडिकया विश्वप्रतिष्ठाभूमिरकृत्रिमः प्रमाता कश्चिदन्तर्विम्रष्टव्य इति पारम्पर्यादापतितम्। यथोक्तमजडप्रमातृसिद्धौ—

इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता ।
या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम् ।। इति,
प्रकाशस्यात्मविश्रान्तिरहम्भावो हि कीर्तितः। इति च।

यथा चोक्तमाचार्याभिनवगुप्तपादैः—'स्फुटतरभासमाननीलसुखादिप्रमात्रन्वेषणद्वारेणैव पारमार्थिकप्रमातृलाभ इहोपदिश्यते' इति। एवमभिप्रायेणैव हि श्रीविज्ञानभैरवे—

गीतादिविषयास्वादसमसौख्यैकतात्मनः ।
योगिनस्तन्मयत्वेन मनोरूढिस्तदात्मता ।।

इत्याद्युपायतयोपपाद्यते। स्मार्तादयोऽप्यत्र नात्यन्तं विसंवदन्ते। यदाहुः—

वीणावादनतत्त्वज्ञः स्वरशास्त्रविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति ।। इति।

वर्धतामिति लोट्प्रत्यययायुक्त्या—

ख्यातिमपूर्णां पूर्णख्यातिसमावेशदार्ढ्यतः क्षपय ।
सृज भुवनानि यथेच्छं स्थापय हर तिरय भासय च ।।

इत्यादिवदुपायोपेयभावं द्योतयन्त्या परमेश्वरस्यात्यन्तदुर्घटघटनप्रागल्भ्यलक्षणं स्वातन्त्र्यमासूत्र्यते। यदनेन दर्शनान्तरप्रणेतृमनीषया संसारनिबन्धत्वेनोपकल्पितः शब्दस्पर्शादिविषयविक्षोभो जीवन्मुक्तिलक्षणाह्लादस्वभावं स्वात्मनो विमर्शं प्रत्युपायतयोपदिश्यते। यथा च तन्त्रान्ते वक्ष्यते—

ओ संसारसुहेल्ली ओ सुलहं मोक्खमग्गसोहग्गम् । इति।

अस्य चोपायोपेयभावस्याव्यभिचारस्वभावसामरस्योद्भावनाय यावद्गति यतितव्यमिति नीत्या वाक्यद्वयैक्यावभासात्मना तन्त्रापरपर्यायेण श्लेषेणोपन्यासः। एवमत्राभिधेयं प्रयोजनं तत्प्रयोजनं च वितत्योन्मीलितम्। पार्यन्तिकं तु प्रयोजनं 'हिअअट्ठाणपरूढो' इति प्रपञ्चयिष्यते।।२।।

विमर्श शक्ति और माया—वेदान्त के ग्रन्थों में यह कहीं नहीं लिखा गया है कि संकेतमात्रैकगम्य उस निर्गुण ब्रह्म की वृद्धि (जय) हो, जो मायाशक्ति से शोभायमान (विच्छुरित) है। कारण स्पष्ट है, निर्गुण ब्रह्म मायाशक्ति से विच्छुरित नहीं है; क्योंकि उसकी माया न सत् है, न असत् है, न सदसदनुभय है; प्रत्युत वह अनिर्वचनीय है। अत: जब वह स्वयं प्रकाशित नहीं है तो ब्रह्म को क्या प्रकाशित करेगी? 'माया' तो अज्ञान है। वह तो मात्र आवरण एवं विक्षेपरूप बन्धनकारिणी शक्ति है। वह चित् एवं सत्य भी नहीं है। वह ब्रह्म की समवायिनी शक्ति भी नहीं है। वह सत्, असत्, सदसत् से परे; भिन्न, अभिन्न, भिन्नाभिन्न से परे अद्भुत एवं अनिर्वचनीय है—

सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा।[१]

महेश्वरानन्द के परमशिव की शक्ति सत् है, शिव की समवायिनी एवं नित्य शक्ति है, वह शिव की अविच्छेद्य एवं स्वरूपात्मिका शक्ति है, वह शिवस्वरूप चन्द्र की चन्द्रिका, अग्निस्वरूप शिव की दाहकतारूप गुण एवं उनका स्वरूप, धर्म, प्रकृति एवं स्वभाव है।

---

१. शंकराचार्य : विवेकचूड़ामणि (१११)

शैवागम की शक्ति चिति है, प्रत्यवमर्शात्मा है, परावाक् है; स्वरसोदिता है, स्वातन्त्र्य है, परमात्मा का ऐश्वर्य है, स्फुरत्ता है, महासत्ता है, सार है और परमेष्ठी का हृदय है—

चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः।।
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।।[1]

विमर्शशक्ति-समवेत परमशिव—परमशिव माया से नहीं; विमर्श शक्ति से समवेत है। 'विमर्श' क्या है? क्या यह माया है? कदापि नहीं।

'विमर्श' परमशिव (परमात्मा) का स्वभाव है। 'माया' निर्गुण ब्रह्म का स्वभाव नहीं है; किन्तु विमर्श शक्ति परमशिव का स्वभाव है—'स परमात्मा चिद्रूपो विमर्शाख्येनैव मुख्यस्वभावेनाव्यभिचारिणा महेश्वरश्चित्तस्य विश्वात्मनः शिवसंज्ञस्याहंविमर्शनमेव शुद्धे ज्ञानक्रिये भिन्नाभिन्नज्ञेयकार्यगते त्वीश्वरस्य शुद्धाशुद्धे भिन्नार्थविषयत्वे पुंसः सत्त्वरजोवृत्तिरूपे प्रकाशप्रवृत्तिसंज्ञे तमसा संकुचिते अशुद्धे एव[2]—

स एव विमृशत्वेन नियतेन महेश्वरः।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः।।[3]

माया का स्वरूप—माया विमर्श शक्ति से भिन्न है (यद्यपि तत्त्वतः तो सब कुछ विमर्श शक्ति का ही रूपान्तर है; अतः सभी उससे अभिन्न है; किन्तु व्यवहारतः वह भिन्न है)। माया भेदात्मिका है और पशुभाव-प्रकाशिका है—

भेदधीरेव भावेषु कर्तुर्बोधात्मनोऽपि या।
मायाशक्त्येव सा विद्येत्यन्ये विद्येश्वरा यथा।
तस्यैश्वर्यस्वभावस्य पशुभावे प्रकाशिका।।
विद्याशक्तिस्तिरोधानकरी मायाभिधा पुनः।
भेदे त्वेकरसे भातेऽहन्तयानात्मनीक्षते।
शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृम्भते।।[4]

विमर्श शक्ति भेदप्रथा-प्रसवित्री नहीं है, किन्तु 'माया' भिन्नवेद्यप्रथा की जन्मदात्री है—

भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभोगदम्।

विमर्श शक्ति से परिणद्ध अन्धा नहीं, शक्तिमान बनता है; किन्तु माया-परिणद्ध जीव 'अन्धा' हो जाता है—

---

१. प्रत्यभिज्ञाकारिका (४४-४५)
२. प्रत्यभिज्ञाकारिकावृत्ति
३. प्रत्यभिज्ञाकारिका (८८)
४. प्रत्यभिज्ञाकारिका

एष प्रमाता मायान्धः संसारी कर्मबन्धनः।

माया के कारण ही मल (आणव, मायीय एवं कार्ममल) उत्पन्न होते हैं—

कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत्त्रयम्।

आत्मा का प्रत्यभिज्ञान विद्या से होता है; किन्तु माया से पशुभाव प्राप्त होता है—

तस्यैश्वर्यस्वभावस्य पशुभावे प्रकाशिका।
विद्याशक्तिस्तिरोधानकरी मायाभिधा पुनः।।

'माया' विमर्श शक्ति से एवं परमशिव से स्वतन्त्र एवं पूर्णतया पृथक् स्वतन्त्र सत्ता भी नहीं है; क्योंकि उसे भी शक्तिमान से अव्यतिरिक्त शक्ति कहा गया है तथापि वही शिव की परा शक्ति (विमर्श शक्ति या स्वातन्त्र्य शक्ति) नहीं है; क्योंकि उससे बड़ी तो महामाया है। माया स्वरूपगोपनात्मिका क्रीड़ा है। उसी से अख्यातिमय यह विश्व प्रकट होता है—माया नाम शक्तिः, शिवस्य शक्तिमतोऽव्यतिरेकिणी स्वरूपगोपनात्मिका क्रीडा, तन्निमित्तादेव यस्मादख्यातिमयमेतद्विश्वं भासते।[1]

मायारहित ब्रह्म अपने स्वस्वरूप से च्युत नहीं होता; किन्तु विमर्शहीन परमशिव की स्थिति ऐसी नहीं है। यही शान्तब्रह्मवादियों एवं शैवागमदार्शनिकों में भेद है—निर्विमर्शस्य प्रकाशस्यापि स्फटिकादिवद्विश्वावभासनेऽपि अस्वतन्त्रत्वात्स्वात्मन्यसत्ता जडेन च भावेन सादृश्यमेव स्यात् परस्परवृत्तपरिज्ञानेऽनेकमूकप्रायत्वात्। एतेन शान्तब्रह्म-वादनिरासः कटाक्षितः।[2]

वेदान्तियों का मायावाद शैवागमिकों के स्वातन्त्र्यवाद से इसीलिये भिन्न है।

स्वात्मविश्रान्ति के समय माया नहीं रहती; किन्तु विमर्श तो रहता है—विमर्श शक्ति तो रहती है—

या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम्।
वर्धतां महाप्रकाशो विमर्शविच्छुरितनिश्छलोद्योतः।।

(महार्थमञ्जरी)

विमर्श का स्वरूप—विमर्श का स्वरूप क्या है? काश्मीरीय शैव दर्शन की अद्वैतप्राण दृष्टि में तत्त्वातीत परमशिव ही अन्तर्बाह्य सर्वत्र व्याप्त है। वह चिद्रूप है। शिवसूत्रों में चैतन्यमात्मा (१.१) कहकर इसे ही चैतन्यस्वरूप आत्मा कहा गया है। समस्त छत्तीस तत्त्व और उनका समस्त प्रपञ्चीकरणात्मक जगत् इसी चैतन्यस्वभाव आत्मा में स्थित है। यही परतत्त्व है। इसे ही परा संवित् 'परमशिव' एवं अनुत्तर आदि संज्ञाओं से संकेतित किया गया है—

१-२. उत्पलदेवाचार्य : अजडप्रमातृसिद्धिवृत्ति।

१. चितिस्तुर्यातीतपदात्मिका परासंवित्।[१]

२. यत् परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्म जगत्।[२]

३. अनुत्तरं न विद्यते प्रकृष्टतरं यतस्तदनुत्तरं चिद्घनम्।[३]

प्रकाश-विमर्श—प्रकाश परमशिव (परमात्मा सत्ता) की संज्ञा है और 'विमर्श' उसकी स्वसमवेता, अव्यभिचारिणी शक्ति एवं महेश्वरता की पूर्ण प्रतीति है—

स एव विमृशत्वेन नियतेन महेश्वरः।

प्रकाश (परमशिव/शक्तिमान/परमात्मा/महेश्वर/चिति शक्ति/परासंवित्/परतत्त्व) विमर्श से अपृथक् है। इनमें अविनाभाव सम्बन्ध है; अतः ये परस्पर अविच्छेद्य हैं—

प्रकाशमानं न पृथक् प्रकाशात् स च प्रकाशो न पृथग् विमर्शात्।[४]

१. प्रकाश आत्मा का स्वरूप है तो विमर्श प्रकाशस्वभाव परमात्मा के स्वरूप की प्रतीति है।

२. 'विमर्श' महेश्वरता की पूर्ण प्रतीति है।

३. विमर्श परमशिव का पूर्णतम 'अहं' है।

४. प्रकाश शिव है एवं 'विमर्श' प्रकाश की शक्ति है।

एक ही सत्ता के दो पक्ष

प्रकाश | विमर्श

५. परमशिव कौन है? शिव एवं शक्ति का जो अविच्छेद्य एवं नित्य सामरस्य है, वही परमशिव है।

६. शक्ति एवं शिव में अभेदात्मक सम्बन्ध है।

७. शिव के विना शक्ति एवं शक्ति के विना शिव अकल्पनीय है।

८. शक्ति के विना शिव भी जड़ स्फटिक जड़तुल्य हो जायेंगे; क्योंकि प्रकाशात्मा होते हुये भी स्फटिक, मणि आदि को अपनी सत्ता का बोध तो होता नहीं।[५]

९. 'प्रकाश' की आत्मविश्रान्ति अहंभाव है—

प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः।[६]

यहाँ 'अहं' एवं 'इदम्' में पार्थक्य-बोध नहीं रहता—

या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम्।[७]

---

१. तन्त्रालोक (भाग ३)
२. परमार्थसारकारिका (११)
३. परात्रिंशिकाविवृति
४. विज्ञानभैरवविवृति
५. ईश्वरप्रत्यभिज्ञाविमर्शिनी (भाग १)
६. अजडप्रमातृसिद्धि
७. अजडप्रमातृसिद्धि

शिव एवं शक्ति का अभेद—शिवदृष्टिकार सोमानन्द ने इसे बहुत अच्छी तरह समझाया है—

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथा भावानिच्छया कर्तुमीहते।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते।।[१]

शक्ति और विमर्श—शक्ति आत्मास्वरूप परमशिव का विमर्श है। यह विमर्श उस शक्ति का शाम्भव सामर्थ्य है, जो कर्तुं, अकर्तुं एवं अन्यथाकर्तुं के स्वभाव वाली है।

ईश्वरप्रत्यभिज्ञाविमर्शिनीकार की दृष्टि—अभिनवगुप्त 'विमर्श' की व्याख्या इस प्रकार करते हैं—'विमर्शो हि सर्वंसहः परमपि आत्मीकरोति, आत्मानं च परीकरोति, उभयम् एकीकरोति, एकीकृतं द्वयमपि न्यग्भावयति इत्येवं स्वभावः।[२]

विमर्श शक्ति और स्वातन्त्र्य शक्ति—इसी विमर्श शक्ति की सामर्थ्य से सब कुछ कर सकने की शक्ति प्राप्त करने के कारण परमशिव को पूर्ण स्वतन्त्र एवं उसकी शक्ति को स्वातन्त्र्य कहा गया है। परमशिव की इच्छाशक्ति ही उसका स्वातन्त्र्य है—

स्वतन्त्र इति तस्येच्छा शक्तिः स्वातन्त्र्यसंज्ञिता।[३]

परमेश्वर की इच्छाशक्ति ही उसकी स्वातन्त्र्य शक्ति है। इस स्वातन्त्र्य शक्ति में 'ज्ञानशक्ति' एवं 'क्रियाशक्ति' की अभेदात्मक स्फुरता है—

विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः।[४]

शिव से लेकर पृथ्वी-पर्यन्त छत्तीस तत्त्वों का अभेदात्मकतापूर्ण स्फुरण आत्मा का विश्वात्मक प्रसार है। इसे ही शैवागम विमर्श की आख्या प्रदान करता है। 'विमर्श' परमशिव की शक्ति है और यह निःशेष जगत् इसी शक्ति का विश्वात्मक स्फार है। 'विश्व' परमशिव (आत्मा) का शक्तिप्रचय है—स्वशक्तिप्रचयोऽस्य विश्वम्।[५]

विश्व का उन्मेष-निमेष करने वाली इसी पारमेश्वरी परा शक्ति को स्पन्दकारिका में स्पन्द कहा गया है।

'विमर्श' चिदात्मा के प्रकाशस्वरूप की प्रतीति है। विमर्श ही चिदात्मा शिव का स्वातन्त्र्य है। इसी से आत्मा पर-निरपेक्ष (पर-पराङ्मुख) रहकर अपनी पूर्णता में विश्रान्त रहा करता है। उसकी यह पर-निरपेक्ष आत्मपूर्णता की प्रतीति ही उसका आनन्द है—स एव परानपेक्षः पूर्णत्वादानन्दरूपो। अभिनवगुप्तपादाचार्य कहते हैं—अन्यनिरपेक्षतैव परमार्थत आनन्दः।[६]

---

१. शिवदृष्टि (३.२-३)
२. ई. प्र. विम. (भाग-२)
३. मालिनी
४. प्रत्यभिज्ञाकारिका
५. शिवसूत्र (३.३०)
६. ई. विमर्शिनी (भाग-१)

चित् अंश शिवभाव है और आनन्दांश शक्तिभाव है। चिदंश (प्रकाश) एवं आनन्दांश (विमर्श) का सामरस्य ही परमभाव है। इसी परमभाव को शैवागमों में परासंवित् एवं परमशिव कहा गया है। अपनी ही शक्ति के प्रसाररूप विश्व को अहंरूप में विमर्श करने की क्रिया का स्वतन्त्र कर्ता होने से वह स्वतन्त्र चिदात्मा है।

'शक्ति' विशुद्ध दर्पण है। इसमें शिव अपना साक्षात्कार करते हैं। शिव का स्वरूप या उनकी प्रकृति 'अहं' है—अहं विश्वस्य स्वरूपम् अहं इत्येवं आकारम्। शिव का अनुभव (विमर्श) अहन्ता (अहन्ता की अनुभूति) है—अहं इत्येवं रूपं ज्ञानम्।

पुण्यानन्द की दृष्टि—पुण्यानन्दनाथ 'कामकलाविलास' में कहते हैं कि जिस प्रकार कोई नृपति निर्मल दर्पण में अपने प्रतिबिम्ब को देखकर अपने सुन्दर मुख का ज्ञान प्राप्त करता है, उसी प्रकार शिव भी स्वाधीन स्वात्मशक्ति को देखकर अपनी परिपूर्ण अहन्ता एवं प्रकाशस्वरूप का ज्ञान प्राप्त करता है। इसी विमर्श की संज्ञा है—स्फुरत्ता, स्पन्द, परावाक्, महासत्ता आदि।

विमर्शसम्बन्धिनी नागानन्द की दृष्टि—आचार्य नागानन्द कहते हैं—विमर्शो नाम विश्वाकारेण वा विश्वप्रकाशेन वा विश्वोपसंहारेण वा अकृत्रिमोऽहमिति स्फुरणम्। तस्यां तल्लीनत्वं नाम अन्तर्मुखत्वम्।

परमशिव की जो पूर्णाहन्ता है, उसी का आख्यान्तर 'विमर्श' है। 'प्रकाश' शिव-रूप है और 'विमर्श' शक्तिरूप है। 'शक्ति' आत्मारूपी परमशिव का विमर्श है। विमर्श एक नैसर्गिकी स्फुरत्ता है। जिसके द्वारा शिव जगत् की सृष्टि, उसका पालन एवं संहार किया करते हैं—

नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्तिः।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति।।[१]

शिव ही प्रकाश है और शक्ति ही विमर्श है। इसी विमर्श शक्ति को शिव अन्तर्गर्भित करके स्थित है। 'कामकलाविलास' में पुण्यानन्द कहते हैं—

सकलभुवनोदयस्थितिलयमयलीलाविनोदनोद्युक्तः।
अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः।।

अभिनवगुप्तपादाचार्य की दृष्टि—आचार्य अभिनवगुप्त कहते हैं—

अन्तर्विभाति सकलं जगदात्मनीह यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः पुनर्निजविमर्शनसारवृत्त्या विश्वं परामृशति नो मुकुरस्थया तु।।

नित्याषोडशिकार्णवकार की दृष्टि—इस ग्रन्थकार के अनुसार त्रिदेवात्मिका पारमेश्वरी परमा शक्ति त्रिपुरा ही विमर्श है—

---

१. वरिवस्यारहस्यम्

एषा सा परमा शक्तिरेकैव परमेश्वरी।
त्रिपुरा त्रिविधा देवी ब्रह्मविष्ण्वीशरूपिणी।।

आचार्य शिवानन्द की दृष्टि—आचार्य शिवानन्द कहते हैं कि 'परमा शक्तिरिति विमर्शरूपा'।

आचार्य अमृतानन्दनाथ की दृष्टि—आचार्य अमृतानन्दनाथ कहते हैं कि प्रकाशात्मक दीपकरूप शिव की प्रभारूपा शक्ति ही विमर्श है—शिवस्य प्रकाशात्मने दीपस्य शक्ति-विमर्शाख्यैव प्रभा। यही शक्ति मेय-मातृ-प्रमा-प्रमाण से सङ्कुचित होकर विश्व बन जाती है—विश्वाकारा मेय-मातृ-प्रमा-प्रमाणभेदैः सङ्कुचद्रूपा।

ऋजुविमर्शिनीकार की दृष्टि—ऋजुविमर्शिनी में कहा गया है कि यही विमर्श शक्ति छत्तीस तत्त्वों के रूप में परिणत हो जाती है—विश्वाकार प्रमा षट्त्रिंशतत्त्वात्मना परिणता विमर्शशक्तिः।[१]

नागानन्द ने कहा था कि 'विमर्श' एक अद्वैतबोध है, जो विश्वाकारेण, विश्वप्रकाशनेन एवं विश्वसंहारेण के रूप में शाम्भवी शक्ति द्वारा प्रकट हुआ करता है। 'विमर्श' पूर्णाहंभावना है।

नटनानन्दनाथ की दृष्टि—नटनानन्दनाथ 'चिद्वल्ली' में कहते हैं कि—'जगदुत्पत्ति-स्थितिलयहेतुभूताकृत्रिमाहम्भावपरामर्शो विमर्शः।

प्रत्यभिज्ञाकारिकाकार की दृष्टि—प्रत्यभिज्ञाकारिका में आचार्य उत्पलदेव कहते हैं कि अवभास का स्वभाव ही विमर्श है—

स्वभावमवभासस्य विमर्शं विदुरन्यथा।[२]

'प्रकाश' की मुख्य आत्मा प्रत्यवमर्श है—प्रकाशस्य मुख्य आत्मा प्रत्यवमर्शः।[३] उसके विना आकार में स्वच्छता (निर्मलता/प्रकाशमयता) तो आ सकती है; किन्तु चैतन्य (अजाड्य) नहीं आ सकता; क्योंकि उसके विना उसकी स्थिति चैतन्यहीन; किन्तु स्वच्छ स्फटिक के समान हो जाएगी—

प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः।[४]

प्रत्यवमर्शस्तं विनार्थभेदिताकारस्यास्य स्वच्छतामात्रं न त्वजाड्यं चमत्कृतेरभावात्।[५]

साक्षात्कार ज्ञान में भी विमर्श की ही विद्यमानता रहती है—

साक्षात्कारक्षणेऽप्यस्ति विमर्शः कथमन्यथा।[६]

---

१. ऋजुविमर्शिनी टीका
२. ईश्वर प्र. का. (४२)
३. ईश्वर प्र. का. वृत्ति
४. ईश्वरप्रत्यभिज्ञाकारिका
५. ईश्वर प्र. का. वृत्ति
६. ईश्वरप्रत्यभिज्ञाका.

साक्षात्कारक्षणज्ञानेऽपि चितोऽर्थप्रत्यवमर्शोऽस्ति सूक्ष्मः।[१]

विमर्श जड प्रकृति अचेतन शक्ति की आख्या नहीं है; क्योंकि विमर्श चित्स्वभाव है—वपुः चित्स्वभावताम् अभ्येति, स च संरम्भो विमर्शः क्रियाशक्तिरुच्यते।

अभिनवगुप्त ईश्वरप्रत्यभिज्ञाविमर्शिनी में कहते हैं कि विमर्श ही तो ज्ञान है। इसके विना तो स्वयं शिव भी जड़ हो जाते हैं—विमर्श एव ज्ञानं तेन विना हि जडभावोऽस्य स्यादिति उक्तम् स एव च क्रिया।

अभिनवगुप्त कहते हैं कि शिव की महेश्वरता उसकी अपनी विमर्श शक्ति के कारण ही है—

स एव विमृशत्वेन नियतेन महेश्वरः।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः।।

अभिनवगुप्तपाद की दृष्टि—आचार्य अभिनवगुप्त की दृष्टि इस प्रकार है—

१. प्रकाशलक्षण स्वात्मा स्फटिकादिक की भाँति परामर्शनशून्य नहीं है; प्रत्युत वह सदैव विमृश्यमानस्वरूप है—यही उसका विमृशद्रूपत्व है।

२. अनवच्छिन्न विमर्शता ही उसका अन्योन्यमुखत्व, आनन्दैकघनत्व एवं माहेश्वर्य है—

(क) न च अस्य असौ प्रकाशलक्षणः स्वात्मा नीलाद्युपरागश्च परामर्शनशून्य एव आस्ते स्फटिकमणेरिव अपितु सदैव विमृश्यमानरूपः। इति विमृशद्रूपत्वम्।

(ख) अनवच्छिन्नविमर्शता अनन्योन्मुखत्वम् आनन्दैकघनत्वमेव अस्य माहेश्वर्यं।[२]

३. शिव का विमर्श अहंभावात्मक है—स एव हि अहंभावात्मा विमर्शो।[३] (विमर्श एव देवस्य—ई. प्रत्यभिज्ञा)।

४. प्रकाशरूपता ही 'ज्ञान' है। वहीं (ज्ञान में) स्वातन्त्र्यात्मा विमर्श क्रिया विद्यमान है—प्रकाशरूपता ज्ञानं तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया।[४]

५. विमर्श अन्तःकृत प्रकाश है—विमर्शश्च अन्तःकृतप्रकाशः।[५]

६. यही विमर्श परावस्था में ज्ञान और क्रिया दोनों है, जो परस्पर अभिन्न है—

(क) विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः। (प्र. का.)

(ख) इति विमर्श एव परावस्थायां ज्ञानक्रिये।[६]

७. परापरावस्था में भगवान् सदाशिव की भूमि में 'इदन्तासामान्याधिकरण्यापन्नाहंताविमर्शस्वभावे'[७]। सामान्याधिकरण्यापन्ना अहन्ता का विमर्श होना है।

---

१. प्रत्यभिज्ञाकारिकावृत्ति
२. ईश्वरप्रत्यभिज्ञाविमर्शिनी
३. आचार्य अभिनवगुप्त
४. ईश्वरप्रत्यभिज्ञाविमर्शिनी
५. अभिनवगुप्तपादाचार्य
६. प्रत्यभिज्ञाविमर्शिनी
७. ई. प्र. विमर्शिनी

८. अपरावस्था अर्थात् मायापद (मायिक भूमि) में इदम् भाव के प्राधान्य से ही इस विमर्श की विद्यमानता है—अपरावस्थायां च मायापदे इदंभावप्राधान्येन वर्तमाने इति विशेषः।[१]

विमर्श की अवस्थायें

- १. परावस्था—यहाँ ज्ञान एवं क्रिया दोनों अभिन्न हैं। जहाँ ज्ञान है, वहीं क्रिया है तथा जहाँ क्रिया है, वहीं ज्ञान है।
  (परावस्थायां ज्ञानक्रिये। विमर्शश्च अन्तकृतप्रकाशः)
- २. परापरावस्था—यहाँ इदन्ता एवं अहन्ता में सामानाधिकरण्य है।
  परापरावस्थायां इदन्तासामान्याधिकरण्यापन्नाहन्ता विमर्शः स्वभावे।
- ३. अपरा अवस्था—इस मायापद में इदम् का प्राधान्य है।
  अपरावस्थायां च मायापदे इदंभावप्राधान्येन इति विशेषः।

सांख्य का सत्कार्यवाद और आगमिक सर्वविमर्शवाद—सत्कार्यवादी कहते हैं कि कोई नूतन सृष्टि नहीं होती। अप्रकट का प्रकट हो जाना ही सृष्टि है। सृष्टि सर्जन नहीं है। कूर्माङ्गों की भाँति अपने भीतर अवस्थित सत्ता का बहिःप्रकाशन ही सृष्टि है। शैव आगमिक भी ऐसा ही कहते हैं—

वर्तमानावभासानां भावानामवभासनम्।
अन्तःस्थितवतामेव घटते बहिरात्मना।।[२]

यही प्रत्यवमर्श का माहात्म्य है—प्रत्यवमर्शस्य माहात्म्यं यद्विश्वं स्वात्मैक्येनान्तःस्थितं बहिरिदन्तयोद्भासयन् (उद्भास्यमानमपि पुनः पूर्णाहन्ताविश्रान्त्याभेदमापादयेत्)।[३]

शिव का विमर्श क्या है? उसकी आत्मविश्रान्ति की अवस्था में उसका विमर्श-स्वरूप क्या है—

या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम्।

यहाँ 'इदम्' 'अहं' में लयीभूत रहता है और प्रकाशस्यात्मविश्रान्तिरहम्भावो हि कीर्तितः।[४] इसकी (जगत् की) सत्ता अन्तःसत्ता का प्रकाशन है—

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।[५]

---

१. ई. प्र. वि. (का. ११)
२. प्रत्यभिज्ञाकारिका (१.३२)
३. अजडप्रमातृसिद्धि (१४)
४. अजडप्रमातृसिद्धि (२२)
५. प्रत्यभिज्ञाकरिका (३८)

आत्मा की विश्वमूलकता तथा उसकी स्वतःप्रामाणिकता

ननूक्तयुक्त्या विम्रष्टव्यः कश्चित् कर्तृविशेषः कुलालादिवद् न कुत्रचिदपरोक्षमुपलक्ष्यते, अनुमेयत्वादौ तु तत्र प्रमाणाधीना हि वस्तुस्थितिरिति स्थित्या तादृक् किञ्चित् प्रमाणं वक्तव्यम्। तदनुक्तौ च तस्यासत्कल्पत्वापत्तिरित्याशङ्क्याह—

अत्ता खु वीसमूलं तत्थ पमाणं ण को वि अत्थेइ।
कस्स व होइ पिपासा गंगासोत्ते णिमग्गस्स ॥३॥

(आत्मा खलु विश्वमूलं तत्र प्रमाणं न कोऽप्यर्थयते।
कस्य वा भवति पिपासा गङ्गास्रोतसि निमग्नस्य।।)

निश्चय ही आत्मा विश्व की मूल सत्ता है। उसके साक्ष्य के लिये किसी भी अन्य प्रमाण को खोजने की सार्थकता नहीं है। गंगा जी की धारा में अवस्थित कोई भी प्राणी भला कैसे प्यासा रह सकता है।।३।।

इहात्मैव हि प्रकाशस्वभावत्वाद् विश्वव्यवहारे निबन्धनम्, ममावभासते मयावलोक्यत इति प्रमातृप्रकाशोपश्लेषेणैव स्तम्भकुम्भादीनां प्रकाशमानत्वात्। तद्व्यतिरेके च तेषां स्तम्भ एव कुम्भः, कुम्भ एव स्तम्भ इत्यनयोरन्योन्यं स्वलक्षणापहारोपक्रमे न कस्यचिदपि नियन्तृत्वमिति स्मम्भरूपेण स्तम्भः किं भवत्यस्तम्भो वेति सन्देहो वा तस्याप्यसम्भवो वेति सर्वथा तूष्णीम्भाव एव स्वभावः स्याद् भुवनव्यवहारस्य। यदि च स्तम्भादिरूपतयैव तेषां प्रकाशमानत्वं न पुनः प्रमातृप्रकाशानुग्रहात्मा कश्चिदतिशयः, तर्हि सर्वेषामपि तथा प्रकाशेरन्, न वा कस्यचिदपीति प्रमातृणां व्यवहारोच्छेदप्रसङ्गः। किञ्च, स्तम्भकुम्भाद्यात्मनो विश्वस्य स्वात्मनैव प्रकाशमानताङ्गीकारे सर्वस्यापि प्रमातृवर्गस्य सार्वज्ञ्यमत्यन्ताज्ञत्वं वा प्रसज्येत, नियामकाभावात्। तस्मादात्मनो जगद्व्यवहारप्रयोजकत्वमनिच्छताऽप्यङ्गीकार्यम्। प्रयोज्यप्रयोजकभावश्च पर्यन्ततोऽनयोस्तादात्म्यमेव पर्यवसाययिष्यतीत्यात्मप्रकाशमयोऽयं विश्ववर्तिवेद्यवर्गोल्लास इत्यापतितम्। यदुक्तं श्रीप्रत्यभिज्ञायाम्—

प्रागिवार्थोऽप्रकाशः स्यात् प्रकाशात्मतया विना।
न च प्रकाशो भिन्नः स्यादात्मार्थस्य प्रकाशता ।। इति।

खलुरविप्रतिपत्तौ। एवं स्थिते तत्रैवात्मनीदमेतादृगिति वस्तुव्यवस्थापकत्वलक्षणं स्वाभासविशेषं प्रमाणं प्रति पण्डितस्य वा पामरस्य वा न कस्यचिदपेक्षोत्पद्यते, प्रमातृप्रकाशादव्यतिरेकात्। प्रत्युत तेनैव व्यवस्थाप्यमानत्वाच्च प्रमाणस्य। प्रमाणं हि नाम नवनवोदयः स्वाभासविशेषः। सोऽपि स्वाभासोऽभिनव इत्युक्त-

त्वात्। नवनवोदयत्वं च तस्य तत्तद्देशकालोपश्लेषावच्छिद्यमानान्योन्यविलक्षण-प्रमेयद्वारोपारूढः कश्चिद् विशेषः। न पुनः स्वाभाविको धर्म इत्यवधीरिताखिल-विकल्पविक्षोभमक्षुभिताब्धिकल्पमेकस्वभावमात्मतत्त्वं प्रत्यस्य व्यापार एव नोपपद्यत इत्यर्थः। न कोऽप्यर्थयत इति। आत्मनि प्रमाणमिच्छन्नात्मा स्यान्न वा। यद्यनात्मा जगवर्गः, तत्प्रमाणापेक्षैव नोपपद्यते। आत्मैव चेत्, तर्हि स्वस्मिन् स्व-यमेव प्रमाणमपेक्षत इत्यापतेत्। यदाहुः—

अख्यातिर्यदि न ख्यातिः ख्यातिरेवावशिष्यते ।
ख्यातिश्चेत् ख्यातिरूपत्वात् ख्यातिरेवावशिष्यते ।। इति।
प्रमातृतास्पदे तत्र प्रमाणं नोपयुज्यते ।
करणात् कर्तुराधिक्यमन्यैरभ्युपगम्यते ।।
स्वतन्त्रः खलु कर्तेति शाब्दिकैरप्युदीर्यते ।
तच्च स्वातन्त्र्यमन्येभ्यः कारकेभ्यः प्रधानता ।।
यत्प्रभावात् प्रमाणानां प्रमाणत्वव्यवस्थितिः ।
तत्रैव तदपेक्षेति न किं व्यर्थं वचो भवेत् ।।
लौकिकानां प्रमाणानामनाश्वासाद्धि यौक्तिकैः ।
ईश्वरस्य प्रमाणत्वं प्रमातृत्वेऽप्युदाहृतम् ।।
प्रमातरि प्रमाणं किमिति पृच्छन् प्रमातृताम् ।
विजहाति न वा नाद्यः प्रश्नस्यानुपपत्तितः ।।
न द्वितीयश्च कल्पः स्यात् प्रमाणं किमु विस्फुरेत् ।
इति हि प्रश्नतात्पर्यं तत्रात्मन्यैक्यसम्मतौ ।।
मयि त्वयीति भेदोऽयं न कदाचन युज्यते ।
नानात्मत्वे स्वविषयं प्रमाणं प्रति भावना ।।
पृच्छ्यते प्रतिवादीति महन्मौर्ख्यं प्रसज्यते ।
भ्रान्तिश्चेदात्मनि भ्रान्त्या बुद्धे रज्जुभुजङ्गवत् ।।
वाच्यं प्रमाणमित्येतदुन्मत्तवचनायते ।
अथ नास्त्येव मे तत्र प्रतीतिरिति कथ्यते ।।
तत्र प्रमाणं पृच्छ्येत कीदृग् वोत्तरमुच्यताम् ।
अगोचरः प्रमाणानामत आत्मा महेश्वरः ।।

यदुक्तं श्रीप्रत्यभिज्ञायाम्—

प्रमातरि पुराणे तु सर्वदाभातविग्रहे ।
किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि ।। इति।

तथा चोपनिषत्—'विज्ञातारमरे केन विजानीयात्' इति।

स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते ।
पादोद्देशे शिरो न स्यात् तथेयं वैन्दवी कला ।। इति।

श्रीतन्त्रालोकेऽपि—

प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते ।
तेषामपि परो जीवः स एव परमेश्वरः ।। इति।

उक्तमर्थं दृष्टान्तदृष्ट्या प्रतिपादयति—कस्य वेत्यादि। **गाङ्गो हि प्रवाहः शैत्य-प्रसादाद्यनेकगुणोत्कर्षादन्तर्बहिस्तापापहारप्रवीणो भवति। तत्रैव सर्वाङ्गीणाप्लव-पूर्वकमघमर्षणाद्यवस्थासु को नाम नरस्तृषितः स्यात्। न कश्चिदपि तथा स्यादिति यावत्। पिपासेत्यनेन गङ्गास्रोतोनिमग्नस्यापि यदि कस्यचित् सलिलपानेच्छा, कस्तत्र पातुं प्रत्यूह इति प्रत्याययता दार्ष्टान्तिकेऽपि स्थले विश्वव्यवहारनिबन्धनं परमेश्वरं प्रति प्रमाणजिज्ञासायां प्रत्यक्षादीनि सर्वाण्यपि प्रमाणानि सम्भवन्ति, न पुनरेषामत्र काचिदपेक्षेत्युद्भाव्यते। एतेन—**

तन्वादि बुद्धिमत्कर्तुं सन्निवेशविशेषवत् ।
घटवद् यदनेवं तत्रैवं खपरमणुवत् ।।

इत्यादिप्रमाणोपपादनोपक्षीणस्येश्वरसिद्ध्यादेः प्रबन्धस्य प्रवृत्तिवैफल्यशङ्का-कलङ्कोऽप्युट्टङ्कित इत्यवगन्तवयम्।।३।।

सारे लोक-व्यवहार का कारण आत्मा ही है। प्रकाशस्वभाव होने के कारण ही (आत्मा के कारण) समस्त लोक-व्यवहार चल रहा है। चूँकि आत्मा प्रकाश-स्वभाव है; इसीलिये सारे लौकिक व्यवहार चल रहे हैं; अन्यथा उसके विना तो स्तम्भ, घट, पट एवं उपल आदि में भेद कौन कर पाता? ऐसी स्थिति में तो 'तद्व्यतिरेके च तेषां स्तम्भ एव कुम्भः, कुम्भ एव स्तम्भ इति'। फिर उन दोनों में अन्तर क। नियन्तृत्व कौन करता? 'न कस्यचिदपि नियन्तृत्वमिति'। सारांश यह कि निःशेष लोक-व्यवहार का नियामक मात्र आत्मसत्ता है।

१. इहात्मैव हि प्रकाशस्वभावत्वाद् विश्वव्यवहारे निबन्धनम्।

२. तस्मादात्मनो जगद्व्यवहारप्रयोजकत्वमनिच्छताप्यङ्गीकार्यम्।

३. प्रयोज्यप्रयोजकभावश्च पर्यन्ततोऽनयोस्तादात्म्यमेव पर्यवसाययिष्यतीति। आत्म-प्रकाशोऽयं विश्ववर्तिवेद्यवर्गोल्लास इति।

प्रत्यभिज्ञाकार की दृष्टि—ईश्वरप्रत्यभिज्ञा में आचार्य उत्पलदेव कहते हैं—

प्रागिवार्थोऽप्रकाशः स्यात् प्रकाशात्मतया विना।
न च प्रकाशो भिन्नः स्यादात्मार्थस्य प्रकाशता।।

प्रश्न—यदि कोई आत्मा के प्रमाण पर शंका करता है तो शंका करने वाले में आत्मा न होती तो शंका ही कौन उठाता? जड़ पत्थर तो अपनी सत्ता के विषय में कोई शंका नहीं उठा पाते। इसी दिशा में महेश्वरानन्द पूछते हैं—आत्मनि प्रमाणमिच्छन्नात्मा स्यान्न वा। यद्यनात्मा जडवर्गः तत्प्रमाणापेक्षैव नोपपद्यते। आत्मैव चेत्तर्हि स्वस्मिन् स्वयमेव प्रमाणमपेक्षत इत्यापतेत्।

इसी प्रसंग में निम्न तर्क महत्त्वपूर्ण है—

अख्यातिर्यदि न ख्यातिः ख्यातिरेवावशिष्यते।
ख्यातिश्चेत् ख्यातिरूपत्वात् ख्यातिरेवावशिष्यते।।
प्रमातृतास्पदे तत्र प्रमाणं नोपयुज्यते।
करणात् कर्तुराधिक्यमन्यैरभ्युपगम्यते।।
स्वतन्त्रः खलु कर्तेति शाब्दिकैरप्युदीर्यते।
तच्च स्वातन्त्र्यमन्येभ्यः कारकेभ्यः प्रधानता।।
यत्प्रभावात् प्रमाणानां प्रमाणत्वव्यवस्थितिः।
तत्रैव तदपेक्षेति न किं व्यर्थं वचो भवेत्।।
लौकिकानां प्रमाणानामनाश्वासाद्धि यौक्तिकैः।।
ईश्वरस्य प्रमाणत्वं प्रमातृत्वेऽप्युदाहृतम्।।
प्रमातरि प्रमाणं किमिति पृच्छन् प्रमातृताम्।
विजहाति न वा नाद्यः प्रश्नस्यानुपपत्तितः।।
न द्वितीयश्च कल्पः स्यात् प्रमाणं किमु विस्फुरेत्।
इति हि प्रश्नतात्पर्यं तत्रात्मन्यैक्यसम्मतौ।।
मयि त्वयीति भेदोऽयं न कदाचन युज्यते।
नानात्मत्वे स्वविषयं प्रमाणं प्रति भावना।।
पृच्छ्यते प्रतिवादीति महन्मौर्ख्यं प्रसज्यते।
भ्रान्तिश्चेदात्मनि भ्रान्त्या बुद्धे रज्जुभुजङ्गवत्।।
वाच्यं प्रमाणमित्येतदुन्मत्तवचनायते।
अथ नास्त्येव मे तत्र प्रतीतिरिति कथ्यते।।
तत्र प्रमाणं पृच्छ्येत कीदृग् वोत्तरमुच्यताम्।
अगोचरः प्रमाणानामत आत्मा महेश्वरः।।

श्रीप्रत्यभिज्ञाकार की दृष्टि—ईश्वरप्रत्यभिज्ञा में कहा गया है कि—

प्रमातरि पुराणे तु सर्वदाभातविग्रहे।
किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि।।

औपनिषदिक दृष्टि—विज्ञातारमरे केन विजानीयात्।

स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते।
पादोद्देशे शिरो न स्यात्तथेयं वैन्दवी कला।।

तन्त्रालोककार की दृष्टि—आचार्य अभिनवगुप्त 'तन्त्रालोक' में कहते हैं—

प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते।
तेषामपि परो जीवः स एष परमेश्वरः।।

औपनिषदिक दृष्टि—आत्मा की विश्वमूलकता प्रतिपादित करते हुये तैत्तिरीयोपनिषद् (वल्ली २, अनु. १) में कहा गया है कि विश्व का मूल तत्त्व आत्मा है और उसी से पञ्चभूतों का आविर्भाव है—तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरऽग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरसमयः।

आत्मा → → आकाश → → वायु → → अन्न → → जल → → पृथ्वी → → औषधियाँ → → अन्न → → पुरुष → → पुरुष की अन्नरसमयता आदि।

१. आत्मा प्राणमायः (२.२)
२. शारीर आत्मा (२.३)
३. आत्मा मनोमयः (२.३)
४. योग आत्मा (२.४)
५. आत्माऽऽनन्दमयः, आनन्द आत्मा (२.६)
६. सोऽकामयत्। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वमसृजत् यदिदं किं च।

तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च व्यच्चाभवत्। निरुक्तं चानिरुक्तं। निलयनं चानिलयनं। विज्ञानं चाविज्ञानं। सत्यं चानृतं च सत्यमभवत्। यदिदं किं च। तत्सत्यमित्याचक्षते।

७. यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञास्व। तद् ब्रह्मेति। (भृगु वल्ली—प्रथम अनुवाक)
८. ॐ आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किञ्चनमिषत्। स ईक्षत लोकान्नु सृजा इति। (ऐतरेयोपनिषद्—प्र.अ., प्र.ख.)

शिव की सार्वत्रिक स्फुरता

ननु स्तम्भकुम्भादिवदात्मनः प्रकाशो न कदाचिदपि स्फुटतयोपलभ्यते। अस्फुटे चार्थे प्रमाणव्यापारेणैवावतरितव्यमित्याशङ्क्याह—

जं जाणंति जळा अपि जळहारीओ पि जं विजाणंति।
जस्स च्चिअ जोक्कारो सो कस्स फुडो ण होइ कुळणाहो ।।४।।

(यं जानन्ति जडा अपि जलहार्योऽपि यं विजानन्ति।
यस्यैव नमस्कारः स कस्य स्फुटो न भवति कुलनाथः।।)

जिसे (वैश्वात्म्य के कारण सर्वज्ञात कुलनाथ को) आभीरादिक जड़ीभूत चेतना वाले (जड़) लोग एवं जल भरने वाली अति सामान्य दासियाँ भी जानती हैं और जिस (प्रकाशात्मा शिव) के लिये ही सारे अभिवादन समर्पित किये जाते हैं वह 'कुल' (शरीर-इन्द्रिय-लोकादिक से युक्त विश्व) का स्वामी किसके समक्ष प्रकाशित (व्यक्त) होकर विद्यमान नहीं होता।।४।।

यं वैश्वात्म्येन प्रसिद्धिमन्तं प्रकाशात्मनो वीरेश्वरा इवानुद्रिक्तप्रकाशा जडा आभीरादयोऽपि जानन्ति, यं च विमर्शमय्यो वीरेश्वर्य इव वैदग्ध्याभासशालिन्यो घटदासीप्रभृतयोऽप्यवबुध्यन्ते। सर्वेषामपि स्थूलोऽहं सम्पन्नोऽहमित्यादेः स्वात्मस्फुरणस्य स्फुटमेवोपलभ्यमानत्वात्। यच्छ्रुतिः—

उतैनं गोपा अदृशन् अदृशन्नुदहार्यः इति ।

विमर्शप्राधान्याज्जलहारीज्ञानं प्रति वैशिष्ट्यमुक्तम्। ज्ञानशक्त्येव प्रमातॄणां क्रियाशक्त्याऽप्ययं क्रोडीक्रियत इत्याह—यस्यैव नमस्कार इति। **जडजलहार्यादिर्हि सर्वोऽपि जीववर्गस्तत्तत्फलकाङ्क्षया तत्र तत्र नमस्कुर्वाणो लक्ष्यते। स सर्वोऽपि नमस्कारो यत्सम्बन्धेनैव भवति, यथा श्रुतिः—'यस्मै नमस्तच्छिरः' इति। सर्वस्यापि स्वात्मैव देवतेत्यग्रे भविष्यति। यतः—**

त्वमेवात्मेश! सर्वस्य सर्वश्चात्मनि रागवान् ।

इति श्रीमत्स्तोत्रावल्यामुक्तम्। अथ च जडाः स्तम्भकुम्भादयो भावाः, जलहार्यः शब्दस्पर्शाद्यादानक्षमा इन्द्रियशक्तयः, तेऽपि यज्जानन्तीति परमेश्वरस्य प्राकट्योत्कर्ष उपपाद्यते। यतः स्तम्भकुम्भादयोऽपि तत्तत्प्रमातृविषयीकारद्वारा ज्ञानक्रियाश्रयतया निश्चीयन्ते। यदुक्तम्—'द्रष्टैव हि ततो जगत्' इति। कर्तैवेत्यस्याप्युपलक्षणमेतत्। यत् प्रयुक्तं शम्भ्वैक्यदीपिकायाम्—'विश्वमिदं मन्मयम्, मत्कार्यत्वात्। यदित्थं तत् तथा। यथा शरीरम्। इदं च मम कार्यं तस्मान्मन्मयम्' इति। तद्वच्चक्षुरादीन्द्रियाण्यपि प्रमातृपरिबर्हतयैव तथा तथा भवन्तीति। उक्तरूपश्च स परमेश्वरः कुलस्य देहाक्षभुवनादेर्विश्वविलासस्य तादात्म्यपर्यवसायितया स्मृत्यादिनिर्वाहको भवन् कस्य पदार्थस्य स्फुटो न भवति। कस्येति यदि कश्चिदुच्येत स एव स्वभावतो न स्यादित्यर्थः। अयं भावः—विषयेन्द्रियादेर्वेद्यवैचित्र्यस्य गोपालजलहार्यादेः प्रमातृवर्गस्य च—

समलो विमलो वापि व्यवहारोऽनुभूयते ।

इति श्रीप्रत्यभिज्ञाप्रक्रियया ग्रामं गच्छति, सन्ध्यामुपास्ते इत्यादिलौकिक-

शास्त्रीयव्यवहारस्वभावं ज्ञानक्रियायुगलमेव साक्षात् पारम्पर्येण वाऽनुप्राणनमवलोक्यते। यथा श्रीप्रत्यभिज्ञायाम्—

तथाहि जडभूतानां प्रतिष्ठा जीवदाश्रया।
ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्।। इति।

ते च ज्ञानक्रिये ममेत्यहमिति वाऽहम्भावव्यतिरेके कुत्रापि नोपपद्येते इति सर्वाहम्भावस्वभावं परमेश्वरं प्रत्यस्फुटत्वशङ्काया न कश्चिदवकाश इति।।४।।

यं = जिसे, प्रकाशात्मा परमशिव को। जडा = आभीर आदि जड़ीभूत चेतना वाले लोग। जलहार्यो = जल भरने वाली दासियाँ। स्फुट = व्यक्त। प्रकाशित। अभिव्यक्त। कुलनाथ = विश्वरूप कुल का स्वामी शिव। यस्यैव नमस्कार: = 'यस्मै नमस्तच्छिर:' (श्रुति)।

सभी प्राणियों में निवास करने वाली आत्मा ही देवता है—सर्वस्थापि स्वात्मैव देवता (परिमल)। अत: 'त्वमेवात्मेश सर्वस्य सर्वश्चात्मनि रागवान्'।

आचार्य महेश्वरानन्द की दृष्टि—आचार्य महेश्वरानन्द कहते है कि 'जड़' (स्तम्भ-कुम्भ) आदि एवं 'जलहार्य:' (शब्द-स्पर्श-आदान आदि में समर्थ इन्द्रियाँ) भी जिसे जानती हैं, उस सर्वज्ञात शिव का सर्वज्ञातृत्व असामान्य है; अत: इससे 'परमेश्वरस्य प्राकट्योत्कर्ष उपपाद्यते'।[1] यही तो शिव की अनुत्तर महिमा है। 'द्रष्टैव हि ततो जगत्'। स्तम्भ, कुम्भ आदि भी उन-उन प्रमाताओं के विषय बनने एवं ज्ञान-क्रिया के आश्रित होने के फलस्वरूप ही तो पहचाने एवं निश्चित किये जाते हैं कि ये कौन हैं?

शाम्भवैक्यदीपिकाकार की दृष्टि—'शाम्भवैक्यदीपिका' में कहा गया है कि यह समस्त विश्व 'मन्मय' है; क्योंकि यह मेरा कार्य है। यह जो जैसा है, वह वैसा (परमेश्वरवत्) है; जैसे कि शरीर। चूँकि यह मेरा कार्य है; अत: यह मन्मय है—विश्वमिदं मन्मयम्, मत्कार्यत्वात्। यदित्थं तत् तथा। यथा शरीरम्। इदं च मम कार्यं तस्मान्मन्मयम्।

अहंभाव के व्यतिरिक्त किसी की भी सत्ता नहीं है। परमेश्वर कैसा है? 'सर्वाहम्भावस्वभावं परमेश्वरं' परमात्मा सारे अहंभावों की समष्टि है।[2]

'ज्ञान' और 'क्रिया' जो शिव की शक्तियाँ हैं, उनके विना तो किसी भी प्रकार का ज्ञान एवं किसी भी प्रकार की क्रिया सम्भव ही नहीं है; अत: जगत् के सारे ज्ञानों एवं क्रियाओं के मूल में भी शिव ही है; इसीलिये प्रत्यभिज्ञाकार उत्पलदेव कहते हैं—

तथाहि जडभूतानां प्रतिष्ठा जीवदाश्रया।
ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्।।[3]

१-३. परिमल

शिवतत्त्व (या आत्मसत्ता) **की अनिर्वचनीयता**

एवं सामान्यतः प्रमाणानामनुपयोगमात्मन्युपपाद्य विशेषतोऽप्युपपादयन्नागमे कञ्चिदनुग्रहं दर्शयति—

ओच्छिण्णं पच्चक्खं ओच्छिण्णं तम्मुहं च अणुमाणं।
आअमदीवालोओ तस्स पयासेइ किं पि माहाप्पं॥५॥

(अवच्छिन्नं प्रत्यक्षमवच्छिन्नं तन्मुखं चानुमानम्।
आगमदीपालोकस्तस्य प्रकाशयति किमपि माहात्म्यम्॥)

प्रत्यक्ष प्रमाण तो (अपनी सङ्कुचित शक्ति एवं अपने सीमित विस्तार के कारण) अवच्छिन्न है और तन्मुखापेक्षी अनुमान प्रमाण भी अवच्छिन्न है। आगमशास्त्ररूपी दीप-प्रभा ही थोड़ा-बहुत उसकी (अनवच्छिन्न परम तत्त्व की) महिमा पर प्रकाश डाल पाती है॥५॥

ग्राह्यार्थसन्निकर्ष एव प्रत्यक्षस्य प्रामाण्यमित्यत्यन्तमेतत् सङ्कुचितम्। अनुमानं च व्याप्त्युपलम्भसापेक्षत्वाद् व्याप्त्युपलम्भस्य च प्रत्यक्षमूलत्वादवच्छिन्नमेव। अर्थापत्त्यादेरत्रान्तर्भावो वैशेषिकादिभिरभ्युपगतः। अनन्तर्भावे वा तस्य संकोचः कल्पकाद्युपलम्भविकल्पात् स्वयमुपकल्पनीयः। एवं चावच्छिन्नानां प्रमाणानामनवच्छिन्ने स्वात्मनि प्रवृत्तिरिति महतीमनौचित्यकक्ष्यामवतरतीति प्रागप्युक्तम्। आगमस्तु यद्याप्तमात्रवाक्यत्वात् प्रामाण्यमर्हति, तर्हि तस्याप्तिः कीदृगिति चिन्तायामन्यस्मादाप्तात्, तस्याप्यन्यस्मादिति मूलक्षयकारिण्यनवस्थेत्यप्रामाण्यमेव। माणिक्यादिपरीक्षावत् त्रिचतुरकक्ष्याविश्रान्तौ तु सैव सङ्कोचाय कल्पते। यदि पुनः 'आगमस्त्वनवच्छिन्नप्रकाशात्मकमाहेश्वरविमर्शपरमार्थः' इत्याचार्याभिनवगुप्तोक्तस्थित्या परप्रमातृविमर्शशक्तिमयतयायमङ्गीक्रियते, तदानीमसौ तस्य स्वात्मनः स्वभावभूते प्रकाशे प्रदीपोल्लेख इव तमःस्थगिते स्तम्भकुम्भादावभिव्यञ्जकतया कञ्चिच्चमत्कारमुपजनयति। तत्रापि यथा दीपालोकेन ध्वान्तगर्भवर्तिनां स्तम्भादीनामारोहपरिणाहादिस्वभाव उन्मील्यते, तद्वदस्यापि स्वात्मनो यन्माहात्म्यमनवच्छिन्नस्वभावत्वं स्वव्यतिरिक्ताशेषभुवनाक्षाद्यनुप्राणनक्षमत्वं विश्वतदुत्तीर्णत्वलक्षणस्वलक्षणद्वितयसामरस्यसम्पत्पात्रत्वम्, तत् किमप्यलौकिकं तत्त्वमागमेनोन्मुद्र्यते। यदुक्तमाचार्याभिनवगुप्तपादैः—

यं प्राप्य सर्वागमसिन्धुसङ्घपूर्णत्वमभ्येति कृतार्थतां च।
तं नौम्यहं शाम्भवतत्त्वचिन्तारत्नौघसारं परमागमाब्धिम्॥ इति।

अथ यदि शाखाशिखायां शशाङ्कमण्डलमित्यादिवदुपचारादत्र प्रमाण-

व्यवहारकौतूहलम्, तदा स्वस्विन्नात्मनि प्रत्यक्षं परत्रानुमानं सर्वत्रागम इत्यलं तन्त्रान्तरपान्थघण्टापथप्रस्थानेन।।५।।

प्रत्यक्ष = प्रति + अक्ष। जो अक्षों (इन्द्रियों) के प्रति उन्मुख या आविर्भूत हो— 'ग्राह्यार्थसन्निकर्ष एव प्रत्यक्षः।'[१] 'प्रत्यक्ष' तो अत्यन्त सङ्कुचित है; क्योंकि सारे पदार्थ इन्द्रियग्राह्य नहीं हैं। अनुमान = अनुमीयते अनेन इति अनुमानम्। अनुमान तो प्रत्यक्ष पर अवलम्बित है; क्योंकि जो प्रत्यक्षीकृत नहीं होगा, उसका अनुमान क्यालगाया जा सकेगा? 'व्याप्त्युपलम्भसापेक्षत्वाद् व्याप्त्युपलम्भस्य च प्रत्यक्ष मूलत्वादवच्छिन्नमेव'।[२]

सारांश यह कि प्रत्यक्ष प्रमाण एवं अनुमान प्रमाण दोनों अवच्छिन्न हैं। अर्थापत्ति आदि प्रमाण प्रत्यक्ष-अनुमान पर आश्रित हैं। इन सबकी अप्रामाणिकता स्वयमेव उपकल्पनीय है। अवच्छिन्न के फीते से अनवच्छिन्न को नापना कहाँ तक समीचीन है? 'एवं चावच्छिन्नानां प्रमाणानामनवच्छिन्ने स्वात्मनि प्रवृत्तिरिति महतीमनौचित्यकक्ष्यामवतरतीति'।[३]

जहाँ तक आगम (आर्ष) प्रमाण की बात है, उस सम्बन्ध में तो यह कहा ही गया है कि स्वयं आगम उस आत्मतत्त्व को 'नेति नेति' कहता है। आप्त वाक्य भी उसके स्वरूपोद्घाटन में पंगु हैं। आप्त वाक्यों को प्रमाण मानने पर अनवस्थादोष से मुक्ति कैसे मिलेगी?[४] यदि वे आप्त वाक्य यह सूचना देते हैं कि 'द' ने यह कहा तो 'द' से किसने कहा? यदि 'द' से 'स' ने कहा तो 'स' से किसने कहा? यदि 'स' से 'ब' ने कहा तो 'ब' से किसने कहा? यदि 'ब' से 'अ' ने कहा तो 'अ' से किसने कहा? किसका कथन प्रामाणिक है? आप्त वाक्यों की प्रामाणिकता भी सिद्ध नहीं है; क्योंकि इसमें तो अनन्त 'किसने' 'क्यों' 'क्या' की परम्परा जुड़ी मिलेगी। अतः आत्मा को प्रमाणित करने वाले सारे प्रमाण पङ्गु हैं।[५]

क्या 'माणिक्य' के अस्तित्व के लिये किसी अन्य प्रमाण की आवश्यकता पड़ती है? क्या अपने अस्तित्व 'अहमस्मि' की पुष्टि के लिये अन्य प्रमाणों की अपेक्षा होती है? आत्मा यही 'अहं' है। इसी 'अहं' का रूपान्तर 'इदम्' है; अतः 'अहं' और 'इदम्' दोनों के अस्तित्व का प्रमाण स्वयं आत्मा है; क्योंकि 'आत्मा खलु विश्वमूलं'। अतः 'तत्र प्रमाणं न कोऽप्यर्थयते। कस्य वा भवति पिपासा गङ्गास्रोतसि निमग्नस्य'।[६]

अभिनवगुप्त कहते हैं—आगमस्त्वनवच्छिन्नप्रकाशात्मकमाहेश्वरविमर्शपरमार्थः। परप्रमातृ विमर्श शक्ति के द्वारा अङ्गीकार्य है। आत्मा अपने स्वभावभूत प्रकाशमयता के कारण प्रज्वलित प्रदीप की भाँति स्वयंप्रकाशित एवं स्वतःप्रमाण है। जो विश्वोत्तीर्ण है, उसे विश्व के पैमाने से कैसे नापा जा सकता है?

अभिनवगुप्त की दृष्टि—आचार्य अभिनवगुप्त कहते हैं—

१-५. महेश्वरानन्द : परिमल ६. महार्थमञ्जरी

यं प्राप्य सर्वागमसिन्धुसङ्घपूर्णत्वमभ्येति कृतार्थतां च।
तं नौम्यहं शाम्भवतत्त्वचिन्तारत्नौघसारं परमागमाब्धिम्।।

सारे आगम भी उसी की पूर्णता से पूर्ण हैं तो पूर्णतम को 'अपूर्ण' की आँखों से कैसे देखा जा सकता है और उसे कैसे पूर्णतया पहचाना जा सकता है?

अनात्मोपासना की दिशा में साफल्याप्ति के प्रति शंकास्पदता

ननु प्रमाणपथातिवृत्तं चेदिदमात्मतत्त्वम्, तत् सर्वोऽपि जनस्तद्विमर्शं प्रत्यधिकारी न कश्चिद् वा स्यादप्रमितत्वाविशेषादित्याशङ्क्य नात्र कश्चिदधिकारिविभागक्लेश इत्याह—

जाणं णिरूवणिज्जो वइरिक्को को पि अप्पणो भावो।
अप्पविमुहाण ताणं अहिआरिविहाअविब्भमो होउ ।।६।।

(येषां निरूपणीयो व्यतिरिक्तः कोऽप्यात्मनो भावः।
आत्मविमुखानां तेषामधिकारिविभागविभ्रमो भवतु।।)

जिन लोगों का आत्मातिरिक्त अन्य पदार्थ विभावनीय (अनुगमनीय/उपास्य) है, उन आत्मसाधना-विमुखों (अनात्मोपासकों) का साफल्याधिकार (उपलब्धियों का अधिकार) सदैव शंकास्पद ही रहता है।।६।।

इह येषां पुंसां स्वात्मरूपात् परमेश्वराद् व्यतिरिक्तो भवन् कश्चिज्ज्योतिष्टोमादिः पदार्थो निरूपणीयो विभावनीयो भवति, तेषामन्यपदार्थौन्मुख्याविनाभूतादात्मवैमुख्यादेव हेतोरयमत्राधिकारी न त्वयमिति यो विभ्रमो विशिष्टो भ्रमो विलासरूपत्वादप्रामाणिको व्यवहारो वा स भवतु। तत्सद्भावे वयं न प्रतिबन्धारः। अतिसर्गे लोट्। ततश्च तेषामुपालम्भनीयता च द्योत्यते। यदुक्तमाचार्याभिनवगुप्तपादैः—

आत्मानमनभिज्ञाय विवेक्तुं योऽन्यदिच्छति।
तेन भौतेन किं वाच्यं प्रश्नेऽस्मिन् को भवानिति।।

कोऽपीति। **अस्मन्मर्यादायां भावान्तरस्यात्मव्यतिरेकस्फुरणमात्रे सत्यपि पर्यन्ततस्तन्मयताया एवावधारणादात्मनो व्यक्तिरिक्तः कोऽपि भाव इत्ययुक्तैव वाचोयुक्तिः। यदुक्तं संवित्प्रकाशे—**

यदिदं दृश्यते किञ्चिद् दर्शनात् तन्न भिद्यते।
दर्शनं द्रष्टृतो नान्यद् द्रष्टैव हि ततो जगत्।। इति।

आगमेऽपि—

यावन्न वेदका एते तावद्वेद्याः कथं प्रिये। इति।

अथाप्युपरि कथ्यत इत्यर्थः। येषां पुनः स्वात्मन एव भावः स्वातन्त्र्यस्वभावः कश्चिदतिशयितो धर्मो विमृष्टव्यतयाऽवतिष्ठते, तेषामात्मौन्मुख्यशालिनां न कदाचिदप्ययमधिकारिविभागव्याक्षेपः। एतदुक्तं भवति—ज्योतिष्टोमादयो हि विभावनीया अर्था विभावयितॄन् प्रमातॄन् प्रति पृथग्भावेन प्रसिद्धाः। अतस्तेषां स्वर्गकामत्वादिरधिकारिविभागः कश्चित् सङ्गच्छेत। येषां पुनरात्मस्वरूपमेव निरूपणीयम्, तेषां नैरात्म्यशङ्कायामस्त्वनधिकारित्वम्। तदभावाच्च कथमधिकारितारतम्यमिति। एतेनेहामुत्रार्थभोगविरागाद्यपि नाधिकारिवैशिष्ट्यायेति व्याख्यातम्, यत इहामुत्रार्थभोगोद्रेक एव मोक्षः पुरुषार्थात्मनः स्वात्मविमर्शस्य प्रयोजनतया प्रतिपादयिष्यते। तर्हि मुमुक्षुत्वमस्त्वधिकार इति चेत्? न,

वस्तुस्थित्यां न बन्धोऽस्ति तदभावान्न मुक्तता।
विकल्पघटितावेतावुभावपि न किञ्चन।।

इति न्यायाद् बन्ध एव नास्ति। कुतो मोक्षः कुतस्तरां तदिच्छा। अस्तित्वे वा सैव क्रियाशक्तिपर्यन्तमुज्जृभत इति विमर्शस्य तदिच्छायाश्च पर्यन्ततो भेदाभावात् प्राप्य एवार्थोऽधिकार इत्युक्तं भवतीति।।६।।

निरूपणीय = विभावनीय, अनुगमनीय, उपास्य। व्यतिरिक्त = पृथक् कोई अन्य। अन्य कोई अर्थात् ज्योतिष्टोम यज्ञादिक। विभ्रमो भवतु = आत्मातिरिक्त अन्य पदार्थों के प्रति औन्मुख्य होने पर अर्थात् आत्मवैमुख्य होने से—यह उपासक उस उपासना या साधना में या उस साधना से सम्भूत उपलब्धियों को प्राप्त करने के सौभाग्यरूप अधिकार को प्राप्त भी कर सकेगा या नहीं?—यह शङ्का सदैव बनी रहती है।[१]

महेश्वरानन्द कहते हैं कि जिन लोगों के लिये स्वात्मरूप परमेश्वर से अतिरिक्त ज्योतिष्टोमादि अन्य पदार्थ विभावनीय होता है, उनका अन्य पदार्थों के प्रति औन्मुख्य होने के कारण (आत्मवैमुख्य के परिणामस्वरूप) साधना में साफल्य (या साधना में विशिष्ट उपलब्धियों को प्राप्त होने) का अधिकार मिलना निश्चित नहीं रहा करता; प्रत्युत यह अधिकार-प्राप्ति शंक़ास्पद रहा करती है।[२]

अभिनवगुप्तपादाचार्य की दृष्टि—इसी प्रसंग में आचार्य अभिनवगुप्त (उक्त तथ्य की पुष्टि करते हुये) कहते हैं—

आत्मानमनभिज्ञाय विवेक्तुं योऽन्यदिच्छति।
तेन भौतेन किं वाच्यं प्रश्नेऽस्मिन् को भवानिति।।

१-२. परिमल

संवित्प्रकाशकार की दृष्टि—संवित् प्रकाश में कहा गया है—

यदिदं दृश्यते किञ्चिद् दर्शनात् तन्न भिद्यते।
दर्शनं द्रष्टृतो नान्यद् द्रष्टैव हि ततो जगत्।।

भाव यह है कि जो कुछ भी देखा जाता है अर्थात् जो दृश्य है, वह 'दर्शन' से भिन्न नहीं है। यह 'दर्शन' द्रष्टा से भिन्न नहीं है। 'द्रष्टा' है; इसीलिये जगत् भी है; क्योंकि जगत् तो दृश्य है। यदि द्रष्टा ही नहीं रहेगा तो दृश्य कहाँ से रहेगा?

आगमोक्त मत—आगमों में भी इसी दृष्टि को उपन्यस्त करते हुये कहा गया है कि—यावन्न वेदका एते तावद्वेद्याः कथं प्रिये?

अर्थात् यदि वेदक ही न हो तो वेद्य कैसे रह सकता है? अर्थात् वेद्य वेदक पर एवं दृश्य द्रष्टा पर निर्भर है।

प्रश्न—क्या पदार्थ की सत्ता वेदक या द्रष्टा पर निर्भर है? यदि हाँ तो अन्धा तो घट-पट नहीं देखता तो क्या घट-पट की सत्ता नहीं है?

उत्तर—है तो, किन्तु 'घटत्व' एवं 'पटत्व' के प्रति उसकी जो संवेदनशीलता, उसके प्रति राग-द्वेष, आसक्ति-अनासक्ति, आकर्षण-विकर्षण उत्पन्न हुआ करता है, वह नहीं रहेगा। यदि किसी नारी के प्रति आकर्षण-विकर्षण नहीं है तो द्रष्टा के लिये नारी के होने या न होने में कोई अन्तर रहेगा ही नहीं। इसी दृष्टि से कहा जाता है कि 'दृश्य' द्रष्टा पर, 'वेद्य' वेदक पर एवं 'ग्राह्य' ग्राहक पर निर्भर है।

जिनमें अनात्मातिरिक्त स्वात्मभाव विद्यमान है—जिनमें स्वातन्त्र्य स्वभाव है और वह तत्त्व उनका सतत रूप से विम्रष्टव्य पदार्थ है—उन आत्मौन्मुख्यनिरत (आत्मोन्मुख) साधकों को साधना के प्रत्येक क्षेत्र में अधिकार प्राप्त है—चाहे वह अधिकार साधना में प्रवेश का हो या उसमें साफल्याप्ति का—'येषां पुनः स्वात्मन एव भावः स्वातन्त्र्य-स्वभावः कश्चिदतिशयितो धर्मो विम्रष्टव्यतयाऽवतिष्ठते, तेषामात्मौन्मुख्यशालिनां न कदाचिदप्ययमधिकारिविभागव्याक्षेपः'।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं कि जो साधक ज्योतिष्टोम यज्ञ आदि बाह्योपासनाओं में निरत हैं, उनकी दृष्टि में यज्ञोपासना एवं यज्ञोपासक पृथक्-पृथक् तत्त्व हैं। वे पृथग्भूत तत्त्व हैं; अतः ऐसी द्वैतदृष्टि से अनुष्ठित उपासना स्वर्ग आदि तो दे सकती है; किन्तु मुक्ति नहीं अर्थात् आत्मसाक्षात्काररूप परमा उपलब्धि उन्हें प्राप्य नहीं है। यहाँ तो भोग-योगसाहचर्य भी है; किन्तु वहाँ वह भी नहीं है। यहाँ मोक्ष की दृष्टि भी विलक्षण है; क्योंकि 'यत इहामुत्रार्थभोगोद्रेक एव मोक्षः। भोगश्च मोक्षश्च करस्थ एव'।[१]

---

१. परिमल

क्योंकि आत्मविमर्श में निरत उपासकों के लिये भोग-मोक्ष एवं बन्धन-मुक्ति में भेद भी नहीं है; क्योंकि—

वस्तुस्थित्यां न बन्धोऽस्ति तदभावान्न मुक्तता।
विकल्पघटितावेतावुभावपि न किञ्चन।।

आचार्य गौड़पाद की दृष्टि—आचार्य गौड़पाद 'वैतथ्यप्रकरण' में कहते हैं—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता।।

क्योंकि—

मनोदृश्यमिदं द्वैतं यत्किञ्चित्सचराचरम्।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते।।
प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।।[१]

विज्ञानभैरवकार की दृष्टि—विज्ञानभैरव में कहा गया है—

न मे बन्धो न मोक्षो मे भीतस्यैता बिभीषिकाः।
प्रतिबिम्बमिदं बुद्धेर्जलेष्विव विवस्वतः।।

कल्हण की दृष्टि—घास-फूस से बनाया हुआ मुझौसा आदमी पक्षियों को तो ड़रा सकता है; किन्तु मतवाले वनकुञ्जरों का क्या बिगाड़ सकता है—

शालीन् पलालपुरुषोऽवति यः कृशानुः दग्धाननश्चटकपेटकभीतिदानैः।
त्रातुं स एव विहितो विपिने विदध्यात्किंतत्र भञ्जनकृतां वनकुञ्जराणाम्।।

संसार से मोहित, बन्धन-ग्रस्त एवं विषयासक्त लोगों को बन्धन एवं मुक्ति प्रभावित कर सकती है; किन्तु वह जीवन्मुक्तों पर भला क्या प्रभाव डाल सकती है?

इसी दृष्टि से महेश्वरानन्द कहते हैं—इति न्यायाद् बन्ध एव नास्ति। कुतो मोक्षः? कुतस्तरां तदिच्छा?[२]

विधि-निषेध के नियम या सिद्धान्त

ननु प्रमाणाधिकारिविभागाद्यनुपयोगे विधिनिषेधयोरेव वैयर्थ्यं स्यात्, विपर्यये बाधाभावादित्याशङ्क्य तयोः स्वरूपमुन्मीलयति—

जत्थ रुई तत्थ विही जत्थ इमा ण त्थि तत्थ अ णिसेहो।
इअ अह्माण विवेओ हिअअपरिप्पंदमत्तसत्थाणं ।।७।।

१. माण्डूक्यकारिका २. परिमल

(यत्र रुचिस्तत्र विधिर्यत्रेयं नास्ति तत्र च निषेधः।
इत्यस्माकं विवेको हृदयपरिस्पन्दमात्रशास्त्राणाम्।।)

जहाँ (आत्मा और परमात्मा के चिन्तन में) रुचि है, वहाँ विधि (शास्त्रादेशात्मक स्वीकृति) है और जहाँ (आत्मविषयक चिन्तन में रुचि) नहीं है, वहाँ निषेध है। यही हमारा (विधि-निषेध का निष्कर्ष एवं तात्पर्यरूप तथा पारमेश्वर-विमर्शात्मक पूर्णाहंभाव रूप) विवेक (परम ज्ञान) है, जो कि हमारे (आगमरूप) शास्त्रों का हृदय-परिस्पन्द (हृदय में प्रवाहित परमर्शात्मा-चमत्कार रूप स्पन्द) है या हृदयपरिस्पन्दस्वरूप हमारे शास्त्रों (आगमों) का यही विवेक (परमज्ञान) है।।७।।

यदेतदस्तीति ज्ञानलक्षणो विधिर्नास्तीति ज्ञानस्वभावो निषेधश्च चोदनार्थः। तत्र सन्ध्योपास्त्यादौ विधिः, कलञ्जभक्षणादौ निषेधश्चेत्युच्यते। तत्रेदमालोचनीयम्—अनुष्ठातॄणां प्रवृत्तिनिवृत्तिप्रयोजनतया हि विधिनिषेधयोर्व्यापारः, 'अज्ञातज्ञापकत्वे सत्यप्रवृत्तप्रवर्तको विधिः' इत्युक्तत्वात्। तत्र किं तज्ज्ञानमात्रेण ते प्रवर्तन्ते निवर्तन्ते च, उत स्वेच्छानुगुण्यात्। यदि ज्ञानमात्रेण, सन्ध्यानुपासकः कलञ्जभक्षको वा न कश्चिदालोक्येत। यदि तु स्वेच्छानुगुण्यात्, तदनुष्ठातॄणां रुचिमेव विधिनिषेधावनुवर्तेते इत्यर्थो भवति। ततश्च तेषां सन्ध्योपासनादावर्थे यत्र रुचिस्तत्र विधिः, यत्र वा कलञ्जभक्षणादौ न रुचिस्तत्र च निषेध इत्यनया भङ्ग्या सन्ध्योपासनादावेवारुचिश्चेत् तत्र च निषेधः, कलञ्जभक्षणादावेव चेद् रुचिस्तत्र च विधिरित्यर्थतत्त्वनिश्चयः स्यात्। इत्युक्तक्रमेणास्माकं पारमेश्वरविमर्शपर्यायपूर्णोऽहम्भावभूषितानां विवेको विधिनिषेधयोस्तात्पर्यतो निष्कर्षः। एतादृशे च तत्त्वनिश्चये तदेव नः शास्त्रम्, यत् सर्वसंवित्संघट्टनात्मना स्वहृदयस्य परितः पृथिव्यादितत्त्वपरम्पराक्रोडीकारप्रावीण्येन स्पन्दः परामर्शात्मा चमत्कारः। पारमेश्वरः परामर्श एव ह्यागम इति प्रागप्यवोचाम। तदनुष्ठातॄणामिच्छाशक्तिरेव प्रवृत्तिनिवृत्त्यौन्मुख्याद् विधिर्निषेध इति व्यपदेशभेदमनुभवतीति यावत्। यदुक्तं संवित्प्रकाशे—

**त्यागः शक्यक्रियो यस्य स हेय इति निश्चितः।
त्यक्तुं न शक्यते यच्च तदुपादेयमित्यपि।। इति।**

मया चोक्तं संविदुल्लासे—

**प्रामाणिकी विधिनिषेधकथा यदि स्यात्
पर्यन्ततः परम एव शिवः प्रमाणम्।
सर्वोत्तरः स खलु तत्र विधिं निषिद्धे
कर्तुं क्षमेत विहिते च विभुर्निषेधम्।। इति।**

एतेन श्रुतिस्मृत्यादेरप्यस्मत्तन्त्रस्य प्रामाण्योत्कर्षो व्याख्यातः। यथोक्तं श्रीभगवद्गीतासु—

एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते । इति।
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । इति च।

यथा श्रीविज्ञानभैरवे—

किञ्चिज्ज्ञैर्या स्मृताऽशुद्धिः सा शुद्धिः शम्भुदर्शने ।
न शुचिर्ह्यशुचिस्तस्मान्निर्विकल्पो भवेन्नरः ।। इति।

यथा च श्रीकालिकामते—

पतन्ति जन्तवो येन कर्मणा नरके ध्रुवम्।
उत्पतन्ति च तेनैव त्रिकालज्ञा भवन्ति च।।

एतदाशयेनैव हि श्रीविज्ञानेन्दुकौमुद्याम्—

मनो यत्रैव विश्रान्त्या पूर्णभावमुपाश्नुते।
अतः परं हि किं नाम शुभक्षेत्रं भविष्यति।।

इति पुण्यक्षेत्रादिलक्षणमुन्मीलितम्। एतेन—

अप्रबुद्धमतीनां हि एता बालबिभीषिकाः।
मातृमोदकवत् सर्वं प्रवृत्त्यर्थमुदाहृतम्।।

इति श्रीविज्ञानभैरवांशो व्याख्यातः।।७।।

विधि किसे कहते हैं? 'अज्ञातज्ञापकत्वे सत्यप्रवृत्तप्रवर्तको विधिः'। विवेक क्या है? पारमेश्वर-विमर्श का पर्याय पूर्णोऽहम्भावना-विभूषित ज्ञान ही विवेक है—'पारमेश्वर-विमर्शपर्यायपूर्णोऽहंभावभूषितानां विवेको:'। सन्ध्योपासना आदि व्यापारों में रुचि ही विधि हैं और कलञ्ज (विषाक्त बाणों से मृत पशुओं का मांस, तम्बाकू का पौधा) भक्षण में रुचि नहीं है; अतः वहाँ निषेध है। संविदुल्लास में कहा गया है कि—

प्रामाणिकी विधिनिषेधकथा यदि स्यात्
पर्यन्ततः परम एव शिवः प्रमाणम्।
सर्वोत्तरः स खलु तत्र विधिं निषिद्धे
कर्तुं क्षमेत विहिते च विभुर्निषेधम्।।

विज्ञानभैरव में कहा गया है—

किञ्चिज्ज्ञैर्या स्मृताऽशुद्धिः सा शुद्धिः शम्भुदर्शने।
न शुचिर्ह्यशुचिस्तस्मान्निर्विकल्पो भवेन्नरः।।

विधिनिषेध की व्यवस्था के अनुकूल ही व्यक्ति की लोकयात्रा निष्पन्न होती है। उसे ही 'संसार' कहते हैं। उसका उल्लंघन ही पुरुषार्थ है—'सैव च संसार इत्युच्यते। तदुल्लङ्घनं च पुरुषार्थ:'। शास्त्रों में कहा गया है कि—

अप्रबुद्धमतीनां हि एता बालविभीषिका:।
मातृमोदकवत् सर्वं प्रवृत्त्यर्थमुदाहृतम्।।

विज्ञानेन्दुकौमुदी में कहा गया है—

मनो यत्रैव विश्रान्त्या पूर्णभावमुपाश्नुते।
अत: परं हि किं नाम शुभक्षेत्रं भविष्यति।।

विधि-निषेध—तत्र सन्ध्योपास्त्यादौ विधि:, कलञ्जभक्षणादौ निषेधश्चेत्युच्यते।

प्रवृत्ति-निवृत्ति के प्रयोजन से ही विधि-निषेध का अनुगमन होता है। व्यापारों एवं वस्तुओं के शुभाशुभ परिणामों के ज्ञान से ही विधि-निषेध एवं प्रवृत्ति-निवृत्ति के व्यापार निष्पन्न हुआ करते हैं। इनमें विधि-निषेध के कारण ही ग्रहण एवं त्याग हुआ करता है।

संवित्प्रकाशकार की दृष्टि—

त्याग: शक्यक्रियो यस्य स हेय इति निश्चित:।
व्यक्तुं न शक्यते यच्च तदुपादेयमित्यपि।।

कालिकागम की दृष्टि—कालिकागम में विधि-निषेधात्मक व्यापारों के ग्रहण के आधार पर तन्निहित कर्मों से नरकादिक का विधान माना गया है—

पतन्ति जन्तवो येन कर्मणा नरके ध्रुवम्।
उत्पतन्ति च तेनैव त्रिकालज्ञा भवन्ति च।।

आत्म-पर्यालोचना के अभाव के दुष्परिणाम

ननु विधिनिषेधादिना हि लोकयात्रा, तयोश्च स्वेच्छामात्रजीवितत्वे तस्या न किञ्चिद्रूपमित्युक्तं भवति। सैव च संसार इत्युच्यते। तदुल्लङ्घनं च पुरुषार्थ:। तत्प्रयोजनतया प्रवृत्तं चैतत् तन्त्रं काकदन्तपरीक्षाप्रायमापद्येतेत्याशङ्क्याह—

पच्चाळोअणविमुहे वत्थुसहावस्स अत्तणो हिअए।
सङ्काविसवेएण व संसारभएण मुज्झए लोओ ॥८॥

(पर्यालोचनविमुखे वस्तुस्वभावस्यात्मनो हृदये।
शङ्काविषवेगेनेव संसारभयेन मुह्यति लोक:।।)

हृदय के, वस्तुस्वभावरूप आत्मा के, पर्यालोचन से विमुख रहने पर यह जीव-लोक शंका के विष के शक्तिशाली प्रवाह के समान ही संसार के भय से भ्रमित होता रहता है।।८।।

योऽयं लोको दृश्यवर्गवैलक्षण्याद् द्रष्टृत्वधर्मा तत एव परमेश्वरवदात्मनो विश्वशरीरत्वपञ्चकृत्यकारित्वाद्यैश्वर्ययोगेऽपि पशुत्वाभिमानी प्रमातृवर्गः, तस्यायं प्रायशः स्वभावो यद्युक्तितत्त्वान्वेषणे परमेश्वराभिन्नोऽपि स्वयं स्वेच्छामात्रत्वादहम्भाववदिदम्भावमप्यवगाहमानस्य स्वस्य यद्धृदयमिच्छाज्ञानक्रियात्मकशक्तित्रितयमे(लाप?ल)नरूपमन्तस्तत्त्वम्, तत्परामर्शं प्रत्यौदासीन्यमवलम्बत इति। तच्च तस्य स्वचित्तस्वभावादापतितम्। चित्तं हि नाम चैतन्यपथावरोहाच्चेत्यसञ्चयान्तश्चर्याचातुर्योपात्तसङ्कोचा चिच्छक्तिरित्यवधार्यते। चित्तमयत्वं चास्याऽवच्छिन्नस्य 'प्रमातुः तन्मयो मायाप्रमाता' इति श्रीप्रत्यभिज्ञाहृदयमर्यादया सम्प्रतिपन्नम्। यतः श्रीशिवसूत्रेषु 'चैतन्यमात्मा' इतिवत् 'चित्तमात्मा' इत्यप्याणवदशौचित्येन पुनरुपदिष्टमिति स्वाभाविकमस्येदमौदासीन्यम्। अत एव चायं संसाराज्जननमरणादिरूपाल्लोयात्राव्यवहाराद् बिभ्यद् 'द्वितीयाद् वै भयं भवति' इत्युपनिषत्प्रक्रियया भेदप्रथोपारूढं चाकित्यमुद्वहन् मुह्यति। आत्मनः परमैश्वर्यावस्थास्मृतिप्रमोषादन्तः संक्लिश्यते। यथा सर्पदंशाभावेऽपि विषावेशशङ्काशाली स्वस्य मनसि सर्पभ्रमदायिनो रज्ज्वादेः पदार्थस्य वस्तुभूतस्वभावपर्यालोचनोपेक्षायां तात्त्विकसर्पदंशवन्मूर्च्छामरणादिकामन्तर्व्यथामुपगच्छति, तद्वदित्युपमया प्रतिपादितमर्थतत्त्वं हृदयङ्गमीक्रियते। उक्तरूपे चास्य मोहे स्वशक्तय एव प्रवर्तन्ते। ताश्च वाग्भूमौ परापश्यन्त्यादिमथ्यो वाचि ब्राह्मीमाहेश्वर्यादयः। संवित्क्रमे स्वात्मस्फुरत्तासारा वामेश्वरीखेचर्याद्याः। प्राणपर्वणि च शरीरनिर्वहणोपक्षीणवृत्तयः प्राणापानप्रभृतयः। तासां ह्यहन्तेदन्ताद्वितयावगाहनसामर्थ्यादात्मस्वरूपोन्मीलनवत् तदाच्छादनेऽप्यौचित्यमस्ति। यद्यप्यस्य पश्वभिमतस्यात्मन इच्छादिशक्तित्रितयानुप्राणनत्वमपरिहार्यम्, तथापि या एताः पारमेश्वर्यामवस्थायामप्रतिहतस्वातन्त्र्यलक्षणेच्छा विश्वभेदप्रथानुरूपेण सार्वज्ञ्योपबृंहिता ज्ञानशक्तिः, तद्वत् सर्वकर्तृत्वात्मिका क्रियाशक्तिश्च, ता एव पशुदशायां कूर्माङ्गभङ्ग्या सङ्कुचन्त्यः क्रमादपूर्णताख्यातिरूपमाणवम्, वेद्यभेदप्रथास्वरूपं मायीयम्, शुभाशुभानुष्ठानात्मकं कार्मणं च मलमुन्मीलयन्ति, ततश्चायं संसारीत्युच्यते। एनमेव हि व्यामोहं प्रत्यूहयितुं सदाचार्यचरणराजीवसपर्या कार्यतयोद्घोष्यते। यदा पुनः स एव लोकः स्वहृदयस्य वास्तवं स्वभावं पर्यालोचयितुमुन्मुखीभवति, तदा न कश्चित् संसारशब्दस्यार्थतयोपलभ्यते। स्वसंरम्भविजृम्भात्मकतयैवास्य विमृश्यमानत्वात्। यथोक्तमाचार्याभिनवगुप्तपादैः—

स्वतन्त्रः स्वच्छात्मा स्फुरति सततं चेतनशिवः
पराशक्तिश्चेयं करणसरणिप्रान्तमुदिता।
तदाभोगैकात्मा स्फुरति च समस्तं जगदिदं
न जाने कुत्रायं ध्वनिरनुपतेत् संसृतिरिति ।। इति।

यथा चाद्वयोल्लासे—

भ्रमः संसारो यत् कथमिव भवेन्मुक्तिरमुत-
स्त्वितीयं या वाञ्छा बत जडधियां सा प्रसरति।
त्वदन्यन्नास्तीति प्रभवदविकल्पाद्वयमते:
स्थिरीकारो मोक्षो द्वितयघटना संसृतिरतः ।। इति।

यथा च संवित्प्रकाशे—

तस्माद् विकल्पः संशुद्धाद् विज्ञानान्नातिरिच्यते ।
तेनैव निर्विकल्पोऽयं विकल्पः स्वात्मनि स्थितः ।। इति।
सर्वो विकल्पः संसार इत्युक्तेरयमाशयः ।
तदसत्त्वं सृतेः सत्त्वं शुद्धायाः संविदः स्थितम् ।। इति च।

अत्राप्युक्त एव दृष्टान्तः। यथा—रज्ज्वादितत्त्वावबोधे भुजङ्गादिभ्रान्त्यभावान्मूर्च्छाद्यननुभव इति। अयमर्थः—सर्वस्यापि जनस्य बाह्यव्यवहारव्यतिरेकेण स्वहृदयोन्मुखः कश्चिदहमित्युद्योगः परिस्फुरति। स च जानामीति संविद्विशेषवपुरेवोपपद्यत इति ज्ञानशक्तेरनपह्नवः। जानामीत्यत्र विमर्शाकारसंरम्भरूपा काचित् क्रियाप्यर्थाक्षिप्ता। एतद्द्वितयानुप्राणनावस्थायामिच्छाशक्तिव्यपदेश इत्यव्याकुलोऽयमिच्छाज्ञानक्रियासामरस्यात्मा स्वभावः, यो हृदयमिति व्यवह्रियते। तस्य च वस्तुनः पर्यालोचनायां 'वितर्क आत्मज्ञानम्' इति श्रीशिवसूत्रस्थित्या स एवाहं परमशिवभट्टारकः शक्तित्रितयवत्त्वादिति विमर्शलक्षणा शक्तिराविर्भवति। यदुद्देशेन 'शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदिश्यते' इति श्रीप्रत्यभिज्ञोक्तिः। यथोक्तमीश्वरसिद्धौ—

स्वात्मैवायं स्फुरति सफलप्राणिनामीश्वरोऽन्तः ।
कर्ता ज्ञातापि च यदि परं प्रत्यभिज्ञास्य साध्या ।। इति।

यथा चोक्तं श्रीविज्ञानभैरवे—

सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः ।
स एवाहं शैवधर्मा इति दार्ढ्याच्छिवो भवेत् ।। इति।

श्रीशिवदृष्टौ च—

अथ स्थिते सर्वदिक्के शिवतत्त्वेऽधुनोच्यते ।
तस्मिन् ज्ञातेऽथवाऽज्ञाते शिवत्वमनिवारितम् ।।
वह्निर्ज्ञातोऽथवाऽज्ञातः प्रकाशं जनयेन्न किम् ।
अज्ञातं न सुवर्णं किं तदा किमुपलं भवेत् ।।

इत्याक्षिप्य,

सत्यमेव तथापीह सुवर्णं ज्ञातमात्रकम् ।
मूल्यादिनोपभोगाय दानार्थमुपयुज्यते ।।
चिन्तामणिरविज्ञातो भवेच्चिन्तामणिः स्फुटम् ।
तथापि कार्यभोगार्थमज्ञातः केन धार्यते ।।

इत्यादिनोपपादितम्। एतच्च पुरस्तादप्युद्घाटयिष्यते। एवं च स्वात्मनः परमेश्वरतया परामर्शात् परमेश्वरस्य च धर्मिग्राहकप्रमाणप्राबल्याद् विश्वशरीरतयाऽङ्गीकारात् संसारचाकित्यादेश्च स्वर्गनरकादिवैचित्र्यवद् विश्वान्तर्भावेनोपलभ्यमानत्वात् शरीरिणश्च शरीरं प्रत्यहम्भावभावनोत्कर्षादभेदानुभवैकभाजनत्वात्

परमेश्वर! तेषु तेषु कृच्छ्रेष्वपि नामोपनमत्स्वहं भवेयम् ।
न परं गतभीतस्त्वदङ्गसङ्गादुपजाताधिकसम्मदोऽपि यावत् ।।

इति श्रीमत्स्तोत्रावलिस्थित्या महेश्वराद्वैतसंविदाह्लादामृतमहाह्रदावगाहचमत्कारचर्वणचातुर्यमेव पर्यवस्यति। न पुनर्बन्धमोक्षादिविकल्पविक्षोभातङ्ककलङ्कशङ्काप्यत्र सम्पद्यते। यच्छ्रुतिः—'तरति शोकमात्मवित्' इति।

यथा च श्रीमदनुभवस्तोत्रे—

त्वं पृथग्विगतबाह्यसम्भ्रमस्तिष्ठसीश्वर! यदात्मचित्यलम् ।
लूनमूलकलनैः कुतस्तदा गम्यतामतनुमायिता गुणैः ।। इति।

एवं स्थितेऽपि—

यथा नृपः सार्वभौमः प्रभावामोदबृंहितः ।
क्रीडन् करोति पादातधर्मांस्तद्धर्मधर्मतः ।।
तथा प्रभुः प्रमोदात्मा क्रीडत्येवं तथा तथा ।

इति श्रीशिवदृष्टिदृष्ट्या स्वात्मस्वातन्त्र्योल्लासात् स्वहृदयपरामर्शशून्यत्वं च केषाञ्चित् सम्भवति, येन संसारादिविभागव्यवहारः। यथा श्रुतिः—'अदेवाद् देवः प्र च ता गुहा यन्' इत्यादि। अत्र च श्रीचिद्गगनचन्द्रिका—

हृद्गुहामभिलषन्नहन्तया दृक्क्रियावपुरदृक्क्रियात् पदात् ।
सन्तमेमि समभावदं शिवं सख्यहानिरमुना हि सूतये ।। इति।

यथा च समाधिपञ्चदश्याम्—

यदेतस्यापरिज्ञानं तत् स्वातन्त्र्योपकल्पितम् ।
स एव खलु संसारो जडानां यस्तु भीषणः ।। इति।

श्रीसर्ववीरभट्टारकेऽपि—

अज्ञानाच्छङ्कते लोकस्ततः सृष्टिश्च संहृतिः ।
मन्त्राः शिवात्मकाः सर्वे सर्वे वर्णाः शिवात्मकाः ।। इति।

मोक्षोपाये च—

स्वापरामर्शमात्रोऽयमपराधः कियानसौ ।
तावन्मात्रेण तज्जातं यद् वक्तुं नैव पार्यते ।। इति।

उक्तरूपार्थपरिज्ञानेव मोक्षः, तद्विपर्ययश्च बन्ध इत्यलमतिप्रपञ्चेन।।८।।

लोक = दृश्यवर्ग, पशुत्वाभिमानी प्रमातृवर्ग। इस पशुप्रमाता का स्वभाव यह है कि यह परमेश्वर से अभिन्न होने पर भी स्वतः अपनी स्वेच्छा-मात्र से अहंभाव की भाँति इदंभाव का अवगाहन करता हुआ अपनी इच्छा, ज्ञान एवं क्रियारूप शक्तित्रय के प्रति उदासीन है, उसके सत्परामर्श के प्रति पराङ्मुख है। उसकी यह मानसिकता स्वचित्त के स्वभाव के कारण है।[१] चित्त क्या है? चैतन्य का संकोच-ग्रहण या चिति शक्ति का सङ्कोच ही चित्त है।[२]

आचार्य क्षेमराज की दृष्टि—प्रत्यभिज्ञाहृदयम् में आचार्य क्षेमराज कहते हैं कि 'चितिरेव चेतनपदावरूढा चेत्यसङ्कोचिनी चित्तम्' अर्थात् चेतन पद से अवतरित तथा विषयों द्वारा सङ्कुचित 'चिति शक्ति' ही चित्त है।

चित्त भगवती चिति का स्वरूपान्तर है—

१. चित्त कोई अन्य तत्त्व नहीं है; अपितु भगवती चिति ही चित्त हैं—'न चित्तं नाम नान्यत्किञ्चित् अपितु सैव भगवती तत्'।[३]

२. जब यह चिति शक्ति अपने स्वरूप को छिपाकर संकोचावलम्बन करती है तब उसकी दो प्रकार की गतियाँ होती हैं—कभी तो वह उल्लसित सङ्कोच को गौण करके चित्प्राधान्य को लेकर स्फुरित होती है और कभी सङ्कोच-प्राधान्य को लेकर स्फुरित होती है।

३. स्वाभाविक चित्प्राधान्यपक्ष में प्रकाशमात्र प्रधान होने पर 'विज्ञानाकलता' का विकास होता है और प्रकाश तथा विमर्श दोनों की प्रधानता होने पर विद्यातत्त्व में अवस्थित प्रमातृता प्राप्त होती है।[४]

४. प्रकाश एवं विमर्श के प्राधान्य में भी क्रमशः सङ्कोच के सङ्कुचित एवं क्षीण होने पर आत्मा ईश्वर, सदाशिव एवं अनाश्रित शिवरूपता का स्वरूप प्राप्त करती है।

५. स्वातन्त्र्यात्मा चिति शक्ति ही ज्ञान, क्रिया एवं माया के स्वरूप में रूपान्तरित

१-२. परिमल ३-४. प्रत्यभिज्ञाहृदयम्

होकर पशुदशा में सङ्कोच-प्रकर्ष के कारण सतोगुण, रजोगुण एवं तमोगुण के स्वभाव वाले चित्त के रूप में स्फुरित होती है—'स्वातन्त्र्यात्मा चितिशक्तिरेव ज्ञान-क्रिया-माया-शक्तिरूपा पशुदशायां सङ्कोचप्रकर्षात् सत्त्वरजस्तमःस्वभावचित्तात्मतया स्फुरति'।[1]

प्रत्यभिज्ञाकार की दृष्टि—'चित्तमयत्वं चास्याऽवच्छिन्नस्य प्रमातुः तन्मयो माया प्रमाता इति श्रीप्रत्यभिज्ञाहृदयमर्यादया सम्प्रतिपन्नम्।[2]

शिवसूत्रकार की दृष्टि—शिवसूत्र में चैतन्यमात्मा तो कहा ही गया है; किन्तु इसके साथ ही साथ 'चित्तं मन्त्र' (२.१) भी कहा गया है और 'आत्मा चित्तम्' भी कहा गया है—

१. चैतन्यमात्मा = (प्र. उन्मेष-१.१) शाम्भवोपाय।
२. चित्तम् मन्त्रः = (द्वि. उन्मेष-२.१) शाक्तोपाय।
३. आत्मा चित्तम् = (तृ. उन्मेष-३.१) आणवोपाय।

आणवदशा में चित्त ही आत्मा है—'यदेतत् विषयवासनाच्छुरितत्वात् नित्यं तद्ध्यवसायादिव्यापारबुद्ध्यहंकृन्मनोरूपं चित्तं तदेव अतति, चिदात्मकस्वरूपाख्यात्या सत्त्वादिवृत्त्यवलम्बनेन योनीः सञ्चरति इति आत्मा अणुरित्यर्थः। न तु चिदेकरूपस्य अस्य अतनमस्ति'।

आत्मा के दो रूप—१. चैतन्यमात्मा २. आत्मा चित्तम् (संकोचावभासात्मक)।[3]

श्रुति की दृष्टि—'द्वितीयाद् वै भयं भवति' (द्वितीय (आत्मातिरिक्त द्वितीय = अर्थात् द्वैत दृष्टि) से भय उत्पन्न होता है)—भेदप्रथोपारूढं चाकित्यमुद्वहन् मुह्यति।[4]

महेश्वरानन्द कहते हैं कि जिस प्रकार साँप के न काटने पर भी विष के चढ़ने के भय के कारण (रस्सी को साँप समझने वाले व्यक्ति को) सर्पदंश के समान मूर्च्छा एवं मृत्यु की अन्तर्व्यथा अनुभूत होने लगती है, उसी प्रकार आत्मा को न जानने वाले व्यक्तियों को संसार के भय व्यामोहित करके कष्ट देने लगते हैं। यह कष्ट देने वाले व्यापार भी 'स्वशक्ति' के ही रूपान्तरण हैं—उक्तरूपे चास्य मोहे स्वशक्तय एव प्रवर्तन्ते।

(क) संवित् क्रम में वामेश्वरी एवं खेचरी आदि शक्तियाँ स्वात्मस्फुरत्ता की ही उपज हैं।[5]

(ख) वाग्भूमि में परा, पश्यन्ती, मध्यमा एवं वैखरी शक्तियाँ (वाणीरूपा शक्तियाँ) भी पराशक्ति के ही रूपान्तरण हैं।

(ग) मातृका एवं उनकी अधिष्ठात्री देवियों की भूमि में ब्राह्मी, माहेश्वरी आदि शक्तियाँ भी एक ही पराशक्ति का रूपान्तरण हैं।

---

१. क्षेमराज : प्र. हृ. ३. शिवसूत्रविमर्शिनी (क्षेमराज)
२. परिमल ४-५. परिमल

(घ) प्राणभूमि में प्राण, अपान, समान, व्यान, उदान एवं धनञ्जय आदि प्राण-प्रकार भी एक ही शक्ति के रूपान्तरण है—प्राक् संवित् प्राणे परिणता।

(ङ) चैतन्यविभाग की भूमि में अहं प्रत्यय एवं इदम् प्रत्यय तथा अहमस्मि, अहमिदम्, इदमहम्, इदमन्यत्, अहमन्यत् आदि स्तरों पर भी एक ही आत्मा विभिन्न रूपों में अवभासित होती है। अहन्ता और इदन्ता, वेदक और वेद्य, ग्राहक और ग्राह्य तथा जड़ और चेतन सभी में एक ही आत्मा के अन्तःस्थित होने के कारण ये सभी एक के ही बहुरूप हैं, एकोऽहं बहु स्याम् की परिणतियाँ हैं।

'संसारभयेन मुह्यति' अर्थात् संसार के भय से व्यामोहित होता है। 'संसार' तो है ही नहीं। 'एको ब्रह्म द्वितीयो नास्ति' की यथार्थता के कारण 'द्वितीय' तो है ही नहीं; अतः द्वितीय की अनुभूति अज्ञान के कारण ही होती है। अज्ञान के उदय से ही 'द्वितीय' की अनुभूति एवं भय का उदय होता है--'द्वितीयाद् वै भयं भवति'। प्रत्येक पशु में पशुपति की ही शक्तियाँ हैं—पशु और पति में कोई भेद नहीं है।

शिव की शक्तियाँ और उनका पशुओं में सङ्कोच[१]

- ज्ञानशक्ति—पारमेश्वर्यावस्थायां प्रतिहतस्वातन्त्र्यलक्षणेच्छाविश्वभेदप्रथानुरूपेण सार्वज्ञोपबृंहिता ज्ञानशक्तिः।
- क्रियाशक्ति—तद्वत् सर्वकर्तृत्वात्मिका क्रियाशक्तिश्च।

पशु-दशा में सङ्कोच

आणव मल मायीय मल कार्मण मल (मलत्रय)

१. ता एव पशुदशायां कूर्माङ्गभङ्ग्या सङ्कुञ्चन्त्यः क्रमादपूर्णताख्यातिरूपमाणवम्।

२. वेद्यभेदप्रथास्वरूपं मायीयम्।

३. शुभाशुभानुष्ठानात्मकं कार्मणं च मलमुन्मीलयति।

इन्हीं तीनों मलों के कारण प्राणी संसारी कहा जाता है—'ततश्चायं संसारीत्युच्यते'।

जब यही 'लोक' अपने हृदय के यथार्थ स्वभाव के पर्यालोचनार्थ साधना करता है तब उसे कोई भी 'संसार' (लोक) यथार्थ सत्ता के रूप में अनुभूत नहीं होता—यदा पुनः स एव लोकः स्वहृदयस्य वास्तवं स्वभावं पर्यालोचयितुमुन्मुखीभवति तदा न कश्चित् संसारशब्दस्यार्थतयोपलभ्यते।[२]

इसी तथ्य को आचार्य क्षेमराज ने विस्तार से समझाया है।

आचार्य क्षेमराज की दृष्टि—आचार्य क्षेमराज निम्न सूत्र की व्याख्या में कहते हैं—चिद्वत्तच्छक्तिसङ्कोचात् मलावृतः संसारी।[३]

१-२. परिमल ३. शक्तिसूत्र

संसारी—यदा चिदात्मा परमेश्वर: स्वस्वातन्त्र्यात् अभेदव्याप्तिं निमज्ज्य भेदव्याप्तिम् अवलम्बते तदा तदीया इच्छादिशक्तय: असङ्कुचिता अपि सङ्कोचयत्यो भान्ति, तदानीमेव अयं मलावृत: संसारी।

(क) आणव मल—इच्छाशक्ति → आणव मल। तथा च अप्रतिस्वातन्त्र्यरूपा इच्छाशक्ति: सङ्कुचिता सती अपूर्णम्मन्यतारूपम् आणवं मलम्।

(ख) मायीय मल—ज्ञान शक्ति → मायीय मल। ज्ञानशक्ति: क्रमेण सङ्कोचात् भेदे सर्वज्ञत्वस्य किञ्चिज्ज्ञत्वाप्ते: अन्त:करणबुद्धीयतापत्तिपूर्वं अत्यन्तं सङ्कोचग्रहणेन भिन्नवेद्यप्रथारूपं मायीयं मलम्।

(ग) कार्ममल—क्रियाशक्ति → कार्ममल। क्रियाशक्ति: क्रमेण भेदे सर्वकर्तृत्वस्य किञ्चित्कर्तृत्वाप्ते: कर्मेन्द्रियरूपसङ्कोचग्रहणपूर्वम् अत्यन्तं परिमिततां प्राप्ता शुभाशुभानुष्ठानमयं कार्मं मलम्।

इच्छाशक्ति का सङ्कोच →	ज्ञानशक्ति का सङ्कोच →	क्रियाशक्ति का सङ्कोच
↓	↓	↓
आणव मल	मायीय मल	कार्म मल

इन्हीं शक्तियों का सङ्कोच 'शिव' को उसकी अपरिमित शक्तियों के स्थान पर सङ्कुचित (सीमित) शक्तियों वाला बना देता है। परिणामत: वह शक्तिदरिद्री होकर 'संसारी' कहलाने लगता है—तथा सर्वकर्तृत्व-सर्वज्ञत्व-पूर्णत्व-नित्यत्व-व्यापकत्वशक्तय: सङ्कोचं गृह्णाना यथाक्रमं कला-विद्या-राग-काल-नियतिरूपतया भान्ति। तथाविधश्च अयं शक्तिदरिद्र: संसारी उच्यते स्वशक्तिविकासे तु शिव एव।[१]

अभिनवगुप्तपादाचार्य की दृष्टि—आचार्य अभिनवगुप्त कहते हैं कि स्वात्मा तो स्वतन्त्र, स्वच्छ, मलहीन है; फिर भी यह पाशविक मालिन्य कहाँ से आ गया? सत्ता तो मात्र एक है—आत्मा या शिव; फिर संसार कहाँ से आ गया? आगे वे फिर कहते हैं—

स्वतन्त्र: स्वच्छात्मा स्फुरति सततं चेतनशिव:
पराशक्तिश्चेयं करणसरणिप्रान्तमुदिता।
तदाभोगैकात्मा स्फुरति च समस्तं जगदिदं
न जाने कुत्रायं ध्वनिरनुपतेत् संसृतिरिति।।

अद्वयोल्लासकार की दृष्टि—अद्वयोल्लास में कहा गया है—

भ्रम: संसारो यत् कथमिव भवेन्मुक्तिरमुत-
स्त्वितीयं या वाञ्छा बत जडधियां सा प्रसरति।

१. प्रत्यभिज्ञा हृदयम्

त्वदन्यन्नास्तीति　　प्रभवदविकल्पाद्वयमते:
स्थिरीकारो　मोक्षो　द्वितयघटनासंसृतिरत:।।

सारे विकल्प ही समष्टि रूप में एकत्रित होकर 'संसार' का स्वरूप धारण कर लेते हैं। विकल्पों की संशुद्धि होने पर ही स्वात्मा में स्थिति सम्भव है; अन्यथा नहीं।

संवित्प्रकाशकार की दृष्टि—संवित् प्रकाश में कहा गया है—

तस्माद् विकल्प: संशुद्धाद् विज्ञानान्नातिरिच्यते।
तेनैव निर्विकल्पोऽयं विकल्प: स्वात्मनि स्थित:।।
सर्वो　विकल्प:　संसार　इत्युक्तेरयमाशय:।
तदसत्त्वं सृते: सत्त्वं शुद्धाया: संविद: स्थितम्।।

सभी लोगों में बाह्य व्यवहार-व्यतिरेक द्वारा स्वहृदयोन्मुख कोई 'अहम्' रूप वाला उद्योग परिस्फुरित होता है। हृदय क्या है? इच्छाज्ञानक्रियासामरस्यात्मास्वभाव: यो हृदयमिति व्यवह्रियते।[1]

तत्त्वपर्यालोचना की स्थिति में 'वितर्क आत्मज्ञानम्'[2] की स्थिति में आरूढ़ होने पर अनुभव यह होता है कि मैं शक्तियों से परिणद्ध शिवभट्टारक हूँ और मेरी शक्ति विमर्श शक्ति है—स एवाहं परमशिवभट्टारक: शक्तित्रयत्वादिति विमर्शलक्षणा शक्तिराविर्भवति।

'शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदिश्यते' कहकर प्रत्यभिज्ञाकार ने भी इसी लक्ष्य को प्राप्त करने का विधान किया है।

ईश्वसिद्धिकार की दृष्टि—ईश्वरसिद्धि में कहा गया है—

स्वात्मैवायं　स्फुरति　सकलप्राणिनामीश्वरोऽन्त:।
कर्ता ज्ञातापि च यदि परं प्रत्यभिज्ञास्य साध्या।।

विज्ञानभैरवकार की दृष्टि—विज्ञानभैरव में भी 'पशु' को सर्वकर्ता, सर्वज्ञ, सर्वव्यापक परमेश्वर ही कहा गया है। उसे अपने इस स्वरूप की 'प्रत्यभिज्ञा' शैवधर्म में दृढ़ता के द्वारा ही होती है—

सर्वज्ञ:　सर्वकर्त्ता　च　व्यापक:　परमेश्वर:।
स　एवाहं　शैवधर्मा　इति　दार्ढ्याच्छिवो　भवेत्।।

शिवदृष्टिकार की दृष्टि—आचार्य सोमानन्द कहते हैं कि जीव 'शिव' है। चाहे जीव इसे जाने और चाहे न जाने। चाहे कोई अग्नि को जाने और चाहे न जाने; किन्तु अग्नि सदैव प्रकाश देती ही है। जानने और न जानने से क्या होता है? क्या न जानने से सोना पत्थर बन जायेगा?

---

१. परिमल　२. शिवसूत्रम्

अथ स्थिते सर्वदिक्के शिवतत्त्वेऽधुनोच्यते।
तस्मिन् ज्ञातेऽथवाऽज्ञाते शिवत्वमनिवारितम्।।
वह्निर्ज्ञातोऽथवाऽज्ञातः प्रकाशं जनयेन्न किम्।
अज्ञातं न सुवर्णं किं तदा किमुपलं भवेत्।।

यह बात अवश्य सत्य है कि यदि कोई यह जान ले कि 'यह सोना है' तो वह मूल्य, उपभोग एवं दान आदि के प्रयोजन में उपादेय होगा और इसी प्रकार यदि चिन्तामणि रत्न के विषय में यह ज्ञान प्राप्त रहेगा कि यह बहुमूल्य चिन्तामणि महारत्न है तो यह भी अपने समस्त अभीप्सितों को पूर्ण करता रहेगा; अन्यथा इसे कोई धारण ही क्यों करेगा?

सत्यमेव तथापीह सुवर्णं ज्ञातमात्रकम्।
मूल्यादिनोपभोगाय दानार्थमुपयुज्यते।।
चिन्तामणिरविज्ञातो भवेच्चिन्तामणिः स्फुटम्।
तथापि कार्यभोगार्थमज्ञातः केन धार्यते।।

'संसारभयेन मुह्यति' (संसार के भय से मोहग्रस्त होता है) ऐसा क्यों? इसका कारण अज्ञान-मात्र है, न कि संसार एवं संसरण। 'संसार' तो आनन्द-क्रीड़ा है; अतः इससे भय कैसा?

आचार्य सोमानन्द की दृष्टि—शिवदृष्टि में कहा गया है कि जगत् एक क्रीड़ा है—

यथा नृपः सार्वभौमः प्रभावामोदबृंहितः।
क्रीडन् करोति पादातधर्मांस्तद्धर्मधर्मतः।।
तथा प्रभुः प्रमोदात्मा क्रीडत्येवं तथा तथा।।

यदि जगत् शिव की क्रीड़ा है तो चूँकि जीव भी शिव ही है तो यह जगत् उसके लिये भी भय नहीं, मात्र आनन्दप्रद क्रीड़ा ही है।

स्पन्दकारिकाकार की दृष्टि—'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' कहकर श्रुति ने भी सृष्टि को आनन्द की उत्पत्ति उद्घोषित किया है; अतः जगत् को (या निःशेष सृष्टि को) आनन्द का पर्याय मानना चाहिये। 'आनन्दकन्द' की आनन्दात्मिका सृष्टि में दुःख है कहाँ? इसीलिये स्पन्दप्रदीपिकाकार कहते हैं कि जगत् केवल मनोञ्जन की क्रीड़ा है। जो इसे इस दृष्टि से देखता है, वह जीवन्मुक्त हो जाता है—

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।
स पश्यन् सर्वतो युक्तो जीवन्मुक्तो न संशयः।।[१]

---

१. स्पन्दकारिका

समाधिपञ्चदशाकार की दृष्टि—समाधिपञ्चदशा में कहा गया है कि यद्यपि संसार दुःखमय तो नहीं है; किन्तु जड़ लोगों के लिये भीषण है—

यदेतस्यापरिज्ञानं तत् स्वातन्त्र्योपकल्पितम्।
स एव खलु संसारो जडानां यस्तु भीषणः।।

सत्य तो यह है कि शिव स्वेच्छया आत्मप्रच्छादन करके लीलावश 'पशु' एवं 'जगत्' की भूमिका की (स्वातन्त्र्य शक्ति के द्वारा) काल्पनिक रचना करता है और उसमें आनन्दमग्न होकर रमण करता है; फिर दुःख एवं कष्ट के लिये स्थान ही कहाँ है?

श्रुतियों में ऋषियों की दृष्टि—छान्दोग्योपनिषद् (३.९.१२) में कहा गया है कि आत्मा ही जगत् है। आत्मा में नानात्व किञ्चित् भी नहीं है—आत्मैवेदं जगत् सर्वं नेह नानास्ति किञ्चन। आत्मैवेदं सर्वम् ('यह' अर्थात् यह सम्पूर्ण इदमात्मक जगत् आत्मा-मात्र ही है)।

उसी आत्मा से सभी का जन्म हुआ है। आकाश (प्रथम तत्त्व) भी उसी से आविर्भूत हुआ है—तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः (तै. उ.-२.१.२), 'यतो वा इमानि भूतानि जायन्ते' (तै. उप.-३.१)।

वह सत्य है, वह आत्मा है और वही तू है—तत्सत्यं स आत्मा तत्त्वमसि, (छा. उप.-८.८-१६)।

'न तु तद् द्वितीयमस्ति' (बृ. उप.-४.३.२३)। उस आत्मा के अतिरिक्त अन्य (दूसरा) कोई है ही नहीं।

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।। (मा. का.)

सृष्टि के पूर्व पहले यह मात्र आत्मा ही विद्यमान थी—आत्मैवेदमग्र आसीत् (बृ. उ.)।

यहाँ इसके लिये सब आत्मा ही हो गया है—यत्र त्वस्य सर्वमात्मैवाभूत् (बृ. उ.-४.५.१५)।

आत्मा (ब्रह्म) को छोड़कर यहाँ नाना कुछ है ही नहीं—नेह नानास्ति किञ्चन (क. उ.-२.१)। वही एक अनेक बन गया है—इन्द्रो मायाभिः पुरुरूप ईयते (बृह. उप.-१.४.१७)। ब्रह्म वा इदमग्र आसीत् (बृ. उप.-१.४.१०)। माण्डूक्योपनिषद् में कहा गया है कि यह सब ब्रह्म ही है। यह आत्मा ही ब्रह्म है—सर्वं ह्येतद् ब्रह्मायमात्मा।

दुःख क्यों है? दुःख इसलिये है; क्योंकि 'अहं' ने अपने को 'इदम्' मान रक्खा है—चैतन्य ने अपने को जड़ (शरीर, इन्द्रिय एवं इन्द्रियों के धर्म) मानकर उसके साथ तादात्म्य स्थापित कर लिया है। सब कुछ चिन्मय है। वेद्य का ऐसा कोई भाग नहीं

है, जो वेदक से बाहर हो। वेद्य वेदक है। वेदक संवित् है और संवित् ही आत्मा है—

यदैव विदितं विश्वं तदानीमेव चिन्मयम्।
यन्नास्ति भागो वेद्योऽसौ नाथ यो वेदकाद् बहिः।।
वेद्यो वेदकतामाप्तो वेदकः संविदात्मताम्।
संवित् त्वदात्मा चेत् सत्यं तदिदं त्वन्मयं जगत्।।

अतः 'आत्मैवेदं जगत् सर्वं नेह नानास्ति किञ्चन' (छा. उ.-३.९.१२) ही सत्य है। ऐसी कोई अवस्था ही नहीं है, जो शिव न हो—

तेन शब्दार्थचिन्तासु न सावस्था न यः शिवः।[१]

फिर पति 'पशु' कैसे बन गया? उसने सुख में दुःख कैसे खोज लिया? कारण सुस्पष्ट है। पशुत्व का कारण शक्तिवर्ग की भोग्यता है—

शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम्।
कलाविलुप्तविभवो गतः सन् स पशुः स्मृतः।।[२]

एक ही क्रियात्मिका शक्ति प्राणी को पशु एवं सिद्ध, बन्धनग्रस्त एवं मुक्त दोनों बना देती है—

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका।।[३]

श्रीसर्ववीरभट्टारककार की दृष्टि—श्रीसर्ववीरभट्टारक में तो कहा गया है कि अज्ञान के कारण ही सृष्टि-संहार दृष्टिगत होते हैं—

अज्ञानाच्छङ्कते लोकस्ततः सृष्टिश्च संहृतिः।

प्रश्न है कि जब 'सृष्टि' है ही नहीं अर्थात् हमारा जन्म हुआ ही नहीं है तो दुःख किसको? इस समस्त विश्व की जड़ कौन है? विश्व का मूल क्या है? आत्मा ही निःशेष सृष्टि का मूल है—'अत्ता खु वीसमूलं', आत्मा खलु विश्वमूलं[४]' इहात्मैव हि प्रकाशस्वभावत्वाद् विश्वव्यवहारे निबन्धनम्'।[५]

'तस्य भासा सर्वमिदं विभाति' उसके प्रकाश से ही यह समस्त जगत् प्रकाशित होता है।

ऐसी स्थिति में 'संसारभयेन मुह्यति लोकः' वाक्य की सार्थकता क्यों है? चूँकि प्राणी आत्मा के वस्तुस्वभाव के पर्यालोचन से विमुख है—[६]पर्यालोचनविमुखे वस्तु-स्वभावस्यात्मनो हृदये।

१. स्पन्दकारिका (२९)
२. स्पन्दकारिका (४५)
३. स्पन्दकारिका (४८)
४. महार्थमञ्जरी (३)
५. परिमल
६. महार्थमञ्जरी (८)

इसी कारण मिथ्या शंका से विष का वेग सारे जगत् को कष्ट दे रहा है—शंका विषवेगेनेव संसारभयेन मुह्यति लोकः।[१]

सारे शोकों को अतिक्रान्त करने का केवल एक ही मूल मन्त्र है और वही शोक-सागर से उद्धार करता है और वह है—'आत्मज्ञान'—'तरति शोकमात्मवित्' (श्रुति)। इसीलिये अनुभवस्तोत्र में कहा गया है—

त्वं पृथग्विगतबाह्यसंभ्रमस्तिष्ठसीश्वर! यदात्मचित्यलम्।
लूनमूलकलनैः कुतस्तदा गम्यतामतनुमायिता गुणैः।।

परिमलकार की दृष्टि—परिमलकार महेश्वरानन्द अन्तिम परामर्श देते हुये (इस भय को नष्ट करने हेतु) मोक्षोपाय की शरण में जाने का उपदेश देते हैं और कहते हैं कि आत्मपरामर्श न करना ही अपराध है। इसी कारण प्राणी वस्तु के वस्तुत्व का बोध ग्रहण नहीं कर पाता; अतः स्वपरामर्श ही भयमुक्ति का द्वार है—

स्वापरामर्शमात्रोऽयमपराधः कियानसौ।
तावन्मात्रेण तज्जातं यद् वक्तुं नैव पार्यते।।

आत्मा की समस्त प्राणियों में स्फुटता

नन्वात्मनो विमर्शमयः कश्चिद् विशेषः संसाराद्यशेषक्लेशोपशमनसामर्थ्य-शालितयोन्मीलितः। स च तस्यास्फुटस्वभावस्य स्फुटीकारात्मेत्यवधार्यते। न च तत्रास्फुटत्वशङ्काऽप्यवतरितुमर्हति, अत्यन्तस्फुटतयोपपादितत्वात्। ततः प्रमाण-प्रमेयव्यवहारविकल्पस्यानुपयोगोऽत्र वितत्य व्याख्यात इत्याशङ्क्याह—

माणिक्कपवेओ विअ णिओलिओ णिअमऊहलेहाए।
पडिभाइ लोइआणं अच्चंतफुडो वि अप्फुडो अप्पा ॥९॥

(माणिक्यप्रवेक इव निचोलितो निजमयूखलेखया।
प्रतिभाति लौकिकानामत्यन्तस्फुटोऽप्यस्फुट आत्मा।।)

जिस प्रकार सर्वोत्कृष्ट (प्रवेक) माणिक्य निचोलित (कञ्चुकित, आवरित) रहने पर भी अपनी रश्मियों के लेख के कारण प्रकाशित रहता है, उसी प्रकार आत्मा (तत्त्वतः) अस्फुट रहते हुये भी समस्त प्राणियों के भीतर अत्यन्त स्फुट रूप में प्रकाशित रहा करती है।।९।।

आत्मरूपो हि परमेश्वरः प्रकाशोत्कर्षवत्वादशेषभुवनव्यापनक्षमत्वाच्च विश्वविकल्पकल्पनामयीमर्चिःप्रोहपरम्परामुपर्युपर्युन्मीलयन्, 'तत् सृष्ट्वा तदेवानु-प्राविशत्' इत्युपनिषत्प्रक्रियया तथैव निचोलितः कञ्चुकितप्रायो नित्यमास्ते। तत्र

---

१. महार्थमञ्जरी (८)

लौकिकानां प्रमेयतयालोक्यमाने विश्वस्मिन् व्यवर्तॄणां प्रमातॄणाम्—

अत्यन्तस्वच्छता सा यत् स्वाकृत्यनवभासनम् ।

इति श्रीतन्त्रालोकस्थित्या प्राकट्योद्रेककक्ष्यारूढतया विप्रष्टव्योऽप्यसौ मध्याह्नमार्तण्डमण्डलन्यायेन तत्तद्रश्मिपरम्परास्फुरणप्राचुर्येण रश्मिमद्ग्रहणासामर्थ्यादप्राकट्यावस्थामधितिष्ठति। यथा त्रासादिराहित्यादत्यन्तश्लाघ्यो माणिक्योपलखण्डः स्फुरदुरुमरीचिमञ्जरीपिञ्जरितपर्यन्ततयैव माणिक्यमेतदुत्कृष्टमिति नाध्यवसितुं शक्यते तद्वदात्मनोऽपि स्वशक्तिप्रसरतिरोहितत्वादेवास्फुटत्वशङ्का। एवमुभयस्वभावतायामेवास्य विश्वव्यवहारौचित्यम्। तदुक्तं मयैव संविदुल्लासे—

अर्चिःप्ररोहे महतः प्रमातुर्वातिस्फुटत्वे च बहिः प्रथा मे ।
अपेक्षते प्रेक्षितुमात्मदर्शं सूर्योदयं तद्व्यवधिं च लोकः ।। इति।

इयं च लौकिकानेव मातॄन् प्रत्युपपद्यते। यदुक्तं श्रीप्रत्यभिज्ञायाम्—

किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते ।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदिश्यते ।। इति।

तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा ।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि सन्नीश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभज्ञोदिता ।। इति च।

अलौकिकानन्तर्मुखान् प्रति तु—

न ध्यायतो न जपतः स्यादस्याऽविधिपूर्वकम् ।
एवमेव शिवाभासस्तं नुमो भक्तिशालिनम् ।।

इति श्रीमत्स्तोत्रावल्युक्तिरेव युक्तिपथमनुवर्तत इति।।९।।

प्रवेक = अत्यन्त श्रेष्ठ, उत्कृष्ट। निचोलित = आच्छादित, आवरणबद्ध। मयूख = रश्मि। स्फुट = सुस्पष्टतया प्रकाशित।

लोकव्यवहार में सर्वत्र आत्मसत्ता ही क्रियारत है और वही सभी की सृष्टि करके सभी के भीतर प्रविष्ट हो गई है—तत् सृष्ट्वा तदेवानुप्राविशत् इतना होने पर भी वह प्रायः निचोलित (आच्छादित, कञ्चुकित) अवस्था में ही रहती है—निचोलितः कञ्चुकितप्रायो नित्यमास्ते।[१]

कठोपनिषत्कार की दृष्टि—कठोपनिषद् में कहा गया है कि सम्पूर्ण प्राणियों में छिपा हुआ यह आत्मा प्रकाशमान नहीं होता। यह तो सूक्ष्मदर्शी पुरुषों द्वारा अपनी

१. परिमल

तीव्र एवं सूक्ष्म बुद्धि के द्वारा ही देखा जा सकता है; अन्यथा नहीं—

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।।[१]

वागिन्द्रिय का मन में, मन का बुद्धि में, बुद्धि का महत्तत्व में एवं महत्तत्त्व का आत्मा में लय करना चाहिये—

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि।।[२]
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।[३]

आत्मा अस्फुट रहकर भी सर्वत्र स्फुट है।

संविदुल्लासकार की दृष्टि—संविदुल्लास में कहा गया है—

अर्चिः प्ररोहे महतः प्रमातुर्नातिस्फुटत्वे च बहिः प्रथा मे।
अपेक्षते प्रेक्षितुमात्मदर्शं सूर्योदयं तद्व्यवधिं च लोकः।।

प्रत्यभिज्ञाकार की दृष्टि—प्रत्यभिज्ञाकार का कथन है—

किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदिश्यते।।[४]

प्रत्यभिज्ञा का उपदेश इसी उपर्युक्त उद्देश्य के कारण हुआ है। यह भी कहा गया है—

तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके
कान्तो लोक समान एवमपरिज्ञातो न रन्तुं यथा।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि सन्नीश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता।।

जो अलौकिक सामर्थ्य वाले सिद्ध योगी हैं, उनके लिये तो ध्यान, जप एवं विधि-पालन आदि सभी व्यर्थ हैं; क्योंकि वे तो केवल भक्तिमात्र से ही शिवाभास पा लेते हैं; अतः वे भक्तिशाली साधक नमस्कार्य हैं—

न ध्यायतो न जपतः स्यादस्याऽविधिपूर्वकम्।
एवमेव शिवाभासस्तं नुमो भक्तिशालिनम्।।

उपनिषदों के ऋषियों की दृष्टि—यह अमृत ब्रह्म ही आगे, पीछे, दाँयीं और बाँयीं ओर, नीचे एवं ऊपर सर्वत्र फैला हुआ है। यह समस्त जगत श्रेष्ठतम ब्रह्म ही है—

१. कठोपनिषद् (१.१२) ३. ईश्वरप्रत्यभिज्ञा (उत्पलदेव)
२. कठोपनिषद् (१३) ४. कठोपनिषद्

ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्।।[1]

आत्मा है तो सर्वत्र किन्तु वह निगूढ़ भी है; अतः उसको जानने हेतु आत्मक्रीड, आत्मरति भी होना आवश्यक है—आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः।[2]

वह (आत्मा) सर्वत्र स्फुट होने पर भी अस्फुट है; अतः सत्य, तप, सम्यक् ज्ञान एवं ब्रह्मचर्य से ही प्राप्य है—सत्येन लभ्यस्तपसा ह्येष आत्मा, सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्।[3]

प्रकाशरूप शिव द्वारा समस्त मलों का ध्वंस

नन्वात्मनः स्फुटत्वमस्फुटत्वं चेत्यन्योन्यविरुद्धमेतद्धर्मद्वयं कथं नाम सङ्गच्छत इत्याशङ्क्य तस्य तादृशं किञ्चित् स्वातन्त्र्यमस्ति, यद् विमर्श इत्याख्यायते, यद्वत्तया चास्य परामर्शः पुरुषार्थतया सर्वथा साध्य इत्युपपादयति—

उड्ढो जलइ पआसो लोआलोअस्स मंगलपईपो।
विमरिसदसामुहाणिअढज्जंतमलालितेलविच्छड्डो ॥१०॥

(ऊर्ध्वो ज्वलति प्रकाशो लोकालोकस्य मङ्गलप्रदीपः।
विमर्शदशामुखानीतदह्यमानमलालितैलविच्छर्दः ।।)

प्रकाशरूप शिव परमात्मा अपनी विमर्श शक्ति की स्फुरणावस्था के औन्मुख्य में स्थित होकर (आणव, कार्म एवं मायीय) मलों के सञ्चित समूह को जलाकर (प्रमाता-प्रमेय या ग्राहक-ग्राह्यरूप) 'लोकालोक' को उसी प्रकार तीक्ष्णता से प्रकाशित करता है, यथा (दीपक की) बत्ती के द्वारा अपने अग्र भाग पर लाये गये तेल को जलाकर मंगलमय दीपक सारे अन्धकार को दूर करके लोकालोक को प्रकाशित कर देता है।।१०।।

योऽयमहं जानामि मम स्फुरतीत्याद्यशेषव्यवहारानुस्यूतः प्रकाशरूपोऽर्थः, स खलु लोक्यमानस्य भावराशेरलोक्यमानस्य खपुष्पाद्यविशेषमभावजातस्य च प्रदीपवत् प्रकाशकतयाऽनूभूयते। तथा लोको मुख्यया वृत्त्या प्रकाशस्वभावत्वात् प्रमाता, अलोकश्च तदधीनप्रकाशत्वात् प्रमेयम्, ग्राह्यग्राहकोभयकोट्युपश्लेषाल्लोकालोकः प्रमाणमिति प्रमात्रादित्रिकपरमार्थस्य विश्वस्य प्रकाशको भवति। तादृक्प्रकाशाभावे विश्वस्यान्धतमसत्वापत्तिरिति प्रागप्यवोचाम। अत एव ह्यसौ मङ्गलतयोपन्यस्तः। इदमेव हि तदतिमहन्मङ्गलम्, यत् स्तम्भकुम्भादीनामन्योन्यस्वभावापहारशङ्कां निस्स्वभावत्वसम्भावनां च व्यपोह्य तेषां तथाभावेनावस्थापनम्। स च ऊर्ध्वः स्वयम्प्रकाशतया प्रकाश्यवर्गोत्तीर्णो भवन् ज्वलति सर्व-

---

१. मुण्डकोपनिषद् (११) २. मुण्डकोपनिषद् (४) ३. मुण्डकोपनिषद्

सम्प्रतिपत्त्या परिस्फुरति। तस्य च विमर्शाख्योऽतिशयः कश्चित् स्वभावतया स्वीकर्तव्यः। अन्यथा दर्पणादिप्रकाशवदस्य जाड्यकक्ष्यानुप्रवेशप्रसङ्गात्।

यदुक्तं श्रीप्रत्यभिज्ञायाम्—

प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः। इति।

स च कार्यवर्गवैलक्षण्येन प्रकाशस्य कर्तृत्वाख्यो धर्म इत्यनन्तरमुपपादयिष्यते।

अत्र खल्वतिविस्तीर्णे लोकयात्राविजृम्भिते।
व्यवह्रियन्ते बहवो भावा भूभूधरादयः॥
व्यवहारविधिस्तेषामसङ्कीर्णश्च लक्ष्यते।
तत्र किं तन्निमित्तं स्यादित्यालोचयतां सताम्॥
संवित्तिव्यतिरेकेण नैवान्यदुपलभ्यते।
तस्या व्यपोहशङ्कायां भूः स्वात्मनि न भूर्भवेत्॥
नाप्यभूर्भूधरादस्याः पृथक्त्वं च कथं भवेत्।
मिथो रूपापहारे च फूत्कर्तुं कस्य कौशलम्॥
एवं वेद्यस्य पृथ्व्यादेरसङ्कीर्णे प्रकाशने।
सामान्यतो विशेषाच्च संविदेव प्रगल्भते॥
सापि वेद्यवदन्येन प्रकाश्या चेत् प्रवर्तते।
प्रकाशस्तन्मयो न स्याज्जाड्ययोगाविशेषतः॥
संविदोऽन्यप्रकाश्यत्वे संवित्त्वं लुप्यते न वा।
न चेद् व्यर्थं तदन्यत् स्याद् येन सेयं प्रकाश्यते॥
लुप्यते चेत् किमाकारा सा तेनास्तु प्रकाशिता।
तस्मान्यस्य प्रकाशश्च कुत इत्यवलोकने॥
अन्यदन्यदिति व्यक्तमनवस्थितिरापतेत्॥
अतोऽस्याः स्वप्रकाशत्वं स्वभावादेव सिध्यति॥
प्रकाशश्चोक्तया भङ्ग्या स्वप्रकाशो भवन्नपि।
भावमात्रस्वभावत्वे न जाड्यं वेद्यवत् त्यजेत्।
स्वप्रकाशोऽप्यसौ काञ्चित् कर्तृतामश्नुते न चेत्।
अन्यथा त्वर्थवन्नास्य स्वभावः स्यात् प्रकाशनम्॥
ततश्च कर्तृता तस्य स्वात्मविश्रान्तिलक्षणा।
अनिच्छतापि स्वीकार्या यामहन्तां विदुर्बुधाः॥
पार्यन्तिकी प्रतिष्ठाभूर्वेद्यवर्गस्य यो विभुः।
तस्य स्वयम्प्रतिष्ठत्वमहम्भावः प्रकीर्त्यते॥

विमर्शश्चायमेव स्यान्मुख्यमैश्वर्यमीशितुः ।
अतः स्वतन्त्रो भगवान् सर्वंसह इति स्थितम् ।।

तस्य च विमर्शस्य या दशा स्फुरणावस्था, तस्या मुखेन औन्मुख्ययोगेन मलानामाणवकार्मणमायीयानामालिः पारम्पर्यात्मा सञ्चयः प्रकाशेन कर्तृभूतेन दह्यते, स्वात्मानुप्रवेशितया स्वीक्रियते। तत्र भिन्नवेद्यप्रथा माया। तदायत्तं मलं मायीयम्। कर्मणा पुण्यपापवासनात्मना सम्भूतं कार्मणम्। अणुर्नाम पूर्णाहम्भाव-परामर्शशून्यत्वात् सङ्कुचितम्मन्यो जीवः। तद्भाव एवाणवम्। तच्चानात्मन्यात्मज्ञानमात्मन्यनात्मज्ञानं च। एतदाशयेनैव हि श्रीशिवसूत्रेष्वकारप्रश्लेषा-प्रश्लेषाभ्यां चैतन्यमात्मज्ञानं बन्ध इत्युक्तम्। यदुक्तं श्रीतन्त्रालोके—

चैतन्यमात्मज्ञानं बन्ध इत्यत्र सूत्रयोः ।
संश्लेषेतरयोगाभ्यामयमर्थः प्रकाशितः ।। इति।

परमेश्वरो हि ज्ञानक्रियारूपतया प्रकाशविमर्शस्वभावः। तस्य च ज्ञातृत्वे विम्रष्टृत्वे चैकतरस्मिन्नप्यपरामृश्यमाने मलमाणवं नामोत्पद्यत इति तात्पर्यार्थः। यथा श्रीप्रत्यभिज्ञायाम्—

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ।। इति।

सर्वोऽपि मलोल्लासः

मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्।

इति श्रीमालिनीविजयोत्तरस्थित्या स्वपरामर्शानान्मुख्यमात्रस्वभावः। स च—

औष्ण्यं हुताश इव शीतलिमानमिन्दौ
शय्यासु मार्दवमिवाश्मसु कर्कशत्वम्।
बाह्येषु मोहमिव योगिषु च प्रबोधं
स्वातन्त्र्यमस्ति हि नियन्त्रयितुं महन्मे।।

इति संविदुल्लासस्थित्या पारमेश्वरस्वातन्त्र्यमेवेति विवेकः। एतेन—

एकोऽप्यनेकशक्तिर्दृक्क्रिययोश्छादको मलः पुंसाम् ।
तुषकम्बुकवद् ज्ञेयस्ताम्राश्रितकालिकावद् वा ।।

इत्यादिना मलो नामात्मगतं किञ्चिद् द्रव्यमित्याचक्षाणाः प्रत्याख्याताः। तत्र चोक्तमलत्रयोपरक्ताः सकला मायातत्त्वान्तरालवर्तिनो देवादयश्च, आण-वकार्मणमलद्वयानुबद्धाः प्रलयाकलाः। आणवे च तेषामात्मज्ञातृत्वविमर्श-शून्यतानिबन्धनं मलमित्यनुसन्धेयम्। तेषु च केषुचिद् वेद्यभेदप्रथोपाधिको

मायीयोऽपि मलः सम्भवति। अन्येषां त्वपवेद्यप्रथानुप्रविष्टानामसौ न विद्यत इति विशेषः। एकमला विज्ञानकलाः। तत्रापि तन्मलं स्वात्मनो विप्रष्टृत्वविमर्श-शून्यत्वात्। विद्येश्वराणामपि मायीयमात्रानुबन्धादेकमलत्वमेव। मलक्षयोपलक्षिता मन्त्रादयः। तत्रापि तत्क्षयौन्मुख्यमात्रे मन्त्राः, तदुपक्रमे मन्त्रेश्वरा विद्येश्वराश्च, येषामीश्वरोऽभिमन्ता। क्षीयमाणमलत्वे मन्त्रमहेश्वराः, येषां च सदाशिवोऽधिष्ठाता। वासनामात्रोपरक्तमलतायामनाश्रितशिवतत्त्वम्। सर्वाकारानुत्पन्नमलोल्लासस्तु भगवान् परमशिवभट्टारक एवेति प्रमातृवैचित्र्यम्। आनीतेति। मलत्रयदाहस्य चायमुपायो यद्विमर्शमुखेनान्तःप्रापणम्। स्वात्मानुप्रविष्टानां च—

यथा हि वह्निना लीढमिन्धनं तन्मयं भवेत्।
एवं चिता समालीढं चैत्यं चिन्मयतां व्रजेत्।।

इत्यादिनीत्या तद्वद्भावावश्यम्भावात् तेषां मलस्वभावत्वमेव विपर्यस्यतीति यावत्। यदुक्तं श्रीभगवद्गीतासु—

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन। इति।

यच्चोक्तं मयैव संविदुल्लासे—

वेद्योपरागविभवेन विमोह्यमानं
लोहान्तरव्यतिकरादिव व्यक्तकार्ष्ण्यम्।
ज्वालावलीभिरभितप्य विमर्शवह्निः
स्वच्छं हिरण्यमिव मे हृदयं विधत्ते।। इति।

मलशङ्कापरित्याग एव मलक्षयोपाय इति यावत्। तदुक्तं श्रीनिशाकुले–

स्फटिकोपलगो रेणुः किं तस्य कुरुतां प्रिये।
व्योम्नीव नीलं हि मलं मलशङ्कां ततस्त्यजेत्।। इति।

यथा किल चैत्रमैत्रादेर्जीवकदम्बकस्य स्तम्भकुम्भादेर्भावराशेश्च प्रकाशको गृहदेवताद्युपचारद्वारा मङ्गल्यः प्रदीपो वह्निविशेषत्वादग्नेरूर्ध्वज्वलनमिति न्यायादूर्ध्वो भवन् ज्वलति। यथा च तस्य वर्तिमुखेनानीय तैलप्रसरो दह्यत इति रूपकश्लेषौ। उपमाद्यलङ्कारेण वाक्यवैचित्र्यं तदर्थस्य हृदयङ्गमीकरणायेत्युक्त-प्रायमेतत्।।१०।।

प्रकाशो = परमप्रकाशक शिव। लोक = प्रकाशस्वभाव प्रमाता। अलोक = प्रमाता के अधीनस्थ, अप्रकाश प्रमेय। लोकालोक = ग्राहक-ग्राह्य, प्रमाता-प्रमेय। ऊर्ध्वः = स्वयंप्रकाश होने के कारण प्रकाश्य वर्ग से उत्तीर्ण (श्रेष्ठतर)। ज्वलति = परिस्फुरित होता है। प्रकाशो = प्रमा, प्रमेय एवं प्रमाता को प्रकाशित करने वाला। विमर्शदशा =

आत्मपरामर्श की स्फुरणावस्था। मुखेन = औन्मुख्य योग द्वारा। मल = आणव मल, २. कार्मण मल एवं ३. मायीय मल। आलि = पंक्ति, समूह, सञ्चय।

१. आणव मल—'अणुर्नाम पूर्णाहम्भावपरामर्शशून्यत्वात् सङ्कुचितम्मन्यो जीवः। तद्भाव एवाणवम्'। 'पूर्णोऽहं' की भावराशि से शून्य जो संकुचित जीव हैं, वे 'अणु' कहलाते हैं। उनका अपूर्णोऽहं भावजात ही आणवमल है। इस आणवमल के दो प्रकार हैं—

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः।।

यह स्वस्वरूप की हानि का पर्याय है।

यह अनात्मा में आत्मज्ञान एवं आत्मा में अनात्म-ज्ञान से युक्त है—तच्चानात्मन्यात्मज्ञानमात्मन्यात्मज्ञानं च। (आत्मनि अनात्मज्ञानम् + अनात्मनि आत्मज्ञानं)।[१]

२. कार्मण मल—कर्मणा पुण्यपापवासनात्मना सम्भूतं कार्मणम्।[२]

३. माया मल—तत्र भिन्नवेद्यप्रथा माया। तदायत्तं मलं मायीयम्।[३]

परमशिव अपनी स्वातन्त्र्य शक्ति के द्वारा जो अवरोहणात्मक स्वात्मप्रच्छादन की क्रीड़ा करता है, वह स्वरूपगोपनात्मिका इच्छारूपा क्रीड़ा ही काश्मीर शैवदर्शन में आणव मल स्वीकार की गई है। आणवमल यथार्थ नहीं है; प्रत्युत शिव की अवरोहण लीला के लिये शिव के द्वारा अपनी स्वातन्त्र्य शक्ति के माध्यम से की गई मल की कल्पनामात्र है—

देवः स्वतन्त्रश्चिद्रूपः प्रकाशात्मा स्वभावतः।
रूपप्रच्छादनक्रीड़ायोगादणुरनेककः ।।

(अभिनवगुप्ताचार्य—तन्त्रालोक-१३.१०३)

आणव मल का कारण है—ईश्वर की स्वस्वरूप-तिरोधित्सा—इह ईश्वरस्य स्वरूपतिरोधित्सैव तावदाणवमलस्य कारणम् (तन्त्रालोक : भाग-८)।

मल है क्या? संसाराङ्कुरकारणरूप अज्ञान ही 'मल' है—

मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्।

तन्त्रसारकार की दृष्टि—तन्त्रसार नामक ग्रन्थ में कहा गया है कि जो अज्ञान है, वही बन्धन का मूल कारण है और उसे ही तन्त्राम्नाय में 'मल' कहा गया है—

अज्ञानं किल बन्ध हेतुरुदितः शास्त्रे मलं तत्स्मृतम्।

क्या अज्ञान ज्ञानाभाव की संज्ञा है? नहीं। सांसारिक जीवों में होने वाला परिमित

१-२. महेश्वरानन्द : स्वोपज्ञ परिमल ३. परिमल

ज्ञान ही अज्ञान है; इसलिये इस ज्ञान को शिवसूत्रकार ने दो बार अज्ञान कहा है। वे कहते हैं—ज्ञानं बन्धः। (१.२)

शैव शास्त्रों में इस अज्ञान को ही 'मल' कहा गया है। अज्ञान का कारण क्या है? परमशिव की वह स्वातन्त्र्य नाम्नी शक्ति, जिसके द्वारा वह अवरोहण एवं आरोहण नामक क्रीड़ा किया करता है, अज्ञान का कारण है।

आचार्य उत्पलदेव आणव मल के दो रूप बताते हैं—

१. स्वातन्त्र्यहानिर्बोधस्य : स्वातन्त्र्य-बोध का अभाव।
२. स्वातन्त्र्यस्याप्यबोधता : स्वातन्त्र्य का अबोध।
३. स्वस्वरूप की हानि (अबोध)—

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः।।

अज्ञान एवं मल में क्या सम्बन्ध है?

मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्।।

मालिनीविजयोत्तरतन्त्रकार की दृष्टि—इस तन्त्र-ग्रन्थ में स्वपरामर्शात्मक ज्ञान को एवं स्वातन्त्र्य को प्राधान्य देते हुये कहा गया है—

औष्ण्यं हुताश इव शीतलिमानमिन्दौ
शय्यासु मार्दवमिवाश्मसु कर्कशत्वम्।
बाह्येषु मोहमिव योगिषु च प्रबोधं
स्वातन्त्र्यमस्ति हि नियन्त्रयितुं महन्मे।।

संविदुल्लासकार की दृष्टि—संविदुल्लास में कहा गया है कि पारमेश्वर स्वातन्त्र्य ही प्रधान तत्त्व है। 'मल' आत्मगत नहीं, बाह्य है—

एकोऽप्यनेकशक्तिर्दृक्क्रिययोश्छादको मलः पुंसाम्।
तुषकम्बुकवद् ज्ञेयस्ताम्राश्रितकालिकावद् वा।।

परमशिव अपनी स्वातन्त्र्य शक्ति एवं स्वतन्त्र स्वभाव के कारण जो लीलावश जीवस्वभाव ग्रहण करते हैं और स्वरूप-गोपन करके स्वेच्छावश स्वगृहीत पारिमित्य को यथार्थ समझने लगते हैं, उनकी वही पारिमित्य-प्रतीति 'बन्धन' बन जाती है—

केवलं एताः बन्धमोक्षादिकल्पना मायाशक्तिवशात्।
अपरामृष्टस्वरूपस्यैव न तु चिदद्वैतपरामर्शशीलस्य।।[1]

१. अणुत्व चेतना में अहन्ताभिमान आणवमल है।

---

१. विज्ञानभैरवविवृति

२. भिन्नवेद्यप्रथा मायीय मल है।

३. शुभाशुभ वासनाओं से रचित मल कार्ममल है।

शुभाशुभविकल्प ही कार्ममल का स्वरूप है। पारमित्य या सङ्कोच को ग्रहण करना ही आणवमल है—सङ्कोच एव हि पुंसामाणवमलमित्युक्तप्रायम्।[१]

इसी कार्ममल के पाश से पाशबद्ध होकर जीव बार-बार जन्म-मृत्यु (आवागमन चक्र) का कष्ट भोगता है।

१. 'माया' किसे कहते हैं? 'तत्र भिन्नवेद्यप्रथा माया'। अभेद में भेद, अद्वैत में द्वैत एवं अद्वय में द्वय की मिथ्या कल्पना या विकल्प-सृष्टि ही माया है।

२. मायीय मल क्या है? मायायत्त मल ही मायीय मल है—तदायत्तं मलं मायीयम्।

३. कार्ममल क्या है? पुण्यपापवासनात्मना सम्भूत मल ही कार्मणमल हैं—कर्मणा पुण्यपापवासनात्मना सम्भूतं कार्मणम्।

४. आणवमल क्या है? पूर्णाहम्भावपरामर्श से शून्य एवं संकुचितम्मन्य जीव ही अणु कहा जाता है और उसके इसी भाव को आणवमल कहते हैं—अणुर्नाम पूर्णाहम्भावपरामर्शशून्यत्वात् सङ्कुचितम्मन्यो जीवः। तद्भाव एवाणवम्।

उसी प्रकार का अनात्मा में आत्मज्ञान एवं आत्मा में अनात्मज्ञान ही आणवमल है—तच्चानात्मन्यात्मज्ञानमात्मन्यात्मज्ञानं च।

शिवसूत्रकार की दृष्टि—उक्त आशय से ही वसुगुप्ताचार्य ने 'शिवसूत्र' में कहा था कि 'चैतन्यमात्माज्ञानं बन्धः'।[२]

तन्त्रालोककार अभिनवगुप्तपादाचार्य की दृष्टि—अभिनवगुप्त ने 'चैतन्यमात्मा' एवं 'ज्ञानं बन्धः'—इन दोनों शिवसूत्रों को एक सूत्र में मिलाकर उन दोनों की एकीकृत व्याख्या की है—

चैतन्यमात्मज्ञानं बन्ध इत्यत्र सूत्रयोः।
संश्लेषेतरयोगाभ्यामयमर्थः प्रकाशितः।।

तान्त्रिकों का परमेश्वर वेदान्त के निर्गुण ब्रह्म से भिन्न है; क्योंकि—परमेश्वरो हि ज्ञानक्रियारूपतया प्रकाशविमर्शस्वभावः।

उसके ज्ञातृत्व-विम्रष्टृत्व में से किसी के भी अपरामृश्यमान रहने पर आणवमल नहीं उत्पन्न होता।

प्रत्यभिज्ञाकार उत्पलदेव की दृष्टि—'विमर्शदशामुखानीतदह्यमानमलालि-

---

१. स्वच्छन्दतन्त्र टीका

२. परिमल

तैलविच्छर्दः'। तीनों मलों के प्रज्वलित या परिदग्ध करने के लिये विमर्श की उन्मुखता ही उपाय है।

जिस प्रकार बत्ती के द्वारा अपने अग्रभाग पर लाये गये तेल-समूह को दीपक की आग जलाकर अन्धकार को विनष्ट करते हुये जड़ एवं चेतन (अलोक-लोक) सारे समूह को प्रकाशित कर देती है, उसी प्रकार 'प्रकाश'रूप परमशिव अपनी समवायिनी विमर्श शक्ति की स्फुरणावस्था के औन्मुख्य बिन्दु पर अवस्थित होकर सारे अज्ञानात्मक अन्धकार को नष्ट करके प्रमाता-प्रमेयरूप (ग्राहक-ग्राह्यरूप) सारे जगत् को प्रकाशित कर देता है।

ज्वलति = सम्पूर्ण सम्प्रतिपत्ति (विद्यमानता, समीप स्थिति) के द्वारा परिस्फुरित होता है। विमर्श क्या है? 'विमर्श' शिव का स्वभाव है—विमर्शाख्योऽतिशयः कश्चित् स्वभावतया स्वीकर्तव्यः।[१] लोकालोकस्य मंगलप्रदीपः—लोक्यमान एवं अलोक्यमान (लोकालोक दोनों) प्रकाशरूप शिव के प्रकाश से प्रकाशित हो उठते हैं; क्योंकि शिव इन दोनों के लिये तमध्वंसी मंगलप्रदीप है।

परमात्मा को 'प्रकाश' इसलिये कहा गया है; क्योंकि 'प्रकाश्य' जगत् के सारे प्रकाश इसी महाप्रकाश शिव से आविर्भूत होते हैं। 'प्रकाश' (शिव) केवल प्रकाशमय ही नहीं, कर्तृत्वमय भी है—प्रकाशस्य कर्तृत्वादयो धर्मः।[२] यदि प्रकाश में कर्तृत्व नहीं होगा तो वह प्रकाशमय किन्तु जड़ स्फटिक की भाँति रह जाएगा—

प्रकाशेऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः।[३]

प्रकाश और कर्तृत्व का सामरस्य—वेदान्त का ब्रह्म कर्तृत्वहीन है; किन्तु शैवों-शाक्तों का शिव कर्तृत्ववान है। इसी दिशा में व्यक्त विचारों पर ध्यान दीजिये—

अत्र खल्वतिविस्तीर्णे लोकयात्राविजृम्भते।
व्यवह्रियन्ते बहवो भावा भू भूधरादयः।।
व्यवहारविधिस्तेषामसङ्कीर्णश्च लक्ष्यते।
तत्र किं तन्निमित्तं स्यादित्यालोचयतां सताम्।।
संवित्तिव्यतिरेकेण नैवान्यदुपलभ्यते।
तस्या व्यपोहशङ्कायां भूः स्वात्मनि न भूर्भवेत्।।
नाप्यभूर्भूधरादस्याः पृथक्त्वं च कथं भवेत्।
मिथो रूपापहारे च फूत्कर्तुं कस्य कौशलम्।।
एवं वेद्यस्य पृथ्व्यादेरसङ्कीर्णे प्रकाशने।
सामान्यतो विशेषाच्च संविदेव प्रगल्भते।।

---

१. परिमल २. परिमल ३. प्रत्यभिज्ञाकारिका

सापि वेद्यवदन्येन प्रकाश्या चेत् प्रवर्तते।
प्रकाशस्तन्मयो न स्याज्जाड्ययोगाविशेषतः।।
संविदोऽन्यप्रकाश्यत्वे संवित्त्वं लुप्यते न वा।
न चेद् व्यर्थं तदन्यत् स्याद्येन सेयं प्रकाश्यते।।
लुप्यते चेत् किमाकारा सा तेनास्तु प्रकाशिता।
तस्मान्यस्य प्रकाशश्च कुत इत्यवलोकने।।
अन्यदन्यदिति व्यक्तमनवस्थितिरापतेत्।
अतोऽस्याः स्वप्रकाशत्वं स्वभावादेव सिध्यति।।
प्रकाशश्चोक्तया भङ्ग्या स्वप्रकाशो भवन्नपि।
भावमात्रस्वभावत्वे न जाड्यं वेद्यवत् त्यजेत्।।
स्वप्रकाशोऽप्यसौ कश्चित् कर्तृतामश्नुते न चेत्।
अन्यथा त्वर्थवन्नास्य स्वभावः स्यात् प्रकाशनम्।।
ततश्च कर्तृता तस्य स्वात्मविश्रान्तिलक्षणा।
अनिच्छतापि स्वीकार्या यामहन्तां विदुर्बुधाः।।
पार्यन्तिकी प्रतिष्ठाभूर्वेद्यवर्गस्य यो विभुः।
तस्य स्वयंप्रतिष्ठत्वमहम्भावः प्रकीर्त्यते।।
विमर्शश्चायमेव स्यान्मुख्यमैश्वर्यमीशितुः।
अतः स्वतन्त्रो भगवान् सर्वंसह इति स्थितम्।।

ज्वलति—उन शिव की शक्ति विमर्श की जो स्फुरणावस्थारूप दशा है, उसके मुख से अर्थात् औन्मुख्य बल से मलों के (आणव-कार्मण-मायीय मलों के) सञ्चय-प्रकाशरूप शिव के प्रकाश से जल जाते हैं; अतः स्वात्मानुप्रवेश द्वारा स्वीकार कर लिये जाते हैं अर्थात् शिव उन मलों को अपने में लेकर उन्हें भस्म कर देते हैं।[१]

विमर्शदशामुखानीतदह्यमानमलालि—'विमर्श' की दशा (स्फुरणावस्था) के 'मुख' से (औन्मुख्य योग से) मलों (आणव, कार्म एवं मायीय मलों) के समूह (आलि) जल जाते हैं।

शिव प्रकाश-विमर्शस्वभाव हैं—परमेश्वरो हि ज्ञानक्रियारूपतया प्रकाशविमर्शस्वभावः (परिमल)। शिव मङ्गलदीपवत् अन्धकार को या मल को नष्ट कर देता है—

१. दीप अन्धकार को नष्ट कर देता है।

२. शिव अपने प्रकाश से मलों को नष्ट कर देता है।

मल और उसके प्रमाता—

सकल—'आणव मल' 'कार्ममल' एवं 'मायीय मल' तीनों मलों से युक्त प्रमाता

१. परिमल (१०)

ही 'सकल' कहलाता है—मलत्रयोपरक्ता: सकला मायातत्त्वान्तरालवर्तिनो देवादयश्च।[१]

प्रलयाकल—आणवमल एवं कार्मण मल अर्थात् दो मलों से युक्त जीव 'प्रलया-कल' कहलाते हैं—आणवकार्मणमलद्वयानुबद्धा: प्रलयाकला:।[२]

आणव मल—अणुओं का मल।

आत्मज्ञानतृप्तित्व एवं विमर्शशून्यता से रहित मल आणवमल का एक लक्षण है—आणवे च तेषामात्मज्ञातृत्वविमर्शशून्यतानिबन्धनं मलमित्यनुसन्धेयम्।[३]

विज्ञानाकल—एक मल से उपहित प्राणी ही विज्ञानाकल कहलाते हैं—एक-मला: विज्ञानाकला:। 'विज्ञानाकलों' में भी स्वात्मविभ्रष्टृत्व विमर्शशून्यता[४] रहती है। विद्येश्वरों में भी मायीयमात्रानुबन्ध के कारण एकमलत्व होता है। मन्त्रादिक में मलों का ध्वंस हो जाता है।

(क) मलों का क्षयौन्मुख्य 'मन्त्र' से सम्बद्ध है।

(ख) उपक्रम में 'मन्त्रेश्वर' तथा 'विद्येश्वर' स्थित हैं। वासनामात्रोपरक्त मलतायमानाश्रित ही 'शिवतत्त्व' है।

(ग) परमशिव भट्टारक कौन है—सर्वाकारानुत्पन्नमलोल्लासस्तु भगवान् परम-शिवभट्टारक एवेति।[५]

जिसमें तीन में से कोई भी मल उत्पन्न एवं उल्लसित नहीं होते वे ही हैं—परम-शिवभट्टारक। परमशिव में मलत्रय का अवस्थान क्यों नहीं होता? कारण सुस्पष्ट है—

यथा हि वह्निना लीढमिन्धनं तन्मयं भवेत्।
एवं चितासमालीढं चैत्यं चिन्मयतां व्रजेत्।।

भगवान् श्रीकृष्ण ने इसी तथ्य की पुष्टि करते हुये कहा है—

ज्ञानाग्नि: सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।

संविदुल्लासकार की दृष्टि—संविदुल्लास में महेश्वरानन्द कहते हैं—

वेद्योपरागविभवेन विमोह्यमानं
लोहान्तरव्यतिकरादिव व्यक्तकार्ष्ण्यम्।
ज्वालावलीभिरभितप्य विमर्शवह्नि:
स्वच्छं हिरण्यमिव मे हृदयं विधत्ते।।

मलशङ्का का परित्याग ही मलक्षयोपाय है।[६]

१-३. सोपज्ञ परिमल ५. परिमल
४. परिमल (१०) ६. परिमल (१०)

श्रीनिशाकुलकार की दृष्टि—

स्फटिकोपलगो रेणुः किं तस्य कुरुतां प्रिये।
व्योम्नीव नीलं हि मलं मलशङ्का ततस्त्यजेत्।।

विमर्श और विश्वविस्तार

अथ प्रक्रान्तं विमर्शस्वरूपमात्मनः स्वभावतया स्वयमेवोपपादयति—

संतो हिअअपआसो भवणस्य किआए होइ कत्तारो।
सच्चिअ किआ विमरिसो सोत्था खुहिआ अ वीसवित्थारो ॥११॥

(सन् हृदयप्रकाशो भवनस्य क्रियायां भवति कर्ता।
सैव क्रिया विमर्शः स्वस्था क्षुभिता च विश्वविस्तारः।।)

(स्वात्मस्वरूप) हृदस्थ आत्म-प्रकाश ही भवन-क्रिया (विश्व-सृजन) का कर्ता है। यही (हृदय-प्रकाश) जब तक आत्मा में अवस्थित रहता है तब तक (शुद्ध आत्म-स्वभावस्वरूप) 'विमर्श' कहा जाता है और क्षुब्ध होने पर यही विश्व-विस्तार बन जाता है।।११।।

स्वहृदयस्य प्रकाशो हि सर्वस्यास्तीति वक्तव्यम्, असत्त्वे स्वव्याघातप्रसङ्गात्। यथोपनिषत्—

असन्नेव स भवति असद् ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः ।। इति।

तस्मात् स्वात्मरूपो हृदयप्रकाशः। सन्नित्यत्र सम्प्रतिपत्तिरेव। तत्र सन्नित्येतत् प्रकृतितः प्रत्ययतश्च पर्यालोचनीयम्। अस्तेर्धातोः शतरि खल्वेवमुत्पद्यते। तत्र चास्त्यंशस्यार्थो भावनाख्या क्रिया, प्रत्ययांशस्य तु कर्तेत्यङ्गीकार्यम्। ततश्च सन्नित्यस्य भवनलक्षणायाः क्रियायाः कर्तेत्यर्थो भवति। सैव भवनक्रिया कर्तृतामयी विमर्श इत्युच्यते। पुनः क्रियाशब्दोपन्यासेन भवनं सत्त्वम्, तच्च सामान्यरूपम्। ततो न तस्य क्रियात्वमिति वदन्तो निराक्रियन्ते। यतो भावः क्रियेति नीत्या धात्वर्थमात्रस्य क्रियात्वमभ्युपगन्तव्यमित्यावेद्यते। सा च क्रिया—

अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम्।
तथाहि संविदेवेयमन्तर्बाह्योभयात्मना।
स्वातन्त्र्याद् वर्तमानैव परामर्शस्वरूपिणी ।।

इति श्रीस्पन्दतन्त्रालोकस्थित्या यदा स्वस्मिन् हृदयप्रकाशरूप एवात्मनि तिष्ठति, तदा विमर्शः शुद्धो विमर्श इत्येव व्यवह्रियते। यदा तु विकल्पोपश्लेषलक्षणं क्षोभमनुभवति, तदा विश्वविस्तारः प्रपञ्चस्फुरणवैचित्र्यात्मा विमर्श इति

तत्राधिको विशेषणांशः कश्चिदुत्पद्यते। एवं च प्रकाशस्य विमर्शः स्वभाव इत्यङ्गी-कार्यम्। एतद्व्यतिरेकश्च स्वभावभङ्गपर्यायत्वात् तस्याप्रकाशत्वमेव प्रयोजयति। ततश्चायं स्फटिकमुकुरादिवदल्पप्रकाशः स्तम्भकुम्भादिवदप्रकाशो वा स्यादित्युक्तं भवति। किञ्च, सन्नित्यत्र या सत्तोक्ता, सैव चित्त्वमुच्यते। सत्त्वचित्त्वयोश्च साम-रस्यमानन्दः। यदुक्तं श्रीरसान्वये—

या चिद् सत्त्वैव सा प्रोक्ता सा सत्तैव चिदुच्यते।
अत्र चित्सत्तयोर्व्याप्तिस्तत्रानन्दो विराजते।।
यत्रानन्दो भवेद् भावे तत्र चित्सत्तयोः स्थितिः। इति।

आहत्य च सच्चिदानन्दस्वरूपः स्वहृदयात्मा परमेश्वर इत्यवगन्तव्यम्। यदाहुः—

सच्चित्सुखमयः शम्भुस्त्रिरूपः सर्ववस्तुषु। इति।
इत्थमन्तर्बहिर्भाववैचित्र्येऽपि प्रसर्पति।।
यौगपद्यमयीं स्वस्य विप्रकृष्टत्वमयीं स्थितिम्।
अनुशील्य जनः स्वच्छामैश्वरीं श्रियमश्नुते।
एवमेतदुपेक्षायां पाशवेन विमुह्यति।।
यथा यथा विजृम्भेत स्वसंरम्भचमत्क्रिया।
तथा तथा विकल्पानां विक्षोभः क्षयमश्नुते।।
कलयापि विमर्शस्य वीर्यवत्ता विपश्चितः।
तन्व्यापि विषकाकिण्या दुर्लङ्घो हि भुजङ्गमः।। इति।

कर्तृत्व शक्तिसम्पन्नता विश्व-विस्तार की पारमात्मिकी शक्ति ही विमर्श है। जब तक यह हृदय का प्रकाश आत्मस्वरूप रहता है तब तक शुद्ध सत्त्व क्रियात्मक रहता है। जैसे ही इसमें विकल्पों की अभिव्यक्ति प्रारम्भ होती है तभी विश्व का विस्तार प्रारम्भ हो जाता है। 'स्वशक्तिप्रचयो विश्वम्' (शिवसूत्र) भी प्रपञ्च को शक्ति का प्रचय ही घोषित करता है। संसार में व्यक्त असंख्य कार्यों, व्यापारों एवं क्रियाओं के मूल में परमात्मा की क्रियाशक्ति ही व्याप्त है। विश्व-विमर्श (विश्व-विस्तार या विश्व-सृष्टि) में शक्तिमान शिव ही विद्यमान है।

विमर्श-स्वरूप—विमर्श का स्वरूप क्या है? नागानन्द कहते हैं कि अकृत्रिम अहंभाव का स्फुरण या पूर्ण अहंभावना (पूर्णाहन्ता) ही 'विमर्श' है। यह सृष्टि, स्थिति एवं संहार—तीनों में अहमाकाराकारित होकर व्यक्त होती है।

विमर्श परमात्मा की वह शक्ति है, जो कि विश्वाकार में परिणत हो जाती है। विश्व को अपने भीतर स्थित रखती है और विश्व का संहार कर देती है; किन्तु उसके परिणमन—सृजन-स्थिति एवं संहार तीनों में उसका अकृत्रिम अहं ही व्यक्त होता है।

उसके अतिरिक्त कुछ भी नहीं—विमर्शो नाम विश्वाकारेण वा विश्वप्रकाशेन वा विश्वोपसंहारेण वा अकृत्रिमोऽहमिति स्फुरणम्।

परमशिव की जो 'पूर्णाहन्ता' है, वही आख्यान्तर में 'विमर्श' है। 'प्रकाश' विश्वस्वरूप है और 'विमर्श' शक्तिस्वरूप। शक्ति ही परम शिव का 'विमर्श' है। यह परा शक्ति है, जिसमें कर्तुं, अकर्तुं एवं अन्यथाकर्तुं तीनों की शक्तियाँ विद्यमान हैं—विमर्शो हि सर्वंसहः परमपि आत्मीकरोति आत्मानं च परीकरोति उभयम् एकीकरोति एकीकृतं द्वयमपि न्यग्भावयति इत्येवंस्वभावः। 'विमर्श' एक नैसर्गिकी स्फुरत्ता है, शिव की शक्ति है। यह वह शक्ति है, जिसके द्वारा शिव जगत् की उत्पत्ति, पालन एवं संहार करते हैं। अन्त्य 'ह'वाच्य कला भी विमर्श है—

> नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्तिः।
> तद्योगादेव शिवो जगदुत्पादयति पाति संहरति।।[1]
> अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः।
> हकारोऽन्त्यः कलारूपः विमर्शाख्यः प्रकीर्त्तितः।।

शिव तत्त्व प्रकाशात्मा है और 'विमर्श' ही इसका स्वभाव है।

सृष्टि की अवस्था में विश्वाकार होने के द्वारा, स्थिति की अवस्था में प्रकाशन के द्वारा तथा संहार की अवस्था में आत्मसात् करने के द्वारा शिव में जो पूर्ण अकृत्रिम अहंभाव है, उसे ही 'विमर्शशक्ति' कहते हैं। यदि शिव में विमर्श शक्ति न हो तो शिव अनीश्वर या जड़ हो जायेंगे। 'विमर्श' के अनेक पर्याय हैं; यथा—कर्तृत्व, स्फुरत्ता, चित्, परावाक्, चैतन्य एवं परमात्मा का मुख्यैश्वर्य आदि।

इस शक्ति के अनन्त रूप हैं; किन्तु इन्हें पाँच वर्गों में विभाजित किया गया है, जो इस प्रकार है—

१. चित्शक्ति ३. इच्छाशक्ति ५. आनन्दशक्ति
२. आनन्दशक्ति ४. ज्ञानशक्ति

उत्पलदेवाचार्य की दृष्टि—आचार्य उत्पलदेव प्रत्यभिज्ञाकारिका में कहते हैं कि अवभास का स्वभाव ही विमर्श कहा जाता है—स्वभावमवभासस्य विमर्शं विदुरन्यथा। यह चेतन तत्त्व है, चैतन्य है, चित्क्रिया है, चितिकर्तृता है; चिति, प्रत्यवमर्शात्मा, परावाक्, स्वातन्त्र्य, ऐश्वर्य स्फुरत्ता, सार एवं परमेष्ठी का हृदय है—

> आत्मा त एव चैतन्यं चित्क्रिया चितिकर्तृता।
> चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता।
> स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः।। (१.४)

---

१. वरिवस्यारहस्यम्

सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।। (१.४५)

उत्पलदेवाचार्य कहते हैं कि 'विमर्श' तो चिद्रूप परमात्मा का मुख्य स्वभाव है और यह (स्वभावस्वरूप) 'विमर्श' ज्ञान-क्रियायुक्त है—

स एव विमृशत्वेन नियतेन महेश्वरः।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः।। (१.८८)

अर्थात् स परमात्मा चिद्रूपो विमर्शाख्येनैव मुख्यस्वभावेनाव्यभिचारिणा महेश्वरश्चित्तत्त्वस्य विश्वात्मनः शिवसंज्ञस्याहंविमर्शनमेव शुद्धे ज्ञानक्रिये (प्र. का. वृत्ति)।

'आत्मविमर्शरूपा अनादिनिधना प्रभोः स्वभावभूता'। पुण्यानन्दनाथ कहते हैं कि महेश सृष्टिप्राक् अवस्था में 'विमर्श' को अन्तर्लीन करके रखते हैं—अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः।

विमर्श की व्याख्या करते हुये नटनानन्दनाथ कहते हैं कि 'विमृश्यते परामृश्यते इदमिति विमर्शः प्रपञ्चः'। परमात्मा द्वारा सृष्ट विश्व का जो परामर्श है, वह प्रसिद्ध परामर्श है—इदम्, इदमित्येव हि परमात्मना सृष्टस्य जगतः प्रसिद्धपरामर्शः। इदमित्येव हि प्रपञ्चपरामर्शो दृश्यते। एवंभूतो विमर्शः प्रपञ्चः। विमर्शः पूर्णाहम्भावना।

सारांश यह कि पूर्णाहम्भावनायुक्त (पूर्णाहन्तायुक्त) होकर प्रपञ्च की अहमाकार भावना करना ही 'विमर्श' है। यह जगदात्मैक्यसंवलित विमर्श महेश्वर की अपनी शक्ति है। यही 'विमर्श' महेश्वर की वास्तविक क्रियाशक्ति है; इसीलिये 'महार्थमञ्जरी' में कहा गया है—सैव क्रिया विमर्शः।

प्रकाश और विमर्श परस्पर सर्वथा अभिन्न हैं; अतः ये दो होकर भी अद्वैत हैं और अद्वैत होकर भी दो जैसे प्रतीत होते हैं। यह आत्मास्वरूप परासंवित् ही समस्त भावों में—निःशेष सत्ताओं में—व्याप्त है। इसे ही चिति या आत्मा कहा गया है और यह आत्मा इतनी व्यापक है कि ऐसा कोई भाव नहीं है, जहाँ यह व्याप्त न हो। आचार्य सोमानन्दपाद ने शिवदृष्टि में कहा है—

आत्मैव सर्वभावेषु स्फुरन्निर्वृत्तचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद् दृक् क्रियः शिवः।। (प्र. आ.-२)

प्रतिज्ञा—सर्वभावेषु स्वात्मैव इति व्यवहर्तव्यम् इति प्रतिज्ञा।

हेतु—निर्वृतचिदित्यादिविशेषणकलापो हेतुः।

प्रमाण—स्फुरन्निति धर्मिणो हेतोश्च स्वसंवेदनप्रत्यक्षं प्रमाणम्।

निगमन—अतएव स्फुरन्निति पृथक्पदम्। निर्वृतचित्त्वाद्येव च शिवत्वमित्यर्थाच्छिवलक्षणमपि दर्शितम्। तस्मिंश्च सिद्धे विषये शिवत्वव्यवहारमात्रं तद्विषयं साध्यते।

यही आत्मा शिव है और उसका विमर्श ही शक्ति है। शक्ति एवं शक्तिमान दोनों अभिन्न हैं। आचार्य सोमानन्दपाद 'शिवदृष्टि' में इसकी पुष्टि करते हुये कहते हैं कि—

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथा भावानिच्छया कर्तुमीहते।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते।।

'शक्ति' की समवेतता के कारण ही शिव शक्तिमान एवं कर्ता बनता है। 'शक्ति' आत्मस्वरूप परमशिव का विमर्श है। यही विमर्श नाम्नी शक्ति अघटनघटनापटीयसी (कर्तुं, अकर्तुं, अन्यथाकर्तुं) शिव की अपनी शक्ति है। 'शिवदृष्टि' में कहा गया है कि जिस प्रकार कुम्भकार (कर्ता) का कार्य 'घट' है, उसी प्रकार कार्यों को उत्पन्न करने वाली (परमशिव की) इच्छाशक्ति ही 'विमर्श' है—

यथा कर्तुः कुलालादेर्घटः कार्य इतीदृशः।
विमर्श इच्छारूपेण तद्वदत्रापि संस्थितम्।। (३.८४)

परमात्मा शिव अपने इसी 'विमर्श' शक्ति की सहायता से सब कुछ कर सकने की क्षमता के कारण 'स्वतन्त्र' है और उनकी शक्ति का नाम है—स्वातन्त्र्य शक्ति। परमशिव की स्वतन्त्र इच्छाशक्ति ही (परोन्मुखी, परापेक्षी न होने के कारण) स्वतन्त्र इच्छा (स्वातन्त्र्य) शक्ति कहलाती है। परमशिव की इच्छा परोन्मुख नहीं है; किन्तु अन्य प्राणियों की इच्छा परोन्मुखी (परापेक्षी) है। प्रत्येक अपूर्ण सत्ता दूसरे की सहायता से ही अपना कार्य निष्पादित कर पाती है; अतः अपूर्ण कहलाती है।

परमशिव की यह अन्यापेक्षारहितत्व (निराशंज्ञता, आकांक्षा का अभाव) ही आत्मा की पूर्णता है। इसी कारण इसे स्वतन्त्र कहा जाता है।

स्वात्मविश्रान्ति—परमशिव (स्वतन्त्र आत्मा) अपने-आपमें ही विश्रान्त रहता है। उसकी यह स्वात्मविश्रान्ति ही उसका पूर्ण आनन्द है—

स्वात्मविश्रान्तिरेवैषा देव-स्यानन्द उच्यते।

शिव से लेकर पृथ्वी-पर्यन्त छत्तीस तत्त्वों में अभेदरूप से स्फुरित आत्मा का इच्छाप्रसार ही उसकी विश्वात्मकरूपता है। इसे ही शैवागम में विमर्श कहा गया है। 'शक्ति' का स्फार ही विश्व है और शक्ति ही है—शिव की आन्तरिक स्वातन्त्र्य शक्ति या विमर्श। 'शक्तिप्रचयोऽस्य विश्वम्' (शिवसूत्र) द्वारा इसी तथ्य की अभिव्यक्ति की गई है। यह भी ध्यातव्य है कि परमात्मा शिव (परमशिव) की इच्छा, ज्ञान, क्रिया—तीनों अपृथक् हैं। इसीलिये कहा गया है कि—

न क्रियारहितं ज्ञानं न ज्ञान-रहिता क्रिया। (नेत्रतन्त्र)

ज्ञान एक क्रिया है; अतः उसका कोई कर्ता होना आवश्यक है। वही कर्ता (क्रिया

का आश्रय) शिव है। परमशिव की इच्छा से ही ज्ञान एवं क्रिया—दोनों का उद्भव हुआ है। अतः परमात्मा की इच्छा चिकीर्षारूपात्मिका है और उसी में सब कुछ निहित है। विश्व परमशिव (आत्मा) का शक्तिसंघात है। प्रकाश आत्मा का स्वरूप है और विमर्श प्रकाशात्मा परमात्मा के स्वस्वरूप की प्रतीति है। यह विमर्श ही प्रकाश की अपनी प्रकाशकता एवं महेश्वरता की पूर्ण प्रतीति है—

स एव विमृशत्वेन नियतेन महेश्वरः।

परासंवित्, प्रकाश एवं विमर्श—प्रकाश और विमर्श परस्पर पूर्णतः अभिन्न हैं। दोनों में से कोई भी अकेला एक अपना पृथक् अस्तित्व नहीं रखता। एक के अभाव में दूसरे की कल्पना सम्भव ही नहीं है।

एक ही तत्त्वातीत परमशिव अन्तर्जगत् एवं बाह्य जगत् में अर्थात् सर्वत्र व्याप्त है। यह सम्यक् चिद्रूप है; इसीलिये इसे 'चिति' या 'परासंवित्' कहा गया है।

शिवसूत्रों का आद्य सूत्र 'चैतन्यमात्मा' है। इस सूत्र के माध्यम से चिति या परम-शिव को आत्मा कहा गया है अर्थात् वसुगुप्ताचार्य ने शिवसूत्रों में चिति या परमशिव को ही आत्मा ही आख्या दी है। सर्वचैतन्यवादी आचार्य वसुगुप्त और उनका 'शिवसूत्र' शिव से लेकर धरणी-पर्यन्त सभी तत्त्वों का अवस्थान चैतन्य में स्वीकार करता है और चैतन्य को आत्मस्वरूप मानता है। यही वह परात्पर परतत्त्व है, जिसमें छत्तीस तत्त्वों की समष्टि के स्वरूप वाला विश्व अवस्थित है। इस चैतन्यस्वरूप आत्मा से श्रेष्ठतर एवं महत्तर विश्व में कोई भी नहीं है। इसी के कारण इसको 'परमशिव' या 'परा संवित्' एवं 'अनुत्तर' आदि कहा गया है। अभिनवगुप्त तन्त्रालोक (भाग-३) में इसी चैतन्य तत्त्व को परासंवित् कहते हैं—चितिस्तुर्यातीतपदात्मिका परा संवित्[१] इसी परतत्त्वात्मक परासंवित् में षट्त्रिंशदात्म विश्व अवस्थित है—यत् परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्म जगत्।[२]

परात्रिंशिकाविवृति में इसी चिद्घन को अनुत्तर तत्त्व कहा गया है—अनुत्तरं न विद्यते प्रकृष्टमुत्तरं यतस्तदनुत्तरं चिद्घनम्।[३] जिस प्रकार प्रकाशमान प्रकाश से पृथक् नहीं रह सकता, उसी प्रकार प्रकाश भी विमर्श से पृथक् कल्पित नहीं किया जा सकता—प्रकाशमानं न पृथक् प्रकाशात्। स च प्रकाशो न पृथग् विमर्शात्।[४] प्रकाश एवं प्रकाश-मान में जो अविनाभाव सम्बन्ध है, वही प्रकाश एवं विमर्श में है। प्रकाश ही आत्मा है, चिति ही आत्मा है, चैतन्य ही आत्मसंवित् है तथा इस प्रकाशरूप परमात्मा के स्वरूप की प्रतीति ही विमर्श है। महेश्वर के माहैश्वर्य की पूर्ण प्रतीति ही विमर्श है।

प्रकाश शिव है और विमर्श उसकी शक्ति है। विमर्श परमशिव की पूर्णाहन्ता है,

---

१. तन्त्रालोक (भाग-३)
२. परमार्थसारकारिका
३. परात्रिंशिकाविवृति
४. विज्ञानभैरवविवृति

पूर्ण अहम् की प्रतीति है—या स्वस्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम्[१]। शिव और शक्ति का नित्य सामरस्य ही परमशिव है। आचार्य उत्पलदेवाचार्य प्रत्य-भिज्ञाकारिका में कहते हैं कि शिव के विना शक्ति का अस्तित्व सम्भव नहीं है और शक्ति से व्यतिरिक्त होकर तो शिव स्फटिक आदि की भाँति जड़ हो जायेगा; क्योंकि स्फटिक प्रकाशस्वरूप होकर भी अपनी सत्ता की प्रतीति (विमर्श) नहीं कर सकता। इसीलिये उत्पलदेव कहते हैं कि 'अवभास' का स्वभाव ही विमर्श है और इसके विना 'प्रकाश' स्फटिक मणि आदि की भाँति अर्थोपरक्त होने पर भी (तदवत्) मात्र जड़ बनकर रह जायेगा—

स्वभावमवभासस्य विमर्शं विदुरन्यथा।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः।।[२]

सन् हृदय प्रकाशो = अपने-अपने हृदय का प्रकाश तो सभी जीवों में विद्यमान है; क्योंकि असत्त्व (उसके न होने) की बात तो स्वव्याघात होगा—

असन्नेव स भवति असद् ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः।।

अतः हृदयप्रकाश स्वात्मरूप है।

भवनक्रिया = कर्तृतामयी विमर्श, भावनाख्या क्रिया। सन् = सम्प्रतिपत्ति (विद्यमानता, उपस्थिति)। यहाँ अस्त्यंश का अर्थ भावनाख्या क्रिया है। प्रत्ययांश कर्ता है। 'सन्' = भवन लक्षण वाली क्रिया का कर्ता। भवन क्रिया ही 'विमर्श' है—

अवस्थायुगलं चार्यकार्यकर्तृत्वशब्दितम्।
तथा हि संविदेवेयमन्तर्बाह्योभयात्मना।
स्वातन्त्र्याद् वर्तमानैव परामर्शस्वरूपिणी।।[३]

(क) जब हृदय प्रकाशरूप अपनी आत्मा में स्थित रहता है तब शुद्ध विमर्श कहा जाता है—यदा स्वस्मिन् हृदयप्रकाशरूप एवात्मनि तिष्ठति, तदा विमर्शः शुद्धो विमर्श इत्येव व्यवह्रियते।[४]

(ख) जब यह विकल्पोश्लेषलक्षणात्मक क्षोभ का अनुभव करता है तब यह विश्वविस्तार—प्रपञ्चस्फुरण-वैचित्र्यात्मा 'विमर्श' कहलाता है। विमर्श प्रकाश का स्वभाव है—प्रकाशस्य विमर्शः स्वभाव इत्यंगीकार्यम्। इसका व्यतिरेक स्वभावभङ्ग होने के कारण अप्रकाशत्व कहलायेगा। इस स्थिति में यह प्रकाश स्फटिक, मुकुर की भाँति अल्पप्रकाश एवं स्तम्भ-कुभादिक के रूप में प्रकाशहीन कहलाता है। मुख्य तत्त्व

१. अजडप्रमातृसिद्धि
२. प्रत्यभिज्ञाकारिका (१.४२)
२. स्पन्दकारिका
४. परिमल

है—चित्तत्त्व; जो कि प्रकाशात्मक एवं क्रियात्मक दोनों है। 'आनन्द' क्या है? सत्व + चित्त्व का सामरस्य ही 'आनन्द' है—सत्त्वचित्त्वयोश्च सामरस्यमानन्दः।[१]

श्रीरसान्वयकार की दृष्टि—श्रीरसान्वय में कहा गया है—

या चित् सत्तैव सा प्रोक्ता सत्तैव चिदुच्यते।
अत्र चित्सत्तयोर्व्याप्तिस्तत्रानन्दो विराजते।
यत्रानन्दो भवेद् भावे तत्र चित्सत्तयोः स्थितिः।।

सत् चित् एवं आनन्द (सच्चिदानन्द) **का अन्तःसम्बन्ध**—

१. जहाँ-जहाँ सत् है, वहाँ-वहाँ चित् तत्त्व भी है—सर्वचिन्मयवाद की पुष्टि।

२. जहाँ-जहाँ चित् तत्त्व है, वहाँ-वहाँ सत् तत्त्व भी है।

(क) चित् तत्त्व ही सत् तत्त्व है।

(ख) सत् तत्त्व ही चित् तत्त्व है।

३. जहाँ चित् तत्त्व एवं सत् तत्त्व दोनों हैं, वहाँ आनन्द तत्त्व भी है—यत्रानन्दो भवेद् भावे तत्र चित्सत्तयोः स्थितिः।[२]

यह भी ध्यातव्य है कि पहले आनन्दतत्त्व है और बाद में इच्छातत्त्व। आनन्दतत्त्व में क्षोभ आने पर ही इच्छातत्त्व का उन्मेष होता है; अतः यथार्थ आनन्द इच्छा में नहीं, इच्छातीतावस्था (आनन्दावस्था) में है। सांसारिक आनन्द इच्छात्मक है, आनन्द नहीं, आनन्द का संक्षोभ है। परनिरपेक्ष 'स्वातन्त्र्य' ही आनन्द है। आनन्द ब्रह्म है। स्वहृदयात्मा परमेश्वर सच्चिदानन्दस्वरूप है। यह सच्चिदानन्दात्मक स्वहृदयात्मा ही परमेश्वर है—सच्चिदानन्दस्वरूपः स्वहृदयात्मा परमेश्वर इत्यवगन्तव्यम्। कहा भी गया है—

सच्चित्सुखमयः शम्भुस्त्रिरूपः सर्ववस्तुषु।
इत्थमन्तर्बहिर्भाववैचित्र्येऽपि प्रसर्पति।।
यौगपद्यमयीं स्वस्य विम्रष्टृत्वमयीं स्थितिम्।
अनुशील्यजनः स्वच्छामैश्वरीं श्रियमश्नुते।
एवमेतदुपेक्षायां पाशवेन विमुह्यति।।
यथा यथा विजृम्भेत स्वसंरम्भचमत्क्रिया।
तथा तथा विकल्पानां विक्षोभः क्षयमश्नुते।।
कलयापि विमर्शस्य वीर्यवत्ता विपश्चितः।
तन्व्यापि विषकाकिण्या दुर्लङ्घो हि भुजङ्गमः।।[३]

---

१. परिमल

२. परिमल

३. परिमल (महेश्वरानन्द)

विमर्शोन्मेष और जगत्

ननु विश्वव्यवहारो हि बहिर्ग्राह्यार्थतया वर्तमानः कथमात्मस्वभावो विमर्शः स्यादित्याशङ्क्याह—

पुहुवीपरमसिवाणं पच्चाहारे पआसपरमत्थे।
जो अण्णोण्णविसेसो सो च्चिअ हिअअस्स विमरिसुम्मेसो ॥१२॥

(पृथ्वीपरमशिवयोः प्रत्याहारे प्रकाशपरमार्थे।
योऽन्योन्यविशेषः स एव हृदयस्य विमर्शोन्मेषः।।)

पृथ्वी और परमशिव के मध्य एक-दूसरे से (तत्त्वसंघातरूप) जो प्रकाश है, वही हृदय में स्थित विमर्श शक्ति का विश्वोल्लासस्वरूप 'उन्मेष' है।।१२।।

इह हि विश्वव्यवहारानुबन्धी सर्वोऽपि सम्बन्धः कार्यकारणमात्रपर्यवसायी। कारणं च पर्यन्ततः परमशिवात्मा कर्तेति स्वीकार्यम्, यतः संयोगसमवायौ तदनुबन्धिनोऽन्येऽपि सम्बन्धाः संयोजकाद्यवान्तरकर्तृसद्भावेऽपि पर्यन्ततः परमेश्वरेच्छानुविधायितया तस्यैव कर्तुः कार्यतयाऽनुभूयन्ते। अन्यथा द्वयोः पदार्थयोरन्योन्यप्राप्तिरूप एकः सम्बन्ध इत्युक्तौ कथमेकत्रोपक्षीणाशेषशरीरभारोऽयमन्यद्वस्तु स्प्रष्टुमपि प्रगल्भेत। अवैषम्येण च द्वयोर्वृत्तौ कथं सम्बन्ध एव द्विधाभावादसम्बन्धकल्पो न स्यात्। यत्र पुनः समवायादौ लौकिकस्य कर्तुरनुपलम्भः, तत्र परमेश्वर एव कर्तेत्यभ्युपेयम्। नित्योऽपि समवायः परमेश्वरकर्तृकतां नातिक्रामति। क्षणमात्रमगुणं तिष्ठतीति स्थित्या द्रव्याणां क्षणनिर्गुणत्वस्य तैरेवोक्तत्वात् तत्संयोजनवियोजनवैदग्ध्यं तस्यैवेति सिद्धम्। अपि च, अमी संयोगसमवायादयः स्वस्वोचितविषयव्यतिरेकेणान्यत्र न क्वचिदपि प्रवर्तन्त इत्यभ्युपेयम्। अन्यथाऽतिप्रसङ्गात्। तच्चौचित्यं किंवपुरिति पर्यालोचने द्रव्यगुणादिसम्बन्धिस्वभावाद्यतिक्रान्तमन्यदेव तत्त्वमित्यास्थेयम्, यदस्माभिः पारमेश्वरं स्वातन्त्र्यमित्याक्रन्द्येत इति सर्वस्यापि प्रपञ्चस्य तत्कार्यतायां न विप्रतिपत्तिः। सामान्यादीनां च लोकमर्यादया नित्यानामपि परमेश्वरापेक्षया कार्यत्वमेव, येनाकाशस्य नित्याभिमतस्यापि 'तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः' इति श्रुत्या कार्यत्वमासूत्र्यते। उपलक्षणं चैतत्। अतश्च विश्वलक्षणस्यास्य कार्यस्य परमेश्वरः कर्तेति भङ्ग्या कार्यकारणभावोऽयं कर्मकर्तृभावपरमार्थ इत्युक्तं भवति। कारणत्वं च पर्यालोच्यमानं जडस्य नोपपद्यते, मृद्दण्डचक्रादिसामग्रीसद्भावेऽपि कुलालाद्यौदासीन्ये कुम्भाद्यनुत्पत्तेः। बीजादङ्कुर उत्पद्यते इत्यादौ तु कर्तृविशेषानवलोकनेऽप्यङ्कुरस्य तावत् तादृक् सामर्थ्यं न सम्भवति, तस्य तदा सत्त्वाभावात्। बीजस्य तत्सामर्थ्यमिति चेत्? न। कथमङ्कुर उत्पद्यत इति सामर्थ्यं वैयधिकरण्येन बीजस्येत्युच्यते।

किञ्च, तद् बीजं सन्तं वा अङ्कुरमुत्पादयति, असन्तं वा? सन्तं चेत्, कोऽयमत्रोत्पादनरूपोऽर्थः, प्रागेव तत्सत्त्वस्योक्तत्वात्। यद्यसन्तम्, कथं सत्त्वासत्त्वे तत्र न विरुध्येयाताम्। तदभ्युपगमे वा कथं नातिप्रसङ्गः। अतः कश्चिदजड एव कारणं कार्यवर्गस्य। तच्चाजाड्यमस्य कर्तृत्वमेव। यच्च क्वचित् कुलालादीनां कर्तृत्वम्, तत्रापि—

तथा हि कुम्भकारोऽसावैश्वर्येव व्यवस्थया।
तत्तन्मृदादिसंस्कारक्रमेण जनयेद् घटम्॥

इति श्रीप्रत्यभिज्ञाप्रक्रियया यत्स्वातन्त्र्यादमी मृदैव घटस्तन्तुभिरेव पट इति व्यवस्थामनुवर्तन्ते, न पुनर्व्यत्यासेन कर्तुं शक्नुवन्ति, तत्र स एव कर्तेति कुलालादीनां कुम्भाद्यपेक्षया किञ्चिदजाड्येऽपि परमेश्वरापेक्षया जाड्यमेवेति सुष्ठूक्तं कार्यकारणभाव एव सर्वे सम्बन्धाः, कारणं च कर्तैवेति। एवं च सति तत्र परमशिवादुपरि न कर्त्रन्तरस्फुरणम्, पृथिव्या उपरि न कार्यान्तरोत्पत्तिश्च। तयोर्यः प्रतिपदार्थमानुपूर्व्येण व्यवह्रियमाणो बुद्ध्याकृष्यमाणो मध्यवर्ती तत्त्वसंघातरूपोऽर्थः, तस्य प्रत्यक्षादिप्रमाणोपगृह्यमाणस्य पर्यन्ततः प्रकाश एवानुप्राणनतया स्वभाव इत्यन्वयव्यतिरेकाभ्यामवधार्यते, अन्यथा चक्षुरादिसामग्र्यामपि तेषामप्रकाशमानत्वापत्तेः। यदुक्तं नरेश्वरविवेके—

न प्रथेताप्रथारूपं नाश्वेतं श्वेतते यथा। इति।

यथा च श्रीतन्त्रालोके—

न ह्यप्रकाशरूपस्य प्राकाश्यं वस्तुतापि च। इति।

ततश्चान्तःस्थः स्वात्मप्रकाश एव बहिः प्रकाश्यप्रपञ्चतया स्फुरतीत्येतत् तावदभ्युपगन्तव्यम्। ततश्च षट्त्रिंशतोऽपि तत्त्वानां प्रकाशस्वभावत्वाविशेषात् पृथिव्याप इत्यादिरन्योन्यविशेषतो व्यवहारो न सम्भवति। व्यवह्रियते च विशेषः प्रत्यक्षमेव लोकेन। अन्यथा जलस्थलविभागादेरर्थक्रियां प्रत्यनियमापत्तेः। स च विशेषः स्वहृदयगतया विमर्शसत्तयैवोत्पद्यते। उत्पत्तिश्च तादात्म्ये पर्यवस्यति। यद् यज्जातं तत् तदेव हीत्युक्तत्वात्। उन्मेषपदेनैतदाह—स्वात्मविमर्शद्रुमस्य पल्लवपुष्पादिप्रायमेतद् विश्ववैचित्र्यस्फुरणमिति। एतेन परापरप्रमात्रोः प्रकाशविमर्शानुप्राणनत्वं पर्यन्ततस्तयोरैकात्म्यं च व्याख्यातम्। परमशिव इति। उक्तरूपं चास्य स्वातन्त्र्यं विश्वोत्तीर्णत्वमात्रे विश्राम्यति, न पुनर्विश्वमयविश्वोत्तीर्णत्वलक्षणे परमस्वातन्त्र्यसम्पत्साम्राज्ये, तादृक्स्वभावस्य च प्रत्याहारानौचित्यात्, प्रत्युत तस्य प्रत्याहर्तृत्वमेव स्वभाव इति॥१२॥

महेश्वरानन्द पूछते हैं कि विश्व का व्यवहार तो बहिर्ग्राह्यार्थ रूप में स्थित है; फिर

क्यों कहा गया है कि 'विमर्श' आत्मस्वभावात्मक है—कथमात्मस्वभावो विमर्शः। इसी शंका के निराकरणार्थ १२हवीं गाथा कही गई हैं।

पृथ्वी सृष्टि का अन्तिम स्थूलतम पदार्थ एवं कार्य है और परमशिव सारे कारणों का परम कारण है। 'पृथ्वी परमशिवयोः'—पृथ्वी एवं परमशिव में अर्थात् अन्तिम कार्य एवं आदि कारण (परमशिव) के मध्य।

१. परमार्थ = कार्यकारणभावोऽयं कर्मकर्तृभावपरमार्थ इत्युक्तं भवति।

२. कार्य = विश्वविलक्षणास्य कार्यस्य। विश्वव्यवहार।

३. कर्त्ता = कर्ता परमेश्वरः। कारणं च कर्तैवेति।

४. कारणत्व = पर्यालोच्यमान जड़ तो कारण हो ही नहीं सकता। कोई चेतन ही 'कारण' हो सकता है और वह है—परमशिव।

कश्चिज्जड एव कारणं कार्यवर्गस्य।
परमशिवादुपरि न कर्त्रन्तरस्फुरणम्।।

प्रश्न—बाह्य प्रपञ्चरूप कार्य क्या है? अन्तःस्थः स्वात्मप्रकाश एव बहिःप्रकाश्य प्रपञ्चतया स्फुरतीति।

५. विमर्श = परमशिव का पूर्ण अहं ही विमर्श है। 'प्रकाश' शिवरूप है और 'विमर्श' शक्तिरूपा है।

६. पृथ्वी परमशिवयोः—शैवागम के छत्तीस तत्त्वों में प्रथम तत्त्व 'शिवतत्त्व' है और अन्तिम तत्त्व 'पृथ्वी' है।

शैवागम के छत्तीस तत्त्व

- अभेद भूमिका (शिव-शक्ति) **(दो तत्त्व)**
- भेदाभेद भूमिका। सदाशिव ईश्वर। शुद्ध विद्या तत्त्व **(तीन तत्त्व)**
- भेदभूमिका। माया, कला, विद्या, राग, काल, नियति, पुरुष, प्रकृति, बुद्धि, अहंकार, मन, पाँच ज्ञानेन्द्रियाँ, पाँच कर्मेन्द्रियाँ, पाँच तन्मात्रायें, पाँच महाभूत **(इकतीस तत्त्व)**

तयोः—बुद्ध्याकृष्यमाणो मध्यवर्ती तत्त्वसंघातरूपोऽर्थः। उनका स्वभाव क्या है? 'प्रकाश'।

विशेषः—व्यवह्रियते च विशेषः प्रत्यक्षमेव लोकेन। लोक द्वारा प्रत्यक्ष रूप में व्यवहृत।

यह विशेष स्वहृदयस्थ 'विमर्श' से ही उत्पन्न होता है।

उन्मेष—स्वात्मविमर्शद्रुम का विश्ववैचित्र्यरूप स्फुरण।

विमर्श के दो पृथक्-पृथक् रूप—१. आत्मस्वभावविमर्श एवं २. विश्व-विमर्श—ये दोनों एक नहीं हो सकते।

विश्वविस्तार हृदयप्रकाश की बाह्याभिव्यक्ति है तथापि यह हृदयप्रकाशरूप परमात्मा एवं उसकी बाह्याभिव्यक्तिस्वरूप (प्रकाश्य) वेद्योल्लास एक (अभिन्न) नहीं हैं, उनमें व्यावहारिक भेद तो है ही।

औपनिषदिक मत (कार्य-कारणवाद के विषय में)—सृष्टि के मूलभूत तत्त्व आकाश आदि भी जगत् के कारण नहीं हैं; प्रत्युत किसी कर्ता (आत्मा/परमात्मा) के कार्य हैं; इसीलिये उपनिषदों में कहा गया है—

तस्माद् वा एतस्मादात्मन आकाश: सम्भूत:।

अर्थात् सृष्टि-निर्माण करने वाला प्रथम पदार्थ आकाश भी 'आत्मा' से उत्पन्न होने के कारण जगत् का कर्ता नहीं; प्रत्युत एक कार्य है। कर्ता परमेश्वर है—

विश्वलक्षणस्यास्य कार्यस्य परमेश्वर: कर्तेति।

प्रश्न—जड़तत्त्व को 'कारण' एवं 'कर्ता' क्यों न स्वीकार कर लिया जाय?[1]

महेश्वरानन्द कहते हैं कि मृत्तिका, दण्ड, चक्र आदि (भाण्ड-निर्माण की सामग्री) रहते हुये भी कुलाल (कुम्भकार) के न रहने पर कुम्भ का निर्माण सम्भव नहीं हो पाता; अत: सर्वकर्ता परमेश्वर के विना कार्य (जगत्) कैसे निर्मित हो सकता है? यह कर्ता कोई चेतन ही हो सकता है, जड़ नहीं—[2]

कश्चिदजड एव कारणं कार्यवर्गस्य।
तच्चाजाड्यमस्य कर्तृत्वमेव।।

श्रीप्रत्यभिज्ञाकारिकाकार की दृष्टि—प्रत्यभिज्ञा में कहा गया है कि—

तथा हि कुम्भकारोऽसावैश्वर्येव व्यवस्थया।
तत्तन्मृदादिसंस्कारक्रमेण जनयेद् घटम्।।

सृजन की एक व्यवस्था-प्रक्रिया है। मिट्टी से ही घट बन पाता है और तन्तुओं से ही पट बन पाता है; व्यत्यास से निर्माण सम्भव नहीं है।[3]

कुलाल घट की अपेक्षा तो जड़ नहीं है; किन्तु परमेश्वर की तुलना में तो जड़ है ही। सारे सम्बन्ध कार्य-कारणभावस्वरूप हैं और कारण ही कर्ता है। इस प्रकार चिन्तन करने पर यही निष्कर्ष निकलता है कि परमशिवादुपरि न कर्त्रन्तरस्फुरणम्।

अर्थात् परमशिव से ऊपर अन्य कोई कर्ता नहीं है। पृथ्वी के बाद कार्यान्तरोत्पत्ति नहीं है।

---

१. परिमल २. महेश्वरानन्द ३. स्वोपज्ञ परिमल

चितिः स्वतन्त्र विश्वसिद्धिहेतुः।[1] अर्थात् स्वतन्त्र चिति ही सृष्टि, स्थिति एवं लय का हेतु है। आचार्य क्षेमराज कहते हैं—

१. विश्वस्य सदाशिवादेः भूम्यन्तस्य सिद्धौ निष्पत्तौ प्रकाशने स्थित्यात्मनि, परप्रमातृ-विश्रान्त्यात्मनि च संहारे, पराशक्तिरूपा 'चितिः' एव भगवती स्वतन्त्रा अनुत्तर-विमर्शमयी शिवभट्टारकाभिन्ना हेतुः कारणम्।

२. चिति शक्ति से भिन्न अन्य कोई भी सत्ता जगत् का कर्ता नहीं है—ननु जगदपि चितो भिन्नं नैव किञ्चित्।

३. यदि मात्र अभेद है, भेद है ही नहीं तो हेतुहेतुमद्भाव कैसा?

४. यहाँ कैसा कार्य कारणभाव है?

५. यहाँ का कार्य-कारणभाव पारमार्थिक है—चिदेव भगवती स्वच्छस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरति—इत्येतावत्परमार्थोऽयं कार्यकारणभावः।

६. प्रकाशरूपा चितिरेव हेतुः न त्वसौ कश्चित्।

७. अन्यस्य तु माया प्रकृत्यादेः चित्प्रकाशभिन्नस्य अप्रकाशमानत्वेन असत्त्वान्न कश्चिदपि हेतुत्वम्। प्रकाशमानत्वे तु प्रकाशैकात्म्यात् प्रकाशरूपा चितिरेव हेतुः न त्वसौ कश्चित्।

सारांश यह कि माया, प्रकृति आदि अप्रकाशमान हैं; अतः कारण नहीं बन सकते। केवल प्रकाशात्मा चिति ही विश्व का मूल कारण है।

८. 'स्वेच्छया स्वभित्तौ समुन्मीलयति' (शक्तिसूत्र-२) अर्थात् चिति शक्ति स्वेच्छा-पूर्वक स्वात्मारूप भित्ति पर विश्व का उन्मीलन करती है।

अवस्थित वस्तु का प्रकटीकरण ही 'उन्मीलन' है, अतः जगत् का प्रकाशैकात्म्येन अवस्थान है—

१. उन्मीलनं च अवस्थितस्यैव प्रकटीकरणम्।

२. इत्यनेन जगतः प्रकाशैकात्म्येन अवस्थानम् उक्तम्।[2]

'प्रकाश' ही सभी को अनुप्राणित करता है; अतः वही सबका स्वभाव है—'प्रकाश एवानुप्राणनतया स्वभाव इति। अन्यथा चक्षु आदि भी (अप्रकाशमान होने के कारण) सृष्टि का कारण नहीं बन सकते।

नरेश्वरविवेककार की दृष्टि—नरेश्वरविवेक में कहा गया है कि जो अप्रथात्मक है, उसका प्रथन सम्भव नहीं है तथा जो श्वेत नहीं है, उसे श्वेत नहीं किया जा सकता—

न प्रथेताप्रथारूपं नाश्वेतं श्वेतते यथा।

तन्त्रालोककार की दृष्टि—जो अप्रकाशरूप है, उसका प्राकाश्य सम्भव नहीं है—

---

१. प्रत्यभिज्ञाहृदयम् (१) २. प्रत्यभिज्ञाहृदयम्

न ह्यप्रकाशरूपस्य प्राकाश्यं वस्तुतापि च।

वस्तुस्थिति यह है कि जो अन्त:स्थ स्वात्म प्रकाश है, वही बाहर प्रकाश्य प्रपञ्च के रूप में स्फुरित हुआ करता है—अन्त:स्थ: स्वात्मप्रकाश एव बहि: प्रकाश्यप्रपञ्चतया स्फुरति इति।[१]

छत्तीस मूल तत्त्व भी प्रकाशस्वभाव से प्रकाशित हैं।

प्रश्न—शैवागम में उत्पत्ति का क्या अर्थ है?

उत्तर—

१. उत्पत्ति का अर्थ है—अन्त:स्थ तत्त्व का बहि:प्रकाशन या बाह्योन्मीलन।

२. उत्पत्ति तादात्म्यक है—उत्पत्तिश्च तादात्म्ये पर्यवस्यति।[२]

३. यद्यज्जातं तत् तदेव हि।[३]—जो कुछ भी उत्पन्न होता है, वह सभी कुछ परमशिव का अपना स्वरूप ही है।

४. स्वात्मविशर्मद्रुमस्य पल्लवपुष्पादिप्रायमेतद् विश्ववैचित्र्यस्फुरणमिति।[४] अर्थात् स्वात्मविमर्शस्वरूप वृक्ष का पल्लव-पुष्पादि विश्ववैचित्र्यस्फुरण है।

सृष्टि का प्रत्येक पदार्थ प्रकाशविमर्शानुप्राणित है। अत: सभी में ऐकात्म्य है—प्रकाशविमर्शानुप्राणनत्वं पर्यन्ततस्तयोरैकात्म्यम्।[५]

परमशिव का स्वभाव प्रत्याहर्तृत्व है—तस्य प्रत्याहर्तृत्वमेव स्वभाव इति।

शिव का स्वातन्त्र्य केवल उसके विश्वोत्तीर्ण-स्वरूपमात्र में विश्राम ग्रहण करता है—चास्य स्वातन्त्र्यं विश्वोत्तीर्णत्वमात्रे विश्राम्यति।[६]

उसकी आत्मविश्रान्ति क्या है? 'प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तित:'।[७] उसकी विश्रान्ति, स्वातन्त्र्य, कर्तृता सभी अभिन्न हैं—

उक्ता सैव च विश्रान्ति सर्वापेक्षानिरोधत:।
स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरतापि च।।[८]

परमस्वच्छन्द शिव और उनकी शक्तियाँ

अथैनं विमर्शमेव द्रढयितुं षट्त्रिंशत्तत्त्वानामन्योन्यतो विशेषं सृष्टिक्रमानुगुण्येनोपपादयन्नादौ शिवतत्त्वमालोचयति—

तह तह दीसन्ताणं सत्तिसहस्साण एक्कसंघट्टो।
णिअहिअउज्जमरूपो होइ सिवो णाम परमसच्छन्दो ।।१३।।

---

१. परिमल
२. स्वोपज्ञ परिमल
३. परिमल-१२
४. महेश्वरानन्द
५. परिमल
६. परिमल (१७)
७. अजडप्रमातृसिद्धि (२२)
८. अजडप्रमातृसिद्धि (२२)

(तथा तथा दृश्यमानानां शक्तिसहस्राणामेकसंघट्टः।
निजहृदयोद्यमरूपो भवति शिवो नाम परमस्वच्छन्दः।।)

उस-उस प्रकार के (सृष्टिसंहारादिक) विभिन्न रूपों में परिलक्षित होने वाली शक्ति के सहस्रों-सहस्रों व्यापारों की एकता ही अपने हृदयोद्यमस्वरूप सर्वतन्त्रस्वतन्त्र परमशिव के नाम से (अशेष विश्व-सृष्टि में) अभिव्यक्त हुआ करती है।।१३।।

पृथिव्यादिः शक्तिपर्यन्तो योऽयं विश्वस्फुरणप्रकारः, यस्येच्छा ज्ञानं क्रियेति, ज्ञानं स्मृतिरपोहनमिति, सृष्टिः स्थितिः संहारोऽनाख्या भासेति, अन्यथा च तत्तत्स्रोतोन्तरेषु पूज्यमाना योगिन्यो योगिनश्चेति वेद्यविक्षोभोल्लासः, तन्मयीनां शक्तीनां तेन तेन प्रकारेण तत्र तत्रानुभूयमानानामेकैकव्यक्तिपर्यालोचनेऽप्यानन्त्यम्, किमुत कात्स्र्न्यानुसन्धाने। तथा हि—इच्छा तावज्जिज्ञासाचिकीर्षादिभेदाद् बहुप्रकारा। ज्ञानं च स्मृत्यनुभवसंशयविपर्ययोत्प्रेक्षादिवैचित्र्यादनन्तप्रकारम्। क्रियापि गमनासनशयनभोजनभाषणादिभेदादनन्ता। तेषामपि प्रत्येकं भेदप्रभेदविकल्पविक्षोभ इत्यानन्त्योत्कर्षाशयेनोक्तम्—शक्तिसहस्राणामिति। **तेषां च य एकः संघट्ट ऐक्यमनुभवन्नेव सृष्टिसंहाराद्यन्योन्यविरुद्धक्रियायौगपद्यभूमिर्भवति। यश्च 'उद्यमो भैरवः' इति शिवसूत्रस्थित्या स्वहृदयोद्योगस्वभावतयाऽनुभूयते, यश्चोक्तप्रकारार्थद्वितयसामरस्यचमत्कारगोचरीभावयोगादन्यतत्त्ववैलक्षण्येनात्यन्तोत्कृष्टमनन्यमुखप्रेक्षित्वलक्षणं स्वच्छन्दत्वं स्वातन्त्र्यमनुभवतीत्यवधार्यते। अन्यानि हि प्रकृतिपुरुषादीनि तत्त्वान्यधोऽधःपर्वप्रतियोगितया स्वातन्त्र्यमुत्तरोत्तरतत्त्वापेक्षया पारतन्त्र्यं च प्रतिपद्यन्ते। परमस्वच्छन्द इति प्राग्वद् विश्वोत्तीर्ण एवोच्यते। अन्यस्तु विश्वोत्तीर्णविश्वमयः परमशिवभट्टारकः पश्चात् प्रकटयिष्यते। एवंविधः शिवो नाम भवति। अयं भावः—उन्मेषनिमेषात्मना तत्त्वान्तरदुर्लभेन स्वातन्त्र्येण चिदाह्लादलक्षणशक्तिद्वितयसामरस्यमात्रक्रोडीकृतेच्छाज्ञानाद्युत्तरोत्तरशक्तिपरम्परापरिग्रहौन्मुख्यात् 'स्वशक्तिप्रचयो विश्वम्' इति श्रीशिवसूत्रस्थित्या विश्वविक्षोभात्मकानन्तबाह्यशक्तिचक्रवैचित्र्यविजृम्भणाद्भुतोद्भावनप्रगल्भस्वात्मचैतन्योद्यन्तृतापरिस्पन्दसारः प्रमातृविशेषः शिवभट्टारक इति। यदुक्तं श्रीशिवदृष्टौ—**

आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद् विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः।। इति।

यथा श्रीविज्ञानेन्दुकौमुद्याम्—

सर्वव्यापकताभूमिर्ज्ञत्वकर्तृत्वसम्मता।
निजाभासचमत्कारमयी शिवदशा स्मृता।। इति।

भवतीति। **सर्वमप्येतदुपपादितमैश्वर्यं स्वरूपसत्तायामेव पर्यवस्यति। सा च**

चित्त्वं न व्यभिचरतीति प्रागेवोक्तम्—

या चित् सत्तैव सा प्रोक्ता सा सत्तैव चिदुच्यते ।

इत्युक्तत्वात्। या च सा स्फुरत्ता महासत्ता इति प्रत्यभिज्ञाप्यते, तस्याश्च नित्यप्रवर्तमानतया लट्प्रयोगः।।१३।।

महेश्वरानन्द कहते हैं कि पृथ्वी तत्त्व से लेकर शक्ति-पर्यन्त जो यह विश्व-स्फुरण है; इच्छाशक्ति, ज्ञानशक्ति, क्रियाशक्ति, सृष्टि, स्थिति, संहार, अनाख्या, भासा आदि जिसकी अपनी स्वतन्त्र अभिव्यक्तियाँ हैं, वे सभी एक ही परमा शक्ति के विभिन्न रूप हैं।

'शक्तिसहस्राणां' क्यों कहा गया? स्पष्ट है कि शक्ति के अनन्त रूप, अनन्त विस्तार एवं अनन्त विग्रह हैं। अनन्तरूपा किन्तु एकात्मिका परा शक्ति 'एकोऽहं बहु स्याम' के अनुसार एक होकर भी अनन्त है।

इच्छा, ज्ञान एवं क्रिया के फलस्वरूप पृथ्वी आदि में अन्तर्व्याप्त क्रियाशक्ति के असंख्य व्यापारों (कार्यवर्ग) की एकता ही शिवस्वरूप में अभिव्यक्त है। समस्त विश्व-वैचित्र्यविलासरूप विश्व-विमर्श में स्वसंवेद्य अलख निरञ्जन ही शक्तिमान परमशिव में अभिव्यक्त हो रहा है।

'स्वशक्तिप्रचयोऽस्य विश्वम्' (शिवसूत्र) भी इसी तथ्य का प्रमाण है। शिव की सर्वशक्तिमत्ता से ही यह अशेष विश्वविमर्शात्मक (जगत् रूप) कार्य अनुप्राणित है।

(क) चित् शक्ति (ख) आनन्द शक्ति।

शक्ति के विभिन्न रूप

- इच्छाशक्ति—जिज्ञासा एवं चिकीर्षा आदि अनेक भेद हैं।
- ज्ञानशक्ति—स्मृति, अनुभव, संशय, विपर्यय, उत्प्रेक्षा आदि अनन्त भेद हैं।
- क्रियाशक्ति—गमन, भोजन, शयन, आसन, भाषण आदि अनन्त भेद हैं।

शक्ति की अभिव्यक्तियों के असंख्य रूप होने के कारण ही गाथाकार कहते हैं—शक्तिसहस्राणां।

इति श्रीतन्त्रालोकस्थित्या पशुप्रमात्राद्यवच्छेदव्यपोहेन विश्वमेव कार्यतया-ऽनुसन्धीयते, तदानाख्या भासेति तत्कृत्यद्वयव्यपदेश इत्यलमवान्तरेण। नटं प्रति च भूमिकात्वेन यो रामादिराभासते, स तु सम्यङ्मिथ्यासंशयसादृश्यादिवैलक्षण्येन संविदन्तरविषयतया सामाजिकैरनुभूयते। तटस्थैस्तु श्रोत्रियादिभिर्नटतयैवेति। य एष इति पुराणागमादिप्रसिद्धस्य परमेश्वरस्य स्वात्मत्वेनात्यासत्त्या विप्रकृष्टव्यतां द्योतयन् तादृग्विमर्शोन्मेषे परमेश्वरसकाशात् पुरुषं प्रति प्रथमानोऽयं भेदो वाततूल-लौल्यलीलामनुभवतीत्युद्भावयति। दशा कापीत्यनेन परमेश्वरतापन्नस्यापि पुरुषस्य स्वपरामर्शशून्यतया वेद्यवर्गानुप्रवेशाभिमन्तृत्वेन महान् खल्वस्य मोहोत्कर्ष इति शोचनीयता द्योत्यते। यदुक्तं श्रीत्रिंशिकाशास्त्रे—

> पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु।
> क्रमात् कादिषु वर्गेषु मकारान्तेषु सुव्रते।। इतिः

यथा च व्याख्यातमाचार्याभिनवगुप्तपादैः—पुरुषस्य हि संवेद्यरूपस्यैव परिमितस्य वेद्यराशौ गणनम्' इति। तस्य च—

> सम्पन्नोऽस्मि कृशोऽस्मि स्निह्यत्तारोऽस्मि भोदमानोऽस्मि।
> प्राणिमि शून्योऽस्मीति हि षट्सु पदेष्वस्मिता दृष्टा।।

इति श्रीविरूपाक्षपञ्चाशिकाप्रक्रियया देहप्राणाद्युपश्लेषवशाद् बहुत्वमप्युप-

पद्यते। यत एतदालम्बनेन ब्रह्मा चन्द्रः सकल इति प्रमातृभेदः परिस्फुरति। एतेन तस्य स्वर्गनरकाद्युपभोगौचित्यं व्याख्यातम्। यथा श्रीशिवदृष्टौ—

क्रीडया दुःखवेद्यानि कर्मकारीणि तत्फलैः।
सम्पत्स्यमानानि तथा नरकार्णवगह्वरे॥
निवासीनि शरीराणि गृह्णाति परमेश्वरः। इति।

स च कदाचित् स्वात्मस्फुरत्तामेव व्यामोहवशाच्छरीरेन्द्रियादिस्वस्पन्दतयाऽभिमन्यते। न चासौ वास्तवी दृष्टिः। यदुक्तं श्रीस्वच्छन्दे—

सुप्रदीप्ते यथा वह्नौ शिखा दृश्येत नाम्बरे।
देहप्राणस्थितोऽप्यात्मा तद्वल्लीयेत तत्पदे॥ इति।

वास्तवी तु दृष्टिरेतस्फुरत्तापि परमेश्वर एव पर्यवस्यतीति। यदुक्तमजडप्रमातृसिद्धौ—

यद्यप्यर्थस्थितिः प्राणपुर्यष्टकनियन्त्रिते।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता॥ इति।

किञ्च—

परमेष्ठिनमारभ्य कीटपर्यन्तमुल्लसन्।
बहुधोपाधिमास्थाय स एकः सन् प्रकाशते॥
शरीराणां प्रभेदेऽपि न शरीरी विभिद्यते।
आदर्शानां प्रभेदेऽपि पश्यन्निव मुखं पुमान्॥
एकमेव यथा तैलं स्थूलेऽपि तिलसञ्चये।
तथा विश्वविलासेऽस्मिन्नेको लोकोत्तरः प्रभुः॥
प्रतिरन्ध्रं गवाक्षाणामन्तरिक्षे व्यवस्थिते।
यथा न वस्तुतो भेदस्तद्वदात्मनि दृश्यताम्॥
एकमेव हि सामान्यं सत्ता गोत्वादि कल्प्यते।
तद्वदेकोऽयमात्मेति वदन् कस्मान्न मृष्यते॥
एकेनैवात्मना सिद्धे लोकयात्राऽनुवर्तने।
नानात्वकल्पनं तत्र गौरवाय न किं भवेत्॥
किञ्च भेदस्य न क्वापि विषयोऽस्तीति दर्शितम्।
अतोऽप्यद्वैतपक्षेऽस्मिन्नानात्वं कथमात्मनः॥
औपाधिकेऽपि तद्भेदे द्वासुपर्णादिवेदवाक्।
सुखदुःखादिभेदानां व्यवस्थाऽप्युपपद्यते॥

ऐक्येनैव निमित्तेन तत्तद्व्यक्त्यानुवर्तनात् ।
तस्य व्यापकता सिद्धा याऽन्यैरप्युपपाद्यते ।।
ततश्च गजकीटादेस्तत्तद्देहप्रमाणतः ।
आत्मावस्थानमित्येतत् त्यज्यतामर्हतां मतम् ।।
यत्तु तैरुच्यते तस्मिन्नशेषव्यापके सति ।
शरीरेष्विव चैतन्यं शिलास्वपि भवेदिति ।।
तत्रोत्तरं शिलादावप्यस्ति चैतन्यवासना ।
नौल्बण्यमस्याः प्राणादिसाहाय्यानुदयादिति ।।

ये पुनरेनं शरीरादिमेवाहुः, ते पुनरत्यन्तमूर्खाः। तथाहि—

स च देहमयो न स्याच्चैतन्यैकप्रसारभूः ।
नो चेच्छवशरीरेऽपि चेष्टा दृश्येत पूर्ववत् ।।
स्तम्भः कुम्भः सरिद् ग्रावा मृगः पक्षी पुमानिति ।
तारतम्ये निमित्तं किं भूतचैतन्यवादिनाम् ।।
एवं नेन्द्रियरूपोऽयं सुषुप्त्यादौ शरीरिणाम् ।
सत्येवेन्द्रियसंसर्गे चैतन्याऽनुपलम्भनात् ।।
देहेन्द्रियादेरात्मत्वे कर्तृत्वं पर्यवस्यति ।
प्रपञ्चस्यैव कर्तृत्वं कार्यमन्यत् किमिष्यते ।।
अंशतो यदि कर्तृत्वं कार्यत्वं चेति कथ्यते ।
कोंऽशः कस्यास्तु कर्तेति व्यवस्था केन कल्प्यते ।।
उक्तरूपविपर्यासशङ्का वा केन वार्यते ।
अतोऽस्मन्निश्चितस्यैव तत्त्वस्यात्मत्वमिष्यताम् ।।
अथ यः शून्यमाहैनं सोऽपि पर्यनुयुज्यते ।
विश्वान्तर्भावतः किं वा शून्योऽयं स्वयमेव वा ।।
स्वतः शून्यत्वपक्षोऽस्य स्वशास्त्रेऽपि न लिख्यते ।
वेद्यवर्गस्य शून्यत्वे व्यवहारो विलुप्यते ।।
सर्वं व्यवहरत्येव शून्यतां साधयन्नपि ।
विश्वं सत्यं वदत्यन्यः शून्यं वदति कश्चन ।।
यानासनादिवेलायामुभयोः सदृशी स्थितिः ।
व्यवहारैकरूप्यं चेद् वाग्वैषम्येण किं फलम् ।।
न च सर्वं जगच्छून्यमित्यर्थं साधयन् सुधीः ।
लभते वादिनं क्वापि स्वमात्मानं कथामपि ।।

इत्यलमतिप्रपञ्चोपन्यासप्राचुर्येण। प्रकृतमेवानुधाव्यते। इत्थं च सर्वस्यापि प्रपञ्चवैचित्र्यस्य—

तस्माच्छब्दार्थचिन्तासु न साऽवस्था न यः शिवः।

इति श्रीस्पन्दप्रक्रियया पारमेश्वरप्रकाशमयत्वाभ्युपगमे कुतोऽस्य पुरुषमेनं प्रति पक्षपातप्रतिक्षेप इति तात्पर्यार्थः। यदुक्तं नरेश्वरविवेके—

सर्वे चैते प्रमातारः प्रकाशत्वाच्छिवात्मकाः।
सर्वज्ञाः सर्वकर्तारः सर्वतश्चाविभेदिनः।। इति।

एतदर्थद्योतनाय हि पुरुषोऽपि पुरुष इत्युच्यते। यदनयोः पुरे वसतीति पुरुषः पुरमोषति दहतीति पुरुष इति स्वभावभेदः।

बुद्धिप्राणशरीराख्ये यदेतस्मिन् पुरत्रये।
अहङ्काराद् वसत्यात्मा तेनायं पुरुषः स्मृतः।।
एतत् पुरत्रयं दग्धं येन स त्रिपुरान्तकः।
स एव पुरुषः प्रोक्तः स्मरारिरपि स स्मृतः।।

इति श्रीहंसभेदस्थित्या यद्यप्यौचित्येनोन्मील्यते, तथापि पर्यन्ततस्तात्त्विकार्थचिन्तायां तयोरुक्तरूपमैकान्त्यमेव। तादृगवच्छेदे च तस्य स्वस्वातन्त्र्यरूपस्य मलत्रयस्योपलालनं हेतुरिति। ननु भेदप्रथाप्रकर्षेऽपि यद्यनयोस्तादात्म्यं तन्निबन्धनः पतिवत् पशोरैश्वर्योच्छ्रायश्चोपपाद्यते, तर्हि तेनैव तादात्म्येन पशुवत् पतिरपि मायाव्यामोहकदर्थनग्रथितहृदयवृत्तिरस्त्विति चेत्? नैवम्, ऐन्द्रजालिकदृष्टान्तस्यात्र प्राप्तावसरत्वात्। स खलु स्वयमखिलमपि लोकं व्यामोहयन् न केनचिद् व्यामोह्यते। एतदर्थमेव हि परमेश्वरं प्रति शैलूषव्यपदेश इति।।१९।।

इस गाथा में सृष्टिकर्ता परमात्मा को एक अभिनेता एवं जगत् को अभिनय का रङ्गमञ्च कहा गया है। गाथाकार की दृष्टि में जगत् एक रङ्गशाला है—अभिनय का रङ्गमञ्च है और सारे प्राणी अपनी-अपनी अभिनेय भूमिका के निष्पादक अभिनेता हैं। इसी प्रसंग में महेश्वरानन्द कहते हैं—य एष विश्वनाटकशैलूषः शुद्धसंविच्छम्भुः।

शम्भु विश्व-नाटक का महानट है और जगत् उसका नाटक है। (वर्णक = अभिनेता का परिधान (परिच्छद)। परिग्रह = प्राप्ति, सम्पत्ति।)

महेश्वरानन्द की दृष्टि—महेश्वरानन्द कहते हैं कि परमेश्वर वह सत्ता है, जो यह अनुभव करता रहता है कि मैं ही सब कुछ हूँ—परमेश्वरो हि अहमेव सर्वमिति।[१]

परमेश्वर में वैश्वात्म्यप्रथानुभूतिस्फारचमत्कार[२] होने के कारण ही आत्मा को नर्तक भी कहा गया है।

१-२. परिमल

शिवसूत्रकार की दृष्टि—शिवसूत्र में 'नर्तक आत्मा' (३.९) कहकर शिव को महानट की भूमिका में ही प्रस्तुत किया गया है।

आचार्य क्षेमराज की दृष्टि—आचार्य क्षेमराज कहते हैं कि—नृत्यति अन्तर्निगूहित-स्वस्वरूपावष्टम्भमूलं तज्जागरादिनानाभूमिकाप्रपञ्चं स्वपरिस्पन्दलीलयैव स्वभित्तौ प्रकटयति इति नर्तक आत्मा।[१]

अर्थात् परमात्मा अपने यथार्थ स्वरूप को छिपाकर (आत्मगोपन करके) स्वेच्छया अपनी आत्मभित्ति पर नानात्मक जागरादि भूमिकाओं में स्थित होकर अपने को एक अभिनेता की भाँति प्रकट करता है; न कि अपने को सर्वकर्ता, सर्वद्रष्टा, आप्तकाम, जगदीश्वर एवं विश्वातीत के रूप में।[२]

आचार्य वरदराज की दृष्टि—आचार्य वरदराज कहते हैं—

नृत्यत्यन्तःपरिच्छिन्नस्वस्वरूपावलम्बनाः ।
स्वेच्छया स्वात्मचिद्भित्तौ स्वपरिस्पन्दलीलया।।

जागरास्वप्नसौषुप्तरूपास्तास्ताः स्वभूमिकाः।
आभासयति यत्तस्मादात्मा नर्तक उच्यते।।

एवंविधजगन्नाट्यनर्तकस्यास्य योगिनः।
भूमिकाग्रहणस्थानं रङ्गमाह जगद्गुरुः।।[३]

श्रीनैश्वासकार की दृष्टि—श्रीनैश्वास में कहा गया है—अन्तरात्मा एकांश से नर्तक की भूमिका निष्पादित करती है। आगे ग्रन्थकार कहता है—त्वमेकांशेनान्तरात्मा नर्तक कोशक्षिता।

महेश्वरानन्द ने ठीक ही कहा है—श्रीशिवसूत्रस्थित्या विश्वनाटकस्य शैलूषो नट इति व्यपदिश्यते।[४]

विश्व है क्या? क्या पृथ्वी? क्या चौदह भुवन? क्या त्रिलोक या पिण्डाण्ड? नहीं; विश्व इससे भी बड़ा है—विश्वं च पृथिव्यादिशिवान्ततत्त्वसन्दोहात्मकम्।[५]

शिव इसी विश्व का अभिनय करता है—इसके पात्रों के रूप में अभिनय करता है—वही रंगमञ्च है, वही अभिनय है और वही अभिनेता भी है।

शक्तिसूत्रकार की दृष्टि—आचार्य क्षेमराज ने शक्तिसूत्र में शिव की समस्त भूमिकाओं को शक्ति द्वारा निष्पादित दिखाते हुये कहा है—

(क) स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति।[६]

१-२. शिवसूत्रविमर्शिनी
३. शिवसूत्रवार्तिक
४. परिमल (३.१९)
५. परिमल
६. शक्तिसूत्र

(ख) चिति: स्वतन्त्रा विश्वसिद्धिहेतु:।[१]

(ग) विश्वस्य सदाशिवादे: भूम्यन्तस्य सिद्धौ निष्पत्तौ प्रकाशने स्थित्यात्मनि, परप्रमातृविश्रान्त्यात्मनि च संहारे, पराशक्तिरूपा चिति एव भगवती स्वतन्त्रा, अनुत्तर-विमर्शमयी शिवभट्टारकाभिन्ना हेतु: कारणम्।[२]

(घ) ननु जगदपि चितो भिन्नं नैव किञ्चित्। चिदेव भगवती स्वच्छस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरति—इत्येतावत्परमार्थोऽयं कार्यकारणभाव:।

तात्पर्य यह कि कार्य (जगत्) एवं शक्ति अभिन्न हैं। यहाँ कार्य-कारणभाव (Cause-Effect Connection) पारमार्थिक है। कारण कार्य से एवं कार्य कारण से पृथक् नहीं है।

विश्व भगवान् का शरीर है—भगवान् विश्वशरीर:।[३]

विश्व परमशिव से अभिन्न रूप में स्थित है। श्री परमशिव अपने स्वरूप से अभिन्न रूप में विश्व को धारण किये हुये स्थित हैं; अत: विश्व एवं शिव एक ही हैं—श्रीपरमशिव: स्वात्मैक्येन स्थितं विश्वम्।[४] इसी दृष्टि से क्षेमराज कहते है—विश्व शरीर: शिवभट्टारक एव।[५] याथार्थ्य तो यह है कि—न सावस्था न य: शिव:।

अन्य शास्त्रकारों की दृष्टि—अन्य शास्त्रों में कहा गया है कि जन्म, शैशव, यौवन, वार्धक्य आदि अनेक अवस्थाओं और उसमें निष्पादित अनेक भूमिकाओं का निष्पादन या अभिनय करने वाला मैं महानाटककार शिव हूँ। हमारा पौरुष—पुरुषार्थ ही तो नाटक है, जो कि जगत् में अनेक व्यापारों, क्रियाओं एवं कार्यों द्वारा व्यक्त होता है। हम उसी पौरुषस्वरूप नाटक के अभिनेता शिव हैं—

जननशैशवयौवनवार्धकव्ययमयैरखिलैरपि सन्धिभि:।
अभिनयन्नपि पौरुषनाटकं परिणतौ सशिवोऽस्मि महानट:।।

सृष्टि-स्थिति आदि अवस्थापञ्चक एवं आरम्भ-यत्न आदि अवस्थापञ्चक से युक्त जो विश्व नाटक है, उसी को 'य एष विश्वनाटकशैलूष:' वाक्य इंगित कर रहा है।

श्रीभट्टनारायण की दृष्टि—श्रीभट्टनारायण कहते हैं कि यह समस्त त्रिलोक एवं उसके समस्त व्यापार त्रैलोक्यनाटकमात्र हैं—

विसृष्टानेकसद्बीजगर्भं त्रैलोक्यनाटकम्।
प्रस्ताव्य हर! संहर्तुं त्वन्त: कोऽन्य: कवि: क्षम:।।

आचार्य महेश्वरानन्द कहते हैं कि नाटक रसनिष्पत्ति-प्रवण होते हैं और वे दर्शक-सापेक्ष भी होते हैं। इस नाटक का रस क्या है? इसके प्रेक्षक कौन हैं? इसी का समाधान करते हुये वे कहते हैं कि—

१. नाटकों में तो शृंगार रस, करुण रस आदि आस्वाद्य रसों की विद्यमानता रहती

---

१. शक्तिसूत्र (१) २-५. प्रत्यभिज्ञाहृदयम्

है; किन्तु विश्वनाटक में तत्स्थानीय—शब्द, स्पर्श, रूप, रस आदि अनुभवों से परिपूर्ण रस का प्रवाह रहता है।

२. सामान्य नाटकों के द्रष्टा रसिक लोग होते हैं; किन्तु विश्व-नाटक के द्रष्टा (प्रेक्षक) इन्द्रियाँ हैं।

'क्वापि पुरुषो भवति' उस विश्वनाट्य की ओर अभिनयोन्मुखी भूमिका ग्रहण करने की जो अवस्था होती है, वही तो पुरुष है—तस्य च विश्वनाट्याभिनयोन्मुखस्य भूमिका-वलम्बनलक्षणेनार्थेन यावस्था सा पुरुषो भवति।

पुरुष कोई नित्य सत्ता नहीं है—नित्य स्वरूप नहीं है, यह चेतना की एक स्वेच्छागृहीत आत्मगोपन की क्रीड़ा है; इसीलिये महेश्वरानन्द ने इसे अवस्था कहा है—यावस्था सा पुरुषो भवति।

अवस्थायें तो परिवर्तनशील होती हैं, किन्तु शिव एवं आत्मा (परमतत्त्व) अवस्थातीत है। पुरुष की अवस्था (शाम्भव दर्शन के अनुसार) जागतिक अभिनय की इच्छा है—विश्वनाट्य में अभिनय करने की एक अवस्था है।

सारशास्त्र की दृष्टि—सारशास्त्र में कहा गया है कि शिव स्वेच्छया भोक्ता बनकर एवं बन्धनों को स्वीकार करके पशु की भूमिका निष्पादित करता है—

स्वयं बध्नाति देवेशः स्वयं चैव विमुह्यति।
स्वयं भोक्ता स्वयं ज्ञाता स्वयं चैवोपलक्षयेत्।।

स्पष्ट है कि इसके माध्यम से वह विश्वनाटकशैलूष बनता है।

पुरुष और परमात्मा की एकरूपता (अभिन्नता)—महेश्वरानन्द कहते हैं कि पुरुष की शक्ति परमशिव की ही शक्ति है। अतः दोनों में अभिन्नता है; किन्तु इस अभेदबोध का अज्ञान ही उनमें भेद करता है। यथा—असौ शक्तिपाताद्यभावात् कुम्भकारस्यापि घटकरणे सर्वशक्तिशिवात्मता तदपरिज्ञानात् तु कुम्भकारतेत्यर्थः।[1]

शिवसूत्रकार की दृष्टि—विश्व एक रङ्गमञ्च है। शिवसूत्रकार ने आत्मा को एक रङ्गमञ्च कहा है—रङ्गोऽन्तरात्मा (३.१०)।

जगत् ही नाट्य है—जगन्नाट्यमाभासयति। आचार्य क्षेमराज कहते हैं कि—रज्यतेऽस्मिन् जगन्नाट्यक्रीड़ाप्रदर्शनाशयेनात्मना इति रङ्गः, तत्तद्भूमिकाग्रहणस्थानम् अन्तरात्मा, सङ्कोचावभासतत्त्वः शून्यप्रधानः प्राणप्रधानो वा पुर्यष्टकरूपो देहापेक्षया अन्तरो जीवः। तत्र हि अयं कृतपदः स्वकरणपरिस्पन्दक्रमेण जगन्नाट्यमाभासयति। उक्तं च स्वच्छन्दे—

पुर्यष्टकसमावेशाद्विचरन्सर्वयोनिषु।
अन्तरात्मा स विज्ञेय........................।।[2]

---

१. परिमल में उद्धृत २. शिवसूत्रविमर्शिनी

योगिनश्चक्षुरादीनि इन्द्रियाणि हि संसारनाट्यप्रमोदनिर्भरं स्वस्वरूपम् अन्तर्मुखतया साक्षात्कुर्वन्ति।

आचार्य वरदराज की दृष्टि—आचार्य वरदराज कहते हैं कि सदाशिव से क्षितिपर्यन्त यह नि:शेष प्रपञ्च-प्रसार केवल जगन्नाट्य है—

रज्यतेऽस्मिन् जगन्नाट्यक्रीड़ाकौतुकिनात्मना।
इति रङ्गोऽन्तरात्मेति जीव: पुर्यष्टकात्मक:।।
योगी कृतपदस्तत्र स्वेन्द्रियस्पन्दलीलया।
सदाशिवादिक्षित्यन्तजगन्नाट्यं प्रकाशयेत्।।
देहान्तरङ्गे रङ्गेऽस्मिन्नृत्यत: स्वान्तरात्मनि।
प्रेक्षकाणीति संसारनाट्यप्राकट्यकृद्वपु:।
चक्षुरादीन्द्रियाण्यन्तश्चमत्कुर्वन्ति योगिन:।।[१]

शैवागम मानता है कि परमेश्वर का असाधारण स्वभाव सृष्ट्यादिपञ्चकृत्यकारित्व है—परमेश्वरस्य ह्यमेवासाधारणस्वभावो यत् सर्वदा सृष्ट्यादिपञ्चकृत्यकारित्वम्।[२]

वेदान्त का ब्रह्म तो क्रियाशून्य है।

तन्त्रालोककार की दृष्टि—तन्त्रालोककार अभिनवगुप्त कहते हैं कि परमेश्वर में दुर्घटकारित्व की शक्ति है। उसमें स्वाच्छन्द्य है। वह स्वात्मप्रच्छादन क्रीड़ा में पण्डित है—

किन्तु दुर्घटकारित्वात् स्वाच्छन्द्यान्निर्मलादसौ
स्वात्मप्रच्छादनक्रीडापण्डित: परमेश्वर:।

महेश्वरानन्द कहते हैं कि मायोपहित होने पर भी शिव (पशुदशा में भी) पञ्चकृत्यों का निष्पादन करता है—मायापथावतीर्णोऽपि परमेश्वरवत् सर्वदा पञ्चापि कृत्यानि करोति। क्योंकि उसमें संवित्संस्कार कभी नष्ट नहीं हो सकते।

स्पन्दकारिकाकार की दृष्टि—भट्टकल्लट कहते है कि चेतन की अवस्थायें तो परिवर्तित होती रहती हैं; किन्तु चेतन किसी भी अवस्था में अवस्थान्तरित एवं रूपान्तरित नहीं होता; क्योंकि वह नित्य है—

जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति।
निवर्तते निजान्नैव स्वभावादुपलब्धृत:।।

इस गाथा में पुरुष का क्या अर्थ है? अतएव हि सङ्कुचितस्वभावोऽप्यसौ तत्त्व-वृत्त्या विकसितत्वात् पुरुष इति व्यपदिश्यते।[३]

(क) श्रुति = तेनेदं पूर्णं पुरुषेण सर्वम्।

---

२. शिवसूत्रवार्तिक २-३. परिमल

(ख) चिद्गगनचन्द्रिका = पूरणात् पुरुषतामुपेयुषि।

नरेश्वरविवेक में कहा गया है—

सर्वे चैते प्रमातारः प्रकाशत्वाच्छिवात्मकाः।
सर्वज्ञाः सर्वकर्तारः सर्वतश्चाविभेदिनः।।

इस शिवरूप की भी पुरुष से समानता है। पुरुष किसे कहते हैं?

(क) पुरे वसतीति पुरुषः।

(ख) पुरमोषति दहतीति पुरुष इति।

(ग) हंसभेद की दृष्टि—

बुद्धिप्राणशरीराख्ये यदेतस्मिन् पुरत्रये।
अहङ्काराद् वसत्यात्मा तेनायं पुरुषः स्मृतः।।
एतत् पुरत्रयं दग्धं येन स त्रिपुरान्तकः।
स एव पुरुषः प्रोक्तः स्मराररिपि स स्मृतः।।

अवच्छेद के कारण उस शिव का स्वस्वातन्त्र्य मलत्रयोपहित हो जाता है।[1] भेदप्रथा के प्रकर्ष की स्थिति में भी पति एवं पशु में तादात्म्य है।[2]

शिव एवं ऐन्द्रजालिक—परमेश्वर सारे जगत् को (एक ऐन्द्रजालिक की भाँति) व्यामोहित करके भी स्वतः उससे व्यामोहित नहीं हुआ करता—स खलु स्वयमखिलमपि लोकं व्यामोहयन् न केनचिद् व्यामोह्यते।

यही स्थिति परमेश्वर को शैलूष बना देती है—एतदर्थमेव हि परमेश्वरं प्रति शैलूषव्यपदेशः।[3]

'दशा कापि' कहकर गाथाकार ने यह इङ्गित करने का प्रयास किया है कि पुरुष परमेश्वरतापन्न भी क्यों न हो जाय; किन्तु स्वपरामर्शशून्य होने के कारण वेद्यवर्गानुप्रवेशाभिमन्तृत्व के कारण उसका महोत्कर्ष शोचनीय हो जाता है।[4]

श्रीत्रिंशिकाशास्त्र में इसी तथ्य को व्यक्त किया गया है—

पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु।
क्रमात् कादिषु वर्गेषु मकारान्तेषु सुव्रते।।

श्रीविरूपाक्षपञ्चाशिका में भी कहा गया है—

सम्पन्नोऽस्मि कृशोस्मि स्निह्यत्तारोऽस्मि मोदमानोऽस्मि।
प्राणिमि शून्यऽस्मीति हि षट्सु पदेष्वस्मिता दृष्टा।।

परमेश्वर स्वेच्छया (अभिनयार्थ) दुःख, नरक आदि सभी स्वीकार कर लेता है—

१-२. परिमल ३-४. परिमल (१९)

क्रीडया दु:खवेद्यानि कर्मकारीणि तत्फलै:।
सम्पत्स्यमानानि तथा नरकार्णवगह्वरे।
निवासीनि शरीराणि गृह्णाति परमेश्वर:।।

यह स्वात्मस्फुरत्ता ही व्यामोह के कारण शरीर-इन्द्रिय आदि स्वस्पन्द के रूप में माना जाने लगता है; किन्तु यह वास्तविक नहीं है—न चासौ वास्तवी दृष्टि:। (परिमल)

इसी तथ्य की पुष्टि स्वच्छन्दागम में भी की गई है—

सुप्रदीप्ते यथा वह्नौ शिखा दृश्येत नाम्बरे।
देहप्राणस्थितोऽप्यात्मा तद्वल्लीयेत तत्पदे।।

अजडमातृसिद्धिकार की दृष्टि—अजडमातृसिद्धि में कहा गया है—

यद्यप्यर्थस्थिति: प्राणपुर्यष्टकनियन्त्रिते।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता।।

परमेष्ठी से कीटपर्यन्त सभी में एक ही तत्त्व स्थित है—

परमेष्ठिनमारभ्य कीटपर्यन्तमुल्लसन्।
बहुधोपाधिमास्थाय स एक: सन् प्रकाशते।।
शरीरिणां प्रभेदेऽपि न शरीरी विभिद्यते।
आदर्शानां प्रभेदेऽपि पश्यन्निव मुखं पुमान्।।
एकमेव यथा तैलं स्थूलेऽपि तिलसञ्चये।
तथा विश्वविलासेऽस्मिन्नेको लोकोत्तर: प्रभु:।।
प्रतिरन्ध्रं गवाक्षाणामन्तरिक्षे व्यवस्थिते।
यथा न वस्तुतो भेदस्तद्वदात्मनि दृश्यताम्।।
एकमेव हि सामान्यं सत्ता गोत्वादि कल्प्यते।
तद्वदेकोऽप्यमात्मेति वदन् कस्मान्न मृष्यते।।
एकेनैवात्मना सिद्धे लोकयात्राऽनुवर्तने।
नानात्वकल्पनं तत्र गौरवाय न किं भवेत्।।
किञ्च भेदस्य न क्वापि विषयोऽस्तीति दर्शितम्।
अतोऽप्यद्वैतपक्षेऽस्मिन्नानात्वं कथमात्मन:।।

शाम्भवी शक्ति के अनेक रूप

अथ प्रकृतिं प्रकटयति—

णाणकिआमाआणं गुणाण सत्तरअतमसहावाणं।
अविहाआवत्थाए तत्तं पअडित्ति संभवी सत्ती।।२०।।

(ज्ञानक्रियामायानां गुणानां सत्त्वरजस्तमस्स्वभावानाम्।
अविभागावस्थायां तत्त्वं प्रकृतिरिति शाम्भवी शक्तिः।।)

(शाम्भवी शक्ति के रूप में) ज्ञान शक्ति, क्रिया शक्ति एवं माया शक्ति (कही जाने वाली शम्भु-शक्ति) (और अधिक विभाग-विभक्त होने पर) एवं गुणों के रूप में व्यक्त सतोगुण, रजोगुण एवं तमोगुण के स्वभाव वाली प्रकृति (प्रकृति तत्त्व) अपनी अवि-भागावस्था (अविभक्त मूलावस्था) में शाम्भवी शक्ति कहलाती है अर्थात् ज्ञान, क्रिया एवं माया के गुणों वाली तथा सतोगुण, रजोगुण एवं तमोगुण के स्वभाव वाली प्रकृति अपनी अविभक्तावस्था में शाम्भवी शक्ति कहलाती है।।२०।।

ज्ञान नाम प्रकाशः। क्रिया विमर्शः। माया तु अहमिदमिति इदमहमिति किञ्चिद्भेदप्रथप्ररोहेऽपि सदाशिवेश्वरावस्थावदहन्तापर्यवसायिनी शक्तिः। तासां परमेश्वरशक्तिभूतानामपि व्यामोह्यमानपशुजनापेक्षया गुणत्वम्। यदुक्तं श्रीप्रत्य-भिज्ञायाम्—

स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः।। इति।

ताश्च पशौ सत्त्वं रजस्तम इति भवन्ति। याभिः सुखदुःखमोहात्मकोऽयं लोकव्यवहारः। तन्मयीनां च तासां या विभागशून्या तुलाधारणवदत्यन्तावैष-म्यशालिन्यवस्था, तस्यां पर्यालोच्यमानायां प्रकृतिरिति तत्त्वं भवति। यस्यां शुभा-शुभस्वभावानेकसहस्रगुणदोषोन्मेषभूमिकायां शून्यबुद्धिप्राणशरीरविषयावच्छिन्नाः पञ्चाहन्ता निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यातीताः कलाश्च विपश्चिद्भिर्विभूतितया विकल्प्यन्ते। सा च शाम्भव्येव शक्तिरित्यनेन साङ्ख्यादिसिद्धान्तोऽपहास्यते। ते खलु—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।

इत्यादिना पुरुषादुपरि न किञ्चित् तत्त्वान्तरम्, पुरुषश्चोदासीनः प्रकृतिश्च तदधीना, सा च नित्या, न विकृतिः, षोडकस्तु नित्यं विकारात्मक एवेत्याचक्षते। नैवमस्मत्समयः। यतः पुरुषादुपरि बहूनि तत्त्वानि परमशिवपर्यन्तम्। पुरुषश्च सर्वदा सर्वज्ञः सर्वकर्ता च स्वात्माख्यातिवशात् सङ्कुचित इव भासते। प्रकृतिश्च न केवलं पुरुषेणैव प्रेर्यते। तस्य परमेश्वरस्वातन्त्र्यव्यतिरेके तादृक्प्रेरकत्वसामर्थ्या-भावात्। यदुक्तं श्रीस्पन्दे—

न हीच्छा नोदनस्यायं प्रेरकत्वेन वर्तते।
अपि स्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत्।। इति।

सा च नित्यं विकृता कदाचित्त्वविकृता। षोडशकोऽपि कदाचिदविकृतः, कदाचिच्च विकृतोऽपीति।

अथ ये तमुदासीनमाहुर्नित्योदितोद्यमम्।
त एवं प्रतिवक्तव्याः सर्वदा चेदनुद्यमः ।।
तेन मृत्पिण्डकल्पेन जगतः किं प्रयोजनम्।
किमित्यङ्गीकृतिस्तस्य किंप्रमाणोऽपि वा भवेत् ।।
यदुच्येत तदेवैतदौदासीन्यं चिदात्मनः।
प्रवर्तयति विश्वस्मिन् प्रकृतिं विकृतिस्पृशम् ।।
अन्यथा प्रकृतेः किञ्चिन्न प्रागल्भ्यं प्रवर्तते।
तदर्थं स्वीकृतिस्तस्य विश्वातिक्रान्ततेजसः ।।
तेनैव च प्रमाणेन तस्य सिद्धिर्भवेदिति।
अत्रोच्यते यथा सा चेदस्यौदासीन्यकल्पना ।।
अनुदासीन एवेति तात्पर्यं पर्यवस्यति।
वैलक्षण्यात् प्रकृत्यादेः सूक्ष्ममुद्यममास्थितः ।।
इत्यसौ निष्क्रियो न स्याद् यतः सूक्ष्मापि सा क्रिया।
स्थवीयसीः क्रिया सूते प्रकृतौ विकृतिष्वपि ।।
जडा अपि स्वभावेन देहाक्षभुवनादयः।
यत्प्रभावात् प्रवर्तन्ते स कथं निष्क्रियो भवेत् ।।

अत्र च मदीयमेव सूक्तं यथा—

अश्वेषु गच्छत्सु रथः प्रयातीत्युदेतु वादो रथमध्यवर्ती।
सुखं निषण्णो विषयान्तरं च प्राप्तः पुमान् किन्नु चकार शम्भो ।।

अत्रैतदवधार्यमन्तर्विद्भिः। यदुत—

शिवारम्भः प्रकृत्यन्तस्तत्त्वौघः प्रत्यगादि यः।
तत्र विश्वोत्तरस्यास्य शिवस्य परमेष्ठिनः ।।
सर्वक्रिया च सार्वज्ञ्यं सर्वदोदयता तथा।
सर्वव्यापकता पूर्तिः प्रथन्ते पञ्चशक्तयः ।।
अथ शक्तौ तदिच्छायामुन्मना समनेत्यपि।
व्यापिनी नादबिन्दू च रश्मयः पञ्च जाग्रति ।।
अनुग्रहतिरोधानसंहृतिस्थितिसृष्टयः ।
जगत्कृत्यानि पञ्चापि शक्तितत्त्वभुवः प्रथाः ।।

सदाशिवे पुनस्तत्त्वे ईशानस्तत्पुमानिति ।
अघोरो वामदेवश्च सद्योजातश्च शक्तयः ।।
तदूर्ध्वमीश्वरे तत्त्वे रूपातीतोत्तरं महत् ।
रूपातीतं च रूपं च पदं पिण्ड इति क्रमः ।।
तुर्यातीतं च तुर्यं च सुषुप्तिस्वप्नजागराः ।
अवस्थाः पञ्च शुद्धाया विद्यायाः शक्तिविभ्रमः ।।
सैवेयं शाम्भवीं शक्तिमाणवीं शोधनीमपि ।
बोधनीमपि ता दीक्षा प्रसूते स्फूर्तिशालिनी ।।
निरुपायप्रकाशाख्यो ज्ञानं योगः क्रियेत्यपि ।
चर्येति च तदुत्थैव पुमर्थोपायकल्पना ।।
तत एव महाशक्तिर्हाकिनी नाम जायते ।
डाकिनी राकिनी तद्वल्लाकिनी काकिनीत्यपि ।।
साकिनीति च देहेऽस्मिन् यद्वैचित्र्यं विजृम्भते ।
अथ मायेति यत् तत्त्वमुच्यते तस्य शक्तयः ।।
कलाविद्ये रागकालौ नियतिस्तत्र पञ्चमी ।
प्राणोऽपानः समानः स्यादुदानो व्यान इत्यपि ।।
शरीरयात्रोपक्षीणः पुरुषे शक्तिसंग्रहः ।
प्रकृतौ तु गुणाः सत्त्वं रजश्च तम इत्यपि ।।
विकृत्यविकृती तद्वदुच्यन्ते पञ्च रोचिषः ।
अथैतयोः पुम्प्रकृत्योः स्फुरणक्रियया भवेत् ।।
वक्ष्यमाणमशेषेण विश्ववैचित्र्यकल्पनम् ।
तत्प्रकारोऽपि विधिवद् वितत्य प्रतिपाद्यते ।।
पुम्प्रकृत्योः समुद्योगाद् धातुरात्मेति जायते ।
त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राह्वयैरयम् ।।
वातपित्तकफाख्यैश्च स्वांशोद्योतैर्विजृम्भते ।
अनयोरेव संघट्टाद् यो मनो धीरहङ्क्रिया ।।
इत्यन्तःकरणोल्लासस्त्रैविध्येनानुभूयते ।
तत्र बुद्ध्युद्यमाद् धर्मो ज्ञानं वैराग्यमित्यपि ।।
ऐश्वर्यं वरदत्वं चेत्युन्मीलति विचित्रता ।
क्रमादेतद्विपर्यासो मनसः शिल्पमिष्यते ।।
मदीयत्वामदीयत्वकार्पण्यमदमत्सराः ।
अहङ्कारस्फुरत्ता स्युः संसारस्फुर्तिहेतवः ।।

तद्वत् तयोर्विभूत्यैव गुणाः सत्त्वं रजस्तमः ।
इति त्रयः प्रतीयन्ते विकृताविकृतोदयाः ।।
तत्र सत्त्वस्य सौन्दर्यं सौभाग्यं साधुशीलता ।
सौमुख्यमथ सौजन्यमिति स्फुरणविभ्रमः ।।
वशीकरणमाकर्षः शान्तिः पोषणपालने ।
इति कर्माणि रजसो गुणस्याहुः परिग्रहम् ।।
अथ विद्वेषणं यत् स्याद् यच्चोच्चाटनमुच्यते ।
स्तम्भनं मोहनं चेति मारणं चेति याः क्रियाः ।।
तदेतदखिलं तस्य तमसः क्षोभविभ्रमः ।
गुणैरेभिरुपस्कारमहङ्कारो यदाश्नुते ।।
सात्त्विकत्वादिभेदेन तदा त्रैविध्यमृच्छति ।
तत्र शब्दस्पर्शरूपरसगन्धा इति क्रमात् ।।
सात्त्विकः स्वेन रूपेण प्रथते भोग्यवस्तुषु ।
राजसस्तु विजृम्भेत वचनादानधावनैः ।।
विसर्गानन्दनाभ्यां च पञ्चभिः स्वस्वभाववान् ।
तामसोऽपि खवाय्वग्निपाथोभूमिस्वलक्षणैः ।।
भूतैर्वपुष्मान् प्रथते विश्वोपादानहेतुभिः ।
किञ्च त्रैविध्यवत्यस्मिन्नहङ्काराह्वये पदे ।।
विभूतिविभ्रमोत्कर्षात् त्रिधा विततिरिष्यते ।
पुण्येच्छा तत्त्वजिज्ञासा लोकोत्तीर्णार्थगृध्नुता ।।
वस्तुष्वध्यवसायः श्रीर्धीः सङ्कल्पविकल्पिनी ।
शान्तिदान्त्यादिमित्रस्य सात्त्विकस्य विजृम्भितम् ।।
श्रोत्रत्वगक्षिरसनाघ्राणेन्द्रियमयीं दशाम् ।
राजसस्याहुरैश्वर्यं हर्षभीत्यादिदायिनः ।।
वाणी पाणिरथो पादः पायूपस्थमिति क्रमात् ।
मोहालस्यादिसुहृदस्तामसस्य परिच्छदः ।।
अथ या महती सिद्धिः प्रसूता प्रस्तुतद्वयात् ।
तस्याः पञ्चविधा स्फूर्जा साधकेष्वनुभूयते ।।
यथेप्सितशरीराप्तिः प्रवेशोऽन्यस्य वर्ष्मणि ।
दूराध्वयानायानं च दूरश्रवणदर्शनम् ।।
अदृश्यकरणं चेति तत्प्रकारः प्रतीयताम् ।
पुण्यक्रियेति काप्यस्ति विश्वोत्पत्त्यै स्थितिस्तयोः ।।

वीर्यं गाम्भीर्यमैश्वर्यं भोक्तृत्वं दातृतेत्यपि ।
तस्याः प्रथनवैचित्र्यं यल्लभ्यं भाग्यशालिभिः ।।
इत्थं तत्रैव चिन्नाडी ज्ञानसूत्रमिति स्मृता ।
चित्रपद्मशिवाख्याश्च शक्त्यात्माभिहिते अपि ।।
नाडीः पञ्च प्रपञ्चेऽस्मिन् प्रसुवाना प्रवर्तते ।
एवं हाटककालाग्नी कूटस्थ कूर्म इत्यपि ।।
अनन्तः शक्त्युपश्लिष्टः कपिलर्षिरिति क्रमात् ।
तद्विजृम्भैव बोद्धव्या सप्तपातालधारिणी ।।
उक्तैतदखिलाभोगस्वभावत्वेऽप्यनाविलः ।
निस्तरङ्ग इवाम्भोधिर्वहन् गाम्भीर्यसम्पदम् ।।
चिदानन्देषणाज्ञानक्रियापञ्चकशक्तिमान् ।
भैरवः परमो नाथस्तत्त्वान्ते कथयिष्यते ।।

प्रपञ्चवैचित्र्यभुवं प्रपञ्चयन् प्ररूढपञ्चार्थरहश्चमत्क्रियाम् ।
प्रकाशयामास महेश्वरः स्वयं परं परामर्शमयीमहंस्फुराम् ।।
अहङ्क्रिया नित्यमहङ्क्रियायां पराक्रमो यस्य पराक्रमे च ।
स एव वीरो ननु तस्य शास्त्रं विमर्शशाणोल्लिखिला स्वशक्तिः ।।

इत्यलमतिरहस्योन्मीलनसाहसोल्लासेन।।२०।।

प्रकृति एवं शाम्भवी शक्ति में ऐकात्म्य

ज्ञान = प्रकाश, क्रिया = विमर्श, माया = अहमिदम्, इदमहम् के स्वरूप वाली भेदप्रथा के प्ररोह के समय भी सदाशिव-ईश्वर की विशिष्ट अवस्था के समान अहन्ता पर्यवसायिनी शक्ति ही माया है—माया तु अहमिदमिति इदमहमिति किञ्चिदभेद-प्रथा-प्ररोहेऽपि सदाशिवेश्वरावस्थावदहन्तापर्यवसायिनी शक्तिः।

इच्छा, ज्ञान एवं क्रिया शक्तियाँ ही पशुभाव में सतोगुण, रजोगुण एवं तमोगुण बन जाती हैं—

स्वांगरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये त एव पशोः सत्त्वं रजस्तमः।।[१]

महेश्वरानन्द कहते हैं—

१. प्रकृति सत्वगुणस्वभावा होने पर ज्ञान शक्ति कहलाती है।
२. प्रकृति रजोगुणस्वभावा होने पर क्रियाशक्ति कहलाती है।
३. प्रकृति तमोगुणरूपिणी होने पर मायाशक्ति है।

---

१. ईश्वरप्रत्यभिज्ञा

४. इस प्रकार विभाग-विभक्त दशा में प्रकृति ज्ञानक्रिया मायात्मिका है।
५. अविभक्त एकरस अवस्था में यही मूल शक्ति (मूल प्रकृति) ही शाम्भवी शक्ति है।

इन तीनों की शिव के साथ अभिन्नता एवं अन्तरंगता ही शाम्भवी शक्ति है।

सांख्य और त्रिक दर्शन—भेदक तत्त्व—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।

सांख्यकारिका का यह सिद्धान्त एवं इस प्रकार का तत्त्व-विभाजन त्रिक दर्शन को स्वीकार्य नहीं है। इसमें कहा गया है कि पुरुष से उच्चतर अन्य कोई तत्व है ही नहीं। त्रिकनय की दृष्टि यह है कि पुरुष से ऊपर तो अनेक ऊर्ध्ववर्ती तत्त्व हैं और इनका तारतम्य परमशिव तक जाता है।[१]

त्रिक दर्शन के अनुसार प्रकृति का स्वरूप

परशुरामकल्पसूत्र के षट्त्रिंशत्तत्त्वानि सूत्र की सौभाग्यसुधोदय नामक टीका में रामेश्वर सूरि कहते हैं—सत्वरजस्तमोगुणानां साम्यवस्था प्रकृतिः चित्तापरपर्याया त्रयोदशं तत्त्वम्।

शाक्तद्वैतवादी त्रिपुरारहस्य में कहा गया है कि सुषुप्ति में जो प्रकृति है, जाग्रत् मे वही चित्त है—

सुषुप्तौ प्रकृतिर्ज्ञेया तदन्ते चित्तमुच्यते।
वासनापिण्डसहिता चितिश्चित्तमुदीरितम्।। (७२)
अव्यक्तमेतदेवोक्तं वासनापिण्डभावतः।
पुरुषाणां विभेदेन चित्तं बहुविधं भवेत्।। (ज्ञानखण्ड)

माया के कारण कालादिक तत्त्वपञ्चकों से संकोच-प्राप्त जीवरूपी शिव की भेदमयी दृष्टि से अवभासित होता हुआ उसका जो वेद्यस्वरूप विश्व का अविभक्त सामान्याकार है, उसे प्रकृतितत्त्व कहते हैं।

अवच्छिन्न कर्तृत्व से विशिष्ट शून्य आदि प्रमाता के भाव वेद्यविशेष की अपेक्षा जो वेद्यसामान्यात्मक भोग्यरूप है, उसी की आख्या है—प्रकृतितत्त्व या प्रधान।

एवं कलाख्यतत्त्वस्य किञ्चित्कर्तृत्वलक्षणे।
विशेषभागे कर्तृत्वं चर्चितं भोक्तृपूर्वकम्।
विशेषणतया योऽत्र किञ्चिद्भागस्तदोत्थितम्।
वेद्यमात्रं स्फुटं भिन्नं प्रधानं सूयते कला।
(तन्त्रा. ६.९, २१३-२१४)

---

१. परिमल

जैसे पुरुष जगत् उन्मेषरूपी क्रीड़ा करने वाले परमेश्वर की आत्मकल्पना है, वैसे ही प्रकृति उसकी वेद्यकल्पना है—इदमेव हि परं स्वातन्त्र्यं यत् स्वं स्वरूपं वेदकमेव सत् वेद्यत्वेन अवभासयति। (विवेक भाग-१)

काश्मीर का शिवाद्वयदर्शन प्रकृति को तीनों गुणों की अक्षुब्ध दशा या साम्यावस्था मानता है। सांख्य दर्शन भी सत्व, रज एवं तमोगुण की साम्यावस्था को प्रकृति मानता है। (विवेक-६)

सांख्य एवं त्रिक दर्शन में प्रकृतिविषयक धारणा में अन्तर—सांख्य दर्शन प्रकृति को जड़ मानता है और पुरुष को कर्तृत्वहीन एवं प्रकृति से निर्लिप्त मानता है। काश्मीरीय शैवदर्शन के अनुसार अनन्त (स्वतन्त्रेश) जीवों के कर्मानुसार उन्हें सुख-दु:ख का भोगानुभव कराने हेतु प्रकृति क्षुब्ध करते हैं और उक्त गुणत्रय क्षुब्ध होकर जगत् का विस्तार करता है। सांख्य एक प्रकृति मानता है; किन्तु त्रिक दर्शन प्रत्येक पुरुष की पृथक्-पृथक् प्रकृति मानकर प्रकृति की अनन्त संख्या स्वीकार करता है। (तन्त्रालोक भाग-६)

प्रकृति से बुद्धितत्त्व, बुद्धितत्त्व से अहंकार, अहंकार से मन (अन्त:करण) उद्भूत होते हैं। माया-प्रमाता (मित प्रमाता) पाँच ज्ञानेन्द्रियों एवं पाँच कर्मेन्द्रियों (करणों) द्वारा भोग प्राप्त करता है। पाँच तन्मात्रायें पाँच तत्त्व को जन्म देती हैं। सांख्य दर्शन के तेईस तत्त्व यथावत् त्रिक दर्शन में भी ले लिये गये हैं।

मुख्य बात यह है कि अनन्त जीवात्माओं के कर्मों के अनुसार भोग प्रदान करने हेतु प्रकृति को क्षुब्ध करता है—

ईश्वरछाक्षुब्धलौकिकं पुरुषं प्रति।
भोक्तृत्वाय स्वतन्त्रेश: प्रकृतिं क्षोभयेद् भृशम्।।
(तन्त्रा. ६.६-२२५)

त्रिक दर्शन के ३६ तत्त्व

- शिवतत्त्व—१. शिव २. शक्ति (अभेद भूमिका)
- विद्यातत्त्व—१. सदाशिव २. ईश्वर ३. शुद्धविद्या (भेदाभेदभूमिका)
- आत्मतत्त्व—माया, कला, विद्या, राग, काल, नियति, पुरुष, प्रकृति, अन्त:करण, बुद्धि, अहंकार, मन, ५ ज्ञानेन्द्रियाँ, ५ कर्मेन्द्रियाँ, ५ तन्मात्रा एवं ५ पञ्चमहाभूत। (भेदभूमिका)

शैवपरिभाषा (शिवाग्र योगीन्द्र ज्ञान शिवाचार्य) में कहा गया है कि गुणों से पृथ्वीपर्यन्त मूलोपादान ही प्रकृति है, न कि गुणों का उपादान कारण। गुणों की साम्यावस्था प्रकृति है—गुणादिपृथिव्यन्तमूलोपादानं प्रकृति:। ननु गुणोपादानं न प्रकृति:,

किन्तु साम्यावस्थायां प्राप्त गुण एव। ते च परमकरणम्।

इसीलिये कहा गया है—

गुणादिक्षितिपर्यन्तं तत्त्वजातं यतो भवेत्।
तदव्यक्तमिति प्रोक्तं क्षोभ्यं श्रीकण्ठविक्रमैः।।
गुणा एव समावस्थां प्राप्ता प्रकृतिरुच्यते।
तत्कथं तदुपादानं प्रकृतिः प्रतिपाद्यते।।

पौ. पंस्त्व (श्लो. १८-२१) में कहा गया है—

न गुणानां समावस्था प्रकृतिः शिवशासने।
अचेतनत्वेऽनैकत्वाद्गुणानां मुनिपुङ्गवाः।
इष्टं कारणपूर्वत्वं तत्तु प्रकृतिसंज्ञितम्।।

प्रकृति का स्वरूप—तत्त्वसमाससूत्र में प्रकृति एवं पुरुष को नित्य मूल्य तत्त्व प्रतिपादित करते हुये उन्हीं से अनन्त ब्रह्माण्डों की सृष्टि का प्रतिपादन किया गया है। भावगणेश कहते हैं—

पुरुषः स जयत्याद्यः प्रकृतिः सा जयत्यजा।
याभ्यां संसृज्य सृज्यन्तेऽनन्तब्रह्माण्डकोटयः।।

तत्त्वसमाससूत्र (सांख्य का सूत्रग्रन्थ = कपिल-प्रणीत) में कहा गया है कि— अष्टौ प्रकृतयः।

भावगणेश (तत्त्वयाथार्थ्यदीपन टीका में) कहते हैं—प्रकर्षेण कुर्वन्तीति प्रकृतयः। तत्त्वान्तरारम्भकत्वं प्रकृतित्वमिति सामान्यलक्षणम् अर्थात् जिसके द्वारा प्रकर्ष पूर्व क्रिया निष्पादित की जाती है, उसे प्रकृति कहते हैं। प्रकृति का सामान्य लक्षण है— तत्त्वान्तरों का आरम्भकत्व। प्रकृति का एक लक्षण है—गुणों की साम्यावस्था— साम्यावस्थोपलक्षिता गुणाः प्रकृतिरित्येकं लक्षणम्।

प्रकृति के पर्याय (भावगणेश की दृष्टि से)—अव्यक्त, प्रधान, ब्रह्म, अक्षर, क्षेत्र, तम, माया, ब्राह्मी, विद्या, अविद्या, प्रकृति, शक्ति एवं अजा।

गुणत्रय की वृत्तियाँ

सतोगुण—

१. सन्तोष	५. क्षमा	९. दान्ति
२. आर्जव	६. स्मृति	१०. क्षान्ति
३. शौच	७. सौहित्य	११. परा दया
४. व्यवसाय	८. परम औत्सुक्य	

सन्तोषमार्जवं शौचं व्यवसायः क्षमा स्मृतिः।
सौहित्यं परमौत्सुक्यं दान्तिः शान्तिर्दया परा।।
सत्त्वस्य वृत्तयः प्रोक्ताः रजसश्चाथ कथ्यते।

रजोगुण—

१. शौर्य	४. अभिमान	७. निर्दयता
२. क्रौर्य	५. सकल्कता	८. भोग
३. महोत्साह	६. दृढ़ता	९. दम्भ

शौर्यं क्रौर्यं महोत्साहः साभिमानः सकल्कता।
दार्ढ्यं च निर्दयत्वं च भोगो दम्भो रजोगुणाः।।

तमोगुण—

१. अरति	४. पैशुन्य	७. मद	१०. मूढ़ता
२. मन्दता	५. गुरुता	८. आलस्य	
३. दैन्य	६. निद्राधिक्य	९. निरोध	

अरतिर्मन्दता दैन्यं पैशुन्यं गुरुता तथा।
निद्राधिक्यं मदालस्यं निरोधो मूढता च या।
तमसो वृत्तयः प्रोक्ता विभिन्ना सर्वजन्तुषु।।

काश्मीरीय शैव दर्शन के अनुसार (त्रिक दर्शनानुसार) महामाया के स्थूल (तृतीयावस्था) रूप का नाम है—प्रकृति। यह त्रिगुणात्मिका है। महामाया ही अपनी स्थूलावस्था में प्रकृति बन जाती है।

आचार्य क्षेमराज षट्त्रिंशत्तत्त्वसन्दोह में प्रकृति का स्वरूप इस प्रकार परिभाषित करते हैं—

संकलितेच्छाद्यात्मकसत्वादिसाम्यरूपिणी तु सती।
बुद्ध्यादिसामरस्यस्वरूपचित्तात्मिका मता प्रकृतिः।।

इसी प्रकृति के जो तीन गुण हैं, उनका स्वरूप इस प्रकार है—

१. इच्छा = इच्छाऽस्य रजोऽरूपाहंकृतिरासीदहम्प्रतीतिकरी।
२. ज्ञान = ज्ञानमपि सत्त्वरूपा निर्णयबोधस्य कारणं बुद्धिः।
३. क्रिया = तस्य क्रिया तमोमयमूर्तिर्मन उच्यते विकल्पकरी।

आचार्य हयग्रीव ने शाक्तदर्शनम् में कहा है—मायावस्था प्रकृतिः मूलवह्निशिखाग्रे मूलप्रकृतिः।

आचार्य कपिल ने सांख्यसूत्र में कहा है—सत्वरजस्तमसां साम्यावस्था प्रकृतिः।
(२.६१)

आचार्य विज्ञानभिक्षु सांख्यप्रवचनभाष्य में कहते हैं कि—सत्वादिद्रव्याणां या साम्यावस्था अन्यूनानतिरिक्तावस्था, न्यूनाधिकभावेनासंहतावस्थेति यावत् अकार्यावस्थेति निष्कर्ष:, अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थ:।

श्रुति में कहा गया है—

सत्वं रजस्तम इति एषैव प्रकृति: सदा।
एषैव संसृतिर्जन्तोरस्या: पारे परं पदम्।।

सांख्यशास्त्र के तत्त्व : २५ तत्त्वों का वर्गीकरण—

१. प्रकृति = १ ३. विकृति = १६
२. प्रकृति-विकृति = ७ ४. 'प्रकृति-विवृति से परे' पुरुष = १—**२५ तत्त्व**

मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिविकृतय: सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष:।।

स्वातन्त्र्यात्मा चिति शक्ति ही ज्ञान, क्रिया और मायारूप होकर पशुदशा में संकोच के प्रकर्ष से—१. सत्व २. रज ३. तमस् एवं तत्स्वभावात्मक चित्त के रूप में स्फुरित होती है—स्वातन्त्र्यात्मा चितिशक्तिरेव ज्ञानक्रियामायाशक्तिरूपा पशुदशायां संकोचप्रकर्षात् सत्वरजस्तमस्वभावचित्तात्मतया स्फुरति—यह बात श्रीप्रत्यभिज्ञा में कही गई।

श्रीप्रत्यभिज्ञा में कहा गया है—

स्वांगरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये त एव पशो: सत्वं रजस्तम:।।

आचार्य महेश्वरानन्द कहते हैं—ताश्च पशौ सत्वं रजस्तम इति भवन्ति। याभि: सुखदु:खमोहात्मकोऽयं लोकव्यवहार:।

सारांश यह कि—संवित् शक्ति की अंगभूत—१. ज्ञान शक्ति २. क्रियाशक्ति एवं ३. माया शक्ति पश्वावस्था में—सतोगुण, रजोगुण एवं तमोगुण बन जाते हैं और वे प्राणियों में सुख-दु:ख-मोहस्वरूप सांसारिक लोकव्यवहार का प्रवर्तन करते हैं।

सत्वादि सामरस्यस्वरूप चित्तात्मिका शक्ति ही प्रकृति है। आचार्य क्षेमराज कहते हैं—

सत्वादिसामरस्यस्वरूपचित्तात्मिका मता प्रकृति:।[१]

प्रकृति का पञ्चभूतात्मक स्थूल स्वरूप

अपञ्चीकृत महाभूत पञ्चीकृत महाभूत

प्रथमावस्था—इस अवस्था में तन्मात्रायें शुद्ध स्वरूप में रहती हैं।

१. षट्त्रिंशत्तत्त्वसन्दोह

द्वितीयावस्था—इस अवस्था में पञ्चमहाभूतों की प्रत्येक तन्मात्रा की दो बराबर भागों में विभाजित होने की प्रवृत्ति।

तृतीयावस्था—इस अवस्था में वे बराबर भागों में बँट जाती हैं।

चतुर्थावस्था—इस अवस्था में प्रत्येक महाभूत की आधी तन्मात्रा अपने अविकल्प रूप में रहती है और अर्ध चार अंशों में आपने-आपको विभाजित कर लेती है—प्रत्येक अंश सम्पूर्ण तन्मात्रा का आठवाँ हिस्सा होता है।

इस तरह इस अवस्था में प्रत्येक प्रथमावस्था की तन्मात्रा अपने-आपको पाँच हिस्सों में बाँट लेती है—एक अर्धभाग और चार १/८ अंश।

पञ्चमावस्था—इस अवस्था में प्रत्येक आधा भाग ज्यों का त्यों बना रहता है और शेष चार भूतों के लिये गये चार १/८ अंशों के साथ मिल जाता है।

अवस्थायें	आकाश १	वायु २	अग्नि ३	जल ४	पृथ्वी ५	विवरण
१						तन्मात्राओं का अपना शुद्ध अस्फुट स्वरूप
२						तन्मात्राओं की दो भागों में विभाजित होने की उन्मुखता
३						तन्मात्राओं की विभाजित अवस्था
४	००००	००००	००००	००००	००००	आधा भाग अविकल्प रहता है और शेष आधा अपने-आपको चार अंशों में विभाजित कर लेता है।
५	०१ ०२ ०३ ०४ ०५	०१ ०२ ०३ ०४ ०५	०१ ०२ ०३ ०४ ०५	०१ ०२ ०३ ०४ ०५	०१ ०२ ०३ ०४ ०५	प्रत्येक तन्मात्रा के आधे भाग का दूसरे भूतों के चार अंशों के साथ मेल हो जाता है।

स्थूल महाभूतों की उत्पत्ति का क्रम

१. आकाश तत्त्व	१/२ आकाश	१/८ वायु	१/८ अग्नि	१/८ जल	१/८ पृथ्वी	पञ्चीकृतमहाभूत-सम्भवं कर्म सञ्चितम्।
२. वायु तत्त्व	१/२ वायु	१/८ आकाश	१/८ अग्नि	१/८ जल	१/८ पृथ्वी	शरीरं सुखदु:खानां भोगायतनमुच्यते।

३. अग्नि तत्त्व	१/२ अग्नि	१/८ आकाश	१/८ वायु	१/८ जल	१/८ पृथ्वी	
४. जल तत्त्व	१/२ जल	१/८ आकाश	१/८ वायु	१/८ अग्नि	१/८ पृथ्वी	(आत्मबोध, शंकराचार्य)
५. पृथ्वी तत्त्व	१/२ पृथ्वी	१/८ आकाश	१/८ वायु	१/८ अग्नि	१/८ जल	

त्रिक दर्शन का पुरुष—यह सर्वज्ञ है। यह सर्वकर्ता भी है; किन्तु स्वात्माख्याति (आत्मज्ञान) न होने के कारण सङ्कुचित-जैसा दृष्टिगत होता है। सांख्य का पुरुष तो क्रियाहीन है।

त्रिक दर्शन की प्रकृति—यह केवल पुरुष के द्वारा प्रेरित नहीं होती; प्रत्युत परमेश्वर की स्वातन्त्र्य शक्ति के व्यतिरेक (पार्थक्य) की स्थिति में तो प्रकृति सामर्थ्यहीन हो जाती है। इसकी शक्ति स्वातन्त्र्य शक्ति (परमशिव अघटन-घटनापटीयसी; कर्तुं-अकर्तुं-अन्यथाकर्तुं की क्षमता वाली शक्ति) से उद्भावित है। श्री स्पन्दशास्त्र (स्पन्द-कारिका) में भी यही कहा गया है—

> न हीच्छा नोदनस्यायं प्रेरकत्वेन वर्तते।
> अपि स्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत्।।

महेश्वरानन्द की दृष्टि—

१. सांख्यदर्शन की जो यह दृष्टि है कि—पुरुषादुपरि न किञ्चित् तत्त्वान्तरम्। पुरुषश्चोदासीनः। प्रकृतिश्च तदधीना, सा च नित्या, न विकृतिः षोडकस्तु नित्यं विकारात्मक एवेत्याचक्षते। नैवमस्मत्समयः—यह हमारा मत नहीं है।

२. पुरुष सांख्योक्त पुरुष के समान पङ्गु (क्रियाहीन) नहीं है; प्रत्युत इसके विपरीत वह कर्ता है (कर्तृत्व शक्ति से सम्पन्न है)।

३. प्रकृति मात्र पुरुष से प्रेरित नहीं होती; प्रत्युत शिव की स्वातन्त्र्य शक्ति से प्रेरित होती है।

४. सांख्य की प्रकृति जड़ है; किन्तु त्रिक दर्शन की मूल प्रकृति (स्वातन्त्र्य शक्ति संवित् शक्ति, विमर्श) चेतन है।

५. सांख्य की प्रकृति पुरुष से सर्वथा भिन्न तत्त्व है। उसका पुरुष के साथ केवल विच्छेद्य संयोगमात्र होता है; किन्तु त्रिकदर्शन की प्रकृति अविच्छेद्य है, शिव में समवेत है, शिव की अविच्छेद्य समवायिनी शक्ति है। इसका पुरुष के साथ (सांख्य की भाँति) आकस्मिक संयोग वाला सम्बन्ध नहीं है; प्रत्युत उसका शिव के साथ अविच्छिन्न, स्वसमवेत, शाश्वत, अनादिकालीन एवं शिव की आत्मशक्ति के रूप में एवं शिव के स्वभाव के रूप में अविनाभाव सम्बन्ध है।

६. पुरुष और प्रकृति की (सांख्य दर्शन की) दृष्टि त्रिक दर्शन से पूर्णतया पृथक् है।

७. सांख्य की प्रकृति प्रकृति है, विकृति नहीं है; किन्तु त्रिक दर्शन में वह प्रकृति एवं विकृति दोनों है।

८. षोडशक भी कभी विकृत है, कभी विकृत नहीं है।

(क) सा (प्रकृतिः) च नित्यं विकृता कदाचित्त्वविकृता।

(ख) षोडशकोऽपि कदाचिदविकृतः कदाचिच्च विकृतोऽपीति।[१]

कहा भी गया है—

अथ ये तमुदासीनमाहुर्नित्योदितोद्यमम्।
त एवं प्रतिवक्तव्याः सर्वदा चेदनुद्यमः।।
तेन मृत्पिण्डकल्पेन जगतः किं प्रयोजनम्।
किमित्यङ्गीकृतिस्तस्य किं प्रमाणोऽपि वा भवेत्।।
यदुच्येत तदेवैतदौदासीन्यं चिदात्मनः।
प्रवर्तयति विश्वस्मिन् प्रकृतिं विकृतिस्पृशग्।।

अन्यथा प्रकृतेः किञ्चिन्न प्रागल्भ्यं प्रवर्तते।
तदर्थं स्वीकृतिस्तस्य विश्वातिक्रान्ततेजसः।।
तेनैव च प्रमाणेन तस्य सिद्धिर्भवेदिति।
अत्रोच्यते यथा सा चेदस्यौदासीन्यकल्पना।।
अनुदासीन एवेति तात्पर्यं पर्यवस्यति।
वैलक्षण्यात् प्रकृत्यादेः सूक्ष्ममुद्यममास्थितः।।
इत्यसौ निष्क्रियो न स्याद् यतः सूक्ष्मापि सा क्रिया।
स्थवीयसीः क्रिया सूते प्रकृतौ विकृतिष्वपि।।
जडा अपि स्वभावेन देहाक्षभुवनादयः।
यत्प्रभावात् प्रवर्तन्ते स कथं निष्क्रियो भवेत्।।

महेश्वरानन्द कहते हैं—

अश्वेषु गच्छत्सु रथः प्रयातीत्युदेतु वादो रथमध्यवर्ती।
सुखं निषण्णो विषयान्तरं च प्राप्तः पुमान् किन्नु चकार शम्भो।।

यह भी कहा गया है कि त्रिक दर्शन की अपनी मौलिक दृष्टियाँ हैं; यथा—

शिवारम्भः प्रकृत्यन्तस्तत्त्वौघः प्रत्यपादि यः।
तत्र विश्वोत्तरस्यास्य शिवस्य परमेष्ठिनः।।
सर्वक्रिया च सार्वज्ञ्यं सर्वदोदयता तथा।
सर्वव्यापकता पूर्तिः प्रथन्ते पञ्चशक्तयः।।

---

१. परिमल (गाथा क्र०-२०)

अथ शक्तौ तदिच्छायामुन्मना समनेत्यपि।
व्यापिनी नादबिन्दू च रश्मयः पञ्च जाग्रति।।
अनुग्रहतिरोधानसंहृतिस्थितिसृष्टयः ।
जगत्कृत्यानि पञ्चापि शक्तितत्त्वभुवः प्रथाः।

* * * * * * *

सदाशिवे पुनस्तत्त्वे ईशानस्तत्पुमानिति।
अघोरो वामदेवश्च सद्योजातश्च शक्तयः।।
तदूर्ध्वमीश्वरे तत्त्वे रूपातीतोत्तरं महत्।
रूपातीतं च रूपं च पदं पिण्ड इति क्रमः।।
तुर्यातीतं च तुर्यं च सुषुप्तिस्वप्नजागराः।
अवस्थाः पञ्च शुद्धाया विद्यायाः शक्तिविभ्रमः।।
सैवेयं शाम्भवीं शक्तिमाणवीं शोधनीमपि।
बोधनीमपि ता दीक्षा प्रसूते स्फूर्तिशालिनी।।
निरुपायं प्रकाशाख्यो ज्ञानं योगः क्रियेत्यपि।
चर्येति च तदुत्थैव पुमर्थोपायकल्पना।।
तत एव महाशक्तिर्हाकिनी नाम जायते।
डाकिनी राकिनी तद्वल्लाकिनी काकिनीत्यपि।।
साकिनीति च देहेऽस्मिन् यद्वैचित्र्यं विजृम्भते।
अथ मायेति यत् तत्त्वमुच्यते तस्य शक्तयः।।
कलाविद्ये रागकालौ नियतिस्तत्र पञ्चमी।
प्राणोऽपानः समानः स्यादुदानो व्यान इत्यपि।।
शरीरयात्रोपक्षीणः पुरुषे शक्तिसंग्रहः।।
प्रकृतौ तु गुणाः सत्वं रजश्च तम इत्यपि।
विकृत्यविकृती तद्वदुच्यन्ते पञ्च रोचिषः।
अथैतयोः पुम्प्रकृत्योः स्फुरणक्रियया भवेत्।।
वक्ष्यमाणमशेषेण विश्ववैचित्र्यकल्पनम्।
तत्प्रकारोऽपि विधिवद् वितत्य प्रतिपाद्यते।।
पुम्प्रकृत्योः समुद्योगाद् धातुरात्मेति जायते।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्लाह्वयैरयम् ।।

* * * * * * *

वातपित्तकफाख्यैश्च स्वांशोद्योतैर्विजृम्भते।
अनयोरेव संघट्टाद् यो मनो धीरहङ्क्रिया।।

इत्यन्त:करणोल्लासस्त्रैविध्येनानुभूयते ।।
तत्र बुद्ध्युद्यमाद् धर्मो ज्ञानं वैराग्यमित्यपि।
ऐश्वर्यं वरदत्वं चेत्युन्मीलति विचित्रता।
क्रमादेतद्विपर्यासो मनस: शिल्पमिष्यते।।
मदीयत्वामदीयत्वकार्पण्यमदमत्सरा: ।
अहङ्कारस्फुरत्ता स्यु: संसारस्फूर्तिहेतव:।।
तद्वत् तयोर्विभूत्यैव गुणा: सत्वं रजस्तम:।
इति त्रय: प्रतीयन्ते विकृताविकृतोदया:।।

* * * * * * *

तत्र सत्वस्य सौन्दर्यं सौभाग्यं साधुशीलता।
सौमुख्यमथ सौजन्यमिति स्फुरणविभ्रम:।।
वशीकरणमाकर्ष: शान्ति: पोषणपालने।
इति कर्माणि रजसो गुणस्याहु: परिग्रहम्।।
अथ विद्वेषणं यत् स्याद् यच्चोचाटनमुच्यते।
स्तंभनं मोहनं चेति मारणं चेति या: क्रिया:।।
तदेतदखिलं तस्य तमस: क्षोभविभ्रम:।
गुणैरेभिरुपस्कारमहङ्कारो यदाश्नुते।।
सात्विकत्वादिभेदेन तदा त्रैविध्यमृच्छति।
तत्र शब्दस्पर्शरूपरसगन्धा इति क्रमात्।।
सात्त्विक: स्वेन रूपेण प्रथते भोग्यवस्तुषु।।
राजसस्तु विजृम्भेत वचनादानधावनै:।
विसर्गानन्दनाभ्यां च पञ्चभि: स्वस्वभाववान्।
तामसोऽपि खवाय्वग्निपाथोभूमिस्वलक्षणै:।।
भूतैर्वपुष्मान् प्रथते विश्वोपादानहेतुभि:।
किञ्च त्रैविध्यवत्यस्मिन्नहङ्काराह्वये पदे।।
विभूतिविभ्रमोत्कर्षात् त्रिधा विततिरिष्यते।।
पुण्येच्छा तत्त्वजिज्ञासा लोकोत्तीर्णार्थगृध्नुता।
वस्तुष्वध्यवसाय: श्रीर्धी: संकल्पविकल्पिनी।
शान्तिदान्त्यादिमित्रस्य सात्विकस्य विजृम्भितम्।
श्रोत्रत्वगक्षिरसनाघ्राणेन्द्रियमयीं दशाम्।
राजसस्याहुरैश्वर्यं हर्षभीत्यादिदायिन:।।
वाणी पाणिरथो पाद: पायूपस्थमिति क्रमात्।
मोहालस्यादिसुहृदस्तामसस्य परिच्छद:।।

अथ या महती सिद्धिः प्रसूता प्रस्तुतद्वयात्।
तस्याः पञ्चविधा स्फूर्जा साधकेष्वनुभूयते।।

* * * * * * *

यथेत्सितशरीराप्तिः प्रवेशोऽन्यस्य वर्ष्मणि।
दूराध्वयानायानं च दूरश्रवणदर्शनम्।।
अदृश्यकरणं चेति तत्प्रकारः प्रतीयताम्।
पुण्यक्रियेति काप्यस्ति विश्वोत्पत्त्यै स्थितिस्तयोः।
वीर्यं गाम्भीर्यमैश्वर्यं भोक्तृत्वं दातृतेत्यपि।
तस्याः प्रथनवैचित्र्यं यल्लभ्यं भाग्यशालिभिः।।
इत्थं तत्रैव चिन्नाडी ज्ञानसूत्रमिति स्मृता।
चित्रपद्मशिवाख्याश्च शक्त्यात्माभिहिते अपि।।
नाडीः पञ्च प्रपञ्चेऽस्मिन् प्रसुवाना प्रवर्तते।
एवं हाटककालाग्नी कूटस्थः कूर्म इत्यपि।।
अनन्तः शक्त्युपश्लिष्टः कपिलर्षिरिति क्रमात्।
तद्विजृम्भैव बोद्धव्या सप्तपातालधारिणी।।

* * * * * * *

उक्तैतदखिलाभोगस्वभावत्वेऽप्यनाविलः।
निस्तरङ्ग इवाम्भोधिर्वहन् गांभीर्यसम्पदम्।।
चिदानन्देषणाज्ञानक्रियापञ्चकशक्तिमान्।
भैरवः परमो नाथस्तत्त्वान्ते कथयिष्यते।।

* * * * * * *

प्रपञ्चवैचित्र्यभुवं प्रपञ्चयन् प्ररूढपञ्चार्थरहश्चमत्क्रियाम्।
प्रकाशयामास महेश्वरः स्वयं परं परामर्शमयीमहंस्फुराम्।।
अहङ्क्रिया नित्यमहङ्क्रियायां पराक्रमो यस्य पराक्रमे च।
स एव वीरो ननु तस्य शास्त्रं विमर्शशाणोल्लिखिता स्वशक्तिः।।

सांख्य दर्शन में प्रकृति जड़तत्त्व है। वह किसी शक्तिमान की चिदात्मिका समवायिनी शक्ति नहीं है; किन्तु त्रिक दर्शन में वह शाम्भवी शक्ति है—

ज्ञानक्रियामायानां गुणानां सत्वरजस्तमस्स्वभावानाम्।
अविभागावस्थायां तत्त्वं प्रकृतिरिति शाम्भवी शक्तिः।।

शैव-शाक्त आगमिक दृष्टि—प्रकृति के सम्बन्ध में आगमिक दृष्टि का वैलक्षण्य ध्यातव्य है।

माया के कारण मायादिक तत्त्वपञ्चक से सङ्कुचित जीवरूपी शिव की भेदात्मिका दृष्टि से अवभासित उसका जो वेद्यरूप विश्व का अविभक्त सामान्याकार है, उसकी ही आख्या है—प्रकृति तत्त्व।

ईश्वरप्रत्यभिज्ञाकार की दृष्टि—ईश्वरप्रत्यभिज्ञा में कहा गया है कि—शून्यादि प्रमाता के अपने-आप से व्यतिरिक्त वेद्यमात्र स्वरूप वाले प्रकृति तत्त्व से कार्य एवं करण (इन्द्रिय) भाव से तेईस प्रकार के प्रमेयों का विकास होता है। यही प्रकृति है—

त्रयोविंशतिधा नेयं यत्कार्यकरणात्मकम्।
तस्याविभागरूप्येकं प्रधानं मूलकारणम्।।[1]

परमात्मा की शक्तियाँ

ज्ञान शक्ति → सतोगुण क्रिया शक्ति → रजोगुण माया शक्ति → तमोगुण

आचार्य क्षेमराज की दृष्टि—सांख्याचार्यों ने तो कहा था कि—सत्वरजस्तभ-साम्यावस्था ही प्रकृति है; किन्तु त्रिक दर्शन गुणत्रय का समुच्चय (समष्टि) को ही प्रकृति नहीं मानता। उसकी दृष्टि इस प्रकार है—

इच्छादित्रिसमष्टि: शक्ति: शान्ताऽस्य सङ्कुचद्रूपा।
सङ्कलितेच्छाद्यात्मकसत्वादिकसाम्यरूपिणी तु सती।
बुद्ध्यादिसामरस्यस्वरूपचित्तात्मिका मता प्रकृति:।।
इच्छाऽस्य रजोरूपाऽहङ्कृतिरासीदहम्प्रतीतिकरी।
ज्ञानमपि सत्वरूपा निर्णयबोधस्य कारणं बुद्धि:।
तस्य क्रिया तमोमयमूर्तिर्मन उच्यते विकल्पकरी।।[2]

यह भी कहा गया है कि—पराप्रकृति ही भगवान् वासुदेव हैं और समस्त जीव उसके अंश हैं। (पाञ्चरात्र मत)

स्वातन्त्र्यात्मा चिति शक्ति ही ज्ञान, क्रिया एवं माया के रूप में उदित होकर पशुदशा में संकोच-प्रकर्ष के कारण सतोगुण, रजोगुण एवं तमोगुण बन जाती है—

स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये त एव पशो: सत्वं रजस्तम:।।

इन्हीं गुणों की साम्यावस्था प्रकृति है।[3]

---

१. ईश्वरप्रत्यभिज्ञा (भाग २.३-१-१०)
२. षट्त्रिंशत्तत्त्वसन्दोह (१३-१५)
३. स्पन्दकारिका

अन्तःकरण के व्यापार

अथाहङ्कारबुद्धिमनसां तत्त्वमर्थद्वारोपदर्शयति—

कल्लोलंताइ सइं हिअअंबुणिहिम्मि तिण्णि कलणाइं।
आअङ्कंति इदंतं तत्थ अहंतं च एत्थ ओप्पंति॥२१॥

(कल्लोलायमानानि सदा हृदयाम्बुनिधौ त्रीणि करणानि।
आकर्षन्तीदन्तां तत्राहन्तां चात्रार्पयन्ति॥)

हृदय के समुद्र में (तरंगस्वरूप) तीन करण (मन, बुद्धि एवं अहंकार) सदैव तरंगित होते रहते हैं और वे वहाँ (हृदय में) इदन्ता (जागतिक बाह्य विषयों एवं विकल्पों) को आकृष्ट करते रहते हैं तथा यहाँ (बाह्याभिव्यक्त विश्व में) अहन्ता (आत्मसत्ता या हृदय के विचारों) को अर्पित (प्रकट) करते रहते हैं॥२१॥

व्याख्यातरूपं स्वहृदयं हि वैतत्यसर्वतत्त्वास्पदत्वादिना धर्मेण—

नमः प्रमातृवपुषे शिवचैतन्यसिन्धवे।

इति स्थित्या समुद्रतयाऽध्यवसीयते। तत्र कालविशेषावच्छेदव्युदासेन महातरङ्गवदाचरन्ति त्रीणि करणानि प्रमातृरूपस्य कर्तुः साधकतमानीन्द्रियाणि विद्यन्ते। तानि च यथा इदन्तानुप्राणितां विषयवैचित्र्यसम्पदं तत्र हृदयान्तरादाकर्षन्ति हठादनुप्रवेशयन्ति, तद्वदहन्तासारां स्वहृदयचिच्छक्तिमप्यत्र वेद्यभूमावर्पयन्ति, अनैसर्गिकत्वेऽपि नैसर्गिकतयाऽनुभावयन्ति। तानि चाहङ्कारो बुद्धिर्मन इति च व्यवह्रियन्ते तत्र ममेदं न ममेदमित्यभिमानसाधनमहङ्कारः, अध्वसायनिमित्तं बुद्धिः, सङ्कल्पविकल्पहेतुर्मन इति प्रत्येकं लक्षणम्। अयमर्थः—अहङ्कारादीन्यात्मनोऽन्तःकरणानि न केवलं बहिरवलोकितान् विषयानन्तरनुभावयन्ति, किं तर्हि स्वसंक्रान्तया प्रमातृचिच्छक्त्या तं बहिर्वर्तिनमखिलमपि वेद्यवर्गं विषयीभावयोग्यतानुप्रवेशनार्थं प्रकाशमानस्वभावतापादनात्मकपावनीकरणयुक्त्या जिघत्सितौषधाद्यभिमन्त्रणन्यायेनानुगृह्णन्तीति कल्लोलायमानानीति। एतानि हि हृदयमहाम्बुराशौ महातरङ्गाः। ज्ञानकर्मेन्द्रियाणि तु तरङ्गानुतरङ्गन्यायमनुवर्तन्त इत्यर्थः। एषां च विभूतिपरिस्पन्दप्राचुर्यमनन्तरमेवात्यन्तं वितत्य व्याख्यातम्।

अन्तःकरण अन्तस्थ विचारों को बाहर एवं बाह्यस्थ विषयों को भीतर प्रकट एवं विलीन करते रहते हैं। यही मन, बुद्धि एवं अहंकार के प्रमुख कार्य हैं।

जिस प्रकार समुद्र में बड़ी-बड़ी तरंगें उत्पन्न और लीन होती रहती हैं, उसी प्रकार हृदय-समुद्र में मन, बुद्धि एव अहंकाररूप महातरंगें तरंगायमान होती हुई लगातार उत्पन्न एवं लीन होती रहती हैं। ये हृदय की भावनाओं एवं विचारों को बाहर एवं बाहर के विषयों को भीतर प्रकट एवं विलीन करती रहती हैं।

मन संकल्प-विकल्पात्मक होता है। बुद्धि निश्चयात्मिका (अध्यवसायात्मिका) होती है। अहंकार—यह मेरा है, यह मेरा नहीं है—इत्याकाराकारित अहमात्मक विचारों से युक्त अभिमान का पोषक होता है।

मन बुद्धि और अहंकार—मन, बुद्धि, चित्त एवं अहंकार अन्तःकरणचतुष्टय के अङ्ग हैं।

(क) अध्यवसायनिमित्तं बुद्धिः। (परिमल)

(ख) संकल्पविकल्पनहेतुर्मनः। (परिमल)

(ग) तानि चाहङ्कारो बुद्धिर्मन इति च व्यवह्रियन्ते तत्र ममेदं न ममेदमित्यभिमान-साधनमहङ्कारः। (परिमल)

मन, बुद्धि एवं अहंकार—तीनों हमारे हृदय में निरन्तर कल्लोलित या आन्दोलित होकर भीतर एवं बाहर के विषय-वैचित्र्य (विषयों के अनन्तप्रकारात्मक विस्तार) का अनुभव करते रहते हैं। ये तीनों करण हैं।

करण क्या है? साधकतमं करणम्। जो किसी का सर्वोच्च साधन हो, उपाय हो, वही करण है। ये तीनों आन्तर विचारों को बाह्य जगत् में एवं बाह्यवर्ती विषयों को अन्तर (हृदय) में प्रकट करने के अन्यतम साधन हैं; अतः करण कहलाते हैं। सामान्यतया अन्तःकरण (अन्तर्जगत् के करण) चतुर्विध माना जाता है और इसके चार अङ्ग निम्नाङ्कित हैं—

१. मन ३. चित्त
२. बुद्धि ४. अहङ्कार

किन्तु इनमें यहाँ चित्त को छोड़कर तीन को ही करण माना गया है।

परिमलकार की दृष्टि—हृदयाम्बुनिधौ—हृदयसमुद्र में। चूँकि हृदय समस्त तत्त्वों के वैतत्य का आस्पद (स्थान) है; अतः इसे समुद्र कहा गया है—स्वहृदयं हि वैतत्य-सर्वतत्त्वास्पदत्वादिना धर्मेण नमः प्रमातृपुरुषे शिवचैतन्यसिन्धवे—इति स्थित्या समुद्रयाऽध्यवसीयते।[१]

कल्लोलायमानानि—तरंगित। कालविशेष के अवच्छेद के व्युदास (बहिष्करण, दूरीकरण, अनादर, तिरस्कार) के कारण उक्त तीन करण प्रमातारूप कर्ता के लिये साधकतम इन्द्रियाँ हैं; जो कि समुद्र में उठने वाले महातरंगों के समान कार्य करते हैं।[२]

१. महेश्वरानन्द २. परिमल

करणों की कार्य-प्रक्रिया[१]—अन्त:करण किस प्रकार कार्य किया करता है? उसकी क्रियापद्धति क्या है? इसके विषय में महेश्वरानन्द की दृष्टि क्या है? इस विषय में उन्होंने परिमल में सविस्तार प्रकाश डाला है।

अन्त:करण की कार्य-प्रणाली—अहङ्कारादीन्यात्मनोऽन्त:करणानि न केवलं बहिरवलोकितान् विषयानन्तरनुभावयन्ति किं तर्हि स्वसंक्रान्तया प्रमातृचिच्छक्त्या तं बहिर्वर्तिनमखिलमपि वेद्यवर्गं विषयीभावयोग्यतानुप्रवेशनार्थं प्रकाशमानस्वभावतापदनात्मकपावनीकरणयुक्त्या जिघत्सितौषधाद्यभिमन्त्रणन्यायेनानुगृह्णन्तीति कल्लोलायमानानीति। एतानि हि हृदयमहाम्बुराशौ महातरङ्गा:।[२] सारांश यह कि मन-बुद्धि-अहङ्कार आत्मा के आन्तर करण (उपायभूत साधन) हैं। ये केवल बाह्यावलोकित विषयान्तरों का ही अनुभव नहीं कराते; प्रत्युत प्रमाता की चित् शक्ति के द्वारा बाह्यवर्ती समस्त वेद्यवर्ग (ज्ञेय जगत्) को अपना विषय बनाकर उन्हें अन्तर्जगत् में भी प्रविष्ट कराते हैं। ये अन्त:-प्रविष्ट विषय हृदयसमुद्र में महातरंगों के रूप में उत्पन्न और विलीन होते रहते हैं। ये ही हमारी चित्तवृत्तियों का रूप धारण करते हैं। चित्तवृत्ति और उसका स्वरूप क्या है?

योगी आचार्य विज्ञानभिक्षु की दृष्टि—बुद्धि की वृत्ति दीपक की शिखा की भाँति बुद्धि का अग्रभाग है, जिससे कि चित्त का एकाग्रता रूप व्यवहार होता है। यह अग्रभाग ही इन्द्रिय द्वारा बाह्य विषय के सम्पर्क में आने पर विषयाकार में उसी प्रकार परिणत हो जाता है, जिस प्रकार की साँचे में डाला गया पिघला हुआ ताँबा—बुद्धिवृत्तिश्च प्रदीपस्य शिखावद्बुद्धेरग्रभागो येन चित्तस्यैकाग्रव्यवहारो भवति। स एवाग्रभाग इन्द्रियद्वारा बाह्यार्थे संयुज्य अर्थाकारेण परिणमते मूषानिक्षिप्तद्रवताम्रवत्।[३]

सांख्यसूत्रकार की दृष्टि—सांख्यसूत्रकार कहते हैं—भागगुणाभ्यां तत्त्वान्तरं वृत्ति: सम्बन्धार्थं सर्पतीति (सां.-५.१०७) अर्थात् वृत्ति चित्त के भाग एवं गुण दोनों से ही भिन्न पदार्थ है और यह विषय से सम्बन्ध स्थापित करने के लिये सरकती है।

बुद्धि की वृत्ति ही विषय से सम्पर्क स्थापित करने हेतु लिये जाती है। (सांख्य सूत्र : अध्याय-५, सूत्र १०७)। इस बुद्धि की वृत्ति की एक विशेषता यह है कि यह वृत्ति बुद्धि का उस प्रकार का कोई अंश भी नहीं है, जैसे कि स्फुलिंग अग्नि का अंश होता है; क्योंकि उस अवस्था में तो यह बुद्धि से विभक्त होने के कारण उसका विषय से सम्बन्ध स्थापित नहीं कर सकती और यह न तो इच्छा आदि की भाँति उसका गुण ही है, जिस प्रकार कि रूप आदि अग्नि के गुण होते हैं; क्योंकि ऐसा स्वीकार करने पर वह अक्रिय हो जाती है तब उसमें सर्पणरूप क्रिया नहीं हो सकती; अत: इनसे भिन्न तत्त्वान्तर का परिणाम विशेष ही मानना पड़ेगा।

इसी तथ्य को विज्ञानभिक्षु इस प्रकार कहते हैं—वृत्ति न तो अग्नि की चिनगारी की भाँति बुद्धि का भाग है और न तो यह इच्छा आदि के समान उसका गुण है; क्योंकि द्रव्य में ही क्रिया सम्भव है।

१-२. परिमल ३. योगसारसंग्रह (प्रथमोंऽश:)

वह वृत्ति जो पुरुष में प्रतिबिम्बित होकर भासित होती है, वही प्रमाण का फलरूप प्रमा कही जाती है और उसी को द्रष्टा की वृत्ति से सारूप्य कहा जाता है—वृत्तिसारूप्यमितरत्र।[१]

आचार्य भोजराज की दृष्टि—भोजराज कहते हैं कि निर्मल सत्वरूप चित्त का परिणाम ही वृत्तियाँ हैं—चित्तस्य निर्मलसत्वपरिणामरूपस्य या वृत्तयो।

आचार्य व्यास की दृष्टि—योगभाष्यकार व्यास कहते हैं कि—आकर्षन्तीदन्तां तत्राहन्ता चात्रार्पयन्ति।

ज्ञान की प्रक्रिया—(महार्थमञ्जरी-२१) महार्थमञ्जरी के अनुसार करणों के दो व्यापार हैं—इदन्ता को हृदय में आकृष्ट करना, अहन्ता को जगत् के लिये अर्पित करना। तत्त्वत: अहन्ता और इदन्ता दो पदार्थ नहीं हैं; क्योंकि आत्मा (अहन्ता/अहं) ही सारे विश्व का मूल है—आत्मा खलु विश्वमूलं (महार्थमञ्जरी-३)। इन दृष्टियों को अन्त:सम्बद्ध करने पर जो निष्कर्ष निकलता है, वह इस प्रकार है—

---

१. योगसूत्र (१.४)

न्यायशास्त्र में ज्ञान की प्रक्रिया—इन्द्रियार्थ-सन्निकर्ष + मन का अर्थ के साथ संयोग → ज्ञानाप्ति।

महार्थमञ्जरीकार की दृष्टि इस प्रकार है—त्रीणि करणानि। आकर्षन्तीदन्तां तत्राहन्तां चात्रार्पयन्ति। (२१)

परिमलकार की व्याख्या—तानि च यथा इदन्तानुप्राणितां विषयवैचित्र्यसम्पदं तत्र हृदया-न्तरादाकर्षन्ति, हठादनुप्रवेशयन्ति, तद्वदहन्तासारां स्वहृदयचिच्छक्तिमप्यत्र वेद्यभूमावर्पयन्ति, अनैसर्गिकत्वेऽपि नैसर्गिकतयाऽनुभावयन्ति।

सारांश यह कि अन्तर्जगत् और बाह्य जगत् (विचार और बाह्य विषयरूप विश्व) में जो सम्बन्धस्थापन होता है, उसका साधन केवल अन्तःकरण (मन, बुद्धि, अहंकार) है। इनका स्वरूप इस प्रकार है—

१. अहङ्कार—ममेदं न ममेदमित्यभिमानसाधनमहङ्कारः।

२. बुद्धि—अध्यवसायनिमित्तं बुद्धिः।

३. मन—संकल्पविकल्पहेतुर्मन इति।[1]

(क) ये बाह्य विषयों की हृदय में अनुभूति कराते हैं।

(ख) ये हृदय की चिच्छक्ति द्वारा उसमें अन्तर्निहित विषयवस्तु को भी बाहर प्रकट करते रहते हैं।

विश्व के मूलभूत पदार्थ

आन्तर तत्त्व
(अन्तर्जगत्)

अहं
(आत्मा)

बाह्य तत्त्व
(बाह्यजगत्)

इदम्
(जगत्)

आत्मा की अभिव्यक्ति ही जगत् है—

१. आत्मा की सूक्ष्माभिव्यक्ति → सूक्ष्म जगत्।

२. आत्मा की स्थूलाभिव्यक्ति → स्थूल जगत्। (षट्त्रिंशदात्मक जगत्)

—World As An Idea में जर्मन दार्शनिक

आत्मा खलु विश्वमूलं की दृष्टि—महार्थमञ्जरीकार की इस प्राथमिक दृष्टि के अनुसार अहं एवं इदम् का स्वरूप भिन्न है। इसके अनुसार—

---

१. परिमल (२१)

इहात्मैव हि प्रकाशस्वभावत्वाद् विश्व व्यवहारे निबन्धनम्। (परिमल)

पूर्णाहन्ता या शिवत्व =
पूर्ण अहं (शिव)

सोमानन्द की दृष्टि—

१. तस्मात् सर्वं स्थित: शिव:।

२. अथेदानीं प्रवक्तव्यं यथा सर्वं शिवात्मकम्।

३. भावैर्नास्ति विभेदत्वमथवाम्बुधिवीचिवत्।
तत्र विचित्वमापन्नं न जलं जलमुच्यते।।

४. न च तत्राम्बुरूपस्य वीचिकाले विनाशिता।
निश्चलत्वेऽपि हि जलं वीचित्वे जलमेव तत्।।

५. शक्तिमानेव शक्ति: स्याच्छिववत्करणार्थत:।
शक्ते: स्वातन्त्र्यकार्यत्वाच्छिवत्वं न क्वचिद्भवेत्।।

६. अतएव शिव: सर्वमिति योगोऽथ चेतसि।

७. प्रतिपादितमेतावत् सर्वमेव शिवात्मकम्।

८. भवति शिवमयात्मा सर्वभावेन सर्व:।

९. शिवो भोक्ता शिवो भोज्यं शिवेषु शिवसाधन:। (शिवदृष्टि)

स्पन्दकारिकाकार की दृष्टि—

१. तेन शब्दार्थ चिन्तासु न साऽवस्था न य: शिव:।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थित:।।

२. इति वा यस्य संवित्ति: क्रीडात्वेनाखिलं जगत्।
स पश्यन् सततं युक्तो जीवन्मुक्तो न संशय:।।

पारमात्मिक विषयालोक और ज्ञानेन्द्रियाँ

अथ ज्ञानेन्द्रियाण्युन्मुद्रयति—

हिअअट्ठिअस्स विहुणो विसआलोओ विसिस्खलो होइ ।
णाणन्दिअदीवेसुं णिअणिअगोलग्गणिच्चलग्गेसुं ॥२२॥

(हृदयस्थितस्य विभोर्विषयालोको विशृङ्खलो भवति।
ज्ञानेन्द्रियदीपेषु निजनिजगोलाग्रनित्यलग्नेषु।।)

हृदय में अवस्थित विभु सर्वव्यापक परमात्मा का (शृंखलित) विषयालोक (शब्द, स्पर्श, रूप, रस एवं गन्धरूप विषयों का प्रकाश) ही ज्ञानेन्द्रियरूप दीपकों के अपने-अपने गोलाग्र में नित्य स्थित होने पर विशृंखलित रूप में (एक से अनेक होकर) अवस्थित होते हुये व्यक्त हुआ करता है।।२२।।

विभोः परमस्वातन्त्र्यशालिनः स्वशक्त्यवच्छिन्नाशेषदेशकालस्वभावस्य महाप्रकाशस्य तदुचितं किञ्चित् सर्वोत्कृष्टं स्थानमस्ति, यद्धृदयं नाम। यदुक्तं श्रीप्रत्यभिज्ञायाम्—

सैषा सारतया चोक्ता हृदयं परमेष्ठिनः । इति।

तत्रावस्थितस्य चास्य बाह्यानां शब्दस्पर्शादीनां विषयाणां य आलोकः आ समन्ताल्लोकनं साकल्यतः स्वान्तश्चर्वणचातुर्यम्, स विशृङ्खलो भवति बहिर्भाव-स्वभावनियन्त्रणातिक्रान्तो भवति। अत्र चैतदेव निबन्धनं यद् ज्ञानप्रधानाना-मिन्द्रियाणां प्रकाशकत्वप्रकर्षेण प्रदीपप्रायाणां ये निजनिजास्तत्तदसाधारणा गोलाः श्रवणशष्कुल्यादयः, तदग्रेषु बहिर्विषयौन्मुख्यानुगुणेषु प्रदेशेषु सार्वकालिकं लग्नं स्फुरत्तयाऽवस्थानमिति। तानि च श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमिति पञ्चधा भिद्यन्ते। शब्दस्पर्शरूपरसगन्धानां ग्राह्याणां क्रमेण ग्रहणोपकरणत्वमेषां लक्षणम्।।२२।।

ज्ञानेन्द्रियों—श्रवणेन्द्रिय, त्वगिन्द्रिय, रसनेन्द्रिय, चक्षुरिन्द्रिय एवं घ्राणेन्द्रिय—के माध्यम से शब्द, स्पर्श, रस, रूप एवं गन्धनामक विषय का आलोक बाह्य जगत् में प्रकट होता है। ज्ञानेन्द्रियों के द्वारा किया गया यह विषय-रसास्वाद हृदयस्थ परमेश्वर के स्वरूपभूत विषयालोक का विशृंखलित बाह्यवर्ती रूप है। समस्त विषयास्वादों का मूल कारण तो हृदयस्थ महाप्रकाश परमेश्वर है और उसी परमेश्वर का आलोक हमारे ज्ञानेन्द्रियों द्वारा अभिव्यक्त होकर शब्द, स्पर्श, रूप, रस एवं गन्ध के स्वरूप में बाहर प्रकट होता रहता है।

परिमलकार की दृष्टि—महेश्वरानन्द ने 'हृदय' शब्द की इस प्रकार व्याख्या विशिष्ट अर्थ में की है—परमस्वातन्त्र्यशाली (विभु) परमशिव जिसकी स्वातन्त्र्य शक्ति

से समस्त देश-काल अवच्छिन्न है, ऐसे महाप्रकाशस्वरूप परमशिव का जो सर्वोत्कृष्ट स्थान है, उसे ही हृदय कहते हैं—महाप्रकाशस्य तदुचितं किञ्चित् सर्वोत्कृष्टं स्थान-मस्ति यद्धृदयं नाम।

ईश्वरप्रत्यभिज्ञाकार की दृष्टि—आचार्य उत्पलदेव ने भी ईश्वरप्रत्यभिज्ञा में इस तथ्य की पुष्टि करते हुये कहा है कि परमात्मा की स्वातन्त्र्य शक्ति, जो परमशिव का सार है, वही हृदय है—

सैषा सारतया चोक्ता हृदयं परमेष्ठिनः।[१]

इसी की व्याख्या करते हुये उत्पलदेव कहते हैं—सा विश्वात्मनः परमेश्वरस्य स्वात्म-प्रतिष्ठारूपा हृदयमिति तत्र तत्रागमे निगद्यते।[२]

विशृंखलो भवति = शृंखलारहित हो जाता है। विषयालोक विशृंखलित हो जाता है। विषयों का आलोक = हृदयस्थ विभु का विषयालोक। हृदयस्थ परमेश्वर के बाह्यवर्ती शब्द-स्पर्श आदि विषयों का आलोक (आ = समन्तात् लोकनं) अर्थात् चारो ओर से साकल्यतः स्वान्तश्चर्वणरूप चातुर्य—शृंखलारहित हो जाता है अर्थात् बहिर्भावस्व-भावनियन्त्रणातिक्रान्त हो जाता है।[३]

गोला = प्रत्येक ज्ञानेन्द्रिय के अपने-अपने पृथक् गोलक होते हैं; यथा—श्रवण-शष्कुली आदि।[४] उन इन्द्रियगोलकों का बहिर्भूत विषयों के प्रति औन्मुख्य हुआ करता है और इनका स्फुरणात्मक अवस्थान हुआ करता है—ज्ञानप्रधानामिन्द्रियाणां प्रकाश-कत्वप्रकर्षेण प्रदीपप्रायाणां ये निजनिजास्तत्तत्साधारणा गोलाः श्रवणशष्कुल्यादयः तदग्रेषु बहिर्विषयौन्मुख्यनुगुणेषु प्रदेशेषु सार्वकालिकं लग्नं स्फुरत्तयाऽवस्थानमिति।[५]

इन्द्रियगोलकों के ही विषय में विज्ञानभिक्षु कहते हैं कि—बुद्धिवृत्तिश्च प्रदीपस्य शिखावदबुद्धेरग्रभागो येन चित्तस्यैकाग्रताव्यवहारो भवति। स एवाग्रभाग इन्द्रियद्वारा बाह्यार्थे संयुज्य अर्थाकारेण परिणमते।[६]

दीपक = इन्द्रियों को दीपक क्यों कहा गया है? इन्द्रियों को दीपक इसलिये कहा गया है; क्योंकि इन्द्रियों में प्रकाशकत्व का प्रकर्ष होता है—ज्ञानप्रधानामिन्द्रियाणां प्रकाशत्वप्रकर्षणप्रदीपप्रायाणां।

इसीलिये विज्ञानभिक्षु भी बुद्धिवृत्ति को प्रदीपशिखावत् कहते हैं—बुद्धिवृत्तिश्च प्रदीपस्य शिखावद् बुद्धेरग्रभागे।[७]

---

१. प्रत्यभिज्ञाकारिका (४५)

२. प्रत्यभिज्ञाकारिकावृत्ति

३-५. परिमल

६-७. योगसारसंग्रह

ज्ञानेन्द्रियों के प्रकार[1]

श्रोत्रेन्द्रिय	त्वगिन्द्रिय	नेत्रेन्द्रिय	रसनेन्द्रिय	घ्राणेन्द्रिय
↓	↓	↓	↓	↓
श्रवण	स्पर्श क्रिया	दर्शन	रसास्वादन	सूँघना
(शब्द)	(स्पर्श)	(रूप)	(रस)	(गन्ध)

परमात्मा की कर्मेन्द्रियाँ और जीवों में गति-सञ्चार

अथ कर्मेन्द्रियाण्युन्मीलयति—

होन्ति कलणाइ पञ्च खु कम्मपहाणाइ लोअणाहस्स।
फन्दइ सेरं जेहिं जणो जडादो विलक्खणो होन्तो ॥२३॥

(भवन्ति करणानि पञ्च खलु कर्मप्रधानानि लोकनाथस्य।
स्पन्दते स्वैरं यैर्जनो जडाद् विलक्षणो भवन्॥)

लोकपति परमेश्वर की (ज्ञानानुषंगिनी) पाँच कर्मप्रधान इन्द्रियों (वाक्, पाणि, पाद, पायु एवं उपस्थ) के स्वेच्छापूर्वक स्वतः कार्यों में प्रवृत्त होने पर (इसके परिणामस्वरूप) प्राणिवर्ग गतिशील (स्पन्दित) होकर जड़ से भिन्न प्रतीत होने लगता है॥२३॥

लोकस्य जडाजडविभागेनावलोक्यमानस्य विश्वस्य यो नाथः सृष्ट्यादि-निर्वाहकतया स्वामी तस्य कर्मप्रधानानि ज्ञानेन्द्रियाणां क्रियास्पर्शेऽपि ज्ञान-प्राचुर्यवद् ज्ञानानुषङ्गेऽपि क्रियाशक्त्युल्बणानि पञ्चेन्द्रियाणि भवन्ति। खलु प्रसिद्धौ। यैर्निमित्तभूतैः, जनो जननमरणाद्युपद्रुतोऽपि जीववर्गः, जडात् स्तम्भकुम्भादेः परिच्छिन्नप्रकाशादर्थाद् व्यतिरेकमश्नुवानः, स्पन्दते ईषच्चलति, तत्तदिन्द्रिय-प्राप्यादर्थादुपरि न किञ्चिच्चलति। तावच्चलति। स्वैरमिति। **स्वस्यात्मीयस्योप-करणस्य प्रेरणं यथा भवति तथेत्यर्थः। तादृक् स्वातन्त्र्यमेव चास्याऽपरिच्छिन्न-प्रकाशत्वम्। तानि च वाक्पाणिपादपायूपस्था इति विभिद्यन्ते। तल्लक्षणं च क्रमाद् वचनादानविहरणविसर्गानन्दात्मकक्रियासाधनत्वम्। अत्रैवं विवेकः—**

अन्तःकरणवर्गेऽस्मिन्नहङ्कारोऽभिमानभूः।
सहकारितया गृह्णन्नन्यद्धीमनसोर्द्वयम्॥

---

१. **अहङ्कारादिक अन्तःकरणों के व्यापार**—अहंकारादीन्यात्मनोऽन्तःकरणानि न केवलं बहिरवलोकितान् विषयानन्तरमनुभावयन्ति किं तर्हि स्वक्रान्तया प्रमातृचिच्छक्त्या तं बहिर्वर्तिन-मखिलमपि वेद्यवर्गं विषयीभावयोग्यतानुप्रवेशनार्थं प्रकाशमानस्वभावतापादनात्मकपावनी-करणयुक्त्या जिघत्सितौषधाद्यभिमन्त्रणन्यायेनानुगृह्णन्तीति कल्लोलायमानानीति। एतानि हि हृदयमहाम्बुराशौ महातरङ्गाः। ज्ञानकर्मेन्द्रियाणि तु तरङ्गानुतरङ्गन्यायमनुवर्तन्त इत्यर्थः।

प्रवर्तयति कर्तॄणां बहिर्ज्ञानं क्रियामपि ।
क्रमादेतद्द्वयाक्रान्त्या ज्ञानकर्मेन्द्रियप्रथा ।।
तत्र ज्ञानप्रधानं सच्चक्षुराद्युपपादितम् ।
कायप्रवृत्त्यभावेऽपि विषयग्रहणक्षमम् ।।
कर्मोत्तरेषु तेष्वेव विशेषः परिकीर्त्यते ।
क्रिया हि हानमादानमिति द्वेधाऽनुभूयते ।।
बाह्याभ्यन्तरभावेन द्वैविध्यं तद्द्वयोरपि ।
बाह्यतायां तयोः पायुर्हानप्राधान्यभाग् भवेत् ।।
आदानप्रवणः पाणिः पादस्तदुभयक्रियः ।
अन्तर्यदेतदखिलं प्राणो वितनुते मरुत् ।।
तद् वागिन्द्रियमाख्यातं शब्दसृष्टिविचक्षणम् ।
यदेतदुक्तविक्षोभशान्त्या विश्रान्तिरात्मनः ।
तदुपस्थ इति ज्ञेयमानन्दोत्तरमिन्द्रियम् ।
सम्भूयवृत्तावप्येषां प्राधान्यं क्वापि कस्यचित् ।। इति।

अनेक रूपात्मक प्रपञ्च में जड़ एवं चेतन को भिन्न-भिन्न प्रकट करने वाली परमात्मा की पाँच कर्मेन्द्रियाँ ज्ञानेन्द्रियों के द्वारा प्रवृत्त होती हैं। वाक्, पाणि, पाद, वायु एवं उपस्थरूप कर्मेन्द्रियों के प्रयोग से चेतन जड़ से पृथक् होता है।

इनके कार्य पृथक्-पृथक् हैं; यथा—वचन, आदान, विहरण, विसर्गानन्द आदि क्रियायें।[१] आगमों में कहा गया है कि—

अन्तःकरणवर्गेऽस्मिन्नहङ्कारोऽभिमानभूः ।
सहकारितया गृह्णन्नन्यद्धीमनसोर्द्वयम् ।।
प्रवर्तयति कर्तॄणां बहिर्ज्ञानं क्रियामपि।
क्रमादेतद्द्वयाक्रान्त्या ज्ञानकर्मेन्द्रियप्रथा।।
तत्र ज्ञानप्रधानं सच्चक्षुराद्युपपादितम्।
कायप्रवृत्त्यभावेऽपि विषयग्रहणक्षमम्।।
कर्मोत्तरेषु तेष्वेव विशेषः परिकीर्त्यते।
क्रिया हि हानमादानमिति द्वेधाऽनुभूयते।।
बाह्याभ्यन्तरभावेन द्वैविध्यं तद्द्वयोरपि।
बाह्यतायां तयोः पायुर्हानप्राधान्यभाग् भवेत्।।
आदानप्रवणः पाणिः पादस्तदुभयक्रियः।
अन्तर्यदेतदखिलं प्राणी वितनुते मरुत्।।

---

१. परिमल

तद् वागिन्द्रियमाख्यातं शब्दसृष्टिविचक्षणम्।
यदेतदुक्तविक्षोभशान्त्या विश्रान्तिरात्मनः।।
तदुपस्थ इति ज्ञेयमानन्दोत्तरमिन्द्रियम्।
सम्भूयवृत्तावप्येषां प्राधान्यं क्वापि कस्यचित्।।[१]

ज्ञानानुषंगिणी कर्मेन्द्रियों में स्पन्दनशीलता होने पर ये जड़ से भिन्न हो जाती हैं।

लोकत्रय के क्रीड़ाङ्गण के क्रीड़ाकारी
परमेश्वर का स्वरूप

अथ शब्दादिविषयपञ्चकं विविनक्ति—

वीसुज्जाणविरूढे गन्धप्पमुहे सुगंधिए पुप्फे।
पञ्च वि अग्घाअन्तो कीलइ तेल्लोक्कधुत्तओ देओ॥२४॥

(विश्वोद्यानविरूढानि गन्धप्रमुखानि सुगन्धीनि पुष्पाणि।
पञ्चाप्याजिघ्रन् क्रीडति त्रैलोक्यधूर्तो देवः।।)

विश्व-वाटिका में उत्पन्न एवं जिसमें गन्धतन्मात्रा का प्राधान्य विद्यमान है, ऐसे पञ्चतन्मात्रात्मक पञ्चपुष्पों की गन्ध को सूँघता हुआ वह परमद्योतनस्वभाव तथा परम धूर्त (विश्व-क्रीड़ा-विदग्ध) परमशिव लोकत्रय (मान-मेय-मातृस्वरूप तीनों लोक) में साह्लाद क्रीड़ा कर रहा है।।२४।।

त्रैलोक्ये मानमेयमातृरूपे विश्वस्मिन्नपि यो धूर्तो वैदग्ध्यावधीरितान्यव्यवहारकलापः, स द्योतनस्वभावत्वान्महान् प्रमाता भवन् विश्वलक्षणादुद्यानादुत्पन्नानि पृथिव्याद्यसाधारणगुणगणं गन्धमादीकृत्य प्रवृत्तानि सुगन्धीनि प्रकाशपरिमलपरिस्फुरणोल्बणानि पञ्चापि प्रसूनान्याजिघ्रन् ग्रहणं प्रति किञ्चित्कौटिल्यसद्भावेऽप्यार्जवेनानुसन्दधानः क्रीडति हर्षानुसारेण स्पन्दते। स्वस्वातन्त्र्यमुपदर्शयतीति यावत्। ते च विषयाः शब्दस्पर्शरूपरसगन्धा इति भवन्ति। एषां च क्रमादाकाशादिगुणत्वं श्रोत्रादिग्राह्यत्वं वा प्रातिस्विकं लक्षणमूह्यम्। गन्धप्रमुखानीति संहारक्रमेणोक्तिस्तन्मात्रासु गन्धस्य प्राधान्यं प्रकटयितुम्। यदुक्तमभियुक्तैः—

१. परिमल

इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताः ।
स्वभावेन समाराध्य ज्ञातुः सोऽयं महामखः।। इति।

गन्धोऽपि निरूप्यमाणः पृथिवी। पृथिव्या उपरि न किञ्चिद् भूतान्तरमित्यत्रोत्कर्ष इति रहस्यम्।।२४।।

त्रैलोक्य = मानमेयमातृरूप विश्व। धूर्त = वैदग्ध्यावधीरितान्यव्यवहारकलाप। देव = द्योतनस्वभाव महान् प्रमाता। क्रीडति = हर्षानुसार स्पन्दित होता है। गन्धप्रमुखानि = शब्द, स्पर्श, रूप, रस, गन्ध (पञ्चतन्मात्राओं) में गन्ध गुण प्रधान होने के कारण यहाँ पञ्चतन्मात्राओं के वाचक के रूप में 'गन्धप्रमुखानि' कहकर मात्र गन्धतन्मात्रा का ही उल्लेख किया गया है। गन्धप्रमुखानि (पञ्चतन्मात्राओं में गन्ध नामक तन्मात्रा प्रधान है) = गन्ध तन्मात्रा है प्रमुख जिनमें, ऐसी पञ्चतन्मात्रायें। कहा भी गया है—

इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताः ।
स्वभावेन समाराध्य ज्ञातुः सोऽयं महामखः।।

विश्वोद्यान = विश्वरूप वाटिका। पुष्पाणि = फूल। शब्द-स्पर्श-रूप-रस-गन्धरूप पञ्चतन्मात्राओं के प्रसून। विषय = शब्द-स्पर्श-रूप-रस-गन्ध। क्रीडति—किञ्चित्कौटिल्य-सद्भावेप्यार्जवेनानुसन्दधानः क्रीडति हर्षानुसारेण स्पन्दते।

यह विश्व एक उद्यान के समान है। इसमें पृथ्वी आदि पञ्चभूतों के पुष्पों के प्रधान गुण (पञ्चन्मात्रा) अर्थात् शब्द-स्पर्श-रूप-रस-गन्ध आदि गुणों का रसास्वादन करता हुआ त्रैलोक्यधूर्त शिव क्रीड़ा करता है—

प्रसूनान्याजिघ्रन् ग्रहणं प्रति किञ्चित्कौटिल्यसद्भावेऽप्यार्जवेनानुसन्धानः क्रीडति हर्षानुसारेण स्पन्दते।

धूर्त = व्यवहारकलाविदग्ध।

जगत् एक क्रीड़ा है। कहा गया है कि यह देव देवी के साथ निरन्तर क्रीड़ा रस हेतु उत्सुक होकर विचित्र प्रकार के सृष्टि-संहार की क्रीडनात्मक क्रियायें करता रहता है—

एष देवोऽनया देव्या नित्यं क्रीडारसोत्सुकः।
विचित्रान् सृष्टिसंहारान्विधत्ते युगपत्प्रभुः।।

इसी प्रकार महार्थमञ्जरीकार ने कहा है—क्रीडति त्रैलोक्यधूर्तो देवः। (म०-२४)

कहीं जगत् को क्रीड़ा कहा गया है और कहीं उसे चित्र कहा गया है—

निरुपादानसम्भारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने।।
जगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि।
स्वयमेव समालोक्य प्रीणाति भगवान् शिवः।।

आचार्य सोमानन्द कहते हैं कि जिस प्रकार एक सार्वभौम सम्राट् अकारण एवं केवल मनोरञ्जन के लिये क्रीड़ा किया करता है, उसी प्रकार प्रमोदात्मा प्रभु भी विश्व-सृजन, विश्व-संहार आदि की क्रीड़ायें किया करता है—

यथा नृपः सार्वभौमः प्रभावामोदभावितः।
क्रीडन्करोति पादान्तधर्मांस्तद्धर्मधर्मतः।
तथा प्रभुः प्रमोदात्मा क्रीडत्येवं तथा तथा।

(शिवदृष्टि-१.३७-३८)

उत्पलदेवाचार्य की दृष्टि—आचार्य उत्पलदेव कहते हैं—यथैश्वर्यचमत्कारवासितः सार्वभौमो राजा निरर्गलतया क्रीडया तल्लक्षणस्वभावात्तैः पदातिसम्बन्धिचेष्टितानि आचरति, तथा परमेश्वरः पूर्णत्वात् स्वत आनन्दघूर्णितैस्तैस्तैर्भूतभेदात्मभिः प्रकारैरेवमेतत्सदृशं क्रीडति।

यह क्रीड़ा हर्षानुसारी स्पन्द है—हर्षानुसारी स्पन्दः क्रीड़ा। (शिवदृष्टिवृत्ति)

पञ्चमहाभूत और पारमात्मिक माधुर्य—
पारस्परिक अन्तःसम्बन्ध

अथ भूतपञ्चकमुद्भावयति—

थिण्णस्स कमवसादो इक्खुरसस्स व सिवप्पआसस्स।
गुलपिण्डा इव पञ्च वि भूदाइं महुरदं ण मुञ्चन्ति॥२५॥

(स्त्यानस्य क्रमवशादिक्षुरसस्येव शिवप्रकाशस्य।
गुडपिण्डा इव पञ्चापि भूतानि मधुरतां न मुञ्चन्ति।।)

पाँचों महाभूत (क्षिति, जल, पावक, समीर एवं गगन) प्रकाशस्वरूप परमात्मा के दिव्य माधुर्य का उसी प्रकार त्याग नहीं करते, जिस प्रकार (अग्नि के सम्पर्क में आने पर) यथाक्रम प्रगाढ़तर होने वाले ईख के रस के माधुर्य का गुड़पिण्ड त्याग नहीं किया करते।।२५।।

शिवात्मा खलु प्रकाशः शक्तिसदाशिवादिपरिपाट्यनुसारेण प्रस्तुतभूतपञ्चक-पर्यन्तं स्त्यानीभवति। वेदितृस्वभावन्यग्भावाधीनवेद्यतोत्कर्षात्मकं काठिन्य-मनुभवति। यदुक्तं श्रीशिवदृष्टौ—

.................इत्यादिषट्त्रिंशत्तत्त्वरूपताम् ।
बिभ्रद् बिभर्ति रूपाणि तावतो व्यवहारतः।।
यावत् स्थूलं जडाभासं संहतं पार्थिवं घनम्। इति।

तादृशस्य चास्य मधुरतां सर्वप्रमातृस्वात्मस्वभावताऽनुभाव्यपरमशिव-प्रकाशोल्लासात्मकमहाह्लादोपलक्षणं सामरस्यं पञ्चापि भूतान्याकाशप्रभूतानि

न परित्यजन्ति, किन्तु स्वान्तरखिलं गर्भीकृत्य प्रवर्तन्ते। केवलं शिवात् स्वच्छ-स्वभावात् स्त्यानताधिक्यमेतेषां भेदः। यद्वदिक्षुरसस्य स्वपाकयुक्तिक्रमात् स्त्यानीभूतस्य माधुर्यं गुडपिण्डैर्न परित्यज्यते। यथा च परमार्थसारे—

रसफाणितशर्करिकागुडखण्डाद्या यथेक्षुरस एव।
तद्वदवस्थाभेदाः सर्वे परमात्मनः शम्भोः ।। इति।

यथा च लक्ष्मीतन्त्रे—

संविदेव हि रूपं मे स्वच्छस्वच्छन्दनिर्भरा।
सापीक्षुरसवद् योगात् स्त्यानतां प्रतिपद्यते।
अतो निरूप्यमाणं तच्चैत्यं चित्त्वमुपैष्यति ।। इति।

ततश्च पृथिव्यामनाश्रितशिवप्रभृतीनि पञ्चत्रिंशदपि तत्त्वानि कारणवासना-नुवृत्तिद्वारा परिस्फुरन्तीत्यनया भङ्ग्या तत्र शिवतत्त्वे पृथिव्यादीनि सर्वाण्यपि सत्कार्यवादमर्यादयाऽवतिष्ठन्ते। एवं प्रकृतिपुरुषादिषु मध्यवर्तिष्वप्युक्तोभय-प्रक्रियया सर्वाण्यप्युपरितनान्यधस्तनानि च तत्त्वानि सम्मिलन्तीति सर्वं सर्वात्मक-मित्यर्थनिष्कर्षः स्यात्। तदुक्तं श्रीतन्त्रालोके—

एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता। इति।

सर्वथा पारमेश्वरप्रकाशस्फुरत्तात्मकमेतदखिलमपि विश्ववैचित्र्यमित्युक्तं भवति। यदुक्तं श्रीशिवदृष्टौ—

एवं सर्वपदार्थानां समैव शिवता स्थिता।
परापरादिभेदोऽत्र श्रद्दधानैरुदाहृतः ।। इति।

भूतानि चाकाशः, वायुः, तेजः, आपः, पृथिवीति प्रसिद्धानि। शब्दादिगुणत्वं च तल्लक्षणं स्पष्टम्। यद्वा अवकाशध्वनिकरत्वम्, चलनसञ्जीवनता, पाच-कदाहकत्वम्, द्रावकप्लावकता, काठिन्यधारकत्वं च क्रमादमीषां लक्षणानि। अत्र च 'वर्णक्रमे पृथिव्यादिपुरुषान्तं स्पर्शाक्षराणि' इति श्रीत्रिंशिकाशास्त्रप्रक्रियया प्रागेव प्रदर्शितम्। पञ्चकञ्चुक्यां त्वन्तस्थाः। तत्र नियतिः सर्वानुस्यूतेति न पृथग्गणनार्हा। कालस्य तु आकाशशक्तित्वाच्चिन्मयतैकोपपादनप्रवृत्ततया पुंसः—

मायाप्रमातृतादानं प्रत्यौचित्यं न विद्यते।

इत्यन्तस्थाश्चतस्रः सञ्जाताः। यथोक्तं तत्रैव—

वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्। इति।

यथा च व्याख्यातमाचार्याभिनवगुप्तपादैः—'आकाशशक्त्या तु नात्र माया-प्रमातृतादाने प्रयोजनमस्ति' इति। शुद्धविद्यादिशिवान्तं पुनरूष्माणः। तत्र हकारः

शक्तिः शिवश्चेत्यावृत्त्याऽवतिष्ठते, तस्यानुत्तरविसर्जनीयसामरस्यात्मकत्वात्। शिवशक्त्योस्त्यैकरूप्यमेव स्वभावः। भेदस्तु काल्पनिक इत्युपपादितत्वाच्च। यथोक्तम्—

तदूर्ध्वं शादि विख्यातं पुरस्ताद् ब्रह्मपञ्चकम्। इति।
षट्त्रिंशत्यत्र तत्त्वेषु पृथ्व्यम्बुपवनादयः।
ते ते पदार्थाः संयुक्त्या मिश्रिता बहुशाखया।
स्तम्भकुम्भादिभावेन कुर्वन्त्यर्थक्रियां नृणाम्।
तत्र कर्मेन्द्रियैरुक्तैर्बहिष्ठास्ते घटादयः॥
अर्प्यन्ते सन्निकर्षेण व्यवहर्तृजनं प्रति।
सांविदैरिन्द्रियैस्त्वेते निरीक्ष्यन्ते तथा तथा॥
अन्तःकरणवर्गेण सङ्कल्पितविकल्पिताः।
निश्चिताभिमताश्चैते विद्यया च विवेचिताः।
कलाकालादिभिर्भावैर्वेद्यत्वेनानुरञ्जिताः।
विश्राम्यन्ति विमर्शाढ्ये स्वात्मरूपे प्रमातरि॥
स च प्रमाता देहेऽस्मिन् प्राणो धीशून्यतोरपि।
बध्नाति यैरहम्भावं ते सद्विद्यादयः क्रमात्॥
एवं परामर्शमयीं प्रतिष्ठां लक्ष्माहुराप्ताः परमस्य शम्भोः।
एतद्विपर्यासवशात् पशुः स्यात् प्रमाणमस्मिन् गुरुशासनं नः॥२५॥

स्त्यान = घनीभूत। परमात्मा को रस कहा गया है—रसो वै सः। रसस्वरूप परमात्मा शिवात्मा ही प्रकाश है—शिवात्मा खलु प्रकाशः।[१] समस्त तत्त्वों में व्याप्त माधुर्यमय प्रकाश प्रकाशस्वरूप परमात्मा की परिव्याप्ति है। परमशिव (महाप्रकाश) के परमाह्लादात्मक सामरस्य का (माधुर्य का) आकाशादिक पञ्चमहाभूत कभी त्याग नहीं करते।

माधुर्य की घनीभूतता के आधिक्य की दृष्टि से पञ्चभूतों एवं परमात्मा के माधुर्य में भले अन्तर हो; किन्तु माधुर्य की दृष्टि से दोनों में कोई भी भेद नहीं है। रसमय परमात्मा सर्वत्र एकरस व्यापक है—शिवात्मा खलु प्रकाशः शक्तिसदाशिवादिपरिपाट्य-नुसारेण प्रस्तुतभूतपञ्चकपर्यन्तं स्त्यानीभवति।[२]

वेदितृ का वेद्यभाव में परिणमन उसके माधुर्यस्वरूप में तो नहीं; किन्तु उसके अवस्थान्तर में भेद अवश्य उत्पन्न करता है—वेदितृस्वभावन्यग्भावाधीनवेद्यतोत्कर्षात्मकं काठिन्यमनुभवति।[३]

---

१. परिमल २. परिमल (२५) ३. परिमल

आचार्य सोमानन्दपाद कहते हैं—

.... इत्यादिषट्त्रिंशत्तत्वरूपताम् ।
बिभ्रद् बिभर्ति रूपाणि तावतो व्यवहारत:।
यावत् स्थूलं जडाभासं संहतं पार्थिवं घनम्।।[१]

परमशिव के प्रकाशोल्लासात्मक महाह्लाद के स्वरूप में स्थित सामरस्य को पञ्चभूत कभी परित्यक्त नहीं करते; प्रत्युत वे अपने में गर्भीकृत करके रखते हैं—परमशिव-प्रकाशोल्लासात्मकमहाह्लादोपलक्षणं सामरस्यं पञ्चापि भूतान्याकाशप्रभूतानि न परित्यजन्ति, किन्तु स्वान्तरखिलं गर्भीकृत्य प्रवर्तन्ते।[२]

पञ्चभूतों एवं परमशिव के माधुर्य में अन्तर—दोनों के माधुर्य के स्वरूप में तो कोई भी भेद नहीं है; क्योंकि पूर्णतम की पूर्णता ही समस्त अपूर्णों में विद्यमान है—

ॐ पूर्णमद: पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

'रसो वै स:' कहकर जिसे श्रुतियों ने रस (रसतम) कहा है, उसी का रस ही प्रपञ्च के प्रसार में सर्वत्र प्रवाहित है। यह रस ही माधुर्य है।

भगवान् का माधुर्य—वल्लभाचार्य ने इस पारमात्मिक माधुर्य का बड़ा सुन्दर निरूपण किया है। परमात्मा माधुर्य का विग्रह है और उसके सारे अंग, सारे व्यवहार, उसकी सारी लीला, उसके सारे परिकर, उसका गीत, उसका हँसना, बोलना, चलना आदि सब कुछ मधुर है; क्योंकि वह माधुर्य की प्रतिमूर्ति है। वल्लभाचार्य उसके इसी माधुर्य में डूबकर कहते हैं—

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्।।
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।
वेणुर्मधुरो रेणुर्मधुर: पाणिर्मधुर: पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरधरं मधुरम्।।
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम्।।

---

१. शिवदृष्टि २. परिमल (२५)

गोपी मधुरा लीला मधुरा युक्तं मधुरं भुक्तं मधुरम्।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्।।[१]

स्त्यानीभूत माधुर्य (घनीभूत ईख के रस) को गुड़ कभी नहीं छोड़ता—यद्वदिक्षुरसस्य स्वपाकयुक्तिक्रमात् स्त्यानीभूतस्य माधुर्यं गुडपिण्डैर्न परित्यज्यते।[२]

परमार्थसारकार की दृष्टि—उक्त माधुर्यवाद का ही प्रतिपादन परमार्थसार में भी करते हुये कहा गया है—

रसफाणितशर्करिका गुडखण्डाद्या यथेक्षुरस एव।
तद्वदवस्थाभेदाः सर्वे परमात्मनः शम्भोः।।

लक्ष्मीतन्त्रकार की दृष्टि—लक्ष्मीतन्त्र में भी इसी दृष्टि को उपन्यस्त करते हुये कहा गया है कि संवित्तत्त्व ही ईख के रस के समान गुड़ के रूप में स्त्यानीभूत (घनीभूत) हो जाता है; अतः ईख के रस एवं गुड़ में अवस्थान्तर भेद तो है, किन्तु स्वरूपान्तर भेद नहीं है—

संविदेव हि रूपं मे स्वच्छस्वच्छन्दनिर्भरा।
सापीक्षुरसवद् योगात् स्त्यानतां प्रतिपद्यते।
अतो निरूप्यमाणं तच्चैत्यं चित्वमुपैष्यति।।

महेश्वरानन्द की दृष्टि—स्थूलतम पृथ्वीतत्त्व से लेकर अनाश्रित शिव आदि ३५ तत्त्व भी कारणवासनानुवृत्ति के द्वारा अनुप्राणित होकर परिस्फुरित होते हैं; अतः शिवतत्त्व में पृथ्वी आदि सारे तत्त्व सत्कार्यवाद की दृष्टि से अवतिष्ठित रहने के कारण (कारण की ही भाँति) रसमय हैं।[३]

इसी प्रकार प्रकृति-पुरुष आदि तत्त्वों के मध्य स्थित सारे पदार्थ भी उक्त प्रक्रिया के द्वारा ऊपर से नीचे तक समस्त तत्त्व परस्पर सम्मिलित होकर अवस्थित हैं; अतः—

सर्वं सर्वात्मकम्—अर्थात् सारे पदार्थ निजी (व्यक्तिगत) स्वरूप में भी सर्वात्मक हैं—सर्वाण्यप्युपरितनान्यधस्तनानि च तत्त्वानि सम्मिलन्तीति सर्वं सर्वात्ममित्यर्थनिष्कर्षः स्यात्।[४]

सर्वसर्वात्मकतावाद—योगशास्त्र जात्यन्तर परिणामवाद का प्रतिपादन करते हुये उक्त सिद्धान्त की पुष्टि तो करता ही है, साथ ही महार्थमञ्जरीकार ने भी इसकी पुष्टि की है। इसीलिये उन्होंने कहा है—सर्वं सर्वात्मकमित्यर्थनिष्कर्षः।

तन्त्रालोककार की दृष्टि—आचार्य अभिनवगुप्तपाद भी इस दृष्टि को प्रतिपादित करते हैं—

१. मधुराष्टक (वल्लभाचार्य)
२. परिमल
३. परिमल (६५)
४. महेश्वरानन्द : परिमल (२५)

एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता।

शिवदृष्टिकार की दृष्टि—आचार्य सोमानन्दपाद कहते हैं कि पारमेश्वर प्रकाश की स्फुरत्ता से समस्त विश्व-वैचित्र्य (विश्व के पदार्थों की अनेकरूपता) आद्यन्त स्फुरित हैं; अत: जगत् के समस्त पदार्थों में शिवत्व अभिव्यक्त हो रहा है—

एवं सर्वपदार्थानां समैव शिवता स्थिता।
परापरादिभेदोऽत्र श्रद्धानैरुदाहृत:।।[१]

त्रिंशिकाशास्त्रकार की दृष्टि—महार्थमञ्जरीकार ने कहा है कि त्रिंशिका शास्त्र भी मेरी दृष्टि को सम्पुष्ट करता है; क्योंकि उसमें सारे वर्णों से ही सारे तत्त्वों (पृथ्वी आदि तत्त्वों) की उत्पत्ति बतलाकर सारे तत्त्वों में वर्णों की अनुस्यूतता सिद्ध करते हुये सारे तत्त्वों एवं तज्जन्य पदार्थों में वर्णात्मक एकता प्रतिपादित की गई है— वर्णक्रमे पृथिव्यादिपुरुषान्तं स्पर्शाक्षराणि इति श्रीत्रिंशिकाशास्त्रप्रक्रियया प्रागेव प्रदर्शितम्।[२]

सर्वसामरस्यवाद—महार्थमञ्जरीकार ने इसी गाथा (२५वीं गाथा) की व्याख्या (परिमल) द्वारा सर्वसामरस्यवाद या सर्वैक्यवाद का प्रतिपादन किया है। उन्होंने कहा है कि—शिवशक्त्योस्त्यैक्यरूप्यमेव स्वभाव:। भेदस्तु काल्पनिक इति।

शास्त्रान्तर की दृष्टि और महार्थमञ्जरी—शास्त्रान्तर भी महार्थमञ्जरी की दृष्टि का पोषक है—

तदूर्ध्वं शादि विख्यातं पुरस्ताद् ब्रह्मपञ्चकम्।
षट्त्रिंशत्यत्र तत्त्वेषु पृथ्व्यम्बुपवनादय:।।
ते ते पदार्था: संयुक्त्या मिश्रिता बहुशाखया।
स्तम्भकुम्भादिभावेन कुर्वन्त्यर्थक्रियां नृणाम्।।
तत्र कर्मेन्द्रियैरुक्तैर्बहिष्ठास्ते घटादय:।
अर्प्यन्ते सन्निकर्षेण व्यवहर्तृजनं प्रति।।
सांविदैरिन्द्रियैस्त्वेते निरीक्ष्यन्ते तथा तथा।
अन्त:करणवर्गेण सङ्कल्पितविकल्पिता:।
निश्चिताभिमताश्चैते विद्यया च विवेचिता:।।
कलाकालादिभिर्भावैर्वेद्यत्वेनानुरञ्जिता: ।
विश्राम्यन्ति विमर्शाढ्ये स्वात्मरूपे प्रमातरि।
स च प्रमाता देहेऽस्मिन् प्राणे धीशून्यतोरपि।
बध्नाति यैरहम्भावं ते सद्विद्यादय: क्रमात्।।
एवं परामर्शमयीं प्रतिष्ठां लक्ष्माहुराप्ता: परमस्य शम्भो:।
एतद्विपर्यासवशात् पशु: स्यात् प्रमाणमस्मिन् गुरुशासनं न:।।[३]

---

१. शिवदृष्टि २. परिमल ३. परिमल (महेश्वरानन्द)

शाम्भव शक्ति एवं विश्वोल्लासात्मक व्यापार—
पारस्परिक अन्तःसम्बन्ध

उक्तरूपस्य तत्त्वप्रपञ्चस्य पिण्डीभूतमर्थतत्त्वमाह—

सव्वस्स भुवणविब्भमजन्तुल्लासस्स तन्तुवल्लिव्व ।
विमरिससंरम्भमई उज्जिम्भइ सम्भुणो महासत्ती ॥२६॥

(सर्वस्य भुवनविभ्रमयन्त्रोल्लासस्य तन्तुवल्लीव।
विमर्शसंरम्भमयी उज्जृम्भते शम्भोर्महाशक्तिः।।)

परमशिव (शम्भु) की विमर्श-संरम्भमयी (विमर्शनात्मक संरम्भ वाली अर्थात् स्वान्तः-स्फुरित क्रियाशक्तिस्वरूपा) महाशक्ति (चिदानन्देच्छाज्ञानक्रियारूपा, शक्तिपञ्चकात्मक स्वातन्त्र्य शक्ति) समस्त विश्ववैचित्र्य-विकास (भुवन-विभ्रम) के कार्य में यन्त्रानुस्यूत सूत्र (तहबीज में बँधे सूत) की भाँति परिस्फुरित हो रही है।।२६।।

योऽयं भुवनात्मनां तत्त्वात्मनां विभ्रमो विलासः प्रसरद्रूपता सैव दार्वादि-संघट्टनात्मनः प्रतिमापुत्रकादेर्यन्त्रस्योल्लासो वलनावर्तनादिर्विकारः, तस्य सर्व-स्यापि तत्तदशेषसन्धिबन्धानुस्यूता सूत्रस्त्रगिव शम्भोः परमानन्दप्रकाशघनतया विश्वमयविश्वोत्तीर्णस्यानाश्रितादिकालाग्निरुद्रान्तविश्ववैचित्र्यसंयोजनवियोजनवैदग्ध्य-शालिनः परमशिवभट्टारकस्य शक्तिः स्वातन्त्र्यलक्षणा महती तत्त्वानामन्यो-न्यप्रयोज्यप्रयोजकभावे पर्यन्ततः सामान्यप्रयोजकत्वे च प्रगल्भा भवत्युज्जृम्भते पृथिव्यादि भाववर्गमिवानाश्रितशिवभट्टारकमपि क्रोडीकृत्याभिवर्धते तद्रूपतया परिस्फुरतीत्यर्थः। यथा च पर्यन्तपञ्चाशिकायाम्—

चित्स्वाभाव्यादसौ देवः स्वात्मना विमृशन् प्रभुः ।
अनाश्रितादिभूम्यन्ता भूमिकाः प्रतिपद्यते ।। इति।

सा च विमर्शसंरम्भमयी विमर्शाख्यो यः संरम्भः स्वान्तःस्फुरत्क्रिया-शक्तिस्फाररूपः, तेन प्रकृतेत्यर्थः। सा चिदानन्देच्छाज्ञानक्रियारूपशक्तिपञ्च-कसामरस्यस्वभावेत्याख्यायते। ततश्च परमेश्वरपरामर्शप्रसरपरिपाटीपाटवपर-मार्थमेतदखिलं तत्त्वपरम्परापरिस्फुरणप्राचुर्योज्ज्वलं विश्वविजृम्भावैचित्र्यमिति तात्पर्यार्थः।

यथोक्तं श्रीप्रत्यभिज्ञाहृदये—'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः' इति। सोऽयं स्वात्मसात्कृताशेषषट्त्रिंशत्तत्त्वकलापो महान् परमशिवभट्टारकाह्वयः प्रमाता सप्तत्रिंशतया स्वीक्रियते। तस्य तादृग्रूपतापि पर्यन्ततो विकल्पकक्ष्यामनुप्रविशति। अविकल्पात्मना च भाव्यं विश्वोत्तरेणेत्यतोऽत्राप्यविकल्पवृत्तिरष्टात्रिंशः कश्चिदागमेष्वङ्गीक्रियते। यदुक्तं श्रीतन्त्रवटधानिकायाम्—

षट्त्रिंशत्तत्त्वपर्यायस्तदभिन्नः परः शिवः ।
उपदेश्यतया सोऽपि स्यादवच्छेदभागतः ।।
अष्टात्रिंशं परं धाम यत्रेदं विश्वकं स्फुरेत् । इति।

किञ्च, शम्भुरत्रानुत्तरात्मा तस्य तादृशी शक्तिश्च तदविभिन्नस्वभावा स्वर-समुदायमयी विसर्गापरपर्यायेति वर्णक्रमानुगुण्येन व्याख्या। सा चानुत्तरा-नन्दे(च्छो?च्छेश)नोन्मेषोनताभिरिच्छाया ईशनस्य च क्रमादस्थैर्यभेदाच्च चतु-ष्प्रकारैर्वेद्योल्लासैरिच्छोन्मेषयोरीशनोनतयोश्चानुत्तरानन्दाभ्यामुभाभ्यां सह सन्धानोपारूढौ द्वौ, पुनस्तत्संहितौ च द्वाविति चतुर्भिरुक्ताशेषवेद्यवर्गवासनात्मना बिन्दुना चोन्मिषन्ती तत्रैवानुत्तरतत्त्वान्तर्विश्राम्यति। तत्तश्चानुत्तरहकाराभ्यां तत्पर्यन्त-पठितेन बिन्दुभट्टारकेण च सह प्रत्याहारक्रमात् सर्वसंवित्समावेशलक्षणः कश्चिदह-मिति परामर्श उदेति। यः 'महाह्रदानुसन्धानान्मन्त्रवीर्यानुभवः' इति, 'मातृकाचक्र-सम्बोधः' इति च श्रीशिवसूत्रेषूपदिश्यते। यथोक्तं श्रीकण्ठीयसंहितायाम्—

आदिमान्तविहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।
गुरोर्लक्षणमेतावदादिमान्तं निवेदयेत् ।।

यथा चास्मद्गुरुभिः श्रीसंवित्स्तोत्रे—

आदिमान्तिमगृहीतवर्णराश्यात्मिकाहमिति या स्वतः प्रथा ।
मन्त्रवीर्यमिति साधितागमैस्तन्मयो गुरुरसि त्वमम्बिके ।। इति।

वीरसम्बन्धी हि धर्मो वीर्यमित्युच्यते। तत्र वीरो नाम विविधमीरयति विश्ववै-चित्र्यमिति भगवान् शब्दराशिभट्टारक उच्यते। तदुक्तं श्रीमच्चिद्गगनचन्द्रि-कायाम्—

ईरणेन विविधेन वीरतां योऽयमक्षरगणः प्रपद्यते । इति।

श्रीप्रभाकौले च—

वामे वीराः समाख्याताः । इति।

एतच्च—

सर्वेषामेव मन्त्राणां विद्यानां च यशस्विनि! ।
इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा ।।

इति श्रीत्रिंशिकाशास्त्र उन्मीलितम् ।।२६।।

भुवन = लोक, तत्त्व, भुवनात्मक तत्त्व। विभ्रम = विलार, प्रसरद्रूपता। यन्त्र = प्रतिमा, पुत्रक आदि यन्त्र। उल्लास = वलना-वर्तनादि विकास। शक्ति = परमशिव भट्टारक की स्वातन्त्र्यलक्षणा शक्ति। उज्जृंभते = परिस्फुरित हो रही है। जृंभण क्रिया के रूप

में स्वभावत: विना प्रयास के उदित हो रही है, प्रसृत हो रही है या प्रस्फुटित हो रही है। संरम्भ = आरम्भ (उत्तेजना। आन्दोलन। क्षोभ।)। स्वान्त:स्फुरत्क्रियाशक्तिस्फार। उज्जृंभण—प्रस्फुटन। प्रसरण। विमर्शसंरम्भमयी = विमर्श-शक्तिरूप स्वान्त:स्फुरत्क्रिया शक्तिस्फार। शक्ति = शिव से अविनाभूत, अभिन्नस्वरूपा विसर्ग शक्ति।

परमशिव (शम्भु) की महाशक्ति में ही समस्त संयोजन-वियोजनात्मक भुवनतत्त्वविलास ओत-प्रोत है। परमशिव की स्वान्त:स्फुरित विमर्श-संरम्भमयी यह स्वातन्त्र्य नामक शक्ति शुद्ध विद्या है। यह शक्ति शक्तिपञ्चकात्मिका है।

स्वातन्त्र्य शक्ति के रूपान्तर

चिति शक्ति आनन्द शक्ति इच्छा शक्ति ज्ञान शक्ति क्रिया शक्ति

द्वैताद्वैतविवर्जित, अनुत्तरात्मा शम्भु ही परमेश्वर हैं। महाशक्ति उन्हीं का अभिन्न स्वरूप है। यह महाशक्ति ही भुवनों के संयोजन-वियोजन (सृजन-संहार) के व्यापारों की विधायिका है। तन्तुवल्ली के समान स्थित महाशक्ति में ही समस्त भुवन, समस्त ३६ तत्त्व अवस्थित या अनुस्यूत हैं। इस महाशक्ति के अतिरिक्त अन्य किसी की भी सत्ता नहीं है। विश्ववैचित्र्य का विलास (भुवन-विभ्रम) परमशिव का ही अपना स्वरूप है; क्योंकि—

शिव: शक्त्या युक्तो यदि भवति शक्त: प्रभवितुं,
न चेदेवं देवो न खलु कुशल: स्पन्दितुमपि।[1]
परोऽपि शक्ति-रहित: शक्त्या युक्तो भवेद्यदि।
सृष्टिस्थितिलयान् कर्तुमशक्त: शक्त एव हि।।

भगवान् श्रीकृष्ण ने भी यही बात कही है—

मत्त: परतरं नान्यत्किञ्चदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।।
यथाकाशस्थितो नित्यं वायु: सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय।।

(श्रीमद्भगवद्गीता-७.७)

शिव की स्वान्त:स्फुरित शुद्धविद्यास्वरूपिणी महाशक्ति उनसे अभिन्न है और शिव-स्वरूपिणी है। अतएव शक्ति एवं शक्तिमान में कोई भेद नहीं है। इसी शक्ति का नाम है—स्वातन्त्र्य शक्ति, जो कि सृष्टि-संहार आदि व्यापारों में परनिरपेक्ष स्वतन्त्र शक्ति है—चिति: स्वतन्त्रता विश्वसिद्धिहेतु:।[2] यही शक्ति सृष्टि, संहार, तिरोधान आदि की विधायिका है।

---

१. सौन्दर्यलहरी २. शक्तिसूत्र (२)

शक्तिवाद—शाक्त और स्पन्दविज्ञानी काश्मीरी शैव शक्ति को ही मूल तत्त्व स्वीकार करते हैं। उनकी दृष्टि में—

१. शक्ति ही समस्त सृष्टि-संहारादिक व्यापार का निष्पादन करती है।

२. शक्ति चिति, आनन्द, इच्छा, ज्ञान एवं क्रिया के रूप में (मुख्यतः पाँच रूपों में) अवस्थित है। इसे ही शक्तिपञ्चक कहा जाता है।

षट्त्रिंशदात्मक जगत् शक्ति का ही अपना स्वरूप है। समस्त छत्तीस तत्त्व भी शक्ति के ही अपने रूप हैं।

पञ्चभूतों के सूक्ष्मतम कण परमाणु सृष्टि के मूल कारण नहीं हैं; क्योंकि इन परमाणुओं का भी कोई कारण है और वह है—शक्ति।

शाक्तों ने परमाणुवाद की इस स्थूल सृष्टि-भूमिका को अस्वीकार कर दिया है; क्योंकि स्थूल तत्त्व किसी सूक्ष्म तत्त्व के ही परिणाम या विवर्त हैं। शाक्त दार्शनिक इन्हें परिणाम कहते हैं और अद्वैत वेदान्ती—विवर्त। दोनों की दृष्टि में जगत् का मूल कारण परमाणु से भी सूक्ष्म है।

शाक्तों ने जगत् के इस सूक्ष्मतम अद्वैत एवं निरपेक्ष-स्वतन्त्र कारण को शक्ति की आख्या प्रदान की है। शाक्त दार्शनिक भास्कर राय की भी यही दृष्टि है।

भास्करराय की दृष्टि—भास्करराय कहते हैं—

नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्तिः।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति।।[1]

शिव इसी नैसर्गिकी स्फुरत्तास्वरूपा विमर्श शक्ति की सहायता से—१. उत्पत्ति २. पालन (संरक्षण) ३. संहार की क्रियायें निष्पादित करते हैं।

शक्ति के परिणाम—

१. अर्थमयी सृष्टि   ३. चक्रमयी सृष्टि
२. शब्दमयी सृष्टि   ४. देहमयी सृष्टि

सावश्यं विज्ञेया यत्परिणामादभूदेषा।
अर्थमयी शब्दमयी चक्रमयी देहमय्यपि च सृष्टिः।।[2]

१. अर्थमयी सृष्टि = शिव से लेकर पृथ्वीपर्यन्त समस्त ३६ तत्त्वों की सृष्टि।

२. शब्दमयी सृष्टि = परा, पश्यन्ती, मध्यमा एवं वैखरीमयी सृष्टि।

३. चक्रमयी सृष्टि = बिन्दु से लेकर भूगृहान्त सृष्टि।

४. देहमयी सृष्टि = स्थूल, सूक्ष्म, कारण आदि शरीरों की सृष्टि।

---

१. वरिवस्यारहस्यम् (४)   २.वरिवस्यारहस्यम्

स्वातन्त्र्य शक्ति का विलास
सूक्ष्म से स्थूल के क्रम में शक्ति का अवस्थान
स्वातन्त्र्यशक्ति
चितिशक्ति
आनन्दशक्ति
इच्छाशक्ति
ज्ञानशक्ति
क्रियाशक्ति
विश्व
शक्ति का परिणाम
सूक्ष्म से स्थूल के क्रम में
स्वातन्त्र्यशक्ति
शब्दमयी सृष्टि
अर्थमयी सृष्टि
चक्रमयी सृष्टि
देहमयी सृष्टि
परा-पश्यन्ती आदि
परा-पश्यन्ती-मध्यमा आदि
शब्दमयी सृष्टि
स्वातन्त्र्य शक्ति
शब्दमयी सृष्टि
अर्थमयी सृष्टि
चक्रमयी सृष्टि
देहमयी सृष्टि

सृष्टि

शब्दात्मिका (शाब्दी सृष्टि) बिन्द्वात्मिका (बैन्दवी सृष्टि)

परिणामवाद—शाक्त दार्शनिक एवं महार्थमञ्जरीकार की दृष्टि—जगत् शक्ति का परिणाम है, न कि विवर्त—

सावश्यं विज्ञेया यत्परिणामादभूदेषा।।

(वरिवस्यारहस्यम्)

त्वयि परिणतायाम् (शंकराचार्य)

तस्यां परिणतायायां तु न कश्चित् पर इष्यते।

उज्जृंभते का अर्थ—पृथिव्यादिभाववर्गमिवानाश्रितशिवभट्टारकमपि क्रोडीकृत्याभिवर्धते तद्रूपतया परिस्फुरति।

पञ्चाशिककार की दृष्टि—यही दृष्टि पञ्चाशिक में भी व्यक्त की गई है—

चित्स्वभाव्यादसौ देव: स्वात्मना विमृशन् प्रभु:।
अनाश्रितादिभूम्यन्ता भूमिका: प्रतिपद्यते।।

यह शक्ति चिदानन्देच्छाज्ञानक्रियारूप शक्तिपञ्चकसामरस्यस्वभावा कहलाती है—सा चिदानन्देच्छाज्ञान-क्रियारूपशक्तिपञ्चकसामरस्यस्वभावेत्याख्यायते।[१]

विश्व शम्भु की शक्ति का विजृम्भणमात्र है; सृजन नहीं है—ततश्च परमेश्वरपरामर्श-प्रसरपरिपाटीपाटवपरमार्थमेतदखिलं तत्त्वपरम्परापरिस्फुरणप्राचुर्योज्ज्वलं विश्वविजृम्भा-वैचित्र्यमिति तात्पर्यार्थ:।[२]

सप्तत्रिंशत्तत्त्व—३७वाँ तत्त्व कौन है? महार्थमञ्जरीकार कहते हैं कि समस्त ३६ तत्त्वों के कलाप (समूह) को स्वात्मसात करके अवस्थित परमशिवभट्टारक नामक प्रमाता सैंतीसवाँ तत्त्व है—परमशिवभट्टारकाह्वय: प्रमाता सप्तत्रिंशतया स्वीक्रियते।

कहीं-कहीं परतत्त्व को अड़तीसवाँ तत्त्व भी कहा गया है; क्योंकि वह (विश्वमय होकर भी) विश्वातीत है—अविकल्पात्मना च भाव्यं विश्वोत्तरेणेत्यतोऽत्राप्यविकल्पवृत्तिरष्टा-त्रिंश कश्चिदागमेष्वङ्गीक्रियते।[३]

तन्त्रवटधानिकाकार की दृष्टि—

षट्त्रिंशत्तत्त्वपर्यायस्तदभिन्न: पर: शिव:।
उपदेश्यतया सोऽपि स्यादवच्छेदभागत:।
अष्टात्रिंशं परं धाम यत्रेदं विश्वकं स्फुरेत्।

---

१. परिमल २. परिमल (३६) ३. परिमल

शम्भु और शक्ति क्या हैं और उनका अन्त:सम्बन्ध क्या है? शम्भु अनुत्तरात्मा हैं और शक्ति शम्भु से अभिन्न है, तदविभिन्नस्वभावा है। वह स्वरसमुदायमयी विसर्ग-पर्याया शैवी ऊर्जा है—शम्भुरत्रानुत्तरात्मा तस्य तादृशी शक्तिश्च तदविभिन्नस्वभावा, स्व-रसमुदायमयी विसर्गापरपर्यायेति।[१]

यह शैवी शक्ति अनुत्तर क्रिया तथा अनुत्तर चिति के रूप में अवस्थित है। उन्मेष (सृष्टि) एवं निमेष (प्रलय) भी इसी शक्ति की उन्मीलन-निमीलन क्रियायें हैं। अशेष वेद्यवर्ग की वासनाओं से उन्मिषित एवं परमशिव (अनुत्तर तत्त्व) में विश्राम ग्रहण करने वाली यह शैवी परा शक्ति ही परमशिव में भी अहं का बोध कराती है—सर्वसंवित्समा-वेशलक्षण: कश्चिदहमिति परामर्श उदेति।[२]

यह परमशिव का अहंबोधात्मक परामर्श-प्रवाह ही सृष्ट्योन्मुखी आद्य धारा है। इसे ही शिवसूत्रकार ने शिवसूत्र (प्रथमोन्मेष-१.२२) में इस प्रकार व्यक्त किया है—महा-ह्रदानुसन्धानान्मन्त्रवीर्यानुभव:[३] (शिवसूत्र)। अर्थात् पराशक्तिस्वरूप महाह्रद (समस्त शक्तिचक्र एवं स्थूल मेयपर्यन्त समस्त जगत् को अपने उदर में रखने वाली स्वातन्त्र्य नाम्नी पराशक्ति) के अनुसन्धान (अन्तर्मुख एवं अनारत रूप से उस शक्ति के साथ तादात्म्य-विमर्शन) द्वारा मन्त्र (शब्दराशिस्फारात्मक एवं पराहन्ता विमर्श से युक्त मन्त्र) के वीर्य (मन्त्र के वीर्यभूत एवं महामन्त्रस्वरूप पूर्णाहन्तारूप आत्मशक्ति) का अनुभव (स्वात्मरूप स्फुरण) होता है। मालिनीविजय में भी 'या सा शक्तिर्जगद्धातु:' कहकर इसी तथ्य की पुष्टि की गई है। 'मातृकाचक्रसम्बोध:' सूत्र द्वारा भी शिवसूत्रकार ने इसी भाव को व्यक्त किया है।

श्रीकण्ठीय संहिताकार की दृष्टि—श्रीकण्ठीसंहिताकार का कथन है कि—

आदिमान्तविहीनास्तु मन्त्रा: स्यु: शरदभ्रवत्।
गुरोर्लक्षणमेतावदादिमान्तं निवेदयेत्।।

श्रीसंवित्स्तोत्रकार की दृष्टि—संवित्स्तोत्र में कहा गया है—

आदिमान्तिमगृहीतवर्णराश्यात्मिकाहमिति या स्वत: प्रथा।
मन्त्रवीर्यमिति साधितागमैस्तन्मयो गुरुरसि त्वमम्बिके।।

वीर्य क्या है?[४] वीरसम्बन्धी धर्म ही वीर्य है। वीर कौन है? तत्र वीरो नाम विविध-मीरयति विश्ववैचित्र्यमिति भगवान् शब्दराशिभट्टारक उच्यते।[५]

श्रीमच्चिद्गगनचन्द्रिकाकार की दृष्टि—ईरणेन विविधेन वीरतां योऽयमक्षरगण: प्रपद्यते।

१-२. परिमल

३. परैव शक्तिर्महाह्रद:, तत: तदनुसन्धानात् (शिवसूत्र-विमर्शिनी : क्षेमराज)

४-५. परिमल

श्रीप्रभाकौलकार की दृष्टि—प्रभाकौलकार कहते हैं—वामे वीरा समाख्याताः।

श्रीत्रिंशिकाकार की दृष्टि—त्रिंशिकाकार कहते हैं—

सर्वेषामेव मन्त्राणां विद्यानां च यशस्विनि।
इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा।।

भट्टकल्लट की दृष्टि—भट्टकल्लट स्पन्दकारिका में कहते हैं—

यस्योन्मेषनिषाभ्यां जगतः प्रलयोदयौ।
तं शक्तिचक्रविभव..।।

यह उन्मेष-निमेष शक्ति का ही तो स्वरूप है। शिव अपनी ही शक्ति के प्रसार-रूप विश्व का अहं रूप में विमर्शन करता है। स्पन्दशक्ति उच्छलनात्मक (स्वात्मन्युच्छलनात्मकः—तन्त्रालोक-४.१८३) है। वह युगपत् विकास-संकोच करती रहती है। शंकरात्मक बोधगगन (अनुत्तर तत्त्व परमशिव) का सारभूत तत्त्व हृदय (विमर्शरूपा) या स्पन्द शक्ति है—पस्पन्दे स स्पन्दः। (ष. त. सं.)। स्पन्द ही शक्ति है।[१]

अध्वषट्क का स्वरूप

नन्वध्वानो हि षडिति आगमेषु प्रसिद्धाः। तत्र तत्त्वव्रातात्मा कश्चिदेवांशः। अन्यत्र तु कथमुक्तार्थोपपत्तिरित्याकाङ्क्षां क्षपयन् प्रकृतगाथायास्तात्पर्यार्थमाह—

जं अत्थाण अ छक्कं तत्थ पआसत्थलक्खणं अद्धं।
विमरिससद्दसहावं अद्धं ति सिवस्स जामलुल्लासो ॥२७॥

(यदध्वनां च षट्कं तत्र प्रकाशार्थलक्षणमर्धम्।
विमर्शशब्दस्वभावमर्धमिति शिवस्य यामलोल्लासः।।)

यह जो अध्वों का षडात्मक समूह (वर्ण, पद, मन्त्र, कला, तत्त्व एवं भुवन) है, इसके प्रकाशार्ध लक्षण वाला अर्धभाग एवं विमर्शार्ध स्वरूप वाला शब्दस्वभाव वाला अर्ध भाग—ये ही दो उन्मेष-निमेषात्मक यामलोल्लास (परमशिव के दो चमत्कार) हैं।।२७।।

अध्वानो हि षडित्यागमेषु प्रसिद्धम्। ते च वर्णाः, पदानि, मन्त्राः, कलाः, तत्त्वानि, भुवनानीत्याख्यायन्ते। तत्र वर्णाः पञ्चाशल्लोकप्रसिद्धाः। पदान्यानन्त्येऽपि व्योमव्याप्यादिमन्त्रमर्यादयैकाशीतिः। मन्त्राश्च तद्वदानन्त्येऽपि ब्रह्मपञ्चकमङ्गषट्कं चेति सङ्कोचदृष्ट्या एकादश। कला निवृत्त्यादयः पञ्च। तत्वान्युक्तरूपाणि षट्त्रिंशत्। भुवनानि च कालाग्निरुद्रादीन्यनाश्रितान्तानीति चतुर्विंशत्यधिकं

१. शक्ति का स्वरूप पूर्ण अहंविमर्श है। यह अहंविमर्श ही मौलिक स्फुरत्ता है। स्फुरत्ता ही शक्ति है।

शतद्वयम्। एतदखिलमपि कलापञ्चकेन क्रोडीक्रियते। तथाहि—निवृत्तौ कलायां क्षकार एको वर्णः। अष्टाविंशतिः पदानि। हृदयसद्योजातौ मन्त्रौ। पृथिवी तत्त्व-मेकम्। कालाग्निरुद्रादीनि भद्रकाल्यन्तान्यष्टोत्तरशतं भुवनानि। प्रतिष्ठायां हाद-यष्टान्ता वर्णास्त्रयोविंशतिः। एकविंशतिः पदानि। शिरोवामदेवौ मन्त्रौ। अप्तत्त्वा-दीनि प्रकृत्यन्तानि त्रयोविंशतिस्तत्त्वानि। अमरेशादीनि श्रीकण्ठान्तानि च षट्-पञ्चाशद् भुवनानि। विद्यायां आदिघान्ताः सप्त वर्णाः। विंशतिः पदानि। शिखा-घोरश्चेति मन्त्रद्वयम्। पुरुषप्रभृतीनि मायापर्यन्तानि सप्त तत्त्वानि। भीमादीन्यङ्गुष्ठ-मात्रान्तानि च सप्तविंशतिर्भुवनानि। शान्तौ तु गखकास्त्रयो वर्णाः। पदान्येकादश। कवचतत्पुरुषौ मन्त्रौ। शुद्धविद्येश्वरसदाशिवास्त्रीणि तत्त्वानि। वामादिसदा-शिवान्तमष्टादश भुवनानि। शान्त्यतीतायां च वर्णाः षोडश स्वराः। पदमेकम्। (शिवः?) ईशानो नेत्रमस्त्रमिति मन्त्रत्रयम्। शिवस्तत्त्वमेकं यः शक्तिस्वभाव इत्याम्नायते। निवृत्त्यादीन्यनाश्रितान्तानि पञ्चदश भुवनानीति विवेकः। एतच्च सिद्धान्तादितन्त्रेष्वत्यन्तं वितत्योपपादितमिति संक्षेपेणोक्तम्। एवं च सति यदेत-दध्वनामुक्तरूपाणां षट्कम्, तत्र यदेकमर्धं भुवनतत्त्वकलास्वभावम्। अन्यत् तु मन्त्रपदवर्णात्मकम्। प्रत्येकं च स्थूलसूक्ष्मपरप्रक्रियया त्रैविध्यम्। तत्र प्रथम-मभिधेयभूतं द्वितीयमभिधानकारकमिति विभागः। तथा च सति वाच्यवर्गः सर्वोऽपि प्रकाशपरमार्थः, वाचकोल्लेखस्तु विमर्शवपुरिति शिवस्य प्रकाश-विमर्शात्मनः परमेश्वरस्य यामल उभयविसर्गारणिस्वभाव उल्लासः। उन्मेषनिमेष-शक्तिद्वितययौगपद्यानुभूतिचमत्कार इत्यर्थः। यथा पर्यन्तपञ्चाशिकायाम्—

> तत्र वाचकवाच्यात्मस्पन्दयोरेकशः प्रभोः।
> स्थूलसूक्ष्मपराभासक्रमयोः षड्विधाध्वता ।। इति।

यथा च श्रीविरूपाक्षपञ्चाशिकायाम्—

> यस्य विमर्शस्य कणः पदमन्त्रार्णात्मकस्त्रिधा शब्दः।
> पुरतत्त्वकलात्मार्थो धर्मिण इत्थं प्रकाशस्य ।। इति।

श्रीचिद्गगनचन्द्रिकायां च—

> याऽहमित्युदितवाक् पराभिधा यः प्रकाश उदितार्थविग्रहः।
> द्वौ मिथः समुदिताविहोन्मुखौ तौ षडध्वपितरौ श्रये शिवौ ।। इति।

एवमाशयेनैव ह्यस्मत्परमगुरुभिः श्रीसौभाग्यहृदयस्तोत्रे—

> वर्णः कला पदं तत्त्वं मन्त्रो भुवनमेव च।
> इत्यध्वषट्कं देवेशि! भाति त्वयि चिदात्मनि ।।

इत्यध्वनामुद्देशस्तत्तद्यामलतयोन्मीलितः। एतेन 'वागर्थाविव संपृक्तौ' इत्यादीनि महाकविवाक्यानि व्याख्यातानि। अतश्च शब्दार्थसामरस्यात्मनि साहित्येऽप्यस्मदाग्रहः पारमेश्वरोऽनुग्रह एव। यदनुप्राणनाः कुण्डलाभरणमुकुन्दकेलिपरिमला(गुहा?)कोमलवल्लीस्तवनखप्रलापादयः प्रबन्धाः प्रख्यायन्ते।

तयोर्विमर्शप्रकाशस्वभावतायाः—'चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता' इति, 'आत्मार्थस्य प्रकाशता' इति च प्रत्यभिज्ञापितत्वात्। एवं च प्राचीनगाथायां शम्भोः प्रकाशस्वरूपस्य शक्तिर्विमर्शमयीत्यपि व्याख्यातम्। स्वपरामर्शोपायभूतत्वाद् वर्णकलादीनामध्वशब्दव्यपदेशः। यथा श्रीस्वच्छन्दे—

मुक्तानां शिवताव्यक्तिकारणं विश्वमेव हि।
शिवताव्यक्तिमार्गत्वात्ते सर्वेऽपि कलादयः।।
अध्वशब्देन कथ्यन्ते ते सर्वे बन्धना अपि। इति।

श्रीविज्ञानभैरवे च—

भुवनाध्वादिरूपेण चिन्तयेत् क्रमशोऽखिलम्।
स्थूलसूक्ष्मपरस्थित्या यावदन्ते मनोलयः।। इति।

वर्ण, पद, मन्त्र, कला, तत्त्व एवं भुवन—ये ही छः अध्व हैं। अ से ज्ञ पर्यन्त समस्त वर्णसमुदाय वर्णाध्व है। पद ८१, मन्त्र ११, कलायें ५ एवं तत्त्व ३६ हैं। समस्त तन्त्राम्नाय में यह प्रसिद्ध है कि अध्व छः हैं।

अध्वषट्क

शुद्धाध्वा—शिव तत्त्व से लेकर शुद्धविद्यातत्त्व तक के प्रमाताओं की सृष्टि शुद्ध अध्वा कहलाती है। शुद्ध अध्वा माया से ऊपर की सृष्टि है। इस सृष्टि के कर्ता साक्षात् भगवान् शिव हैं।

तन्त्रसार में कहा गया है कि—तद्यथा—शाम्भवा शाक्ताः मन्त्रमहेश्वराः। मन्त्रेश्वराः मन्त्रा इति शुद्धाध्वा। इयति साक्षात् शिवः कर्ता।[1]

अशुद्धाध्वा[2]—माया तत्त्व से लेकर पृथ्वी तक की सम्पूर्ण सृष्टि अशुद्ध अध्वा या मायीय सृष्टि कही जाती है। इस सृष्टि में माया का प्राधान्य रहता है। इस अध्वा की सृष्टि (मायिक विश्व का सृजन) अघोरेश के द्वारा माया शक्ति से की जाती है।

---

१. तन्त्रसार (आ. ८)
२. ईश्वरप्रत्यभिज्ञाविमर्शिनी

अध्व षट्क एवं शुद्धाशुद्ध सृष्टि

शुद्धाध्वा[1] (शुद्ध सृष्टि)—

१. यह शिव तत्त्व से शुद्ध विद्या तत्त्व तक प्रसृत है।

२. यह माया से ऊर्ध्व में है; अत: मायातीत है, मायोपरि है।

३. इसके निर्माता साक्षात् शिव भगवान् हैं।

४. यह सृष्टि आदि सर्ग है और कर्म-सिद्धान्त से निरपेक्ष एवं निर्लिप्त है।

५. यह परमशिव की स्वतन्त्र इच्छामात्र पर स्थित है—इच्छामात्रं प्रभो: सृष्टि:।

६. इस आदि सृष्टि (सर्ग) का प्रमाता-समूह मितात्मक नहीं है; प्रत्युत चिदात्मक एवं विश्वप्रमाता है।

७. यहाँ के प्रमाता अपने-आपको समष्टि प्रमाता (स्वयं को विश्व का प्रमाता) मानते हैं।

८. ये प्रमाता समस्त विश्व को (समस्त पारमित्यों से विमुक्त) 'सर्वं इदम्' के प्रत्यय से वेद्यरूप में अनुभव करते हुये भी चिद्रूप में प्रत्यवमृष्ट करते हैं। इसीलिये ये प्रमाता शुद्धप्रमाता कहे जाते हैं।

९. उनकी दृष्टि शुद्धविद्या कहलाती है।

१०. यहाँ अद्वैत प्रथा का प्राधान्य होता है।

११. यहाँ शुद्ध अध्वा में अहंरूप प्रमाता एवं इदम्रूप प्रमेय एक चिन्मात्ररूपता में विश्रान्त रहते हैं। विश्वप्रमाता सामानाधिकरण्य-सम्बन्ध से इदम् (प्रमेय विश्व) को 'यह विश्व मैं हूँ' के भाव से ही परामृष्ट किया करता है।

प्रमाता (वेदक) स्वयं को शरीर, इन्द्रिय, बुद्धि आदि से परे चैतन्य मानकर एवं वेद्यों को चिन्मयरूप में देखते हुये (जड़ न समझकर चेतन मानते हुये) 'अहमिदमस्ति' भाव रखता है।

चिद्रूप को चिद्रूप में परामृष्ट करना ही शुद्ध विमर्श एवं शुद्ध ज्ञान है। उन्हें उसके विपरीत स्वरूप में देखना ही (प्रत्यवमर्श करना ही) अशुद्धि है। अहमिदम् एवं सर्वचिन्मयवाद का बोध ही विशुद्ध विमर्श है।

१२. चूँकि शुद्ध अध्वा के प्रमाताओं में विशुद्ध विमर्श हुआ करता है; अत: परमशिव का यह आदि सर्ग शुद्धाध्वा कहा जाता है।

१३. यह अध्वा शुद्धविद्या-प्रधान है। शुद्धविद्या क्या है? सामानाधिकरण्येनेदं विश्वमहमिति विश्वात्मनो मति: शुद्धविद्या। (ईश्वरप्रत्यभिज्ञावृत्ति)

विद्या पराद्वय प्रथा है—विद्या पराद्वयप्रथा। (शिवसूत्रविमर्शिनी)

---

१. मायाभिधानात् तत्त्वात् परस्मिन् पूर्ण एव शिवादिविद्यातत्त्वपर्यन्ते शुद्धाध्वनि (परमार्थसार-विवृति)।

अशुद्धाध्वा (अशुद्ध सृष्टि)—

१. माया तत्त्व से पृथ्वी तत्त्वपर्यन्त सृष्टि अशुद्ध अध्वा कहलाती है।

२. अशुद्धाध्वा को ही मायिक सृष्टि भी कहते हैं।

३. इसमें माया तत्त्व का प्राधान्य है।

४. माया की सहायता लेकर अघोरेश ही इस सृष्टि की रचना किया करते हैं।

५. माया क्या है? माया भेदबुद्धि का पर्याय है—मायाविभेदबुद्धिर्निजांशजातेषु निखिलजीवेषु (षट्त्रिंशतत्त्वसन्दोह)।

६. अशुद्धाध्वा में माया शक्ति के कारण प्रमाताओं में स्वरूपतिरोधान होने के कारण स्वरूप-विपर्यास रहता है, अतस्मिंस्तद्बुद्धिः का बोध होता है—ग्राहकग्राह्यविपर्यासद्वयप्ररूढौ तु माया शक्तिः (ईश्वरप्रत्यभिज्ञाविमर्शिनी)।

७. स्वरूप-विपर्यास के कारण इन प्रमाताओं में—जड़ात्मक वेद्यों में अहन्ताभिमान होने लगता है—

भेदे त्वेकरसे भातेऽहंतयानात्मनीक्षते।
शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृम्भते।। (ईश्वर प्र.)

८. यहाँ द्वैतप्रथा या भेदबुद्धि की प्रधानता होती है।

९. जड़ात्मक शरीर एवं इन्द्रियों को ही आत्मस्वरूप मानने वाला यह प्रमातावर्ग शरीर के कृश होने पर 'मैं कृश हो गया, मैं दुःखी हो गया' की अनुभूति करने लगता है और जड़बुद्धि के साथ तादात्म्य स्थापित करके बुद्धि के धर्मों को आत्मा के धर्म मानकर 'मैं दुःखी हूँ' आदि दशाओं का अनुभव करने लगता है—कृशोऽहमित्यादिदशासु अहमित्यात्मतया भाति। वेद्यप्रतिबिम्बनवती बुद्धिरभिनिविश्यते अन्तरहं वेद्मि दुःख्यहमिति।
(ईश्वप्रत्यप्रत्यभिज्ञाविमर्शिनी)

१०. इस अध्वा में प्रमाता-वर्ग (स्वरूपविपर्यास के कारण) वेद्यरूप चिन्मय भावों को अपने से पृथक् एवं अचिद्रूप तथा सभी वेद्यों को पृथक्-पृथक् परामृष्ट करने लगता है। (ईश्वर प्र. वि. भाग-२)

११. इन प्रमाताओं का बोध व्यापक (सर्वकर्तृत्व, सर्वज्ञातृत्व, सर्वचिन्मयत्व, सर्वव्यापकत्व, सर्वात्मकत्व) न रहकर मित हो जाता है और भेद-बुद्धि से कलुषित हो जाता है।

१२. चिद्रूपता में अचिद्रूपता एवं अभेद में भेद की प्रतीति ही तो अशुद्ध विमर्श है। ऐसे अशुद्ध विमर्श वाले प्रमाताओं के कारण ही यह अध्वा अशुद्धाध्वा कहा जाता है। इसके निर्माता अघोरेश हैं।[१]

अध्वा के विभिन्न रूप—अध्वानो हि षडित्यागमेषु प्रसिद्धम्। ते च वर्णाः,

---

१. अघोरेश : अशुद्धमध्वानम् इह अस्मद्दर्शने सृजति।

पदानि, मन्त्राः—कलाः, तत्त्वानि भुवनानीत्याख्यायन्ते।[१]

१. वर्ण तो ५० हैं, जो कि अ-आदि क्षान्त हैं।

२. पद—पदान्यानन्त्येऽपि व्योमव्याप्यादिमन्त्रमर्यादयैकाशीतिः।

३. मन्त्र—मन्त्राश्च तद्वदानन्त्येऽपि ब्रह्मपञ्चकमङ्गषट्कं चेति सङ्कोचदृष्ट्या एकादश।

४. कला—कला निवृत्यादयः पञ्च।

५. तत्त्व—तत्त्वान्युक्तरूपाणि षट्त्रिंशत्।

६. भुवन—भुवनानि च कालाग्निरुद्रादीन्यनाश्रितान्तानीति चतुर्विंशत्यधिकं शतद्वयम् (एतदखिलमपि कलापञ्चकेन क्रोडीक्रियते)।

सौभाग्यहृदयस्तोत्रकार की दृष्टि—इस ग्रन्थ में अध्वषट्क को इस प्रकार प्रस्तुत किया गया है—

वर्णः कला पदं तत्त्वं मन्त्रो भुवनमेव च।
इत्यध्वषट्कं देवेशि! भाति त्वयि चिदात्मनि।।

अभिनवगुप्तपादाचार्य की दृष्टि—तन्त्रालोक (प्रथमाह्निक) में आचार्य अभिनवगुप्त कहते हैं कि शिव की शक्तियाँ अनन्त हैं। शिव की शक्ति का आनन्त्य—१. कला २. तत्त्व ३. भुवन ४. वर्ण ५. मन्त्र एवं ६. पद नामक षडध्व में व्याप्त है या षडध्व के रूप में व्यक्तीभूत है—

बहुशक्तित्वमस्योक्तं शिवस्य यदतो महान्।
कला-तत्त्व-पुरार्णाणुपदादिर्भेदविस्तरः ।।

(अणु = मन्त्र) (पुर = भुवन) (अर्ण = वर्ण) अध्व का अर्थ है—मार्ग; यथा—मन्त्राध्व अर्थात् मन्त्र का मार्ग = मन्त्रविज्ञान, मन्त्रविद्या।

मार्ग (अध्वा) **के प्रकार**

- शब्दाध्वा
  - वर्ण
  - पद
  - मन्त्र
- अर्थाध्वा
  - कला
  - तत्त्व
  - भुवन

१. इनमें से पिछले दोनों क्रमशः अगले दोनों के अधीनस्थ हैं अर्थात् पद वर्ण के मन्त्र पद के आधीन है।

अर्थाध्व—१. कला-५, २. तत्त्व-३६, ३. भुवन-२२४।

इनमें भी दूसरा और तीसरा क्रमशः प्रथम एवं द्वितीय के अधीनस्थ (आश्रित) है।

वैसे तो षडध्व-विज्ञान शैव एवं शाक्त दोनों सम्प्रदायों की रचनाओं में मिलता

१. षट्त्रिंशत्तत्त्वसन्दोह

है; किन्तु शाम्भव दर्शन में इसका विशेषोल्लेख है।

शैव और शाक्तों में भेद—

१. शाक्त गण शिव एवं शक्ति—दोनों की उपासना करते हुये भी शक्ति तत्त्व को,

२. शैव गण शक्ति एवं शिव—दोनों की उपासना करते हुये भी शिवतत्त्व को विशेष महत्त्व प्रदान करते हैं।

कला के भेद

शान्त्यतीता कला | शान्ति कला | विद्या कला | प्रतिष्ठा कला | निवृत्ति कला

कला क्या है? कला है—परात्पर शक्ति का सामान्य एवं परात्पर रूप।

कला का द्वितीय अर्थ है—शक्ति का अन्यतम विशिष्ट स्वरूप एवं व्यापार।

जिस समय माया तत्त्व के कारण मितात्मा का पूर्ण प्रकाशस्वरूप तिरोहित हो उठता है और उसकी ज्ञान शक्ति एवं क्रिया शक्ति संकुचित हो उठती है और उसका सर्वज्ञातृत्व एवं सर्वकर्तृत्व किञ्चित् ज्ञातृत्व एवं किञ्चित् कर्तृत्व में पर्यवसित हो जाता है (परिमित कर्तृत्व में परिणत हो जाता है) तब उसे 'कला' कहते हैं—

तत्सर्वकर्तृता सा सङ्कुचिता कतिपयार्थमात्रपरा।
किञ्चित्कर्तारममुं कलयन्ती कीर्त्यते कला नाम।।[१]

कला माया की प्रथम सृष्टि है।

अभिनवगुप्त की दृष्टि—आचार्य अभिनवगुप्त तन्त्रालोक में कहते हैं कि कला माया तत्त्व की प्रथमा सृष्टि है; किन्तु वे अन्यत्र कला को प्रथम कञ्चुक भी कहते हैं। कला के विषय में दो दृष्टियाँ हैं—

१. माया की प्रथम सृष्टि   २. प्रथम कञ्चुक

माया परिग्रहवशाद् बोधो मलिनः पुमान् स पशुर्भवति।
कालकलानियतिवशाद् रागाविद्यावशेन सम्बद्धः।।

(परमार्थसार-१६)

कला का जन्म—अभिनवगुप्तपादाचार्य की दृष्टि—

१. अनाश्रित (शक्ति तत्त्व) ही बाह्यावभास में माया,

२. सदाशिव ही कला एवं विद्या,

३. ईश्वर ही काल एवं नियति,

४. सद्विद्या ही राग बनकर उदित होते हैं—

---

१. षट्त्रिंशत्तत्त्वसन्दोह

अनाश्रितं यतो माया कलाविद्ये सदाशिवः।
ईश्वरः कालनियती सद्विद्या राग उच्यते।।[१]

प्रमाता—

१. माया का प्रमाता अनाश्रित (शक्तितत्त्व)।
२. बुद्धि का प्रमाता (सदाशिव)।
३. प्राण का प्रमाता (ईश्वर)।
४. देह का प्रमाता (सद्विद्या)।

अनाश्रितः शून्यमाता बुद्धिमाता सदाशिवः।
ईश्वरः प्राणमाता च विद्या देहप्रमातृता।।[२]

अभिनवगुप्त की दृष्टि—शिव से विद्यापर्यन्त शिव के जो पाँच रूप हैं, वे ही पाशबद्ध पुरुष के लिये माया से राग तत्त्व के पञ्चकञ्चुक होते हैं—

शिवादिशुद्धविद्यान्तं यच्छिवस्य स्वकं वपुः।
तदेव पुंसो मायादिरागान्तं कञ्चुकीर्भवेत्।।[३]
शक्त्यादिस्तत्त्ववर्गस्तु कञ्चुकत्वेन वै पशोः।
शक्तिर्माता कला विद्या कालो नियतिरेव च।
सदाशिवेश्वरौ विद्या रागस्तु वरवर्णिनि।।

आचार्य भट्टवामदेव की दृष्टि—भट्टवामदेव कहते हैं कि सृष्ट्युन्मुख भगवान् शुद्धाध्वा में वर्तमान रहकर अपनी शक्तियों के माध्यम से माया तत्त्व को विक्षुब्ध करके उस कला तत्त्व का सृजन करते हैं, जो कि किञ्चित्कर्तृत्वलक्षणा है—तत्र सृष्ट्युन्मुखो भगवान् शुद्धाध्वनि वर्तमानः स्वशक्तिभिः मायां विक्षोभ्य कलातत्त्वं किञ्चित्कर्तृत्वलक्षणं पुद्गलस्य सृजति।

तन्त्रालोककार की दृष्टि—अभिनवगुप्तपादाचार्य कहते हैं—

कला हि किञ्चित्कर्तृत्वं सूते स्वालिङ्गनादणोः।
तस्याश्चाप्यणुनान्योन्यं ह्यञ्जनं सा प्रसूयते।।

(तन्त्रालोक-६)

सेयं कला न करणं मुख्यं विद्यादिकं यथा।
पुंसि कर्तरि सा कर्त्री प्रयोजकतया यतः।। (तन्त्रालोक)

---

१. तन्त्रालोक (६.४२)
२. तन्त्रालोक (६.४३)
३. तन्त्रालोक—किञ्चित् कर्तृत्व लक्षण उत्पन्न करने वाली शक्ति ही कला है। (ईश्वरप्रत्यभिज्ञा-विमर्शिनी भाग २)

पञ्चकलायें और उनका स्वरूप—१. शान्त्यातीता २. शान्ति ३. विद्या ४. प्रतिष्ठा एवं ५. निवृत्ति नामक पाँच कलायें कतिपय तत्त्वों की शक्तियाँ हैं और विस्तार की प्रक्रिया की दो अवस्थायें हैं।

तत्त्वों = (३६ तत्त्वों) का विभाजन-विधान

१. शुद्ध तत्त्व (अभेद स्तर) **शिवतत्त्व** (प्रथम वर्ग)—१. शिवतत्त्व २. शक्तितत्त्व।

२. शुद्धाशुद्ध तत्त्व (भेदाभेद स्तर) **विद्या तत्त्व** (द्वितीय वर्ग)—१. सदाशिव २. ईश्वरतत्त्व ३. शुद्धविद्या।

३. अशुद्ध तत्त्व (भेद स्तर) **आत्म तत्त्व** (तृतीय वर्ग)—

(माया से पृथ्वी तत्त्वपर्यन्त ३१ तत्त्व)

१. माया	९. बुद्धि	१७. वाक्	२५. रस
२. कला	१०. अहंकार	१८. पाणि	२६. गन्ध
३. विद्या	११. मन	१९. पाद	२७. आकाश
४. राग	१२. श्रोत्र	२०. पायु	२८. वायु
५. काल	१३. त्वक्	२१. उपस्थ	२९. वह्नि
६. नियति	१४. चक्षु	२२. शब्द	३०. सलिल
७. पुरुष	१५. जिह्वा	२३. स्पर्श	३१. पृथिवी
८. प्रकृति	१६. घ्राण	२४. रूप	

भुवन अर्थात् लोक 'अस्माद् भवतीति भुवनम्' अर्थात् इससे जो कुछ उत्पन्न होता है, उसे भुवन कहते हैं।

भुवनों के प्रकार

शुद्ध | शुद्धाशुद्ध | अशुद्ध

कला	शुद्धतत्त्व	भुवन-संख्या	भुवनों के नाम
शान्त्यातीता कला	शिवतत्त्व	१०	अनाश्रित, अनाथ, अनन्त, व्योमरूपिणी, व्यापिनी, ऊर्ध्वगामिनी, मोचिका, रोचिका, दीपिका, इन्धिका। (इनमें से पाँच शाक्त भुवन हैं और शेष पाँच नादोर्ध्व भुवन हैं)।
	शक्तितत्त्व	५	शान्त्यतीता, शान्ति, विद्या, प्रतिष्ठा, निवृत्ति (ये वैन्दवपुर कहलाते हैं)।
	योग—	१५	

कला	शुद्धतत्त्व	भुवन-संख्या	भुवनों के नाम
शान्ति कला	सदाशिव तत्त्व	१	सदाशिव भुवन
	ईश्वर तत्त्व	८	शिखण्डी, श्रीकण्ठ, त्रिमूर्ति, एकनेत्र, एकरुद्र, शिवोत्तम, सूक्ष्म एवं अनन्त।
	शुद्ध विद्या	९	मनोन्मनी, सर्वभूतदमनी, बलप्रमथनी, बल-विकरणी, कलविकरणी, काली, रौद्री, ज्येष्ठा, वामा
	योग—	१८	
कला	**शुद्धाशुद्धतत्त्व**	**भुवन-संख्या**	**भुवनों के नाम**
विद्या कला	माया तत्त्व	८	अङ्गुष्ठमात्र, ईशान, एकेक्षण, एकपिङ्गल, उद्भव, भव, वामदेव, महाद्युति।
	कालतत्त्व	२	विश्वेश। एकवीर
	कलातत्त्व	२	पञ्चान्तक। शूर।
	विद्यातत्त्व	२	पिङ्ग। ज्योति।
	नियतितत्त्व	२	संवर्त। क्रोध।
	रागतत्त्व	५	एकशिव, अनन्त, अज, उमापति, प्रचण्ड।
	पुरुषतत्त्व	६	एकवीर, ईशान, भव, ईश, उग्र, भीम, वाम।
	योग—	२७	
कला	**अशुद्धतत्त्व**	**भुवन संख्या**	**भुवनों के नाम**
प्रतिष्ठा कला	प्रकृति तत्त्व	८	श्रीकण्ठ, औम, कौमार, वैष्णव, ब्रह्म, भैरव, कृत, अकृत।
	बुद्धितत्त्व	८	ब्राह्म, प्रजेश, सौम्य, ऐन्द्र, गन्धर्व, यक्ष, राक्षस, पिशाच।
	अहङ्कार तत्त्व	१	स्थलेश्वर (१ भुवन)
	मनस् तत्त्व श्रोत्र तत्त्व त्वक् तत्त्व		

	चक्षु तत्त्व जिह्वा तत्त्व नासिका तत्त्व	१	स्थूलेश्वर (१ भुवन)
	वाक् तत्त्व पाणि तत्त्व पाद तत्त्व पायु तत्त्व उपस्थ तत्त्व	१	शङ्कुकर्ण (१ भुवन)
	शब्द तत्त्व स्पर्श तत्त्व रूप तत्त्व रस तत्त्व गन्ध तत्त्व	५	कालञ्जर, मण्डलेश्वर, माकोट, द्राविड, छगलाण्ड।
	आकाश तत्त्व	८	स्थाणु, स्वर्णाक्ष, भद्रकर्ण, गोकर्ण, महालय, अविमुक्त, रुद्रकोटि, वस्त्रपाद।
	वायु तत्त्व	८	भीमेश्वर, महेन्द्र, अट्टहास, विमलेश, नल, नाकल, कुरुक्षेत्र, गया।
	तेजस् तत्त्व	८	भैरव, केदार महाकाल, मध्यमेश, अम्रातक, जल्पेश, श्रीशैल, हरिश्चन्द्र।
	जल तत्त्व	८	लकुलीश, पारभूति, डिण्डी मुण्डी, विधि, पुष्कर, नैमिष, प्रभास, अमरेश।
	योग—	५६	
निवृत्ति कला		३६	पृथ्वी तत्त्व
		१०८	भद्रकाली से कालाग्नि तक।
	कुल मिलाकर	२२४	भुवन।

शुद्ध भुवनों में निवास करने वाली आत्मायें सर्वथा शुद्ध हैं। शेष आत्मायें शुद्धाशुद्ध या अशुद्ध हैं।

परसंवित्

पर संवित्
शिव तत्त्व
(उन्मनी शक्ति)
शक्ति तत्त्व
(समनी शक्ति)
शिव तत्त्व
अहं इदम्
मन्त्रेश्वर
सदाख्यतत्त्व
(नादशक्ति)
अहं इदम्
मन्त्रेश्वर
ईश्वरतत्त्व
(बिन्दु शक्ति)
विद्या तत्त्व
शुद्ध तत्त्व
मन्त्र और
विद्येश्वर
अहं इदम्
सद्विद्या तत्त्व
सद्विद्या से नीचे
पर माया से ऊपर
विज्ञानाकल
यहाँ माया और कंचुक सृष्टि
हेतु संलिष्ट होते हैं
अहं
इदम्
पुरुष तत्त्व
प्रकृति तत्त्व
माया
तत्त्व
में प्रलयाकल+
ब्रह्मा से
समस्त
बद्ध
जीव
आत्म तत्त्व
शुद्धाशुद्ध तत्त्व
बुद्धि से पृथ्वी
पर्यन्त तत्त्व
अशुद्ध तत्त्व

पशु (बद्ध जीव) **के भेद**

१. दिक्ष्वन्तःकरणेषु चरतीति दिक्चरी। यह अन्तःकरणरूपी दिशाओं में सञ्चार करती है।

२. इच्छा चाभ्युपगमरूपत्वादन्तःकरणप्रसाध्येति दिक्चरी। यह इच्छामयी एवं अन्तःकरणप्रसाधिनी है।

(घ) गोचरी शक्ति—यह ज्ञानमयी शक्ति है। यह चक्षु, कर्ण, नासिका आदि इन्द्रियों द्वारा प्रकाशित होती है। इसका करण अन्तःस्थित नहीं; प्रत्युत बाह्येन्द्रियाँ हैं।

महेश्वरानन्द कहते हैं कि यह बहिरिन्द्रियों में सञ्चार करने वाली मन्त्रमयी शक्ति है।

१. गोषु बहिरिन्द्रियेषु सञ्चणाद् गोचरी।

२. ज्ञानं च बहिर्मुखं चक्षुरादिभिर्बाह्येन्द्रियैरुद्दीप्यत इति गोचरी।

(ङ) भूचरी शक्ति—भूचरी शक्ति क्रियात्मिका शक्ति है। यह विश्व-विलास-वैचित्र्य को प्रकट करने वाली शक्ति है। यह विषय-भूमि में सञ्चार करने वाली शक्ति है।

महेश्वरानन्द कहते हैं—

१. भुवि विषयभूमौ चरणाद् भूचरीति।

२. क्रियापि पारमेष्वरीषु शक्तिष्वत्यन्तस्थौल्याद् बहिर्वेद्यवैचित्र्यस्य एवोपलभ्यत इति भूचरी।

संवित् स्वातन्त्र्य वाले शिव की जो पारमेश्वरी शक्ति है, प्रकृति से तो वह निर्विकल्पक है तथापि कभी परिमित प्रमाता में स्फुरित होने पर और फिर अन्त:करण में अनुप्रविष्ट होने पर उसी की बाह्येन्द्रियानुबन्धिनी होकर बहिर्वेद्यलक्षण वाले विषयोल्लास के रूप में भी प्रवाहित होती है। इसी पारमेश्वरी शक्ति के विभिन्न वागात्मक रूप भी हैं।

पारमेश्वरी शक्ति के वागात्मक रूप—

१. (चित् शक्ति) → परा वाक्

२. (आनन्द शक्ति) → सूक्ष्मा वाक्

३. (इच्छा शक्ति) → पश्यन्ती वाक्

४. (ज्ञान शक्ति) → मध्यमा वाक्

५. (क्रिया शक्ति) → वैखरी वाक्

एता एव चिदानन्देच्छाज्ञानक्रियाख्या: शक्तय: परा-सूक्ष्मा-पश्यन्ती-मध्यमा-वैखरीति वाग्रूपाश्चानुभूयन्ते। (महेश्वरानन्द : स्वोपज्ञ परिमल)

स्पन्दकारिका के अनुसार शक्तिचक्र—

१. खेचरी ३. दिक्चरी
२. गोचरी ४. भूचरी

(यस्योन्मेषनिमेषाभ्यां जगत: प्रलयोदयौ।
तं शक्तिचक्रविभवप्रभवं शङ्करं स्तुम:।।)

शक्तिवर्ग के चार भेद हैं—१. खेचरी २. गोचरी ३. दिक्चरी ४. भूचरी। वामेश्वरी शक्ति ही खेचरी आदि चार शक्तियों में रूपान्तरित हो जाती है।

प्रत्यभिज्ञाहृदयसूत्रकार की दृष्टि—प्रत्यभिज्ञाहृदयम् (सूत्र-१२) में कहा गया है—तदपरिज्ञाने स्वशक्तिभिर्व्यामोहितता संसारित्वम्। इसी सूत्र की व्याख्या में आचार्य क्षेमराज कहते हैं कि भगवती चिति शक्ति ही विश्व का वमन (बहि:प्रकाशन) करने

के कारण या संसाररूप 'वाम' विपरीत आचरण करने वाली होने के कारण वामेश्वरी का रूप ग्रहण करती हुई खेचरी, गोचरी, दिक्चरी एवं भूचरी प्रमाता, अन्तःकरण, बाह्यकरण एवं वस्तुस्वभावरूप में स्फुरित होती है।

पशुभूमिका में शून्य पद को ग्रहण करके पारमार्थिक चिद्गगनचरी का स्वरूप छिपा-कर किञ्चित्कर्तृत्वादिरूप कलादि शक्त्यात्मक 'खेचरी' चक्ररूप में प्रकाशित होती है।

अभेदप्रथात्मक पारमार्थिक रूप जिसमें आवृत है तथा भेद का आलोचन आदि जिसमें प्रधान है, ऐसी बाह्य करणों की देवीस्वरूप 'दिक्चरी चक्र' के रूप में भी वही चिति उदित है तथा सर्वात्म रूप को छिपाकर, भेदाभासस्वभाव, प्रमेयरूप 'भूचरीचक्र' के रूप में पशुहृदयों को मूढ़ बनाती हुई शोभित होती है।

पतिभूमिका में अवस्थित शक्तियाँ—

१. चिद्गगनचरी   ३. दिक्चरी
२. गोचरी   ४. भूचरी

क्षेमराज कहते हैं—

(क) किञ्च चितिरेव भगवती विश्ववमनात् संसारवामाचारत्वाच्च वामेश्वर्याख्या, खेचरी-गोचरी-दिक्चरी-भूचरीरूपैः अशेषैः प्रमातृ अन्तःकरणबहिष्करणभावस्वभावैः परिस्फु-रन्ती;

(ख) पशुभूमिकायां शून्यपदविश्रान्ता किञ्चित्कर्तृत्वाद्यात्मककलादिशक्त्यात्मना खेचरी-क्रमेण गोपितपारमार्थिकचिद्गगनचरीस्वरूपेण चकास्ति;

भेदनिश्चयाभिमानविकल्पनप्रधानान्तःकरणदेवीरूपेण गोचरीचक्रेण गोपिताभेदनिश्चया-द्यात्मकपारमार्थिकस्वरूपेण प्रकाशते।

पतिभूमिका में तो—

१. सर्वकर्तृत्वादि शक्तिरूपा चिद्गगनचरी,

२. अभेदनिश्चयादिरूप गोचरी,

३. अभेदालोचनाद्यात्मक दिक्चरी,

४. निजाङ्गस्वरूप अद्वैतप्रथासारभूत, प्रमेयात्मक भूचरी रूप से पतिहृदय को विकसित करती हुई स्फुरित होती है।[१]

५. चिदात्मा परमेश्वर की अविनाशी एवं स्पन्दन जिसमें सार है, ऐसी कर्तृतारूप एक ही निजी ऐश्वर्य शक्ति है।

६. वही शक्ति जब अपने स्वरूप को छिपाकर पशुभूमिका में प्राण, अपान एवं समान शक्ति की दशाओं; जाग्रत-स्वप्न-सुषुप्ति भूमियों; देह, प्राण एवं पुर्यष्टकात्मक

१. प्रत्यभिज्ञाहृदयम्

कलाओं द्वारा व्यामोहित करती है तब उसी से जनित व्यामोहितता संसारित्व के नाम से प्रख्यात है।[१]

भट्टदामोदर की दृष्टि—

शक्ति वर्ग की द्विमुखी प्रवृत्ति

- अज्ञानी (संसारी) पुरुषों को (पशुभूमिकारूढ़ जीवों को) अधोगति के मार्ग में ढकेलने का कार्य : बन्धन का कार्य, अध:पतन एवं संसरण-व्यापार।
- शिवभावारूढ़ प्राणियों को शिवत्वभाव एवं मुक्ति-दान।

पूर्णाविच्छिन्नमात्रान्तर्बहिष्करणभावगा: ।
वामेशाद्या: परिज्ञानाज्ञानात् स्युर्भुक्तिबन्धदा:।।

१. खेचरी शक्ति का स्वरूप—ज्ञान के अनन्त आकाश में विचरण करने वाली शक्तियाँ। अपने मूल रूप में इन शक्तियों की आख्या चिद्गगनचरी (चिदाकाश में विचरण करने वाली) है।

जब परमेश्वर की सर्वकर्तृत्व आदि असंकुचित एवं असीम पाँच शक्तियाँ सङ्कोच में पड़कर कला, विद्या एवं नियति आदि पञ्चकञ्चुकों का रूप धारण करती हैं तब पशुभूमिका पर उनका खेचरी चक्र पड़ता है। इस अवस्था में पशुओं के ज्ञान के क्षेत्र पर सङ्कोच का आवरण डालकर अपने यथार्थ स्वरूप चिद्गगनचरी को छिपा लेती हैं, जिससे वे अपने-आपको शक्तिदरिद्र एवं असहाय-जैसा समझते हैं।[२]

दूसरी ओर यही शक्तिवर्ग सर्वकर्तृव, सर्वज्ञत्व आदि पाँच असीम पारमेश्वरी शक्ति-रूपों में स्पन्दायमान होता हुआ अपने यथार्थ—चिद्गगनचरी रूप से पतिप्रमाता के हृदय को विकसित करता रहता है।

२. गोचरी—परा, पश्यन्ती, मध्यमा एवं वैखरी—इन चार वाणियों के और अन्त:-करणों के क्षेत्र में विचरण करने वाला शक्तिवर्ग—एक ओर पशुप्रमाता के हृदय को भेदव्याप्ति में डालकर अपारमार्थिक संकल्प-विकल्पों का शिकार बना लेता है और दूसरी ओर पतिप्रमाता के हृदय में पूर्ण अभेद-व्याप्ति के रूप में स्फुरणशील रहता है।

३. दिक्चरी—पाँच ज्ञानेन्द्रियाँ और पाँच कर्मेन्द्रियाँ नामक दस दिशाओं में विचरण करने वाला शक्तिवर्ग एक ओर पशुओं की इन्द्रियों को बाहर संसार की ओर प्रवहमान बनाकर, उनके द्वारा उनको बाह्य विषयों का भेदरूप में ग्रहण करवाता है और दूसरी ओर पतिप्रमाता को अन्तर्मुखीन एवं अतीन्द्रिय संवेदन के द्वारा प्रत्येक पदार्थ

---

१. क्षेमराज—प्रत्यभिज्ञाहृदयम्

२. पशुभूमिकायां शून्यपदविश्रान्ता किञ्चित्कर्तृत्वाद्यात्मककलादिशक्त्यात्मना खेचरी क्रमेण गोपितपारमार्थिकचिद्गगनचरीत्वस्वरूपेण चकास्ति। (प्र.हृ.सू.-१२)

का अभेद अहं रूप में ग्रहण कराता है।

४. भूचरी शक्ति—शब्द-स्पर्श-रूप-रस-गन्ध—इन पाँच प्रमेय भूमिकाओं में विचरण करने वाला शक्तिवर्ग—एक ओर पशुप्रमाता को भिन्न-भिन्न रूपों में अवभासित होने वाले घट-पट आदि अनन्त प्रमेयजालों में फँसा लेता है और दूसरी ओर पतिप्रमाता को उन्हीं अनन्त रूपों वाले प्रमेय पदार्थों का, अपने ही अङ्गों के समान, विशुद्ध चिन्मात्ररूप में ही अनुभव करा लेता है।

समस्त आन्तर शक्तिचक्र स्पन्दमयी संवित् के साथ अभिन्न होने के कारण सतत् स्पन्दमय (नित्य चेतन) है।

महेश्वरानन्द ने वाणियों के मूल स्वरूप पर भी प्रकाश डाला है।

वाणियों का मूल स्वरूप

एता एव चिदानन्देच्छाज्ञानक्रियाख्याः शक्तयः परा सूक्ष्मा पश्यन्ती मध्यमा वैखरीति वाग्रूपाश्चानुभूयन्ते।[1]

विमर्शो बिन्दुनादौ च स्फोटः शब्दश्च वाक्क्रमः।[2]

पादुकोदय शास्त्रकार की दृष्टि—पादुकोदय में वाणी का चरणबद्ध (क्रमिक) विकास भी बताया गया है, जो इस प्रकार है—

१. वाणी परमेश्वर की विमर्श शक्ति का ही विविधात्मक रूपान्तरण है।

---

१. स्वोपज्ञ परिमल २. पादुकोदय

२. वाणी सृष्टि का मूलभूत चेतन तत्त्व है।
३. वाणी कुण्डलिनी शक्ति की अभिव्यक्ति है।
४. वाणी शब्दब्रह्म का रूपान्तरण है।
५. वाणी परमेश्वर के शक्तिपञ्चक का ध्वन्यात्मक अवतार है—

शक्तिपञ्चकात्मकत्वं स्वयमूहनीयम्।[1]
सृष्टिस्थितिप्रभृतिपञ्चकीभूतमखिलमत्रैवान्तर्भवति।[2]

शारदातिलककार की दृष्टि—आसीच्छक्तिततो नादः नादाद्बिन्दुसमुद्भवः।

शक्ति → नाद → बिन्दु।

सकल परमेश्वर (सच्चिदानन्द सकल परमेश्वर) → शक्ति → नाद → बिन्दु।

उपनिषदों की शब्दसम्बन्धिनी दृष्टि—शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।

गोरक्षनाथ की दृष्टि—शब्दहिं ताला सब्दहिं कूँची सब्दहिं सबद समाया।

१. भालनेत्र में १७ शक्तियाँ स्थित हैं—सप्तदश फालनेत्र इति (फाल = ललाट)।
२. (फाले) तद्गते नेत्रे सप्तदशशक्तयः। तच्च मूर्तिचक्रमित्याम्नायते (परिमल)।

मूर्च्छनान्मोहरूपात् समुच्छ्रयणरूपाद्वा मूर्तित्वम्।

३. भालनेत्र ही मूर्तिचक्र है। इस मूर्तिचक्र में प्रमाता परमेश्वर का वह्निरूप परम प्रकाश विद्यमान है।

पाँच शक्तियों की ऊर्जा को प्रवाहित करके सृष्टि-सञ्चालन करने में संलग्न शिव की १. प्रमाता २. प्रमाण एवं ३. प्रमेय—तीन प्रकार की उपासनायें हैं। महेश्वरानन्द कहते हैं—प्रमातृप्रमाणप्रमेयतया त्रैविध्येनोपास्तिप्रकारः।

१. जब अहन्ता का समुच्छ्राय होता है तब इदन्ता का न्यग्भाव होता है।
२. जब इदन्ता का समुच्छ्राय होता है तब अहन्ता का न्यग्भाव होता है।

१. मूर्च्छनान्मोहरूपत्वात्—मूर्तित्वम्।
२. समुच्छ्रयणरूपात्—मूर्तित्वम्।

(समुच्छ्राय = ऊँचाई। न्यग्भाव = नीच होने का भाव)

१. जब अहन्ता का समुच्छ्राय होता है तब इदन्ता का न्यग्भावरूप मोह होता है।
२. जब इदन्ता का समुच्छ्राय होता है तब अहन्ता का उक्तरूप मोह होता है।

(क) इसी प्रकार प्रमातृवह्निरूप परमप्रकाश का परभैरवसंवित् पर्यन्त उत्कर्ष होता है।
(ख) इसी तरह पाषाण आदि जड संवित् पर्यन्त न्यूनीभाव होता है। महती स्वातन्त्र्य शक्ति मूर्ति कहलाती है।

---

१. महेश्वरानन्द—स्वोपज्ञ परिमल · २. परिमल (३८)

कलायें संख्या में सत्रह हैं। अग्नि के दो पक्षों—बाह्य एवं आभ्यन्तर पक्षों—की दृष्टि से विचार करने पर १० कलायें एवं ७ शिखायें हैं—

धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विष्फुलिङ्गिनी।
सुश्रीः सुरूपा कपिला हव्यकव्यवहे कलाः।।
हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा।
बहुरूपाऽतिरक्ता च सप्त जिह्वा हविर्भुजः।।

इसी संख्या में १७ मूर्तिचक्र की शक्तियाँ भी हैं। ये पर्यालोच्यमान होने पर प्रमातृस्फुरणरूप में इस प्रकार हैं—

१. अभिमान	६. गमन	११. श्रवण
२. कर्तृत्व	७. उत्सर्जन	१२. स्पर्शन
३. अध्यवसाय	८. आनन्दितृत्व	१३. दर्शन
४. वचन	९. ज्ञान	१४. आस्वादन
५. आदान	१०. सङ्कल्पन	१५. आघ्राणन आदि।

इनमें अन्तःकरण एवं बहिष्करण उपाय के रूप में स्थित हैं।

ये मूर्तिशक्तियाँ सङ्कुचित प्रमाता में आस्वादन-भेदोपश्लेष द्वारा पशुत्व उत्पन्न करती हैं। ये ही शक्तियाँ असङ्कुचित एवं अत्यन्त स्वातन्त्र्यशक्ति के विजृम्भण के संरम्भारम्भक के रूप में प्रवर्तमान होने पर परमशिवीभाव के लक्षण से समलंकृत माङ्गल्य का उन्मीलन करती हैं।

प्रकाशानन्द चक्र के दो प्रकार हैं—(क) १२ एवं (ख) १६।

(क) वाम नेत्र से सम्बद्ध = १६ शक्तियाँ।

(ख) दक्षिण नेत्र से सम्बद्ध = १२ शक्तियाँ।

दक्षिण नेत्र प्रकाशचक्र है। प्रकाश ही प्रमाण है; क्योंकि 'प्रकाश्यतेऽनेन प्रमेयजातमिति प्रकाशः प्रमाणमित्यर्थो भवति'। यहाँ १२ शक्तियाँ हैं।

हंसमत के अनुसार प्रमाता भी महाप्रमाता की अपेक्षा रखने के कारण शक्ति-स्वरूप हैं। वे तत्त्वदृष्टि से यथाक्रम बुद्धिप्रधान वाक्, पाणि, पाद, पायु, उपस्थ = कर्मेन्द्रियाँ; मनःश्रेष्ठ—श्रोत्र, त्वक्, चक्षुः, रसना, घ्राण = ज्ञानेन्द्रियाँ; अहंकार तो सर्वत्र अनुस्यूत है; अतः उसकी पृथक् रूप में गणना नही की जाती।

प्रमाणरूपो भगवान् मार्त्तण्डो द्वादशधा प्रकाशते। (उपनिषद्)

वामं च नेत्रमानन्दचक्रम्।

आनन्द क्या है? आनन्दो नाम स्वात्मपरमेश्वरस्येदन्तया स्फुरत आ समन्तात् समृद्धि-स्वभावः प्रमेयवर्गोल्लासः।

यह सौम्य अंश है।

कलायें १६ हैं। वे वस्तुवृत्ति की दृष्टि से षोडश विकारस्वभावात्मक हैं। विकार क्या हैं? मन, कर्मेन्द्रियपञ्चक, ज्ञानेन्द्रियपञ्चक, भूतपञ्चक। इनमें शब्द-स्पर्श सभी वेद्य-विलासान्तर्गत हैं। शब्दादिक की स्थौल्यावस्था पञ्चमहाभूत है। मन के द्वारा बुद्धि एवं अहङ्कार में क्रोडीकार भाव है। पौराणिकों ने कहा भी है—

मन एव मनुष्याणां कारणं बन्धमोक्षयो:।
बन्धाय विषयासङ्गि मुक्त्यैनिर्विषयं मन:।।

१. मूर्तिप्रकाशानन्द चक्र वामेश्वर्यादि शक्तिपञ्चकात्मक है।

२. प्रमातृवह्निरूप मूर्तिचक्र सर्वोर्ध्ववर्तिनी एवं (सबके अविभागस्वभाव होने के कारण सर्वसाधारण रूप से) स्फुरित होने वाली व्योमवामेश्वरी की प्रधानता के निमित्त से खेचरी शक्ति द्वारा प्रवर्तित होती है।

३. खेचरी शक्ति प्रमातृस्फुरणतन्मयी है।

४. प्रमाणार्क (सूर्यरूप प्रमाण) रूप प्रकाशचक्र दिक्चरी एवं गोचरी—दोनों के मेलन से आरब्ध है; क्योंकि ये दोनों अन्तर्बहिरिन्द्रियोल्लासरूप हैं।

५. प्रमेय सोममय आनन्दचक्र तो भूचरी से अनुप्राणित है।

इसी चक्रत्रय से—इच्छा, ज्ञान एवं क्रिया से तीन शक्तियाँ हैं, ज्वलन तपन है, शशि बिन्दु हैं, भूर्भुव:स्व: व्याहृतियाँ हैं, प्राणोपान उदान वायु हैं; पृथिव्यन्त अन्तरिक्ष स्वर्ग स्थान हैं; सत्व-रजोगुण, तमोगुण—तीन नाड़ियाँ हैं; देवयान, पितृयान एवं महायान—ये तीन यान हैं; स्थूल सूक्ष्म एवं परम तीन अवस्थायें है; कुल, कौल एवं अकुल तीन विभाग हैं; मन्त्र, मुद्रा, निरीहा—ये तीन रहस्य हैं। इसी त्रित्वसमूह से जगत् क्रोडीकृत है—तमेकनेमिं त्रिवृतं षोडशारम् (श्रुति)।

पीठतत्त्व—महेश्वरानन्द कहते हैं कि शरीर को ही पीठ मानकर उसमें उपासना करनी चाहिये—एवं स्थूलं देहं पीठतयोपास्यमुपपाद्य सूक्ष्ममप्येवं विम्रष्टव्यम्।

इसी दृष्टि को केन्द्र में रखकर वृन्दचक्र की इस प्रकार पर्यालोचना की गई है—

प्रकटितपञ्चस्कन्धे चतुष्षष्टिर्भवन्ति वृन्दचक्रे।

वृन्दचक्र का स्वरूप

एवं स्थूलं देहं पीठतयोपास्यमुपपाद्य सूक्ष्ममप्येवं विम्रष्टव्यमित्युन्मीलयितुं वृन्दचक्रं पर्यालोचयति—

पअडिअपञ्चक्खन्धे चोसट्ठी होन्ति विन्दचक्कम्मि ।

(प्रकटितपञ्चस्कन्धे चतुष्पष्टिर्भवन्ति वृन्दचक्रे।)

इस शरीर के पञ्चस्कन्धात्मक वृन्दचक्र में चौंसठ कलायें हैं।

वृन्दानां चक्रं वृन्दचक्रम्। वृन्दश्च सन्दोहात्मा। तादृक्त्वं च तस्य स्वतः पुर्यष्ट-कमयतया ज्ञानसिद्धादिपञ्चकसमष्टिस्वभावत्वात्। तच्च प्रकटितपञ्चस्कन्धम्। ज्ञानसिद्धाः षोडश, मन्त्रसिद्धाश्चतुर्विंशतिः, मेलापसिद्धा द्वादश, शाक्तसिद्धा अष्टौ, शाम्भवसिद्धश्चतस्र इति भङ्ग्या पञ्चवाहक्रमानुगुण्यादुद्भावितपञ्चप्रकारम्। आहत्य चतुष्षष्टिर्वृन्दचक्रम्। तत्र श्रीकालसङ्कर्षण्यपरपर्याया रुद्ररौद्रेश्वरी पञ्चषष्टितमी सर्वानुवृत्तेति न पृथग् गण्यते। तच्च—

धाममुद्रावर्णकलासंविद्भावस्वभावतः ।
पाताऽनिकेतदृष्ट्या च वृन्दचक्रं प्रकाशितम् ।।

इति न्यायादष्टधा भवति। तत्र धामानि स्थानानि ज्ञानसिद्धादीनां क्रमात् कन्द-नाभिहृत्कण्ठभ्रूमध्यरूपाणि। मुद्राः करङ्किण्यादयः। यदुक्तम्—

करङ्किणी क्रोधनी च भैरवी लेलिहानिका ।
खेचरी चेति मुद्रायाः पञ्चात्मकतया स्थितिः ।। इति।

तथा श्रीविज्ञानभट्टारके—

करङ्किण्या क्रोधनया भैरव्या लेलिहानया ।
खेचर्या दृष्टिकाले च परा व्याप्तिः प्रकाशते ।। इति।

मुद्राणां बन्धप्रकारश्च तत्रैवोपपादितः। यथा—

मृद्वासने स्फिजैकेन हस्तपादं निराश्रयम् ।
विधाय तत्प्रसङ्गेन परा पूर्णा मतिर्भवेत् ।।
उपविश्यासने सम्यग् बाहू कृत्वार्धकुञ्चितौ ।
कक्षव्योम्नि मनः कुर्वन् शममायाति चिल्लयात् ।।
स्थूलरूपस्य भावस्य स्तब्धां दृष्टिं निपात्य च ।
अचिरेण निराधारं मनः कृत्वा शिवं व्रजेत् ।।
मध्यजिह्वे स्फारितास्ये मध्ये निक्षिप्य चेतनाम् ।।
होच्चारं मनसा कुर्वन् ततः शान्ते प्रलीयते ।
आसने शयने स्थित्वा निराधारं विचिन्तयेत् ।।
स्वं देहं मनसि क्षीणे क्षणात् क्षीणाशयो भवेत् ।। इति।

तत्त्ववृत्त्या तु करङ्किणी नाम स्वदेहेन्द्रियाख्यभेदविगलनप्रगल्भा मुद्रा। यथा श्रीचिद्गगनचन्द्रिकायाम्—

अन्तरम्ब! बहिरप्यमी करा ये तवाक्षतनवोऽङ्क एष यः ।
विग्रहो द्वितयमप्यतः परं चिन्नभो नयसि नः करङ्किणी ।। इति।

पृथिव्यादिप्रकृत्यन्तं तत्त्वसन्दोहमन्तःसञ्जिहीर्षालक्षणेन क्रोधेन स्वात्मरूपतां नयति क्रोधनी। यथा—

यत् प्रकृत्यवधि तत्त्वमण्डलं क्ष्मामुखं परिमितग्रहास्पदम् ।
क्रोधनी त्वमसि सञ्जिहीर्षया मन्त्रमूर्तिरिह तस्य जृम्भिका ।। इति।

अन्तर्बहिर्भावयौगपद्येन पूर्णसंवित्स्वभावा भैरवी। यथा—

ग्रन्थयो द्विषडुमे! यया धृता सा निरावरणचिन्नभःपदा ।
स्पन्दमूर्तिमृतभेदडम्बरा भैरवी त्वमसि विश्वमेलिनी ।। इति।

इयं च निमीलनोन्मीलनसमाधिद्वयसामरस्यौचित्यादस्माभिरत्यन्तमुपलाल्यते। यदाहुः—

अन्तर्लक्षो बहिर्दृष्टिर्निमेषोन्मेषवर्जितः ।
इयं सा भैरवी मुद्रा सर्वतन्त्रेषु गोपिता ।। इति।

यथा श्रीमहानयप्रकाशे—

महामेलापधर्मिण्यः कौण्डल्युन्मेषविग्रहाः ।
निरावरणचिद्व्योमधामस्था भान्ति नित्यशः ।।
आपूर्य स्वबलोद्रेकसमुत्थं भेदडम्बरम् ।
या स्थिता पूर्णविभवा निरावरणविग्रहा ।।
भैरवी सैव विख्याता मुद्रा सदसदुज्झिता ।
निस्तरङ्गविकासात्मसामरस्यैकपालिनी ।।
आसां मेलापसिद्धानां देवीनां मुद्रिता सदा ।
मु(द्रि?द्र)णेयं द्विधा भासमुद्रेयं भैरवात्मिका ।। इति।

यच्चोक्तमस्मद्गुरुभिर्मनोऽनुशासनस्तोत्रे—

स्तब्धदृष्टि बहिरर्थसंश्रयं निर्विकल्पमपि यत् तवासनम् ।
मुक्तपञ्जरशुकानुकारि तद् भैरवं वपुरुदारमाहर ।। इति।

मयाऽप्युक्तं श्रीपरास्तोत्रे—

आनन्दोदयलक्ष्मणोरकलुषैरुत्पक्ष्मणोरूष्मलै-
रक्ष्णोरुन्मिषितैः प्रताप्य पृथिवीमन्तःस्थलैकस्पृशः ।
पूर्णाहम्प्रथनोत्सवाय सुधियो यामूर्ध्वमध्यासते ।
सा काचित् त्वमचिन्त्यसिद्धिरचला मुद्रां महत्युच्यसे ।। इति।

पुर्यष्टकादिवासनासर्वस्वग्रासलालसा लेलिहाना। यथोक्तम्—

अष्टपुर्युदितबीजवासनासंहृतिप्रवणरश्मिपुञ्जया ।
लीढमात्रमुखभेदया त्वया भूयते जननि! लेलिहानया ।। इति।

वाच्यवाचकाद्यशेषविकल्पविक्षोभविलापिनी सौषुम्नसारणिसीमोलङ्घिनी स्वात्मसं-विदविभिन्नाकारा च खेचरी। यथा—

त्वं पराप्रभृतिवैखरान्तिमोल्लेखविस्तरविलापनोन्मुखी ।
देव्यनावरणशम्भुसद्मगा खेचरी भवसि चिद्विकासिनी ।।
वह्निसूर्यशशिधामघस्मरी कुण्डली तिडदिवोत्पतन्त्यसौ ।
शाम्भवं जननि! बिन्दुमध्वना मध्यमेन च मतासि खेचरी ।।

इति मुद्राविभागः

वर्णाः श्रीमच्छब्दराशिभैरवात्मानः। तत्र ज्ञानसिद्धाः षोडश स्वरमय्यः। मन्त्रसिद्धाः ककारादिमकारान्ता वर्गात्मकाः। मेलापकसिद्धाश्च षण्डस्वररूपाः। यकारादिहकारान्तस्वभावाः शाक्तसिद्धाः। अकारकलाकाराश्च शाम्भवसिद्धा इति। अकारकलाश्च बिन्द्वर्धचन्द्रनिरोधनादस्वभावाः। तत्र बिन्दुरशेषवाच्यावि-भिन्नप्रकाशात्मा चन्द्राकृतिरनुस्वारः। किञ्चिद्वाच्यप्राधान्यशान्तावर्धचन्द्रः, मण्डल-स्वभावादत्यन्तकौटिल्यव्यपायात्। ततोऽपि वेद्यकौटिल्यव्यपगमादृजुरेखारूपा निरोधिका। यदनया परिमितयोगिनां नादानुप्रवेशः, तद्वदपरिमितयोगिनां भेद-दशावेशश्च निरुध्यते। नादश्च स्वपरामर्शपरमार्थ इत्यकारकलारहस्यम्। श्रीपञ्च-पिण्डनाथस्था अकारादयश्च वर्णा ज्ञानसिद्धादीनां क्रमाद् भवन्ति। किञ्च, ज्ञान-सिद्धादयः क्रमाद् अकारकलामय्यः। शाम्भव्यस्तु तत्समष्टिरूपाः। यदस्माभिर-कारस्य पञ्चपिण्डस्य च द्वयोरैकात्म्यमेवाङ्गीक्रियते। यदुक्तं श्रीमहानयप्रकाशे—

अवर्णपञ्चपिण्डार्णरूपयोरद्वयी गतिः ।
यतस्तस्मादुच्यतेऽलं देवीनां तद्गतं वपुः ।। इति।

अनेन श्रीमहार्थत्रिकदर्शनयोरन्योन्यं नात्यन्तं भेदप्रथेति व्याख्यातम्। एवमोङ्कारे-ऽप्यनुसन्धेयम्। यदयमोड्याणपीठस्वभावो नादात्मा परमव्योमरूपः सृष्ट्यादि-प्रथात्रयोपसंहारप्रगल्भो जाग्रदाद्यवस्थात्रयाधिष्ठातृभूतब्रह्मविष्णुरुद्रात्माकारो-कारमकारात्मा सर्वाविभागप्रथामयनादलक्षणार्धमात्रानुप्राणनः प्रतिपादिततद्वर्ण-चतुष्टयसामरस्योन्मीलितो महारावबीजपर्यायो भवति। तथा श्रीमहानयप्रकाशे—

विसर्गस्थितिसंहारप्रथाग्रासैकतत्परः ।
निरुपाख्यमहादीप्तिसमुल्लसनतत्परः ।।
योऽध्युष्टकलनोद्रेकस्वभावः प्रणवाभिधः ।
पीठाभिधं तमेवाहं नमाम्यागमसिद्धये ।।

इति वर्णक्रमः

कला रौद्र्यादयः। तत्र रौद्री वामा अम्बिका ज्येष्ठेति क्रमाद् ज्ञानसिद्धादिभिरुपश्लिष्यन्ते। एतत्सामरस्यलक्षणाश्च शाम्भव्यः। यदुक्तं श्रीचिद्गगनचन्द्रिकायाम्—

> ज्ञानदीधितिषु रौद्र्युदेति ते मन्त्रदीधितिषु वामयोदितम् ।
> योगदीधितिषु जृम्भतेऽम्बिका ज्येष्ठयेत्थमधिशक्तिदीधिति ।।
> देव्यभेदितकलाचतुष्टयी शम्भुदीधितिषु दीप्यते स्वरः । इति।

अथ संवित्स्वभावः। तत्र ज्ञानं नाम सामान्यात्मिका प्राथमिकी प्रथा, यामालोनेत्याचक्षते। मन्त्रः पदार्थोदयसंरम्भात्मा परामर्शः। स एव स्वात्मविश्रान्तो मेलापः। तादृग्रूपस्य च वासनाशान्तिरूपः शाक्तः। विलीनसर्ववासनोपलेपस्य चास्य स्वात्मसंविन्मात्रतापारिशेष्यं शाम्भव इति।

अथ भावस्वभावः। पारमेश्वरो हि प्रकाशः प्रकृत्या प्रसन्नगम्भीरमनुत्तरङ्गमम्बुराशिमनुहरन्नविकल्पात्मैवान्तरस्वातन्त्र्यमयीमानन्दशक्तिमनुभवति। तस्य च तादृक्स्वभावानुप्रविष्टाः शक्तयः शाम्भव्यः। स एव यदा किञ्चित् कल्लोलनक्रियौन्मुख्यमवलम्बते, तदा शाक्तोल्लासः। तस्यैव किञ्चित् कल्लोलीभावे मेलापपरिस्फुरणम्। उपर्युपर्युद्रिक्तकल्लोलकल्पनायां मन्त्रोन्मेषः। चन्द्रोदयादेरिव कुतश्चित् प्रवृद्धिहेतोर्वेलोल्लङ्घनादिरुत्कूलः क्षोभकोलाहलो ज्ञानसिद्धोदय इति। ततश्च ज्ञानसिद्धाः प्रमेयांशतया पर्यालोचनीयाः। मन्त्रसिद्धाः प्रमाणमयत्वेन। मेलापसिद्धाः प्रमात्रात्मकतया। शाक्तसिद्धास्तदवच्छेदव्यपोहेन शुद्धप्रमातृतया। शाम्भवसिद्धाश्च पूर्णसंवित्स्वातन्त्र्यमयपरमशिवभट्टारकस्वरूपतयेति। अथ शाम्भव्यादीनां वामेश्यादितादात्म्यद्योतकः शाम्भवसिद्धासु वामेश्याः पात इत्यादिक्रमेण पञ्चवाहवृन्दचक्रयोरैकात्म्यानुसन्धानं पात इति पातप्रकारः। एवं सृष्ट्यादिक्रमेऽपि पातोऽनुसन्धेयः। यथोक्तं श्रीक्रमसिद्धौ—

> संवित्क्रममिमं देव! शृणु वक्ष्यामि सुन्दर ।
> सृष्टिं स्थितिं च संहारानाख्याभासास्वरूपकम् ।।
> ज्ञानं मन्त्रं च मेलापं शाक्तं शाम्भवसंयुतम् । इति।

यथा श्रीक्रमसद्भावे—

> ज्ञानं सृष्टिं विजानीयात् स्थितिर्मन्त्रः प्रकीर्तितः।
> संहारं तु महाकालमेलापं परमं विदुः।।
> अनाख्यं शक्तिरूपं तु भासाख्यं शम्भुरूपकम् ।
> पञ्चप्रकारमेतद्धि विज्ञेयं तत्त्वदर्शिभिः ।। इति।

अनिकेतो नाम ज्ञानसिद्धादीनां भावक्रमप्रातिलोम्यात् तत्तत्प्रमेयत्वादिविकल्प-

विक्षोभव्युदासेन परमप्रतिष्ठाभूमिप्राप्तिपारिशेष्यपरामर्श इत्यष्टधा विभागः। तत्र ज्ञानसिद्धानां षोडशविकारप्रथामय्यः। मन्त्रसिद्धाश्चान्तर्बहिरिन्द्रियपरिस्पन्दवासनास्वभावाः। इन्द्रियाणि च सर्वानुस्यूतमहङ्कारमुपादाय द्वादशोपलभ्यन्ते। तेषां च कदाचिदात्मस्वरूपादवरुह्य विषयावगाहनवैचित्र्यादन्यदा विषयेभ्यः प्रत्यावृत्त्य स्वात्मविश्रान्तिमात्रव्यापृतत्वाच्च प्रकारद्वयोपपत्त्या द्वैविध्यमस्ति। तन्निबन्धनश्च तद्वासनारूपाणामासां चतुर्विंशतितत्त्वोल्लासः। मेलापकसिद्धास्तु प्रमातृपरमार्था इत्युक्तम्। तत्र प्रमातृणामयं स्वभावो यज्ज्ञानसिद्धात्मकं प्रमेयजातं मन्त्रसिद्धात्मकप्रमाणद्वारा स्वात्मनि विश्रमयन्तीति। ततश्च प्रमाणभूतानामिन्द्रियाणामेव तत्र प्रवृत्त्यौल्बण्याद् द्वादशेन्द्रियमयं मेलापसिद्धाचक्रमित्यर्थो भवति। अथ शाक्तसिद्धाः। शक्तिश्च वासनामयी। सा च पुर्यष्टकविषयत्वादष्टधा भवति। पुर्यश्चाष्टौ बुद्धिरहङ्कारो मनः शब्दादिपञ्चकं चेति प्रसिद्धमिति तदनुप्राणनोऽयमेतच्चक्रविष्फारः। शाम्भव्यश्च नाम प्रलीनाशेषविश्ववासनस्य भगवतः शम्भुभट्टारकस्य तत्स्वरूपाविभिन्नाः शक्तयः। ताश्च तत्त्वदृष्टावम्बाज्येष्ठावामारौद्रीमय्य इति।

> इत्येनां गुरुमुखसम्प्रदायलब्ध्वा वाचालः शुक इव वृन्दचक्रचर्याम् ।
> पञ्चार्थक्रमपदवीरहस्यसंवित्सर्वस्वव्यतिकरगर्भिणीमवोचम् ॥

इत्थं स्वदेहमेव पीठनिकेतनतया स्थूलं वृन्दचक्रात्मना सूक्ष्मं पञ्चवाहस्वभावतया परं च पीठतया पर्यालोच्य, तस्य च त्रैविध्यस्य परमार्थं प्रमातृप्रमाणप्रमेयलक्षणैकमूर्तिप्रकाशानन्दचक्रैः परामृश्य तदुपरि वरिवसनीयां श्रीगुरुनाथपरम्परां तद्व्यतिरेकद्वारा प्रकाशयति—

ण हु मण्डले गुरूणं णिअमो णिअमाइलङ्घिणं जुत्तो ॥३८॥

(न खलु मण्डले गुरूणां नियमो नियमातिलङ्घिनां युक्तः ॥)

इसमें गुरुमण्डल- पंक्ति नहीं है; क्योंकि पंक्तिभेद से नियमातिक्रम होता है॥३८॥

अयमेव पीठस्य तत्प्रतिष्ठाप्याया देवतायाश्च भेदो यदन्योन्यमाधाराधेयभावेऽपि प्रथमस्य स्वतः स्फुरत्ताराहित्यमन्यस्याश्च स्वतः स्फुरत्स्वभावतया नित्यमौज्ज्वल्योत्कर्ष इति। तत्र पीठदेवतानां यः स्फुरत्तां प्रत्यौपाधिकत्वलक्षणो नियमः, स तु भगवतीं श्रीमङ्गलादेवीमारभ्य श्रीमहेश्वरानन्दपर्यन्तं पृथक् प्रथमानानां गुरुनाथानां मण्डलं पङ्क्तिस्तत्र न सम्भवति, यत एते प्रस्तुतं नियममतिलङ्घ्य वर्तन्ते। ततश्च पूर्णसंवित्स्वभावा श्रीगुरुपङ्क्तिरिति तात्पर्यार्थः। यत एते देशकालाद्यवच्छेदरूपं नियममतिलङ्घयन्ति, तत एषां बहुत्वम्। एतत् तत्त्ववृत्त्या न सङ्गच्छते, केवलं तत्तदुपाध्युपश्लेषवशादौपचारिकतयैवाङ्गीक्रियते। यथैकमेव वस्तु दर्पणसलिलतैलाद्याधारभेदात् तथा तथा प्रतिबिम्बति। बहुत्ववच्छरीराद्युप-

रागोऽपि न भेदप्रथामुपपादयति। यथोक्तं मयैव श्रीपादुकोदये—

तत्र यत् पूज्यमस्माकं शक्तीनां मण्डलं महत्।
स्वस्वभावात्मके शम्भौ तत् कृत्स्नं पर्यवस्यति ।।
सोऽपि देवे गुरौ स्वात्मन्यैकात्म्यमुपगच्छति।
स च स्वभावादेकः सन्ननेक इव भासते ।।
आरभ्य मङ्गलादीप्तिशिवानन्दादिकं क्रमम्।
अम्बानाथपदाध्यासात् पारम्पर्येण पूज्यते ।।
शक्तिः शिवो देवपाणिर्दक्षिणामूर्तिरित्यपि।
अन्यथा वा समाख्यातो लोके सोऽयमलौकिकः ।।
तत्तत्कालानुगुण्येन देवस्तैस्तैर्बुभुत्सुभिः।
तत्तत्पृथक्त्वमायाति कल्लोलैरवि भानुमान् ।।
वैचित्र्यं च शरीरादेस्तस्यैवेच्छाविजृम्भितम्।
तद्विकल्पेन नानात्वं ज्ञेयं तत्पादुकास्वपि ।। इति।

अतश्च तत्त्ववृत्त्या स्वात्माविभिन्नानुत्तरस्वभावनादशक्त्यात्मा विमर्श एव श्रीगुरुनाथ इत्युक्तं भवति। यथा श्रीमहानयप्रकाशे—

वस्तुतस्त्वस्वरोल्लासप्रथनोच्छूनतात्मकः।
यो विभाति महानादस्तमजं देशिकं श्रये ।। इति।

श्रीचिद्गगनचन्द्रिकायां च—

अस्वरोल्लसनबीजमग्रिमोच्छूनतावपुरपाकृतक्रमः।
नाद एष तव विश्वदेशिकः कोऽपि स स्मृतिविमर्श ईश्वरे ।। इति।

तस्य च तादृक्स्वरूपपरिज्ञानोपायतया श्रीपादुकायाः परिग्राह्यत्वम्, 'शैवीमुखमिहोच्यते' इत्युक्तत्वात्। सा च तादृश्येवाम्नायते। यथोपदिष्टमन्तर्विद्भिः—'परापरात्मनः स्वात्मनः परानन्दमयी स्वव्यतिरेकबलनोद्युक्ता परा शक्तिः पादुकेति गीयते' इति। तस्याश्च—

वागुरामूलवलये सूत्राद्याः कवलीकृताः।
तथा कुलार्णवज्ञानं पादुकायां प्रतिष्ठितम् ।।

इति स्थित्या प्रतिपादितसर्वार्थक्रमगर्भत्वमवर्जनीयम्। यथा श्रीपूर्वे—

क्रमसङ्कोचगुलिका तद्विकासैकमूलिका।
तत्तत्स्वरूपा वीरादिवीरान्ता पातु पादुका ।। इति।

एतच्च तत्प्रतिपादनमात्रोपक्षीणव्यापारे मदीये श्रीपादुकोदये तन्त्रे द्रष्टव्यम्।।३८।।

वृन्दचक्र—वृन्दों का चक्र। वृन्द = सन्दोह (स्वतः पुर्यष्टकमय एवं ज्ञानसिद्धादिपञ्चक समष्टिस्वभाव है)। यह पञ्चस्कन्धात्मक है।

सिद्धों की संख्या—

१. ज्ञानसिद्ध—१६ ३. मेलापसिद्ध—१२ ५. शाम्भवसिद्ध—०४
२. मन्त्रसिद्ध—२४ ४. शाक्तसिद्ध—०८

इस दृष्टि से पञ्चवाहक्रमानुगुण्य से पाँच प्रकार उद्भावित हैं। ६४ वृन्दचक्र हैं। श्रीकालसङ्कर्षिणी या रुद्ररौद्रेश्वरी ६५वीं (पञ्चषष्टितमी) सर्वानुवृत्त होने के कारण पृथक् रूप से उल्लिखित नहीं की जाती। इसी प्रसंग में निम्न कथन उल्लेख्य एवं ध्यातव्य है—

धाम-मुद्रा-वर्ण-कला-संविद्भावस्वभावतः ।
पाताऽनिकेतदृष्ट्या च वृन्दचक्रं प्रकाशितम्।।

इस दृष्टि से इनकी संख्या ८ है।

'धाम' स्थानवाचक है। ज्ञान-सिद्धादिक क्रम से कन्द-नाभि-हृदय-कण्ठ-भ्रूध्यस्वरूप हैं—ज्ञानसिद्धादीनां क्रमात् कन्दनाभिहृत्कण्ठभ्रूमध्यरूपाणि। (महेश्वरानन्द)

करङ्किणी आदि मुद्रायें ही मुद्रायें हैं—

करङ्किणी क्रोधनी च भैरवी लेलिहानिका।
खेचरी चेति मुद्रायाः पञ्चात्मकतया स्थितिः।।

विज्ञानभट्टारककार की दृष्टि—विज्ञानभट्टारक में कहा गया है—

करङ्किण्या क्रोधनया भैरव्या लेलिहानया।
खेचर्या दृष्टिकाले च परा व्याप्तिः प्रकाशते।।

मुद्राविज्ञान और उसका स्वरूप—मुद्रा-बन्ध के मुख्य प्रकार एवं उनका यथार्थ स्वरूप (रहस्य) क्या हैं?

विज्ञानभट्टारककार की दृष्टि—विज्ञानभट्टारक में कहा गया है—

मृद्वासने स्फिजैकेन हस्तपादं निराश्रयम्।
विधाय तत्प्रसङ्गेन परा पूर्णा मतिर्भवेत्।।
उपविश्यासने सम्यग् बाहू कृत्वार्धकुञ्चितौ।
कक्षव्योम्नि मनः कुर्वन् शममायाति चिल्लयात्।।
स्थूलरूपस्य भावस्य स्तब्धां दृष्टिं निपात्य च।

अचिरेण निराधारं मनः कृत्वा शिवं व्रजेत्।
मध्यजिह्वे स्फारितास्ये मध्ये निक्षिप्य चेतनाम्।।
होच्चारं मनसा कुर्वन् ततः शान्ते प्रलीयते।
आसने शयने स्थित्वा निराधारं विचिन्तयेत्।।
स्वं देहं मनसि क्षीणे क्षणात् क्षीणाशयो भवेत्।

तत्त्ववृत्ति से तो करङ्किणी मुद्रा का अर्थ दूसरा ही है—तत्त्ववृत्त्या तु करङ्किणी नाम स्वदेहेन्द्रियाख्यभेदविगलनप्रगल्भा मुद्रा। यह भेद को नष्ट करने वाली मुद्रा है।

चिद्गगनचन्द्रिकाकार की दृष्टि—

अन्तरम्ब! बहिरप्यमी करा ये तवाक्षतनवोऽङ्कः एष यः।
विग्रहो द्वितयमप्यतः परं चिन्नभो नयसि नः करङ्किणी।।

क्रोधनी मुद्रा का स्वरूप—पृथिवी आदि प्रकृत्यन्त तत्त्वसन्दोह को संजिहीर्षा लक्षण वाले क्रोध से स्वात्मरूपता में रूपान्तरित करने वाली मुद्रा ही क्रोधनी मुद्रा है—पृथिव्यादिप्रकृत्यन्तं तत्त्वसन्दोहमन्तःसंजिहीर्षालक्षणेन क्रोधेन स्वात्मरूपतां नयति क्रोधनी। कहा भी गया है—

यत्प्रकृत्यवधि तत्त्वमण्डलं क्ष्मामुखं परिमितग्रहास्पदम्।
क्रोधनी त्वमसि संजिहीर्षया मन्त्रमूर्तिरिह तस्य जृंभिका।।

भैरवी मुद्रा और उसका स्वरूप—अन्दर एवं बाहर दोनों ओर यौगपद्य, (एक साथ) जो पूर्णसंवित्स्वभावा है, वही भैरवी है—अन्तर्बहिर्भावयौगपद्येन पूर्णसंवित्स्व-भावा भैरवी (परिमल)। कहा भी गया है—

ग्रन्थयो द्विषडुमे! यया धृता सा निरावरणचिन्नभःपदा।
स्पन्दमूर्तिमृतभेदडम्बरा भैरवी त्वमसि विश्वमेलिनी।।

महेश्वरानन्द की व्याख्या—परिमल में महेश्वरानन्द भैरवी मुद्रा की स्वरूपव्याख्या करते हुये कहते हैं—इयं च निमीलनोन्मीलनसमाधिद्वयसामरस्यौचित्यादस्माभिरत्यन्त-मुपलाल्यते।

शास्त्रान्तर-दृष्टि—कहा गया है—

अन्तर्लक्षो बहिर्दृष्टिर्निमेषोन्मेषवर्जितः।
इयं सा भैरवी मुद्रा सर्वतन्त्रेषु गोपिता।।

श्रीमहानयप्रकाशकार की दृष्टि—महानयप्रकाश में कहा गया था—

महामेलापधर्मिण्यः कौण्डल्युन्मेषविग्रहाः।
निरावरणचिद्व्योमधामस्था भान्ति नित्यशः।।

आपूर्य स्वबलोद्रेकसमुत्थं भेदडम्बरम्।
या स्थिता पूर्णविभवा निरावरणविग्रहा।।
भैरवी सैव विख्याता मुद्रा सदसदुज्झिता।
निस्तरङ्गविकासात्मसामरस्यैकपालिनी ।।
आसां मेलापसिद्धानां देवीनां मुद्रिता सदा।
मुद्रिणेयं द्विधा भासमुद्रेयं भैरवात्मिका।।

अनुशासनस्तोत्रकार की दृष्टि—अनुशासनस्तोत्र में कहा गया है—

स्तब्धदृष्टि बहिरर्थसंश्रयं निर्विकल्पमपि यत् तवासनम्।
मुक्तपञ्जरशुकानुकारि तद् भैरवं वपुरुदारमाहर।।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द परास्तोत्र में कहते हैं—

आनन्दोदयलक्ष्मणोरकलुषैरुत्पक्ष्मणोरूष्मलै-
रक्ष्णोरुन्मिषितैः प्रताप्य पृथिवीमन्तःस्थलैकस्पृशः।
पूर्णाहम्प्रथनोत्सवाय सुधियो यामूर्ध्वमध्यासते
सा काचित् त्वमचिन्त्यसिद्धिरचला मुद्रा महत्युच्यसे।।

लेलिहाना मुद्रा और उसका स्वरूप—पुर्यष्टकादिवासनासर्वस्वग्रासलालसा लेलिहाना। कहा भी गया है—

अष्टपुर्युदितबीजवासनासंहतिप्रवणरश्मिपुञ्जया ।
लीढमात्रमुखभेदया त्वया भूयते जननि लेलिहानया।।

खेचरी मुद्रा और उसका स्वरूप—खेचरी मुद्रा का स्वरूप क्या है? महेश्वरानन्द कहते हैं—वाच्यवाचकाद्यशेषविकल्पविक्षोभविलापिनी सौषुम्नसारणिसीमोलङ्घिनी स्वात्मसंविद्विभिन्नाकारा च खेचरी।

शास्त्रान्तरकार की दृष्टि—

त्वं पराप्रभृति वैखरान्तिमोल्लेखविस्तरविलापनोन्मुखी।
देव्यनावरणशम्भुसद्मगा खेचरी भवसि चिद्विकासिनी।।
वह्निसूर्यशशिधामघस्मरी कुण्डली तडिदिवोत्पतन्त्यसौ।
शाम्भवं जननि! बिन्दुमध्वना मध्यमेन च मतासि खेचरी।।

वर्णक्रम—

१. वर्ण—वर्ण तो श्रीमत् शब्दराशि भैरव के ही रूप है—वर्णाः श्रीमच्छब्दराशिभैरवात्मानः। (परिमल)

२. ज्ञानसिद्ध—१६ स्वरात्मक हैं।

३. मन्त्रसिद्ध—ककारादि मकारान्त वर्ण वाले हैं।

४. मेलापक सिद्ध—ये षण्डस्वरूप हैं।

५. शाक्तसिद्ध—ये यकारादि हकारान्तस्वभाव हैं।

६. शाम्भवसिद्ध—ये अकार-लकाररूप हैं।

७. अकार और कला का स्वरूप—अकारकलाश्च बिन्द्वर्धचन्द्रनिरोधनादस्वभावा:।

शाम्भव सिद्ध के लक्षण

अकाराकार | कलाकार

(अकार + कला = अकारकलाश्च बिन्द्वर्धचन्द्रनिरोधनादस्वभावा:।)

(क) बिन्दु—बिन्दुरशेषवाच्या विभिन्नप्रकाशात्मा चन्द्राकृतिरनुस्वार:।

(ख) अर्धचन्द्र—किञ्चिद्वाच्यप्राधान्यशान्तावर्धचन्द्र:।

(ग) निरोधिका—ततोऽपि वेद्यकौटिल्यव्यपगमादृजुरेखारूपा निरोधिका। यदनया परिमितयोगिनां नादानुप्रवेश: तद्वदपरिमितयोगिनां भेददशावेशश्च निरुध्यते।

(घ) नाद—नादश्च स्वपरामर्शपरमार्थ इत्यकारकलारहस्यम्।

पञ्चपिण्डनाथस्थ अकारादि वर्ण ज्ञानसिद्धों में यथाक्रम होते हैं। ज्ञानसिद्ध आदि यथाक्रम अकार कलामय हैं। शाम्भव उनके समष्टिरूप हैं।

महानयप्रकाशकार की दृष्टि—

अवर्णपञ्चपिण्डार्णरूपयोरद्वयी गति:।
यतस्तस्मादुच्यतेऽलं देवीनां तद्गतं वपु:।।

सारांश यह कि महार्थमञ्जरीकार एवं त्रिक दर्शन की पारस्परिक दृष्टियों में अत्यधिक भेदप्रथा नहीं है। प्रणव पर विचार करें तो महानयप्रकाश के इस कथन पर ध्यान देना होगा—

विसर्गस्थितिसंहारप्रथाग्रासैकतत्पर: ।
निरुपाख्यमहादीप्तिसमुल्लसनतत्पर: ।।
योऽध्युष्टकलनोद्रेकस्वभाव: प्रणवाभिध:।
पीठाभिधं तमेवाहं नमाम्यागमसिद्धये।।

कलायें तो रौद्री आदि हैं। इनमें १. रौद्री २. वामा ३. अम्बिका एवं ४. ज्येष्ठा—ये यथाक्रम ज्ञानसिद्ध आदि से उपश्लिष्ट हैं। इनका सामरस्यलक्षण शाम्भव्य है।

चिद्गगनचन्द्रिकाकार की दृष्टि—इसमें कहा गया है—

ज्ञानदीधितिषु रौद्र्युदेति ते मन्त्रदीधितिषु वामयोदितम्।

योगदीधितिषु जृम्भतेऽम्बिका ज्येष्ठयेत्थमधिशक्तिदीधिति।
देव्यभेदितकलाचतुष्टयी शम्भुदीधितिषु दीप्यते स्वर:।।

संवित् स्वभाव—

१. ज्ञान = ज्ञानं नाम सामान्यात्मिका प्राथमिकी प्रथा, यामालोचनेत्याचक्षते।
२. मन्त्र = मन्त्र: पदार्थोदयसंरम्भात्मापरामर्श:।
३. मेलाप = स एव स्वात्मविश्रान्तो मेलाप:।
४. शाक्त = तादृग्रूपस्य च वासनाशान्तिरूप: शाक्त:।
५. शाम्भव = विलीनसर्ववासनोपलेपस्य चास्य स्वात्मसंविन्मात्रतापारिशेष्यं शाम्भव इति।

भावस्वभाव—पारमेश्वर प्रकाश प्रकृत्या प्रसन्न गंभीर, अनुत्तर, विकल्पात्मैव आन्तर स्वातन्त्र्यमयी आनन्दशक्ति का अनुभव करता है। उसकी तादृक् स्वभावानुप्रविष्ट शक्तियाँ शाम्भव्य हैं। वही जब थोड़ा कल्लोलन क्रिया के औन्मुख्य का अवलम्बन ग्रहण करती है तब वह 'शाक्तोल्लास' की आख्या प्राप्त करती है। उसी के थोड़ा कल्लोली-भाव होने पर मेलापपरिस्फुरण होता है। उपर्युक्त उद्रिक्त कल्लोल-कल्पना में मन्त्रोन्मेष है। ज्ञानसिद्ध प्रमेयांशतया पर्यालोचनीय हैं। मन्त्रसिद्ध प्रमाणमयत्वेन पर्यालोचनीय हैं। मेलापसिद्ध प्रमात्रात्मकतया पर्यालोचनीय हैं। शाक्तसिद्ध शुद्धप्रमातृतया पर्यालोचनीय हैं। शांभवसिद्ध पूर्णसंवित्स्वान्त्र्यमय परमशिवभट्टारक के स्वरूप में पर्यालोचनीय हैं।

श्रीक्रमसिद्धिकार की दृष्टि—उक्त ग्रन्थ में कहा गया है—

संवित्क्रममिमं देव! शृणु वक्ष्यामि सुन्दर।
सृष्टिं स्थितिं च संहारानाख्याभासास्वरूपकम्।
ज्ञानं मन्त्रं च मेलापं शाक्तं शाम्भवसंयुतम्।।

श्रीक्रमसद्भावकार की दृष्टि—

ज्ञानं सृष्टिं विजानीयात् स्थितिर्मन्त्र: प्रकीर्तित:।
संहारं तु महाकालमेलापं परमं विदु:।।
अनाख्यं शक्तिरूपं तु भासाख्यं शम्भुरूपकम्।
पञ्चप्रकारमेतद्धि विज्ञेयं तत्त्वदर्शिभि:।।

महेश्वरानन्द की दृष्टि—स्वात्मरूप गुरुनाथ सर्वत्र परिव्याप्त हैं। अत: उनकी कोई पृथक् पंक्ति नहीं है। गुरुपंक्ति ही पूर्ण संवित् स्वरूपा है, अखण्ड ज्ञानरूपिणी है और सर्वत्र व्याप्त है। गुरुपंक्ति पूर्ण संवित्स्वभावरूपा है; अत:—न खलु मण्डले गुरूणां नियमो नियमातिलंघिनां युक्त:। महेश्वरानन्द कहते हैं—

१. अपनी देह को पीठनिकेतन के रूप स्थूल पीठ,
२. वृन्द-चक्र के रूप में स्वीकार करके उसे सूक्ष्म पीठ,
३. एवं पञ्चवाहस्वभावात्मक मानकर उसे परम पीठ के रूप में पर्यालोचित करके

और उसके इस त्रिविधात्मक स्वरूप को (क) प्रमातृ (ख) प्रमाण एवं (ग) प्रमेय लक्षण वाला स्वीकार करके तथा मूर्ति प्रकाशा-नन्द चक्रों के रूप में परामृष्ट करके पीठ-परामर्श के प्राधान्य को स्वीकार किया गया है।

सारांश—

१. वृन्दों का चक्र ही अष्टपुरी वाली काया में वृन्दचक्र है।

२. ज्ञानसिद्ध आदि (ज्ञानसिद्ध, मन्त्रसिद्ध, मेलापसिद्ध, शाक्तसिद्ध, शाम्भव-सिद्ध) के लिये समष्टिरूप पञ्च स्कन्ध ही हैं।

३. ज्ञानसिद्ध १६, मन्त्रसिद्ध २४, मेलापसिद्ध १२, शाक्तसिद्ध ०८, शाम्भव-सिद्ध ०४ = ६४ वृन्दचक्र हैं।

४. ६५वीं रुद्ररौद्रेश्वरी शक्ति सर्वमयी होने के कारण पृथक् मानी जाती है।

५. धाम, मुद्रा, वर्ण, कला, संवित् रूप में वृन्दचक्र ही हैं।

६. वर्ण = शब्दराशिस्वरूप आत्मभैरव हैं।

७. ज्ञानसिद्ध १६ स्वर हैं (१६ स्वर वाले हैं)।

८. मन्त्रसिद्ध = क से म तक के वर्ण वाले हैं।

९. मेलापसिद्ध = खण्डस्वरूप हैं।

१०. शाक्तसिद्ध = यकार से हकारपर्यन्त हैं।

११. शांभव सिद्ध = अकार-कला स्वरूप वाले हैं।

१२. अकार-कला = बिन्दु + अर्धचन्द्र + निरोधिका के स्वरूप वाले हैं।

१३. ज्ञानसिद्ध आदि = अकार कलामय हैं।

१४. शाम्भव सिद्ध = उनका समष्टि रूप है।

१५. ज्ञान = संवित् स्वभाव वाला है।

१६. मन्त्र = पदार्थोदयसंरम्भात्मा परामर्श है।

१७. मेलाप = वही स्वात्मविश्रान्त मेलाप है।

मेलापसिद्धास्तु प्रमातृपरमार्थाः प्रमातॄणामयं स्वभावो यज्ज्ञानसिद्धात्मकं प्रमेयजातं मन्त्रसिद्धात्मकप्रमाणद्वारा स्वात्मनि विश्रमयन्ति।

१८. शाक्तसिद्ध = उसी रूप की वासना-शान्ति के स्वभाव वाला शाक्त सिद्ध है।

१९. शाम्भव सिद्ध = समस्त वासनाओं के विलयरूप स्वात्मसंविन्मात्र ही शांभव सिद्ध हैं।

२०. भावस्वभाव में पारमेश्वर प्रकाश परम स्वतन्त्र एवं पूर्णानन्दमय है।

२१. प्रकाशस्वरूप परम शिव की शक्तियाँ ही शाम्भव हैं।

२२. जब शिव का कल्लोल क्रियोन्मुख होता है तब शाक्तोल्लास होता है।

२३. उसके उद्रिक्त कल्लोल में मेलापसिद्ध का प्रकटीकरण होता है।

२४. कल्लोल-कल्पना में मन्त्रोन्मेष होता है।

२५. ज्ञान सिद्ध प्रमेय, मन्त्रसिद्ध प्रमाण, मेलापसिद्ध प्रमाता, शाक्तसिद्ध शुद्ध-प्रमाता एवं शाम्भव सिद्ध पूर्णसंवित्स्वातन्त्र्यमय के रूप में पर्यालोचनीय हैं।

२६. संवित् क्रम में सृष्टि-स्थिति-संहार-अनाख्य-भासा शक्ति पर्यालोचनीय है।

२७. ज्ञानसिद्ध शक्ति ही सृष्टि, मन्त्रसिद्ध स्थिति, मेलापसिद्ध संहार, शाक्तसिद्ध अनाख्य एवं शाम्भवसिद्ध भासा है।

२८. ज्ञानसिद्ध १६ विकारों से युक्त, मन्त्रसिद्ध बाह्यान्तर इन्द्रियस्पन्दवासना युक्त, मेलापसिद्ध प्रमातृ-परमार्थ स्वभाव का और शाक्तसिद्ध (शक्ति) वासनामय है।

२९. शक्ति (पुर्यष्टकानुरूप) ८ प्रकार की है।

३०. बुद्धि, अहंकार, मन, ५ तन्मात्रायें (विषय) अष्टपुरियाँ हैं।

३१. शाम्भव क्या है? अशेष विश्व वासना निमग्न शिव के स्वरूप से अभिन्न शक्तियाँ ही शाम्भव हैं।

३२. देहरूप पीठनिकेतनरूप में स्थूल, वृन्दचक्र के रूप में सूक्ष्म, पञ्चवाह स्व-भावयुक्त होने पर है। इस पीठ में श्रीमंगलादेवी से श्रीमहेश्वरानन्द-पर्यन्त पृथक् गुरुनाथों की पंक्ति नहीं है।

परमशिव के कृत्यों में शक्तियों की
अनुस्यूतता तथा उनकी संख्या

अथैवमुपपादितस्य स्वात्मरूपपरमशिवभट्टारकाविभिन्नस्य श्रीदेशिकनाथस्य स्वातन्त्र्यसंविच्छक्तिविजृम्भणस्वभावमसाधारणं कृत्यपञ्चकं प्रकटयितुं सर्वोत्तीर्णां भासां पृथग्वक्तव्यतयाऽवस्थाप्य प्रथमं सृष्ट्यादिचतुष्टयं स्पष्टयति—

सिट्ठीए दह कलाओ ठिईए दावीस होन्ति सत्तीओ ।
एक्कादह संहारे तेरह ताओ तुरीअपव्वम्मि ॥३९॥

(सृष्टौ दश कला: स्थितौ द्वाविंशतिर्भवन्ति शक्तय:।
एकादश संहारे त्रयोदश तास्तुरीयपर्वणि।।)

सृष्टि में दस कलायें (शक्तियाँ), स्थिति में बाईस, संहार में एकादश एवं तुरीय में त्रयोदश शक्तियाँ अवस्थित हैं।।३९।।

सृष्टिर्हि नामोद्योगावभासचर्वणात्मविलापननिस्तरङ्गत्वलक्षणप्रथापञ्चक-समष्टिरित्याम्नायते। सर्वेषामस्मदादीनामपि प्रमातॄणामेतत्प्रथापञ्चकाविनाभावः स्वयमूहनीयः। तथाहि—कुलालादयः स्वात्मसंविदैकात्म्यावस्थितं कुम्भादि भावं बहिः पृथक् कर्तुं प्रथममुद्युञ्जते। तमेव बहिर्दण्डचक्रचीवरादिना परिबर्हेणाव-भासयन्ति। अवभासितं च तमापाकाधिरोपणपाकप्रतिष्ठापनादिना पौनःपुन्येन स्वात्मीयतयाऽनुभवन्ति। तदनु तदर्थक्रियामात्रतात्पर्यात् तत्रौदासीन्यमवलम्बन्ते।

औदासीन्यमेव च तस्य विलापनम्। तदर्थक्रियास्मृतिप्रमोषे च तत्र निस्तरङ्गाः सम्पद्यन्ते। यतः कुम्भादिरेव तेषां कल्लोलतयोत्पद्यते। विलीयते च परमेश्वरे। पुनरेतत् प्रथापञ्चकं स्वात्मपरामर्शपावनीभूतमित्येतावानेव भेद इति प्रागप्यवोचाम। तत्र च सृष्टौ कलाः प्रथमप्रवृत्त्यौन्मुख्यशालिन्यः शक्तयो दश। ताश्च योनयस्तत्सिद्धाश्च। तेषां च तत्त्वदृष्टौ उद्योगादिकलापञ्चकात्मकत्वं तत्तत्कलावत्तया तथा तथा कर्तृस्वरूपत्वं च क्रमात् पर्यवस्यति। ताश्च क्रियाज्ञानेच्छोद्योगप्रतिभास्वभावसृष्टिस्थितिसंहारानाख्याभासास्वरूपतया निष्कृष्यन्ते। ततश्च सृष्ट्यादिपञ्चकृत्यान्तर्गतमखिलमपि वैचित्र्यमेकस्यां सृष्टावेव परिस्फुरतीत्युक्तं भवति। यथोक्तं श्रीक्रमसद्भावे—

तया व्याप्तमिदं विश्वं त्रैलोक्यं सचराचरम् । इति।

एवमन्यत्रापि चक्रे तद्व्यतिरिक्तचक्रस्वभावानुप्रवेशस्यावश्यम्भावित्वं केवलं 'प्रधानेन व्यपदेशा भवन्ति' इति नीत्या। तत्तदुद्रिक्तांशोपसंग्रहात् सृष्ट्यादीनां पृथग् व्यवस्था। यथा श्रीक्रमसिद्धौ—

दोहे व्याप्तं गवि क्षीरं स्तनाभ्यां प्रसृतं यथा ।
सर्वगा व्यापिनी सूक्ष्मा एकस्मिन् प्रसृता शिवा ।। इति।

अत एव श्रीमहानयप्रकाशे—

येयं तस्य निरौपम्यशरीरा दीप्तयस्तु ताः ।
नियतग्रहसंस्थानं निधानाय समुत्थिताः ।।
ता एव गदिताः पञ्च योनयः परधामगाः ।
नियतग्रहसंस्थानकल्पनापरिवर्जिताः ।।

इत्यादौ नियतग्रहसंस्थानोद्युक्तत्वं तद्विवर्जितत्वं चोच्यते। श्रीक्रमसद्भावेऽपि—

शृणु मे परमां कालीं विद्यां सृष्टिस्वभावगाम् ।

इत्यादि। एतदुपरिष्टादप्यासूत्रयिष्यते। इत्थमेकैककृत्यविषयेऽपि परमेश्वरस्य पञ्चकृत्यप्रवृत्त्योन्मुख्यमस्तीत्युक्तं भवति। यथा श्रीमहानयप्रकाशे—

इत्थमेकैव पञ्चात्मरूपेण स्फुरति स्वतः ।
स्वभावं प्रकटीकर्तुं या देवी तामहं श्रये ।। इति,

आसां मध्यात्तु देवीनां यदैका स्फुरति स्वतः ।
सर्वास्तदैव सततं सामरस्येन भान्त्यलम् ।। इति च।

श्रीचिद्गगनचन्द्रिकायां च—

पञ्चसु स्फुरति देवि! वृत्तिषु त्वन्मयीषु यदि काचन स्वतः ।
शश्वदाशु निखिलास्तदैव ताः सामरस्यमधिरुह्य भान्त्यमूः ।। इति।

यथा च श्रीशिवदृष्टौ—

यदेकतरनिर्माणे कार्यं जातु न जायते ।
तस्मात् सर्वपदार्थानां सामरस्यं व्यवस्थितम् ।। इति।

अथ स्थितिक्रममाह—स्थितौ द्वाविंशतिर्भवन्ति शक्तय इति। स्थितिर्हि नाम सृष्टानां पदार्थानां यावत्सञ्जिहीर्षोदयमवैयाकुल्येनावस्थानम्। यदुक्तम्—

स्थितिर्नाम स्वरूपस्य तत्तद्रूपतया धृतिः । इति।

शक्तयश्च ताः शिरश्चक्रे युगनाथाश्चत्वारः, तद्देव्यश्चतस्र इत्यष्टौ। हृदयषट्कोणे साधिकारनिरधिकारविभागेन राजपुत्राणां द्विषट्कम्। तन्मध्ये कुलेश्वरः कुलेश्वरीति द्वाविंशतिः। तत्र पीठान्योड्याणजालन्धरपूर्णगिरिकामरूपरूपाणि चत्वार्यधिष्ठाय युगानां कलिद्वापरत्रेताकृतात्मनां क्रमेण नाथभूता जाग्रत्स्वप्नसुषुप्तितुर्यावस्था-क्रान्तस्य विश्वस्य स्थापनार्थमकारोकारमकारनादात्मकप्रणवकलाचतुष्कमन्त्रो-पबृंहितैश्वर्याः, कर्ता ज्ञाता व्यवसिता चे(ति)ता चेति क्रमेण परमकर्तृस्फुरत्तानु-प्राणनाश्चत्वारः कर्तृविशेषा युगनाथा इत्युच्यन्ते। तद्देव्यश्च—

शृणोति शब्दमोलम्बे प्रेक्षते पुष्करद्वये।
करालम्बेऽभिधत्ते च सह्ये जिघ्रति गन्धवत्।।
मातङ्गे तु महापीठे व्याप्नोत्यखिलमीश्वरी।

इति नीत्या तत्तत्पीठावस्थाद्यैश्वर्यरूपाः क्रिया ज्ञप्तिर्व्यवसितिश्चिच्छक्तिश्चेति तत्त्ववृत्त्योपास्यन्ते। राजपुत्राश्च—

जगतो रञ्जनाद् राजा साक्षाद् देवो महेश्वरः।
तत्पुत्रा राजपुत्राः स्युः.................. ।।

इति श्रीपादुकोदयस्थित्या तानि तानीन्द्रियाण्युच्यन्ते। यथा च श्रीचिद्गगनचन्द्रिकायाम्—

राजनात् प्रकृतिरञ्जनाच्च मां राजसंज्ञमनुबोधकर्मणोः ।
षट् त्वया पृथगमी प्रवर्तकाः पुत्रभावमधिरोपिताः शिवे ।। इति।

तत्र साधिकारत्वं कर्मप्राधान्यात्, 'कर्मण्यैश्वर्यमधिकारः' इत्युक्तत्वात्। निरधिकारत्वं च तद्विपर्ययेण ज्ञानोद्रेकात्। अतश्च बुद्धिर्वागादीनि कर्मेन्द्रियाणि च साधिकाराः। मनःश्रोत्रप्रभृतीनि ज्ञानेन्द्रियाणि निरधिकारा राजपुत्राः। कुलेश्वरो-ऽहङ्कारः। तस्याभिमानशक्तिः कुलेश्वरीति तत्त्वार्थपर्यालोचनम्।

अथ संहारप्रकारमाह—एकादश संहार इति। संहारो नाम बहिरुद्भ्रान्तानां भावानां पारमेश्वरे प्रकाशे पुनःप्रसूत्यौचित्येन वटधानादिनीत्या वासनात्मतयाऽवस्थानम्। तत्र शक्तय एकादश। ताश्च सर्वान्तःकरणसमष्टिभूतमहङ्कारं बाह्येन्द्रियदशकं च भक्षयन्त्यः स्फुरन्तीत्येकादशाऽभूवन्निति तत्त्वनिश्चयः। तत्र तादृगहङ्कार एव प्रमाता, तद्व्यतिरेकेण परिमितस्य तस्यानुपलम्भात्। इन्द्रियाणि प्रमाणानि। तद्ग्राह्यं च प्रमेयमिति प्रमात्रादित्रिकमयं प्रमेयमन्तश्चर्वयन्त्यः कलाः संहर्त्र्य इत्युक्तं भवति। एतच्छक्त्युपश्लेषावच्छेदाच्च परमेश्वरस्यैकादशरुद्रत्व-प्रसिद्धिः।

अथाऽनाख्याक्रमं प्रख्यापयति—त्रयोदश तास्तुरीयपर्वणीति। तुर्यमनाख्या-चक्रम्। तद्रूपे पर्वण्यवस्थाविशेषे। अनाख्यमित्याख्याशून्यत्वमुच्यते। आख्या च पश्यन्त्यादिस्थूलवाक्त्रितयस्वभावा। यथोक्तं श्रीचिद्गगनचन्द्रिकायाम्—

नादबिन्दुलिपिविग्रहा गिरस्तिस्त्र ऊर्ध्वगविमर्शशीकराः ।
संहृतिस्थितिविसृष्टिधामसु व्यापृतास्त्वदध ईशवल्लभे ।। इति।

तच्च तत्त्वदृष्ट्या संहृतानां प्रमात्रादीनां संहर्तृस्वभावसंविदग्निमात्रपारिशेष्य-स्वरूपतया निश्चीयते। तच्च—

उद्योगमयमालस्यं प्रकाशैकात्मकं तमः ।
अशून्यं शून्यकल्पं च तत्त्वं किमपि शाम्भवम् ।।

इति संविदुल्लासन्यायादशून्यमपि शून्यमयी काचित् कक्ष्येवावभासते। अत एव हि तुरीयपर्वणीत्युक्तम्। यत एतत्प्रकाशेऽप्यविक्लवेन योगिना किमप्यन्त-र्विम्रष्टव्यं यदलौकिकस्फुरत्तात्मकभासानुभवसौख्यसम्पद्विजृम्भात्मकतया पर्य-वस्यति। यदुक्तं श्रीस्पन्दे—

तदा तस्मिन् महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ।। इति।

तत्र च यद्यपि मुख्यया वृत्त्या शक्तिकल्पनमेवमेतावत्तयेति वा नोपपद्यते, तथाप्युपचारादागमेषु तथाम्नायते। यदुक्तं स्तोत्रभट्टारके—

अकथ्यं वा त्रयातीतमुपचारेण गीयते । इति।

तत्र च ताः शक्तयस्त्रयोदश। ता इति। या स्त्रष्ट्र्यः स्थापयित्र्यः संहर्त्र्यश्च तास्तादात्विकावस्थायां संहर्तृमात्रपारिशेष्येऽप्युद्भविष्यद्वेद्यवैचित्र्यापेक्षया किञ्चिदन्तःकन्दवदवतिष्ठमाना द्वादशेन्द्रियतत्समष्ट्यात्मना त्रयोदश सम्भवन्ति। ताश्च 'इहैकैकत्र सृष्ट्यादौ चक्ररूपता विद्यते' इति श्रीक्रमकेलिक्लृप्त्या सृष्टि-सृष्टिः, सृष्टिस्थितिः, सृष्टिसंहारः, सृष्टितुरीयम्; स्थितिसृष्टिः, स्थितिस्थितिः,

स्थितिसंहारः, स्थितितुरीयम्; संहारसृष्टिः, संहारस्थितिः, संहारसंहारः, संहार-तुरीयम् इति द्वादशानामिन्द्रियस्फुरत्तानाम्—

अनाख्याभासयोरत्र नोपदिष्टः पृथङ्मनुः ।

इति स्थित्या सर्वानुस्यूतया तुरीयसम्मिलितया भासाभट्टारिकया त्रयोदशी-भूतानां परिस्पन्दतयाऽध्यवसीयन्ते। यथा श्रीमहानयप्रकाशे—

आसां द्विषट्कदेवीनां वमनग्रासतत्पराम् ।
देवीं त्रयोदशीं वन्दे तादात्म्यप्रतिपत्तये ।। इति।

एताश्च सृष्टिकाल्यादिव्यपदेशेन स्तोत्रभट्टारकावुद्घाट्यन्त इति त्रयोदश-संविधानोपनिषत्।।३९।।

सृष्टि क्या है? महेश्वरानन्द कहते हैं—सृष्टिर्हि नामोद्योगावभासचर्वणात्मविलापन-निस्तरङ्गत्वलक्षणप्रथापञ्चकसमष्टिरित्याम्नायते।

परमेश्वर शिव की स्वतन्त्र संविच्छक्ति के स्वभावगत पाँच कृत्यों में से सृष्टि आदि चार कृत्यों का ही इस गाथा में उल्लेख किया गया है। इसमें भासा कृत्य अनुल्लिखित है। सृष्टि में १० कलायें (शक्तियाँ) हैं तो स्थिति में २२, संहार में ११ एवं तुरीय में १३ शक्तियाँ हैं।

सृष्टिकृत्य में परम कालीविद्या ही सृष्टिस्वभावा है। परमेश्वर के सृष्टिकार्य में प्रथम प्रवृत्ति को उन्मुख करने वाली १० शक्तियाँ हैं। ये उद्योग, अवभास, चर्वण, आत्मविलापन एवं निस्तरङ्गस्वभाव वाली हैं।

प्रथापञ्चक—

१. उद्योग ३. चर्वण ५. निस्तरंगस्वभाव
२. अवभास ४. आत्मविलापन

ये परमेश्वर के कर्तृत्वस्वभाव को प्रकट करती हैं।

१० शक्तियाँ (सृष्टिकृत्य में १० शक्तियाँ)—

१. क्रिया ३. इच्छा ५. प्रतिभा ७. स्थिति ९. अनाख्या
२. ज्ञान ४. उद्योग ६. सृष्टि ८. संहार १०. भासा

स्थितिकृत्य में २२ शक्तियाँ अवस्थित हैं। स्थिति है क्या? सृष्ट पदार्थों का उसी रूप में संहारपर्यन्त अवधारण किये रहना स्थिति है—स्थितिर्नाम स्वरूपस्य तत्तद्रूपतया धृतिः। ताश्च क्रियाज्ञानेच्छोद्योगप्रतिभास्वभावसृष्टिस्थितिसंहारानाख्याभासास्वरूपतया निष्कृ-ष्यन्ते।

इन्हीं के अन्तर्गत जगत् का सम्पूर्ण वैचित्र्य-विलास है।

श्रीक्रमसद्भाव में कहा भी गया है—

तया व्याप्तमिदं विश्वं त्रैलोक्यं सचराचरम्।

श्रीक्रमसिद्धिकार की दृष्टि—श्रीक्रमसिद्धि में कहा गया है—

दोहे व्याप्तं गवि क्षीरं स्तनाभ्यां प्रसृतं यथा।
सर्वगा व्यापिनी सूक्ष्मा एकस्मिन् प्रसृता शिवा।।

श्रीमहानयप्रकाशकार की दृष्टि—श्रीमहानयप्रकाश में कहा गया है—

येयं तस्य निरौपम्यशरीरा दीप्तयस्तु ताः।
नियतग्रहसंस्थानं निधाना समुत्थिताः।।
ता एव गदिताः पञ्च योनयः परधामगाः।
नियतग्रहसंस्थानकल्पनापरिवर्जिताः ।।

श्रीक्रमसद्भाव में कहा गया है कि भगवती काली तो सृष्टिस्वभावा हैं—

शृणु मे परमां कालीं विद्यां सृष्टिस्वभावगाम्।

इस प्रकार प्रत्येक कृत्य के विषय में भी परमेश्वर का पञ्चकृत्यप्रवृत्त्यौन्मुख्य है।

महानयप्रकाश की दृष्टि—महानयप्रकाश में कहा गया है—

इत्थमेकैव पञ्चात्मरूपेण स्फुरति स्वतः।
स्वभावं प्रकटीकर्तुं या देवीं तामहं श्रये।।
आसां मध्यात्तु देवीनां यदैका स्फुरति स्वतः।
सर्वास्तदैव सततं सामरस्येन भान्त्यलम्।

श्रीचिद्गगनचन्द्रिकाकार की दृष्टि—

पञ्चसु स्फुरति देवि! वृत्तिषु त्वन्मयीषु यदि काचन स्वतः।
शश्वदाशु निखिलास्तदैव ताः सामरस्यमधिरुह्य भान्त्यमूः।।

शिवदृष्टिकार की दृष्टि—शिवदृष्टि में आचार्य वसुगुप्त कहते हैं—

यदेकतरनिर्माणे कार्यं जातु न जायते।
तस्मात् सर्वपदार्थानां सामरस्यं व्यवस्थितम्।।

स्थितिक्रम—स्थितिक्रम में १२ शक्तियों की भूमिकायें रहती हैं। स्थिति किसे कहते हैं? महेश्वरानन्द कहते हैं कि स्थितिर्हि नाम सृष्टानां पदार्थानां यावत्संजिहीर्षोदयमयैवाकुल्येनावस्थानम्। कहा भी गया है—

स्थितिर्नाम स्वरूपस्य तत्तद्रूपतया धृतिः।

स्थितिचक्र में युगनाथरूप चार शक्तियाँ हैं अर्थात् चार देवियाँ हैं। साधिकार एवं निरधिकार विभाग से राजपुत्र १२ हैं। हृदय में कुलेश्वर एवं कुलेश्वरी हैं। युगनाथ उड्याण

पीठ, जालन्धर पीठ, पूर्णगिरिपीठ एवं कामरूपपीठ में अधिष्ठित हैं। शक्तियाँ शिरश्चक्र में हैं और युगनाथ एवं उनकी शक्तियों के चार-चार होने से उनकी शक्तियाँ ०८ हैं।

इन्द्रियों की १२ स्फुरत्तायें—

१. सृष्टि-सृष्टि	५. स्थिति-सृष्टि	९. संहार-सृष्टि
२. सृष्टि-स्थिति	६. स्थिति-स्थिति	१०. संहार-स्थिति
३. सृष्टि-संहार	७. स्थिति-संहार	११. संहार-संहार
४. सृष्टिस्तुरीय	८. स्थिति-तुरीय	१२. संहार-तुरीय

सर्वानुस्यूत भासा शक्ति ही त्रयोदशी शक्ति है।

कुलेश्वर ही अहंकार है। उसकी अभिमान शक्ति ही कुलेश्वरी है। संहार की ११ शक्तियाँ हैं। ये शक्तियाँ समस्त अन्तः-करण समष्टिरूप अहंकार एवं बाह्य १० इन्द्रियों को कवलित करती हुई स्फुरित होती हैं। अहंकार ही प्रमाता है। यही एकादश रुद्रत्व की मान्यता है। यही एकादश रूप में तत्त्वनिश्चय है।

अनाख्य क्रम को लें। अनाख्य क्रम में १३ शक्तियाँ हैं। यह अनाख्य चक्र ही तुरीय चक्र है; क्योंकि यह शक्ति आख्याशून्य है। इसीलिये इसे अनाख्या भी कहा गया है। आख्या पश्यन्ती आदि स्थूल वाक्त्रयोपेता है।

तुरीय शून्यमयी कक्षा है। यह अकथ्य शक्ति है।

पीठचतुष्टय में अखिलेश्वरी परमेश्वरी महादेवी ही व्याप्त हैं।

महेश्वर को राजा इसलिये कहा गया है; क्योंकि वे जगत् का रञ्जन करते हैं।

साधिकार क्रम से प्रवृत्त = बुद्धि। ५ कर्मेन्द्रियाँ।	निराधार क्रम से प्रवृत्त = मन। ५ ज्ञानेन्द्रियाँ।

साधिकार-निरधिकार भेद से राजपुत्र १२ हैं।

कुलेश्वर-कुलेश्वरी हृदय में स्थित हैं।

युगनाथ

१. पीठचतुष्टय में युगनाथ अधिष्ठित हैं।

२. युगानुसार (कलियुग आदि के अनुसार) नाथरूप में स्थित हैं।

३. स्वप्नादिक अवस्थाओं से समाक्रान्त विश्व की स्थापना में—अकार-उकार-मकार-नाद-प्रणवकलारूप मन्त्र के द्वारा ऐश्वर्यरूप तथा

४. कर्ता, ज्ञाता, व्यवसिता, चेतिता के क्रम से परम कर्तृस्फुरत्ता से अनुप्राणित रूप से विद्यमान है।

पीठानि = पीठान्योड्याणजालन्धरपूर्णगिरिकामरूपरूपाणि चत्वारि।

उड्याण। जालन्धर। पूर्णगिरि। कामरूप।

युगनाथ—परमकर्तृस्फुरत्तानुप्राणनाश्चत्वारः कर्तृविशेषा युगनाथा इत्युच्यन्ते।

उनकी देवियाँ—

> श्रृणोति शब्दमोलम्बे प्रेक्षते पुष्करद्वये।
> करालम्बेऽभिधत्ते च सह्ये जिघ्रति गन्धवत्।
> मातङ्गे तु महापीठे व्याप्नोत्यखिलमीश्वरी।।

पीठावस्थायें ऐश्वर्यरूपा हैं।

राजपुत्र की सार्थकता क्या है? पादुकोदय के अनुसार—

> जगतो रञ्जनाद् राजा साक्षाद् देवो महेश्वरः।
> तत्पुत्रा राजपुत्राः स्युः...।।

ये इन्द्रियाँ हैं।

श्रीचिद्गगनचन्द्रिकाकार की दृष्टि—ग्रन्थकार का कथन है—

> राजनात् प्रकृतिरञ्जनाच्च मां राजसंज्ञमनुबोधकर्मणोः।
> षट् त्वया पृथगमी प्रवर्तकाः पुत्रभावमधिरोपिताः शिवे।।

साधिकारत्व क्यों? कर्मप्राधान्य के कारण। निरधिकारत्व क्यों? ज्ञानोद्रेक-प्राधान्य के कारण। साधिकार कौन है? बुद्धिर्वागादीनि कर्मेन्द्रियाणि साधिकाराः (परिमल)। निरधिकार कौन है? मनःश्रोत्रप्रभृतीनि ज्ञानेन्द्रियाणि निरधिकारा राजपुत्राः (परिमल)। कुलेश्वर = कुलेश्वरोऽहङ्कारः (परिमल)। कुलेश्वरी = तस्याभिमानशक्तिः कुलेश्वरीति।

संहार किसे कहते हैं? महेश्वरानन्द कहते हैं—संहारो नाम बहिरुद्वान्तानां भावानां परमेश्वरे प्रकाशे पुनःप्रसूत्यौचित्येन वटधानादिनीत्या वासनात्मतयाऽवस्थानम्।

संहार में ११ शक्तियाँ हैं। ये शक्तियाँ अन्तःकरणसमष्टिभूत अहङ्कार, १० बाह्येन्द्रियों को कवलित करके स्फुरित होती हुई ११ हो जाती हैं।

अहङ्कार ही प्रमाता है। तत्र तादृगहङ्कार एव प्रमाता; क्योंकि तद्व्यतिरेकेण परिमितस्य तस्यानुपलम्भात्। प्रमाता = अहङ्कार है। प्रमाण क्या है? इन्द्रियाणि प्रमाणानि। प्रमेय क्या है? इन्द्रियग्राह्य पदार्थ ही प्रमेय हैं—तद् ग्राह्यं च प्रमेयमिति।

संहर्त्री कौन है? प्रमात्रादित्रिकमयं प्रमेयमन्तश्चर्वयन्त्यः कलाः संहर्त्य इत्युक्तं भवति (परिमल)। प्रमात्रादित्रिक (प्रमा, प्रमाण, प्रमेय आदि) को कवलित करने वाली कला या शक्ति को ही संहर्त्री कहा गया है।

अनाख्याक्रम—तुर्यमनाख्याचक्रम्। आख्या च पश्यन्त्यादि स्थूलवाक्त्रितयस्वभावा।

चिद्गगनचन्द्रिकाकार की दृष्टि—चिद्गगनचन्द्रिका में कहा गया है—

नादबिन्दुलिपिविग्रहा गिरस्तिस्र ऊर्ध्वगविमर्शशीकरा:।
संहृति-स्थिति-विसृष्टि-धामसु व्यापृतास्त्वदध ईशवल्लभे।।

संहृति-क्रम—तत्त्वदृष्ट्या संहृतानां प्रमात्रादीनां संहर्तृस्वभावसंविदग्निमात्रपारिशेष्य-स्वरूपतया निश्चीयते।

संविदुल्लासकार की दृष्टि—

उद्योगमयमालस्यं प्रकाशैकात्मकं तम:।
अशून्यं शून्यकल्पं च तत्त्वं किमपि शाम्भवम्।।

शून्यमयी कक्षा में स्थित कोई शून्यतत्त्व भी है क्या?

स्पन्दकारिकाकार की दृष्टि—स्पन्दकारिका में कहा गया है कि कोई अन्तर्विम्रष्टव्य तत्त्व अवश्य है, जो अलौकिक स्फुरत्ता से युक्त है—

तदा तस्मिन् महाव्योम्नि प्रलीनशशिभास्करे।
सौषुप्तपदवन्मूढ: प्रबुद्ध: स्यादनावृत:।।

स्तोत्रभट्टारक में कहा गया है—

अकथ्यं वा त्रयातीतमुपचारेण गीयते।

वहाँ मुख्य वृत्ति से शक्तिकल्पना उचित नहीं है तथापि उपचार से समीचीन है। ये शक्तियाँ १३ हैं। सृष्टि-विधायिका, स्थापयित्री एवं संहर्त्री शक्तियाँ ही १३ हो जाती हैं।

सृष्टि-सृष्टि, सृष्टि-स्थिति, सृष्टि-संहार, सृष्टि-तुरीय, स्थिति-सृष्टि, स्थिति-स्थिति, स्थिति-संहार, स्थिति-तुरीय, संहार-सृष्टि, संहार-स्थिति, संहार-संहार एवं संहार-तुरीय में अनाख्या एवं भासा का नामोल्लेख नहीं किया गया है। उक्त १२ इन्द्रिय-स्फुरत्ताओं में—

अनाख्याभासयोरत्र नोपदिष्ट: पृथङ्मनु:।

कारण क्या है? कारण है—उन शक्तियों की सर्वानुस्यूतता—सर्वानुस्यूतया तुरीय-सम्मिलितया भासाभट्टारिकया त्रयोदशीभूतानां परिस्पन्दतयाऽध्यवसीयन्ते।

महानयप्रकाशकार की दृष्टि—महानयप्रकाश में कहा गया है—

आसां द्विषट्कदेवीनां वमनग्रासतत्परम्।
देवीं त्रयोदशीं वन्दे तादात्म्यप्रतिपत्तये।।

इस समस्त प्रकरण का पूर्ण उद्घाटन स्तोत्रभट्टारक में बहुत अच्छी तरह किया गया है।

भासा है क्या? महेश्वरानन्द कहते हैं—भासा नाम सृष्ट्यादिकृत्याक्रान्तविश्ववैचित्र्य-

व्यवहारगर्भिणी सर्वोत्तीर्णा, सर्वानुग्राहिणी च पारमेश्वरी चिच्छक्तिः, या तदीयं स्वातन्त्र्यं स एवेत्यध्यवसीयते।[1]

पादुकोदय के अनुसार—

१. भासा च नाम प्रतिभा महती सर्वगर्भिणी।

२. स्वस्वभावशिवैकात्मदेशिकात्मकचिन्मयी।

३. यस्यां हि भित्तिभूतायां मातृमेयात्मकं जगत्।
प्रतिबिम्बतया भाति नगरादीव दर्पणे।।

४. स्वातन्त्र्यरूपा सा काचिच्चिच्छक्तिः परमेष्ठिनः।

५. तन्मयो भगवान् देवो गुरुर्गुरुमयी च सा।

स्थितिक्रम क्या है? स्थितिक्रम में २२ शक्तियाँ होती हैं। स्थिति क्या है? स्थितिर्हि नाम सृष्टानां पदार्थानां यावत्संजिहीर्षोदयमवैयाकुल्येनावस्थापनम्। कहा भी गया है—

स्थितिर्नाम स्वरूपस्य तत्तद्रूपतया धृतिः।

शक्तियों की स्थिति—

१. सृष्टि में १० कलायें ३. संहार में ११ कलायें
२. स्थिति में २२ कलायें ४. तुरीय पर्व में १३ कलायें

क्रमकेलि में कहा गया है कि जो निर्विमर्श तुर्यातीत की इच्छा करते हैं, वे निरुपदेश हुआ करते हैं—अतएव ये निर्विमर्शं तुर्यातीतमिच्छन्ति ते निरुपदेशा एव।

षोडशाधिका कौन है? सप्तदशी कला। १६ शक्तियाँ विश्वप्रतिबिम्बस्वभाव हैं। १६ शक्तियों से उत्तीर्ण विश्व विश्वोत्तीर्ण है।

अनाख्यक्रम में १३ शक्तियाँ हैं। अनाख्य चक्र ही तुरीय चक्र है। आख्य-शून्य होने के कारण ही इसे अनाख्य कहा गया है। तुरीय शून्याश्रयी कक्षाविशेष है। यह अवर्णनीय शक्ति है।

सर्वानुस्यूत भासा शक्ति ही तेरहवीं शक्ति है।

अवस्थाचतुष्टय के युग्म—

१. सृष्टि-सृष्टि	१. संहार-सृष्टि	१. स्थिति-स्थिति
२. सृष्टि-स्थिति	२. संहार-स्थिति	२. स्थिति-सृष्टि
३. सृष्टि-संहार	३. संहार-संहार	३. स्थिति-संहार
४. सृष्टि-तुरीय	४. संहार-तुरीय	४. स्थिति-तुरीय

---

१. महेश्वरानन्द—परिमल (गाथा ४०)

विकल्पातीता भासा शक्ति का स्वरूप

अथ सर्वोतीर्णां भासामुद्भासयति—

भासाए ण विअप्पो फुरइ फुरन्तेक्कणिक्कलिसिरीए।
जइ पडिबिम्बंगईए फुरइ परं छोलहाहिआ देवी॥४०॥

(भासायां न विकल्पः स्फुरति स्फुरदेकनिष्कलश्रियाम्।
यदि प्रतिबिम्बगत्या स्फुरति परं षोडशाधिका देवी॥)

विस्फुरणशीला, एकात्मिका (भेदप्रथातिक्रान्ता तथा अद्वितीया), कलाशून्य एवं ऐश्वर्यलक्षणा भासा (पारमेश्वरी चिच्छक्ति) में विकल्प स्फुरित नहीं होता। यदि कोई प्रतिबिम्बगता शक्ति स्फुरित (प्रकट) होती भी है तो वह कोई विलक्षण षोडश शक्तियों से परे (सप्तदशी) शक्ति है॥४०॥

भासा नाम सृष्ट्यादिकृत्याक्रान्तविश्ववैचित्र्यव्यवहारगर्भिणी सर्वोत्तीर्णा सर्वानुग्राहिणी च पारमेश्वरी चिच्छक्तिः, या तदीयं स्वातन्त्र्यं स एवेत्यध्यवसीयते। यथोक्तं श्रीपादुकोदये—

भासा च नाम प्रतिभा महती सर्वगर्भिणी।
स्वस्वभावशिवैकात्मदेशिकात्मकचिन्मयी ॥
यस्यां हि भित्तिभूतायां मातृमेयात्मकं जगत्।
प्रतिबिम्बतया भाति नगरादीव दर्पणे॥
स्वातन्त्र्यरूपा सा काचिच्चिच्छक्तिः परमेष्ठिनः।
तन्मयो भगवान् देवो गुरुर्गुरुमयी च सा॥ इति।

सा च स्फुरदेकनिष्कलश्रीः स्फुरन्ती स्वान्यविभागशून्यमुल्लसन्ती एका भेदप्रथाऽतिक्रान्ता स्वात्मतादात्म्यशालिनी च भवन्ती निष्कला सृष्ट्यादिवद्विभागोद्देशादिविकल्पविक्षोभमसहमाना श्रीरुद्यदनुरूपैश्वर्यलक्षणा यस्यामिति कृत्वा। तस्यां विकल्प एवमियमित्यादिरूपा विरुद्धा कल्पना न प्रकाशते। यदि किमपि स्फुरति, तत् षोडशाधिकैव। सा च प्रतिबिम्बनीत्यैवेत्यक्षरार्थः। एतदुक्तं भवति—परमेश्वरस्य परमसंवित्स्वातन्त्र्यस्फारस्फुरत्तास्वरूपायामस्यां भासायां वैश्वात्म्यप्रथापारिशेष्यात् स्वतो न काचिद् विकल्पोदयशङ्का सम्भवति। अपि तु, स्वच्छतोत्कर्षशालितया प्रागुपन्यस्तानि सृष्ट्यादीन्येव चक्राण्यस्यां प्रतिबिम्बयुक्त्या परिस्फुरन्तीत्यनया भङ्ग्या तत्तच्छक्तीनां विकल्पेनोपासनमपि किञ्चित् संगच्छते। यदुक्तं श्रीक्रमकेलौ—'अत एव ये निर्विमर्शं तुर्यातीतमिच्छन्ति, ते निरुपदेशा एव' इति। षोडशाधिकेति, सप्तदशी कला। तत्र षोडश शक्तयो विश्वप्रतिबिम्बस्वभावाः। अन्त्या तु—

विश्ववैचित्र्यचित्रस्य समभित्तितलोपमा ।

इति श्रीप्रत्यभिज्ञाप्रक्रियया तत्समष्ट्यात्मकतया तदधिष्ठानभूतेति षोडशाधिकया विश्वं तदुत्तीर्णः परमेश्वरश्च द्वितयमपि संगृह्यते। प्रतिबिम्बप्रक्रिया च स्फटिकमुकुरादिव्यतिरेकादलौकिकी काचिदङ्गीकर्तव्या। यतः स्फटिकादेः प्रतिबिम्बनं प्रति बिम्बापेक्षावश्यम्भावः। अस्यास्तु समस्तस्यापि प्रपञ्चस्य प्रतिबिम्बनं प्रति भित्तिभूतत्वादेतद्विपर्ययः। इदं चोपर्यपि भविष्यति। एतच्चक्रानुप्रविष्टा चेयं षोडशाधिका, षोडशविकारप्रतिबिम्बतत्समष्टिरूपत्वात् प्रथमं सप्तदशस्फुरणप्रकारा भवन्ती पश्चात् प्रकाशविमर्शद्वयभेदोपश्लेषवशाद् भैरवभैरवीविभागयुक्त्या चतुस्त्रिंशदंशतयाऽनुभूयते। सा च विकासयुक्त्या पञ्चाशद्वर्णात्मकविश्वप्रसरपरामर्शपरमार्थतया परिस्फुरन्ती संक्षेपमुद्रया पर्यालोच्यमाना, पीठनिकेतनं प्रति पञ्चधा वहतो गुरुभट्टारकाविभिन्नस्य परमेश्वरस्य यानि मूर्तिप्रकाशानन्दवृन्दचक्ररूपाणि सृष्ट्यादिपञ्चकात्मकानि च नव चक्राणि, तन्मयी श्रीनवाक्षरी सम्पद्यते। ततोऽपि संक्षेपे सर्वस्यापि प्रपञ्चस्य पञ्चवाहपारिशेष्यात् पञ्चपिण्डत्वेन, तस्य च वाग्भवे बीजे, तस्याप्यनुत्तरकलायाम्, अमुष्या अपि स्वात्मपरामर्शमात्रे पर्यवसानमिति। एषा च सिद्धान्तेषु तत्तदधिकाराधिरोहक्रमतारतम्यादन्यथाऽन्यथा व्यवह्रियते। यदाहुः—

येन येन स्वरूपेण भाव्यते तस्य तन्मयी ।
माहेश्वराणां शक्तिः सा सांख्यानां प्रकृतिः परा ।।
महाराज्ञी च सौराणां तारा सुगतवन्दिनाम् ।
लोकायतिकमुख्यानां तदात्वा सा प्रकीर्तिता ।।
शान्ता पाशुपतादीनामर्हतां श्रीश्च तद्विदाम् ।
श्रद्धा हैरण्यगर्भाणां गायत्री वेदवादिनाम् ।
अज्ञानतिमिरान्धानां सर्वेषां मोहनी स्मृता ।। इति।

इत्थमाशयेन लघुभट्टारकैरप्युक्तम्—

लक्ष्मीं राजकुले जयां रणमुखे क्षेमङ्करीमध्वनि
क्रव्यादद्विपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ ।
भूतप्रेतपिशाचजम्भकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदं तारां च तोयप्लवे ।। इति।

एवमम्बास्तवेऽपि—

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे, पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले, शिखिनि त्वमूष्मा
निस्सारमेव निखिलं त्वदृते यदि स्यात् ।। इति।

इत्थं मदीयश्रीपरास्तोत्रेऽपि—

दातॄणां करपल्लवेषु करिणां गण्डेषु पृथ्वीरुहां
पुष्पेषु स्तनमण्डलेषु सुदृशामंसेषु भूमीभुजाम्।
कण्ठाग्रेषु च गायतां कवयतां जिह्वासु चेतस्विनां,
सङ्कल्पेषु च कल्पयन्ति कतिचिद्धन्यास्तवैवोद्यमम्।। इति।

आगमेऽपि—

सैव काली महादेवी गीयते लोकवेदयोः।
इतिहासेषु तन्त्रेषु सिद्धान्तेषु कुलेषु च।। इति।

तथा च श्रीभगवद्गीतासु—

यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्।। इति।

एवम्—

जन्मकाले भवेन्माता, पूजाकाले च देवता।
रतिकाले भवेद् दूती मृत्युकाले च कालिका।।

इत्याद्यूह्यम्। तत्रोद्दिष्टभङ्ग्या सृष्ट्यादिभासान्तं चक्रं श्रीदेवपाणिसम्प्रदायानुप्रविष्टैरस्माभिरनुसन्धीयते, न पुनरेतद्विपर्ययेण। यथा श्रीक्रमसद्भावे—

तेषां मध्यात् क्रमेणैव आदौ पूज्यस्तु कः क्रमः।
तन्मे कथय सुश्रोणि! विस्तरेण यथाविधि।।

इति प्रश्नानन्तरम्—

पुरा यत् कथितं देव! पञ्चवाहमहाक्रमम्।
तेषां तु क्रमराजानां सृष्टिरूपोऽग्रतः सदा।।
ततस्तु स्थितिसंहारमनाख्यं च ततः परम्।
भासाख्यं च ततः पश्चात् पूजयेदक्रमक्रमम्।। इति।

एतत्पञ्चकप्रणेतृत्वमेव परमेश्वरस्य तत्पारमैश्वर्यमित्यसकृदवोचाम। यत्रष्टार्थचतुष्कावभासनम्, लीनमेयत्रयवासनानुवृत्तित्वम्, मेयमानघस्मरवेत्तृत्वम्, सविकल्पकमेयविमर्शः, निर्विकल्पकमेयावभास इति क्रमादागमेषु संक्षेपेणोपपाद्यते। अत्र च तत्तद्देवतामन्त्रोद्धारो मदीये महार्थोदये पर्यालोचनीयः।।४०।।

भासा शक्ति का स्वरूप

महेश्वरानन्द की दृष्टि—महेश्वरानन्द परिमल में कहते हैं—भासा नाम सृष्ट्यादि-

कृत्याक्रान्तविश्ववैचित्र्यव्यवहारगर्भिणी सर्वोत्तीर्णा सर्वानुग्राहिणी च पारमेश्वरी चिच्छक्तिः या तदीयं स्वातन्त्र्यं स एवेत्यध्यवसीयते।

श्रीपादुकोदयकार की दृष्टि—श्रीपादुकोदय में कहा गया है—

भासा च नाम प्रतिभा महती सर्वगर्भिणी।
स्वस्वभावशिवैकात्मदेशिकात्मकचिन्मयी ।।
यस्यां हि भित्तिभूतायां मातृमेयात्मकं जगत्।
प्रतिबिम्बतया भाति नगरादीव दर्पणे।।
स्वातन्त्र्यरूपा सा काचिच्छिच्चक्तिः परमेष्ठिनः।
तन्मयो भगवान् देवो गुरुर्गुरुमयी च सा।।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द उसका स्वरूप इस प्रकार प्रस्तुत करते हैं—

१. सा च स्फुरदेकनिष्कलश्रीः स्फुरन्ती स्वान्यविभागशून्यमुल्लसन्ती **एका**।

२. भेदप्रथाऽतिक्रान्ता स्वात्पतादात्म्यशालिनी च भवन्ती **निष्कला**।

३. सृष्ट्यादिवद्विभागोद्देशादिविकल्पविक्षोभमसहमाना **श्री**रुद्यदनुरूपैश्वर्यलक्षणा यस्यामिति।

४. तस्यां **विकल्प** एवमियमित्यादिरूपा विरुद्धा कल्पना न प्रकाशते।

५. यदि किमपि स्फुरति तत् **षोडशाधिकैव**।[1]

परमेश्वरस्य परमसंवित्स्वातन्त्र्यस्फारस्फुरत्तास्वरूपायामस्यां **भासायां वैश्वात्म्य-प्रथा**पारिशेष्यात् स्वतो न काचिद् विकल्पोदयशङ्का सम्भवति।

६. अपितु स्वच्छतोत्कर्षशालितया प्रागुपन्यस्तानि सृष्ट्यादीन्येव चक्राण्यस्यां प्रति-बिम्बयुक्त्या परिस्फुरन्तीत्यनया भङ्ग्या तत्तच्छक्तीनां विकल्पेनोपासनमपि किञ्चित् संगच्छते।[2]

क्रमकेलिकार की दृष्टि—श्रीक्रमकेलि में कहा गया है—अतएव ये निर्विमर्शं तुर्यातीतमिच्छन्ति ते निरुपदेशा एव।

श्रीक्रमसद्भावकार की दृष्टि—श्रीदेवपाणि सम्प्रदायानुप्रविष्ट महेश्वरानन्द इसी सम्प्रदाय के सिद्धान्तानुसार सृष्ट्यादिभासान्त चक्रों की व्याख्या करते हैं।

श्रीक्रमसद्भाव में प्रश्नोत्तर-पद्धति द्वारा इस विषय पर इस प्रकार प्रकाश डाला गया है—

तेषां मध्यात् क्रमेणैव आदौ पूज्यस्तु कः क्रमः?
तन्मे कथय सुश्रोणि! विस्तरेण यथाविधि।।

* * * * * * *

१-२. महेश्वरानन्द : परिमल (४०)

पुरा यत् कथितं देव! पञ्चवाहमहाक्रमम्।
तेषां तु क्रमराजानां सृष्टिरूपोऽग्रतः सदा।।
ततस्तु स्थितिसंहारमनाख्यं च ततः परम्।
भासाख्यं च ततः पश्चात् पूजयेदक्रमक्रमम्।।

षोडशाधिका = सप्तदशी कला। १६ कलायें क्या हैं? षोडश शक्तयो विश्वप्रतिबिम्बस्वभावाः। अन्तिम का स्वरूप क्या है? अन्त्या तु—

विश्ववैचित्र्यचित्रस्य समभित्तित-लोपमा।

प्रतिबिम्बवाद का खण्डन—महेश्वरानन्द कहते हैं कि यदि जगत् एवं शक्ति में बिम्ब-प्रतिबिम्बवाद के सिद्धान्त को (सम्बन्ध की दृष्टि से) कल्पित करें तो यह दृष्टि अनुपयुक्त होगी; क्योंकि बाह्य जगत् में बिम्ब, प्रतिबिम्ब एवं मुकुर—तीन पदार्थ होते हैं; किन्तु शैवागम के अनुसार तो 'स्वभित्तौ विश्वमुन्मीलयति' (शक्तिसूत्र) के अनुसार शक्ति अपनी ही आत्मभित्ति पर (किसी बाह्य दर्पण पर नहीं) अपने ही स्वरूप को जगत् के रूप में उन्मीलित करती है। अतः यहाँ एक को छोड़कर अन्य (दर्पण, बिम्ब एवं प्रतिबिम्ब आदि की अनेकता) की अपेक्षा होती ही नहीं। यहाँ बिम्ब, प्रतिबिम्ब एवं दर्पण—तीनों शक्ति ही है।

महेश्वरानन्द कहते हैं—प्रतिबिम्बप्रक्रिया च स्फटिकमुकुरादिव्यतिरेकादलौकिकी काचिदङ्गीकर्तव्या। यतः स्फटिकादेः प्रतिबिम्बनं प्रति बिम्बापेक्षावश्यम्भावः। अस्यास्तु समस्तस्यापि प्रपञ्चस्य प्रतिबिम्बनं प्रति भित्तिभूतत्वादेतद्विपर्ययः।[1]

षोडशाधिका = १६ तत्त्वों से अतीत कोई अन्य १७वीं शक्ति—सप्तदशी शक्ति। चूँकि १६ तत्त्वों की तो वह स्वयं उद्भाविका है और उसमें अनुप्रविष्ट भी है; अतः वह १७वीं शक्ति है; अतः षोडशाधिका है—

१. एतच्चक्रानुप्रविष्टा चेयं षोडशाधिका।

२. षोडशविकारप्रतिबिम्बतत्समष्टिरूपत्वात् प्रथमं सप्तदशस्फुरणप्रकारा भवन्ती।

३. (तत्पश्चात्) प्रकाशविमर्शद्वयभेदोपश्लेषवशाद् भैरव-भैरवीविभागयुक्त्या चतुस्त्रिंशदंशतयाऽनुभूयते।

४. वही विश्व विकास की दिशा में ५० वर्णों के परिणामस्वरूप विश्व-प्रसार का परामर्शन करती है। वही पीठनिकेतन के प्रति पञ्चधा प्रवहमान होती है। गुरुभट्टारक परमेश्वर से अभिन्न मूर्तिप्रकाशानन्दवृन्दचक्र के रूपों में परिस्फुरित होती हुई एवं सृष्ट्यादि पञ्चकात्मक नव चक्रों का रूप धारण करती हुई नवाक्षरी के रूप में भी अवतरित होती है। वह स्वात्मपरामर्शात्मा है—स्वात्मपरामर्शमात्रे पर्यवसानम् इति।

ग्रन्थान्तरकार की दृष्टि—ग्रन्थान्तर में कहा गया है—

---

१. महेश्वरानन्द (गाथा-४० परिमल)

येन येन स्वरूपेण भाव्यते तस्य तन्मयी।
माहेश्वराणां शक्तिः सा सांख्यानां प्रकृतिः परा।।
महाराज्ञी च सौराणां तारा सुगतवन्दिनाम्।
लोकायतिकमुख्यानां तदात्वा सा प्रकीर्तिता।।
शान्ता पाशुपतादीनामर्हतां श्रीश्च तद्विदाम्।
श्रद्धा हैरण्यगर्भाणां गायत्री वेदवादिनाम्।
अज्ञानतिमिरान्धानां सर्वेषां मोहनी स्मृता।।

अर्थात् उस परा शक्ति को माहेश्वरों ने शक्ति, सांख्यवादियों ने प्रकृति, सौरों ने महाराज्ञी, सौगतों ने तारा, पाशुपतों ने शान्ता, आर्हतों ने श्री, हैरण्यगर्भों ने श्रद्धा, वेदज्ञों ने गायत्री एवं अज्ञानियों ने मोहनी आख्या दी है।

लघुभट्टारककार की दृष्टि—(शक्ति की अनेक संज्ञायें) लघुभट्टारककार का कथन है—

लक्ष्मीं राजकुले जयां रणमुखे क्षेमङ्करीमध्वनि
क्रव्यादद्विपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ।
भूतप्रेतपिशाचजम्भकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदं तारां च तोयप्लवे।।

अम्बास्तवकार की दृष्टि—भगवती के अनेक रूप, अनेक धर्म, अनेक स्वभाव एवं अनेक लक्षण होने के कारण उनका स्वरूप विविधात्मक है; यथा—

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं,
त्वं चेतनासि पुरुषे पवने बलं च।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निस्सारमेव निखिलं त्वदृते यदि स्यात्।।

श्रीपरास्तोत्रकार की दृष्टि—श्रीपरास्तोत्रकार महेश्वरानन्द कहते हैं कि पराम्बा के अनन्त रूप, अनन्त नाम एवं अनन्त धर्म हैं—

दातॄणां करपल्लवेषु करिणां गण्डेषु पृथ्वीरुहां
पुष्पेषु स्तनमण्डलेषु सुदृशामंसेषु भूमीभुजाम्।
कण्ठाग्रेषु च गायतां कवयतां जिह्वासु चेतस्विनां
सङ्कल्पेषु च कल्पयन्ति कतिचिद्धन्यास्तवैवोद्यमम्।।

आगमों की दृष्टि—बहुदेवत्ववाद का खण्डन करते हुये यह कहा गया है कि एक की ही अनन्त अभिव्यक्तियाँ हैं। उन अभिव्यक्तियों को परा सत्ता की विविधता के रूप में ग्रहण करना समीचीन नहीं है; क्योंकि—

(क) एको ब्रह्म द्वितीयो नास्ति।

(ख) एकं सद्विप्रा बहुधा वदन्ति।

(ग) एकस्तथा सर्वभूतान्तरात्मा रूपं-रूपं प्रतिरूपो बभूव आदि।

भगवती के विषय में भी यही बात कही गई है—

सैव काली महादेवी गीयते लोकवेदयोः।
इतिहासेषु तन्त्रेषु सिद्धान्तेषु कुलेषु च।।

भगवद्गीताकार की दृष्टि—भगवान् श्रीकृष्ण कहते हैं कि जगत् में जो-जो विभूतियाँ हैं, वे सभी मेरी हैं—मेरे तेज का ही अंश हैं—

यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्ज्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्।।

एक ही शक्ति विभिन्न अवस्थाओं में विभिन्न रूप वाली हो जाती है—

जन्मकाले भवेन्माता पूजाकाले च देवता।
रतिकाले भवेद् दूती मृत्युकाले च कालिका।।

भासा शक्ति और उसका स्वरूप

अथेत्थमुपदिष्टस्य सृष्ट्यादिपञ्चकस्य प्रत्येकं स्फुरणप्रकारे किञ्चिद् यौगपद्यं विम्रष्टव्यमित्याह—

सिट्ठीए पञ्चमकला भासेत्ति जणो गणइ ववहाणं।
सिट्ठीए मूलकन्दो भासा भासाए पल्लवो सिट्ठी ।।४१।।

(सृष्टेः पञ्चमकला भासेति जनो गणयति व्यवधानम्।
सृष्टेर्मूलकन्दो भासा भासायाः पल्लवः सृष्टिः।।)

सृष्टि की पाँचवी कला (शक्ति) भासा है। लोग इसमें क्रम का अतिक्रमण मानते हैं। सृष्टि का मूल कन्द (केन्द्र) भासा शक्ति है। भासा (शक्ति) का पल्लव (प्रारम्भिक स्फुरण) ही सृष्टि है।।४१।।

परमेश्वरो ह्यलातचक्रच्छायया सृष्ट्यादीनि पञ्चकृत्यान्यविच्छिन्नमुद्भावयन् स्रष्टृत्वस्थपयितृत्वाद्यशेषानुवृत्तमात्मनः कर्तृत्वोत्कर्षमनुभवन्नास्ते, येनायं विम्रष्टृत्वापरपर्यायेण जडब्रह्मवादिसिद्धान्तपङ्कपल्वलोत्तीर्णः कौलागममहामृतार्णवकर्णधारतयाऽवधार्यते। तथा च सति योऽयं जनो वस्तुतत्त्वपरिज्ञानाभावाज्जननमरणादिपीडितः प्रमातृलोकः, स सृष्टिमारभ्य भासापर्यन्तचक्रपञ्चकक्रमगणनया सृष्टेः सकाशात् स्थित्यादिचक्रत्रितयान्तरिता पञ्चमी शक्तिर्भासेत्यनयोर्विच्छेदमवबुध्यते। तत्त्ववृत्त्या तु सृष्टेरधिष्ठानभूमिर्भासा। तस्याश्च प्रथमपरिस्पन्दस्वभावतया प्रसरद्रूपतया सृष्टिरिति विम्रष्टव्यम्। उपलक्षणं चैतत्। तेन स्थितेर्मूलकन्दः

सृष्टिः, सृष्टेः पल्लवः स्थितिरित्यादिक्रमोऽपि स्वयमूहनीयः। अत्रायं भावः— सृष्ट्यादिषु चतुर्षु कृत्येषु सृष्टिसृष्टिः, सृष्टिस्थितिरित्यादिक्रमेण प्रत्येकं चातुर्विध्यम्, पर्यन्ततो भासापर्यवसायित्वं च। भासा च स्वरूपनिष्कर्षावलोकने संविदैक्य-परामर्शचमत्कारसारापि विश्वप्रतिबिम्बयुक्त्यनुप्रविष्टप्रपञ्चस्वभावानुकारितया पञ्चकस्वरूपैवेति। पञ्चापि कृत्यानि प्रम्येक पञ्चकात्मकतां नातिक्रामन्ति। तेषु च पूर्वपूर्वपञ्चकस्य पञ्चमीं कलामवलम्ब्योत्तरोत्तरस्य पञ्चकस्य प्राथमिकी परिस्फुरति। एवमुत्तरोत्तरपञ्चकप्रथमस्फुरत्तानामधोधःपञ्चकपर्यन्तशक्तिषु विश्रा-न्त्यनुभव इत्युत्पलदलदशशतविदलनलाघवोल्लासवत् क्रमसद्भावेऽप्यसंलक्ष्य-क्रमा पारमेश्वरी पञ्चकृत्यचक्रनिर्व्यूढिरत्यन्तगाढाभ्यासैः प्रौढैः कैश्चिद् विम्रष्टव्य-तयाऽवतिष्ठत इति। इत्थमेतत्क्रमपरामर्श एव स्वात्मविमर्शरूपो जीवन्मोक्षः। यत आज्ञाधरत्वादयो बाह्यविभूतिपरिस्पन्दाः स्वयमवर्जनीयतयोन्मिषन्ति। स च गुरुकटाक्षसम्पर्कादृते न सम्पद्यते। यथा श्रीक्रमसिद्धौ—

क्रकारः क्रोधरूपस्तु मकारो मङ्गलो भवेत्।
क्रोधे तु मङ्गलं कुर्यात् क्रमः कालक्रमो भवेत्।।
गुर्वायत्तं क्रमज्ञानमाज्ञासिद्धिकरं परम्।
क्रमज्ञानान्महादेवि! त्रैलोक्यं कवलीकृतम्।। इति।

शाक्तों के मतानुसार प्रकाशात्मा पूर्ण सत्ता ही भासा शक्ति है। इस शक्ति से युक्त अवस्था ही अनाख्या है।

(क) भासा से अनाख्या में अवतरण निग्रह या तिरोधान है।
(ख) अनाख्या से भासा में आरोहण अनुग्रह है।

तिरोधान—तिरोधान के फलस्वरूप चतुर्दल कमल का आविर्भाव होता है। इसके विकास से षोडशदल तक विकास होता है।

अनुग्रह—अनुग्रह के फलस्वरूप षोडश दल से चतुर्दल तक की गति होती है एवं उसके बाद अनाख्या के आश्रय से भासा में स्थिति होती है।

भासा में आत्मा अविभक्त और अविभाज्य एवं अव्ययस्वरूप होती है। यही पुरुष है। अनाख्या में चतुर्दल प्रकृति में स्थिति होती है। अविभक्त होते हुये भी यह विभाज्य है।

अनुग्रह शक्ति के प्रभाव से क्रमशः—१. प्रमेय से प्रमाण २. प्रमाण से प्रमाता ३. प्रमाता से अनाख्या ४. अनाख्या से पूर्ण (भासा) में प्रवेश होता है। पूर्ण और भासा अभेद रूप में विद्यमान है। तिरोधान काल में वह पृथक् भाव से स्फुरित होता है। इसी की संज्ञा है—शक्तिचक्र (प्रकृति)।

१. भासा शक्ति—सृष्टि की पाँचवीं कला (शक्ति) भासा शक्ति है। इसमें क्रमाति-

क्रम पाया जाता है। सृष्टि का तो मूल कन्द ही भासा शक्ति है। भासा शक्ति का पल्लव (प्रारम्भिक स्फुरण) सृष्टि का आरम्भ है।

सृष्टि से भासा पर्यन्त सृजन—१. सृष्टि २. स्थिति ३. संहार ४. अनाख्य एवं ५. भासा शक्ति। इस क्रम में तो व्यवधान आता है। मान्य प्रचलित क्रम निम्नाङ्कित है—

१. सृष्टि-स्थिति २. सृष्टि-संहार ३. सृष्टि-भासा। इसमें भासा शक्ति तो परमेश्वर की तत्त्वरूपा, परम स्वतन्त्र चिच्छक्ति है। सृष्टि तो भासा शक्ति का स्फुरणमात्र है। भासा शक्ति तो सृष्टि का आदि कन्द है। तात्त्विक दृष्टि से भी सृष्टि का आदि स्रोत—आदि भूमि भासा शक्ति है।

१. भासा कला का सबसे पहले स्फुरण होता है।

२. भासा शक्ति एकमात्र संवित् (चिच्छक्ति = ज्ञान कला) के परामर्श (स्फुरण) का परम चमत्कार है।

३. सृष्टि, स्थिति आदि में जो पाँचवीं शक्ति भासा शक्ति है, वही सभी में प्रधान है।

क्रमविमर्श ही जीवन्मोक्ष है।

४. सृष्टेर्मूलकन्दो भासा भासाया: पल्लव: सृष्टि:। सृष्टे: पञ्चम कला भासेति।

५. तत्त्वदृष्ट्या तु सृष्टेरधिष्ठानभूमिर्भासा।

सृष्टि परमेश्वर के अलात चक्र की छायामात्र है—परमेश्वरो ह्यालाताचक्रच्छायया सृष्ट्यादीनि पञ्चकृत्यान्यविच्छिन्नमुद्भावयन्।

जड़ब्रह्मवादियों का सिद्धान्त—शांकर केवलाद्वैत या जड़ब्रह्मवाद में परमात्मा स्रष्टृत्व से शून्य है; अत: स्थापयितृत्व आदि से भी अतीत है; किन्तु शैवागमिकों की दृष्टि में परमेश्वर पञ्चकृत्यकारी है। महेश्वरानन्द जड़ब्रह्मवाद का प्रत्याख्यान एवं आगमिक शैव दृष्टि तथा कौलागम का प्रतिपादन करते हुये कहते हैं—जड़ब्रह्मवादिसिद्धान्त-पङ्कपल्लवोत्तीर्ण: कौलागममहामृतार्णवकर्णधारतयाऽवधार्यते।[१]

जो व्यक्ति वस्तुतत्त्व के परिज्ञानाभाव के कारण जन्म-मरणादि (आवागमन चक्र) से संत्रस्त प्रमातृलोक है, वह सृष्टि का आरम्भ करके भासापर्यन्त चक्रपञ्चक की क्रम-गणना द्वारा सृष्टि के साथ स्थिति आदि चक्रत्रितयन्तरिता पञ्चमी शक्ति भासा को इनसे अधिक महत्त्व का जानता है।

तत्त्ववृत्ति के अनुसार तो सृष्टि की अधिष्ठान भूमि भासा शक्ति है। इस भासा शक्ति का प्रथम परिस्पन्द स्वभाव एवं प्रसृत रूप के अनुसार सृष्टि के रूप में विम्रष्टव्य है।

१. अत: स्थिति का मूल कन्द सृष्टि है।

२. सृष्टि का पल्लव स्थिति है। यही ऊहनीय है। भाव यह है कि—सृष्ट्यादिक

१. महेश्वरानन्द : स्वोपज्ञपरिमल

चारो कार्यों में सृष्टि-सृष्टि, सृष्टि-स्थिति इत्यादि क्रम प्रत्येक को चार प्रकारों में विभाजित करता है और इसका अन्तिम रूप भासा शक्ति है।

३. भासा शक्ति के स्वरूप के विषय में महेश्वरानन्द कहते हैं—भासा च स्वरूप-निष्कर्षावलोकने संविदैक्यपरामर्शचमत्कारसारापि विश्वप्रतिबिम्बयुक्त्यनुप्रविष्टप्रपञ्चस्व-भावानुकारितया पञ्चकस्वरूपैवेति।

पाँचों कार्यों में प्रत्येक पञ्चकात्मक है। पाँचों भेद पञ्चमी कला (भासा शक्ति) पर आश्रित हैं। यह क्रम-परामर्श ही स्वात्मविमर्शात्मक जीवन्मोक्ष है—इत्थमेतत्क्रमपरामर्श एव स्वात्मविमर्शरूपो जीवन्मोक्षः।

श्रीक्रमसिद्धिकार की दृष्टि—श्रीक्रमसिद्धि में कहा गया है—

ककारः क्रोधरूपस्तु मकारो मङ्गलो भवेत्।
क्रोधे तु मङ्गलं कुर्यात् क्रमः कालक्रमो भवेत्।।
गुर्वायत्तं क्रमज्ञानभासासिद्धिकरं परम्।
क्रमज्ञानान् महादेवि! त्रैलोक्यं कवलीकृतम्।।

तिरोधान काल से सम्बद्ध शक्तिचक्र (प्रकृति) पुरुष से प्रकृति का आविर्भाव है या यह ब्रह्म से माया का उदय है। तिरोधान, आत्मसंकोच या कालचक्र का आविर्भाव है। इसमें प्रतिपद से अमावस्या तक कृष्णपक्ष है। अमावस्या पूर्ण सङ्कोच का प्रतीक है। इस अवस्था में चित्कला का सम्पूर्ण आकुञ्चन होता है। मात्र एक ही कला शेष रहती है और इसी की आख्या है—अमा।

पूर्ण से ही अनाख्या का आविर्भाव होता है। यह आविर्भाव तो विवर्तरूप है; किन्तु अनाख्या से जिस त्रिपुटी का आविर्भाव होता है, वह परिणामरूप है। अनाख्या से पूर्ण (भासा) में प्रवेश परमानुग्रहस्वरूप है।

आरोहक्रम में प्रथमतः रहती है—अपनी चेष्टा। यही है—आणव उपाय। इसके बाद आता है—शाक्त स्रोत। शाक्त स्रोत साधक को स्वयमेव बहा ले जाता है। लक्ष्य क्या है? अनाख्या। अनाख्या में जाकर प्रतीक्षा करनी पड़ती है; क्योंकि उसके आगे भासा में प्रवेश अपनी शक्ति से सम्भव नहीं रह जाता। भासा साधक को स्वयमेव अपनी ओर खींचती है।

अनाख्या से भासा में पदार्पण तभी सम्भव हो पाता है जब आत्मा 'विवृणुते तनुं स्वाम्'। अनाख्या तक अनुग्रह शक्ति स्वयमेव (साधक को) ऊपर खींचती है; किन्तु इसके आगे महाशक्ति खींचती है। अनुग्रह की धारा ही आरोहक्रम में अनाख्या है।

(क) अवरोह काल = शिव का शक्तिरूप में अवतरण।

(ख) आरोह काल = शक्ति की शिवरूप में स्थिति।

अनाख्या के बाद आती है—भासा शक्ति। इसमें हैं—अनन्त व्यवधान। व्यवधान

का कारण है—तिरोधान। शक्ति की दो अवस्थायें है—१. कुल २. अकुल। शक्ति की निरुत्थान दशा को ही कुलाकुलस्वरूप आत्मलीनावस्था, सामरस्य भूमि, सत्ता, अहन्ता, परा, स्फुरत्ता एवं भासा आदि कहा गया है। शिव भी शक्ति की ही एक नित्य-सिद्ध अवस्था है।

कुलशक्ति पिण्ड की आधारभूता कुण्डलिनी शक्ति है; किन्तु अकुलशक्ति साक्षात् शक्ति है।

भासा शक्ति के विषय में स्वयं महार्थमञ्जरीकार भी कहते हैं कि—विस्फुरणधर्मा, एकात्मिका, कलाशून्या एवं ऐश्वर्यलक्षणा पारमेश्वरी चिच्छक्ति के स्वरूप वाली शक्ति ही भासा शक्ति है। इसमें विकल्पों का स्फुरण नहीं होता और वह षोडशाधिका देवी है—

भासायां न विकल्पः स्फुरति निष्कलश्रियाम्।
यदि प्रतिबिम्बगत्या स्फुरति परं षोडशाधिका देवी।।

पूजा एवं पूजा के सारभूत तत्त्व

एवमियता प्रपञ्चेन पूज्यदेवताचक्रस्वरूपं परमार्थतः परामृश्येदानीमस्याः पूजायाः पूर्वप्रस्तुताया अपि निष्कृष्टं वपुरुपपादयितुमाह—

णिअबलणिभालणच्चिअ वरिवस्सा सा अ दुल्लहा लोए।
सुलहाइ वीसपइणो आसवतम्बुल्लगन्धपुप्फाइं ।।४२।।

(निजबलनिभालनमेव वरिवस्या सा च दुर्लभा लोके।
सुलभानि विश्वपतेरासवताम्बूलगन्धपुष्पाणि।।)

आत्मशक्ति का निभालन (साक्षात्कार, अभिज्ञा या परामर्श) ही पूजा (वरिवस्या) है। यह संसार में अत्यन्त दुर्लभ है। विश्व के स्वामी की पूजा हेतु आसव, ताम्बूल, गन्ध एवं पुष्पादिक द्रव्य तो सुगमता से प्राप्त हो जाते हैं।।४२।।

पूजा हि चारो रावश्चरुर्मुद्रेति चतुर्विधतयाम्नायते। यथा श्रीचिद्गगनचन्द्रिकायाम्—

चाररावचरुभिर्विभेदितैर्मुद्रया च यदुपासनं तव।
तद्वशेन भजते परम्परा तावकक्रमगता स्फुटीकृतम् ।। इति।

तत्र चारः समयाचारः। रावो विमर्शः। चरुः प्रथमद्वितीयादिद्रव्यम्। मुद्रा स्वात्मनः परमेश्वरत्वोपपादनाय स्वशरीरं प्रति कल्प्यमानः करचरणादिसन्निवेशविशेषो वेषधारणविशेषश्च। महती तु मुद्रा पर्यन्ततो राव एवान्तर्भवति। तत्र चतुर्ष्वपि पूजाक्रमेषु प्राधान्येन राव एवोपयुज्यते। अन्येषां तु पर्यन्ततस्तत्प्रयोजकतया परिग्रहणम्। तस्मात् स्वस्वरूपपरामर्श एव परमा पूजा। अन्यत्तु गन्ध-

पुष्पधूपदीपादि आडम्बरमात्रमिति तात्पर्यार्थः। अक्षरार्थस्तु—स्वहृदयस्फुरत्तारूपः परमेश्वर एव देवतेत्युक्तं वक्ष्यते च। तत्र यन्निजं स्वात्मतादात्म्यानुप्रविष्टं बलं विश्वविक्षोभसहिष्णुत्वलक्षणं विम्रष्टृत्वम्, तत्पर्यालोचनमेव वरिवस्या। तच्च बलमित्येव व्यपदिश्यते। यदुक्तं श्रीस्पन्दे—'अपि त्वात्मबलं मन्त्राः' इति, तदाक्रम्य बलं मन्त्राः इति च। श्रीप्रत्यभिज्ञाहृदये च—'बललाभे विश्वमात्मसात्करोति' इति। यथा च श्रुतिः—'न वा ओजीयो रुद्र! त्वदस्ति' इति। सा च सपर्या लोके सामान्येन पूजकतयाऽवस्थिते प्रमातृवर्गे निरूप्यमाणे स्वात्मदेवतया तेन परमेश्वरेण दुष्प्रापा, लोकस्य तथा निभालकत्वाभावात्। कतिचन महायोगिन एव हि तथा पर्यालोचयितुं प्रगल्भन्त इत्येतादृश्यैवार्चनया भाव्यम्। अन्या पुनरासवाद्यर्पणरूपा—

दीपार्पणं दवाग्ने पर्जन्यस्य प्रपाजलोद्धारः।
वात्यायाश्च पटाञ्चलवीजनमेतत् तवाद्य नैवेद्यम्॥

इत्यादिनीत्या तस्यात्यन्तसुलभतयाऽध्यवसीयते, यतोऽयं विश्वपतिर्विश्वस्य पूजाद्रव्याणां तदन्येषां च भावानां स्वात्मरूपतादात्म्योपपादकतयाऽधिष्ठाता भवति। तत् स्वत एवाशेषविश्वविलासव्यापकस्य भगवतः किमन्यकर्तृकासवताम्बूलाद्यर्पणडम्भविडम्बनेनेत्यर्थः। यदुक्तं श्रीविज्ञानभट्टारके—

येरैव पूज्यते द्रव्यैस्तर्प्यते वा परावरः।
यश्चैकः पूजकः सर्वः स एवैकः क्व पूजनम्॥ इति।

यथा च श्रीप्रभाकौले—

यावत् वत् परमं शान्तं न विजानन्ति सुन्दरि।
तावत् पूजाजपध्यानहोमलिङ्गार्चनादिकम्॥
विदिते तु परे तत्त्वे सर्वाकारे निरामये।
क्व पूजा क्व जपो होमः क्व च लिङ्गपरिग्रहः॥ इति।

यदि पुनस्तान्येव द्रव्याणि तादृग्विमर्शशक्त्या पवित्रीक्रियन्ते, तत् स्वैरमासतां पूजोपकरणत्वेन। यदुक्तं श्रीभगवद्गीतासु—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ इति।

मयाप्युक्तं संविदुल्लासे—

स्वविभवविमर्शसुरभीण्याददते देवताः प्रसूनानि।
ननु काननेषु सुलभं यदि तत् सामान्यसौरभात् तृप्तिः॥ इति।

तादृग्विमर्शाभावे तु—

मुहुः कराग्रेण निरुध्य नासां मुहुश्च पार्श्वस्थमवेक्षमाणाः ।
देवान् यजन्ते कतिचिद् वयं तु स्वानन्दमुद्रैकमहासपर्याः ।।

इत्यादिनीत्या बाह्याडम्बरः केवलं विडम्बनामात्रफलकतया पर्यवस्यति। यदुक्तमर्चनात्रिंशिकायाम्—

बालिकारचितवस्त्रपुत्रिकाक्रीडितेन सदृशं तदर्चनम् ।
यत्र शाम्यति मनो न निर्मस्फीतचिज्जलधिमध्यमाश्रितम् ।। इति।

यथा च श्रीपश्चिमे—

पूजा होमः क्रमश्चर्या व्रतं शास्त्रनिषेवणम् ।
तपो ध्यानं जप शौचं तत्त्वहीनस्य निष्फलम् ।। इति।

यथा च श्रीगीतानिष्यन्दे—

न पादपतनं भक्तिर्व्यापिनः परमात्मनः ।
भक्तिर्भावस्वभावानां तदेकीभावभावनम् ।। इति।

यथा च श्रीमत्स्तोत्रावल्याम्—

न योगो न तपो नार्चा क्रमः कोऽपि प्रणीयते ।
अमाये शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते ।। इति।

तथा च श्रीमहानयपद्धतौ—

परमनिरावरणात्मनि रूपे यो दृढतरः परामर्शः ।
पूजनमेतदितीत्थं प्रभुणा निरणायि यद्यपि प्रकृतम् ।। इति।

यथा च श्रीपादुकोदये—

पूजा च स्वात्मभावेन देशिकेन्द्रविमर्शनम् । इति।।

एतेन—'पूजा विश्वस्य वेद्यस्य चिद्भूमिविश्रान्तिः' इति श्रीमदृजुविमर्शिनी-स्थित्या—

पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे महाव्योम्नि सा पूजा ह्यादराल्लयः ।।

इत्यादिराम्नायोक्तिरपि व्याख्याता। यतः स्वात्मविलयो नाम स्वविश्रान्ति-लक्षणे स्वपरामर्शे पर्यवस्यति। यदाहुः—

यत्रेन्धनं द्वैतवनं मृत्युरेव महापशुः ।
अलौकिकेन यज्ञेन तेन नित्यं यजामहे ।। इति।

एतदाशयेनैव हि—

कर्पूरशकलोन्मिश्रताम्बूलापूरिताननाम् ।

इत्यादिना स्वात्मदेवतातृप्तिः पूर्वमागमेष्वनुष्ठेयतयाऽऽख्यायते। यथा च श्रीपूर्वे—

द्रवद्रव्यसमायोगाद् स्नपनं तस्य जायते ।
गन्धपुष्पादिगन्धस्य ग्रहणं यजनं स्मृतम् ।
षड्रसास्वादनं तस्य नैवेद्याय प्रजायते ।
यमेवोच्चारयेद् वर्णं स जपः परिकीर्तितः ।। इति।

उक्तरूपा चेयं सपर्या धन्यजन्मनः कस्यचिदेव पुंसः प्रतीतिपथमवतरति। यदुक्तं श्रीतन्त्रालोके—

एष यागविधिः कोऽपि कस्यापि हृदि वर्तते ।
यस्य प्रसीदेच्चिच्चक्रं द्रागपश्चिमजन्मनः ।। इति।

तत्रासवस्यान्तःकरणप्रसाधकत्वम्। ताम्बूलस्य शरीरं प्रति बाह्यान्तरोभय-शोधकत्वम्। गन्धस्य चन्दनादेः प्राचुर्येण बहिरङ्गोपसंस्कारकत्वम्। पुष्पाणां च तत्रैव केशादिमात्राधिवासप्रयोजकतेति पूर्वपूर्वप्राधान्यात् क्रमविवक्षा। विश्वपतेरिति सम्बन्धमात्रे षष्ठी, न माषाणामश्नीयादितिवत्। तेन खल्योगेऽप्येवं प्रयोगो न दुष्यति। यदुक्तम्—

इदं हि शास्त्रमाहात्म्यदर्शनालसचेतसाम् ।
अपभाषणवद् भाति न च सौभाग्यमुज्झति ।। इति।

पूजा चार विधियों से निष्पन्न की जाती है। उनका स्वरूप इस प्रकार है—

१. चार (समयाचार) ३. चरु (द्रव्य)
२. राव (आत्मपरामर्श) ४. मुद्रा (अंगन्यासादि मुद्रायें)

पूजा हि चारो रावश्चरुर्मुद्रैते चतुर्विधतयाम्नायते।[१]

१. चिद्गगनचन्द्रिका की दृष्टि—चिद्गगनचन्द्रिका में कहा गया है—

चाररावचरुभिर्विभेदितैर्मुद्रया च यदुपासनं तव।
तद्वशेन भजते परम्परा तावकक्रमगता स्फुटीकृतम्।।

इसमें चार समयाचार है। राव विमर्श है। चरु प्रथम-द्वितीयादि द्रव्य हैं। मुद्रा 'स्वात्मनः परमेश्वरत्वोपपादनाय स्वशरीरं प्रति कल्प्यमानः करचरणादिसन्निवेषविशेषो वेषधारणविशेषश्च' के रूप में स्थित है।[२]

---

१. परिमल (४२) २. परिमल (४२)

यथार्थ पूजा में केवल राव का प्राधान्य है। अन्य पूजोपकरण, पूजा-विधियाँ एवं पूजाङ्ग इसी राव के सहायकमात्र हैं; क्योंकि 'अन्येषां तु पर्यन्ततस्तत्प्रयोजकतया परिग्रहणम्।'[१]

यथार्थ पूजा का स्वरूप—यथार्थ पूजा तो स्वस्वरूपपरामर्शमात्र है—तस्मात् स्वस्वरूपपरामर्श एव परमा पूजा।

पूजा के अन्य उपकरण तो आडम्बरमात्र हैं—अन्यत्तु गन्धपुष्पधूपदीपादि आडम्बरमात्रमिति तात्पर्यार्थः।

पूजा के दो स्वरूप (महेश्वरानन्द की दृष्टि)—

१. यथार्थ पूजा (राव—स्वस्वरूपपरामर्श एव परमा पूजा)।

२. आडम्बरात्मक अयथार्थ पूजा (धूप, दीप, मुद्रा, न्यास आदि—गन्धपुष्पधूपदीपादि आडम्बरमात्रमिति)।

प्रश्न—जिसकी पूजा की जाती है, उस पूज्य देवता का स्वरूप क्या है? उसके स्वरूपानुकूल ही पूजा की जानी चाहिये।

देवता का स्वरूप—अपने हृदय की स्फुरत्ता के स्वरूप में अवस्थित परमेश्वरात्मक सत्ता ही देवता है—स्वहृदयस्फुरत्तारूपः परमेश्वर एव देवतेत्युक्तं वक्ष्यते।[२]

इस दृष्टि से यदि पूजा के स्वरूप का निर्धारण किया जाय तो कहा जायेगा कि जो स्वात्म-तादात्म्यानुप्रविष्ट निज (आत्म) बल है, जो कि विश्वविक्षोभसहिष्णु है, उसका पर्यालोचन ही पूजा है। उसका विमर्शन ही पूजा है—तत्र यन्निजं स्वात्मतादात्म्यानुप्रविष्टं बलं विश्वविक्षोभसहिष्णुत्वलक्षणं विम्रष्टृत्वम्, तत्पर्यालोचनमेव वरिवस्या।[३]

स्पन्दकारिकाकार की दृष्टि—आचार्य महेश्वरानन्द कहते हैं कि इस सम्बन्ध में स्पन्दशास्त्र की दृष्टि उपपन्न एवं ग्राह्य है। स्पन्दकारिका में कहा गया है—

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः।
प्रवर्ततेऽधिकाराय करणानीव देहिनः।। (१.२६)

* * * * * * *

भूयः स्फुटतरो भाति स्वबलोद्योगभावितः।।३६।।
तत्तथा बलमाक्रम्य नाचिरात् सम्प्रवर्तते।।३७।।
दुर्बलोऽपि तदाक्रम्य यतः कार्ये प्रवर्तते।।३८।।

अपि त्वात्मबलं मन्त्राः (महार्थमञ्जरी में उद्धृत)

अपि त्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत्।।८।।

१-३. परिमल (महेश्वरानन्द)

अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः।
तथा स्वात्मन्यधिष्ठानात् सर्वत्रैव भविष्यति।।

प्रत्यभिज्ञाहृदयकार की दृष्टि—प्रत्यभिज्ञाहृदयम् में आचार्य क्षेमराज कहते हैं—बललाभे विश्वमात्मसात्करोति।

श्रुतियों में भी इसी तथ्य का प्रतिपादन किया है—न वा ओजीयो रुद्र! त्वदस्ति।[१]

सामान्य जनों की अपरा पूजा का स्वरूप—सामान्य पूजक पुष्प-नीराजना-गन्ध-मुद्रा आदि उपकरणों एवं विधियों से सामान्य पूजा किया करते हैं; क्योंकि निभालन के अभाव में स्वात्मदेवता की पूजा सम्भव नहीं है—स्वात्मदेवतया तेन परमेश्वरेण दुष्प्रापा, लोकस्य तथा निभालकत्वाभावात्।[२]

यह यथार्थ पूजा तो कोई अपवाद रूप में स्थित महायोगी ही कर पाता है—कतिचन महायोगिन एव हि तथा पर्यालोचयितुं प्रगल्भन्त।[३]

आसवाद्यर्पणरूपा पूजा का दूसरा ही स्वरूप है।

पूजा-विधि—

दीपार्पणं दवाग्नेः पर्जन्यस्य प्रपाजलोद्धारः।
वात्यायाश्च पटाञ्चलवीजनमेतत् तवाद्य नैवेद्यम्।।

स्वस्वरूप विमर्श ही परा पूजा है।[४]

गन्ध, पुष्प, नीराजना, अर्घ्य आदि तो बाह्य पूजा के उपकरण हैं। तादात्म्यानुप्रवेशभाव से चिन्तन ही पूजा है। हृदयस्थित परमात्मा को प्राप्त करने के लिये आत्मबल (आत्मशक्ति) के परामर्श को ही मन्त्र कहा जाता है। आत्मस्थ परमसत्ता के अभिज्ञान के बिना समस्त पूजा, जप, तप, लिंगपरिग्रह, हवन आदि समस्त पूजन-विधान व्यर्थ हैं। गीता में भी कहा गया है कि बाह्य द्रव्य नहीं, प्रत्युत उनमें सञ्चरित प्रेम एवं श्रद्धा वरेण्य है—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।। (गीता ९.२६)

स्वात्मविमर्शात्मिका श्रद्धा ही पूजा का प्राण है। परमशिव का स्वात्मभावपूर्वक चिन्तन ही यथार्थ पूजा है।

विश्वपति की यथार्थ पूजा से स्वात्मरूप के साथ तादात्म्य होने के कारण साधक स्वयमेव विश्वपति बन जाता है; अतः जो स्वयं विश्व का विलास है और अशेष सृष्टि में व्याप्त है, उसे कृत्रिम पूजा की पद्धति से आसव-ताम्बूल आदि का अर्पण करना

१-४. महेश्वरानन्द : परिमल

तो डम्भविडम्बनामात्र है—अशेषविश्वविलासव्यापकस्य भगवत: किमन्यकर्तृकासव-ताम्बूलाद्यर्पणडम्भविडम्बनेनेत्यर्थ:।[१]

श्रीविज्ञानभट्टारक की दृष्टि—विज्ञानभैरव में कहा गया है कि यदि हम तात्त्विक या यथार्थ पूजा की दृष्टि से पर्यालोचना करें तो जो पूजक जिन द्रव्यों से पूजा करता है या परापर को तर्पित करता है, वे सारे पूजा-द्रव्य और जो पूजक—सभी एक ही तत्त्व तो हैं; अत: किसकी, किसके द्वारा क्या पूजा?

यैरेव पूज्यते द्रव्यैस्तर्प्यते वा परापर:।
यश्चैक: पूजक: सर्व: स एवैक: क्व पूजनम्।। (१५०)

प्रभाकौलकार की दृष्टि—प्रभाकौल में कहा गया है कि हे सुन्दरि! जब-कब उस परम शान्त परमार्थ पद को नहीं जान पाते, तभी तक पूजा, जप, ध्यान, होम, लिंग-पूजा आदि कर्मकाण्ड निष्पन्न किये जाते हैं; किन्तु जब उस सर्वाकार निर्विकार परम तत्त्व का बोध हो जाता है तब पूजा, जप, होम, वेष-परिवर्तन आदि की कोई उपयोगिता नहीं रह जाती। इस स्थिति में तो पूजा, जप आदि की अद्वय भैरवनय में उपर्युक्त नियम ही चरितार्थ होते हैं। अद्वय नय में प्रदर्शित पूजा के अतिरिक्त स्थूल दृष्टि से सम्पन्न पूज्य, पूजन-साधन, पूजा, पूजक आदि की परमार्थ दृष्टि से कोई सत्ता ही नहीं रह जाती। प्रभाकौल में इसी बात को इन शब्दों में कहा गया है—

यावत् तत् परमं शान्तं न विजानन्ति सुन्दरि।
तावत् पूजाजपध्यानहोमलिङ्गार्चनादिकम्।।
विदिते तु परे तत्त्वे सर्वाकारे निरामये।
क्व पूजा क्व जपो होम: क्व च लिङ्गपरिग्रह:।।

यदि ये ही द्रव्य विमर्श शक्ति से पवित्रीकृत करके समर्पित किये जायँ तब तो मणि-काञ्चन योग होगा।

श्रीमद्भगवद्गीताकार की दृष्टि—भगवान् श्रीकृष्ण गीता में पूजोपकरणों के विषय में कहते हैं कि—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मन:।।

संविदुल्लास में महेश्वरानन्द की दृष्टि—संविदुल्लास में कहा गया है कि—

स्वविभवविमर्शसुरभीण्याददते देवता: प्रसूनानि।
ननु काननेषु सुलभं यदि तत् सामान्यसौरभात् तृप्ति:।।

देवता-गण स्वविभव (आत्मोत्कर्ष/आत्मैश्वर्य) के परिमल से तृप्त होते हैं। यदि

१. परिमल (महेश्वरानन्द)

वे सामान्य पुष्पों से तृप्त हुआ करते तो जंगलों में क्या पुष्पों की कमी है?

औपचारिक एवं यथार्थ पूजा में अन्तर—यथार्थ पूजा तो अपनी आत्माजन्य (आत्मैश्वर्यजन्य) एवं आनन्दोत्कर्षपूर्ण मुद्रा से निष्पादित होती है, जब कि बाह्याडम्बरों में विश्वास करने वाले साधकों की बाह्योपास्ति प्राणायाम आदि द्वारा निष्पादित होती है—

मुहुः कराग्रेण निरुध्य नासां मुहुश्च पार्श्वस्थमवेक्षमाणाः।
देवान् यजन्ते कतिचिद् वयं तु स्वानन्दमुद्रैकमहासपर्याः।।[१]

बाह्याडम्बरात्मक सपर्या केवल विडम्बनामात्र है—बाह्याडम्बरः केवलं विडम्बनामात्रफलकतया पर्यवस्यति।

अर्चनात्रिंशिका की दृष्टि—बाह्याडम्बरपूर्ण पूजा ठीक उसी प्रकार की पूजा है, यथा कोई छोटी बालिका पुतली से खेलती हुई उसे यथार्थ बालिका मानती है। जहाँ मन का शमन न हो और जहाँ निर्मल, सुस्निग्ध, चैतन्यान्तक समुद्र में अपनी चेतना निमज्जित होकर विश्राम न कर रही हो, वह सपर्या केवल विडम्बनामात्र है या वस्त्र-पुत्रिका (कठपुतली) से बालिकाओं द्वारा किया जाने वाला मनोरञ्जनमात्र है; पूजा नहीं है—

बालिकारचितवस्त्रपुत्रिकाक्रीडितेन सदृशं तदर्चनम्।
यत्र शाम्यति मनो न निर्मलस्फीतचिज्जलधिमध्यमाश्रितम्।।

श्रीपश्चिम में व्यक्त दृष्टि—जो व्यक्ति तत्त्वज्ञ न हो, उसके द्वारा की गई पूजा, होम, क्रमचर्या, व्रत, शास्त्रानुशीलन, तप, ध्यान, जप, शौच (पावित्र्य) आदि सभी कुछ व्यर्थ हैं—

पूजा होमः क्रमश्चर्या व्रतं शास्त्रनिषेवणम्।
तपो ध्यानं जपं शौचं तत्त्वहीनस्य निष्फलम्।।[२]

फिर यह तत्त्वकथा (तत्त्वज्ञान) है क्या? यह कब प्राप्त होती है? इसका स्वरूप क्या है?

कुलार्णवतन्त्रकार की दृष्टि—

यावत् कामादि दीप्येत यावत् संसारवासना।
यावदिन्द्रियचापल्यं तावत्तत्त्वकथा कुतः?।।

* * * * * * *

यावत् प्रयत्नवेगोऽस्ति यावत् सङ्कल्पकल्पना।
यावन्न मनसः स्थैर्यं तावत्तत्त्वकथा कुतः?।।

* * * * * * *

---

१. परिमल २. महेश्वरानन्दोद्धृत (परिमल)

यावद्देहाभिमानश्च ममता यावदस्ति हि।
यावन्न गुरुकारुण्यं तावत्तत्त्वकथा कुतः?।।

* * * * * * *

यावत्तपो व्रतं तीर्थं जपहोमार्चनादिकम्।
वेदशास्त्रागमकथा यावत्तत्त्वं न विन्दते।।
तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा।
तत्त्वनिष्ठो भवेद्देवि! यदीच्छेन्मोक्षमात्मनः।।[१]

महायानपद्धतिकार की दृष्टि—महायानपद्धति में कहा गया है कि सारे आवरणों से विमुक्त जो परम आत्मा है, उसमें जो दृढ़तर परामर्श होता है, उसे ही पूजन का अभिधान दिया गया है; अन्य को नहीं। यही पूजन यथार्थ पूजन है—

परमनिरावरणात्मनि रूपे यो दृढ़तरः परामर्शः।
पूजनमेतदितीत्थं प्रभुणा निरणायि यद्यपि प्रकृतम्।।

श्रीपादुकोदय की दृष्टि—श्रीपादुकोदय में कहा गया है कि स्वात्मभाव द्वारा देशिकेन्द्र का विमर्शन करते रहना ही पूजा है—

पूजा च स्वात्मभावेन देशिकेन्द्रविमर्शनम्।

ऋजुविमर्शिनीकार की दृष्टि—ऋजुविमर्शिनी में पूजाविषयक दृष्टि को इस प्रकार प्रोन्मीलित किया गया है—

पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढ़ा।
निर्विकल्पे महाव्योम्नि सा पूजा ह्यादराल्लयः।।

अर्थात् पुष्पादिक के समर्पण के माध्यम से जिस पूजा का स्वरूप निर्धारित किया जाता है, वह स्वकल्पित पूजा-दृष्टि 'पूजा' नहीं है। पूजा का यथार्थ स्वरूप तो निर्वि-कल्पात्मक महाव्योम में सादर लय है।

चिद्भूमि में विश्रान्ति ही पूजा—वेद्य विश्व की चिद्भूमि में विश्रान्ति ही पूजा है—पूजा च विश्वस्य वेद्यस्य चिद्भूमिविश्रान्तिः।

उत्पलदेवाचार्य की दृष्टि—आचार्य उत्पलदेव का कथन है कि योग-साधना, तपस्या, अर्चा-क्रम आदि में से कोई भी साधन-विधान शिवमार्ग में ग्राह्य नहीं है; क्योंकि यहाँ तो पूजा, साधना, अर्चा, वरिवस्या आदि सब कुछ भक्तिमात्र है—

न योगो न तपो नार्चा क्रमः कोऽपि प्रणीयते।
अमाये शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते।।[२]

---

१. कुलार्णवतन्त्र (प्रथमोल्लास) २. शिवस्तोत्रावली

महेश्वरानन्द की दृष्टि—निर्विकल्प महाव्योम में पूर्ण श्रद्धा के साथ आत्मविलय ही पूजा है अर्थात् स्वविश्रान्तिलक्षणात्मक स्वपरामर्श में जो पर्यवसान है, वही स्वात्मविलय है और निर्विकल्प महाव्योम में यही स्वात्मविलय पूजा है—यतः स्वात्मविलयो नाम स्वविश्रान्तिलक्षणे स्वपरामर्शे पर्यवस्यति।[१]

अन्य आचार्यों की दृष्टि—उपर्युक्तदृष्टि को केन्द्र में रखकर कहा गया है कि मेरे यज्ञ में द्वैतदृष्टि ही इन्धन है और मृत्यु ही महापशु है, जिसकी बलि दी जानी है। इस अलौकिक यज्ञ में ही मैं नित्य हवन किया करता हूँ—

यत्रेन्धनं द्वैतवनं मृत्युरेव महापशुः।
अलौकिकेन यज्ञेन तेन नित्यं यजामहे।।

श्रीपूर्वशास्त्रकार की दृष्टि—श्रीपूर्वशास्त्र में स्नान, यजन, नैवेद्य एवं जप आदि के विषय में इस प्रकार दृष्टि प्रस्तुत की गई है—

द्रवद्रव्यसमायोगाद् स्नपनं तस्य जायते।
गन्धपुष्पादिगन्धस्य ग्रहणं यजनं स्मृतम्।
षड्रसास्वादनं तस्य नैवेद्याय प्रजायते।
यमेवोच्चारयेद् वर्णं स जपः परिकीर्तितः।।

तन्त्रालोककार की दृष्टि—आचार्य अभिनवगुप्तपाद का कथन है कि यह तत्त्व-दृष्टि-सम्पन्न याग-विधि तो किसी अपवादस्वरूप महान् साधक के हृदय में उन्मीलित हो पाती है—

एष यागविधिः कोऽपि कस्यापि हृदि वर्तते।
यस्य प्रसीदेच्चिच्चक्रं द्रागपश्चिमजन्मनः।।

महेश्वरानन्द की दृष्टि—महेश्वरानन्द ने पूजोपकरणों की सार्थकता एवं सोद्देश्यता पर प्रकाश डालते हुये उसके स्वरूप का निर्वचन इस प्रकार किया है—

१. तत्रासवस्यान्तःकरणप्रसाधकत्वम्।

२. ताम्बूलस्य शरीरं प्रति बाह्यान्तरोभयशोधकत्वम्।

३. गन्धस्य चन्दनादेः प्राचुर्येण बहिरङ्गोपसंस्कारकत्वम्।

४. पुष्पाणां च तत्रैव केशादिमात्राधिवासप्रयोजकतेति पूर्वपूर्वप्राधान्यात् क्रमविवक्षा।

५. इस पूजा-विधान में प्रथमतः प्राणायाम के पारमार्थ्य को प्रख्यापित किया गया है—एवं सपर्यास्वभावं सामान्यतः परामृश्य तद्विशेषानपि तथा योजयिष्यमाणः प्रथमं प्राणायामस्य पारमार्थ्यं प्रख्यापयति।[२]

१-२. परिमल (महेश्वरानन्द)

विम्रष्टुं निजसत्त्वं विभवे कार्योन्मुखे स्तिमितेऽपि।
बाह्यवृत्तान्तानां भङ्गः प्राणस्य संयमो ज्ञेयः।।[१]

संकेतपद्धतिकार की दृष्टि—संकेतपद्धति में कहा गया है कि यथार्थ पूजा बाह्यवर्ती पुष्पादिक द्रव्यों से अनुष्ठित नहीं हुआ करती। पूजा तो साधना की परास्थिति है; अतः अपने अतिमहिमास्पद अद्वय धाम में जो की जाती है, वही यथार्थ पूजा कहलाती है—

न पूजा बाह्यपुष्पादिद्रव्यैर्या प्रथिताऽनिशम्।
स्वे महिम्न्यद्वये धाम्नि सा पूजा या परा स्थितिः।।

तन्त्रालोककार की दृष्टि—आचार्य अभिनवगुप्त कहते हैं कि रूप, रस आदि विभिन्न बाह्य भाव पदार्थों की देश, काल आदि से अपरिच्छिन्न, निरुपाधिक, स्वतन्त्र, स्वच्छ एवं भैरवाकार परसंवित् से अर्थात् बोधभैरव से अभेद रूप में प्रतिष्ठा होना ही यथार्थ पूजा है—

पूजा नाम विभिन्नस्य भावौघस्यापि सङ्गतिः।
स्वतन्त्रविमलानन्तभैरवीयचिदात्मना ।।[२]

भट्ट उत्पलदेवाचार्य की दृष्टि—आचार्य उत्पल कहते हैं कि उच्चार, करण, ध्यानप्रभृति प्रयत्न-साध्य आणवप्रभृति उपायों के सहारे सम्पन्न होने वाली विविध बाह्य विधियों का त्याग करके अनुपाय प्रक्रिया से सहज विधि-सम्पन्न होने वाला स्वात्मस्वरूप बोधभैरव का साक्षात्कार ही भक्तजनों की यथार्थ पूजा-विधि है—

ध्यानायास-तिरस्कार-सिद्धस्त्वत्स्पर्शनोत्सवः ।
पूजाविधिरिति ख्यातो भक्तानां स सदाऽस्तु मे।।[३]

भट्टनारायण की दृष्टि—स्तवचिन्तामणि (११३) में भगवान् से प्रार्थना की गई है कि—हे भगवन्! मैं पुष्पादिक से तो नित्य ही आपकी पूजा करता हूँ; किन्तु आप मेरे लिये वह स्थिति उपस्थित कीजिये कि जिससे मैं आपके समक्ष उस ज्ञानरूपी दीपक को लेकर उपस्थित हो सकूँ, जो कि मन से अज्ञानरूपी तैल से सिञ्चित वासना-रूपी वर्तिका को, धर्माधर्म-प्रभृति जागतिक परम्परा को आगे बढ़ाने वाले समस्त संस्कारों को भस्म कर देने वाला हो। भाव यह कि भेद-बुद्धि का त्याग करके अद्वय स्वात्मस्वरूप में प्रतिष्ठित होना ही यथार्थ पूजा है—

मलतैलाक्तसंसारवासनावर्तिदाहिना ।
ज्ञानदीपेन देव त्वां कदा नु स्यामुपस्थितः।।

१. परिमल (४३)
२. तन्त्रालोक (४.१२१)
३. शिवस्तोत्रावली (१७.४)

विज्ञानभैरवकार की दृष्टि—विज्ञानभैरव में पूजा, होम, जप, हवन, स्नान, याग आदि के तात्त्विक स्वरूप पर प्रकाश डाला गया है। तदनुसार—

(क) जप—

भूयोभूयः परे भावे भावना भाव्यते हिया।
जपः सोऽत्र स्वयं नादो मन्त्रात्मा जप्य ईदृशः।।

(ख) ध्यान—

ध्यानं हि निश्चला बुद्धिर्निराकारा निराश्रया।
न तु ध्यानं शरीराक्षिमुखहस्तादिकल्पना।।

(ग) पूजा—

पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढ़ा।
निर्विकल्पे परे व्योम्नि सा पूजा ह्यादराल्लयः।।

(घ) होम—

महाशून्यालये वह्नौ भूताक्षविषयादिकम्।
हूयते मनसा सार्धं स होमश्चेतनास्रुचा।।[१]

(ङ) याग—

यागोऽत्र परमेशानि तुष्टिरानन्दलक्षणा।
क्षपणात् सर्वपापानां त्राणात् सर्वस्य पार्वति।।
रुद्रशक्तिसमावेशस्तत्क्षेत्रं भावना परा।
अन्यथा तस्य तत्त्वस्य का पूजा कश्च तृप्यति।।[२]

(च) स्नान—

स्वतन्त्रानन्दचिन्मात्रसारः स्वात्मा हि सर्वतः।
आवेशनं तत्स्वरूपे स्वात्मनः स्नानमीरितम्।।[३]

(छ) जप—

सकारेण बहिर्याति हकारेण विशेत् पुनः।
हंसहंसेत्यमुं मन्त्रं जीवो जपति नित्यशः।।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
जपो देव्याः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः।।[४]

---

१. विज्ञानभैरव (१४६)
२. विज्ञानभैरव (१४७-१४८)
३. विज्ञानभैरव (१४९)
४. विज्ञानभैरव (१५५३-५४)

यथार्थ हवन में तो चेतना में समस्त जागतिक पदार्थों को रखकर उनको बोध-भैरवरूप अग्नि में लयीभूत कर दिया जाता है।

(ज) हवन (योगिनीहृदयदीपिका के अनुसार)—

धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा।
सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्।।[१]
नैदानैस्तर्पणैः सम्यग् विशुद्धैरमृतात्मभिः।
मदहन्तां करोमीदं विश्वं हव्यपुरस्सरम्।।[२]

भगवद्गीता की दृष्टि—

सर्वाणीन्द्रियकर्माणि प्राणकर्मणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।।

कुलार्णवतन्त्रकार की दृष्टि—

१. पूजा—

पूर्वजन्मानुशमनाज्जन्ममृत्युनिवारणात् ।
सम्पूर्णफलदानाच्च पूजेति कथिता प्रिये।।

२. तर्पण—

तत्त्वात्मकस्य देवस्य परिवारवृतस्य च।
नवानन्दप्रजननात्तर्पणं समुदाहृतम्।।

३. पुष्प—

पुण्यसंवर्द्धनाच्चापि पापौघपरिहारतः।
पुष्कलार्थप्रदानाच्च पुष्पमित्यभिधीयते।।

४. दीप—

दीर्घाज्ञानमहाध्वान्ताहङ्कारपरिवर्जनात् ।
परतत्त्वप्रकाशाच्च दीप इत्यभिधीयते।। आदि।

आचार्य शंकर की दृष्टि—आचार्य शंकर की दृष्टि में आदर्श पूजा का स्वरूप इस प्रकार है—

---

१. ज्ञानार्णवतन्त्र (२१.२९)
२. सुभगोदयवासना (३९)

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम्।।

(सौन्दर्यलहरी-२७)

१. जप	३. प्रदक्षिणा	५. प्रणाम
२. मुद्रा	४. आहुति	६. सपर्या

इसी बात को आचार्य प्रवर ने शब्दान्तर में इस प्रकार कहा है—

आत्मा त्वं गिरिजामतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विविधोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरोः
यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।।

समयाचारियों का पूजा-विधान—समयाचारियों ने भी बाह्य पूजा का निषेध करते हुये आन्तर पूजा का प्रतिपादन किया है।

(क) सनत्कुमारसंहिता में प्रतिपादित दृष्टि—इसमें स्पष्टतः बाह्य पूजा का खण्डन करते हुये कहा गया है कि—

बाह्यपूजा न कर्तव्या कर्तव्या बाह्यजातिभिः।
सा क्षुद्रफला नृणां ऐहिकार्थैकसाधनात्।।
बाह्यपूजारताः कौलाः क्षपणाश्च कपालिकाः।
दिगम्बराश्चेतिहासा वामकास्तन्त्रवादिनः।।
आन्तराराधनपरा वैदिका ब्रह्मवादिनः।
जीवन्मुक्ताश्चरन्त्येते त्रिषु लोकेषु सर्वदा।।

(ख) आचार्य लक्ष्मीधर की दृष्टि—बाह्य पूजाविधान में ही ऋषि, छन्द आदि का प्रयोग है; आन्तरपूजा में नहीं—बाह्यपूजां न कुर्यादिति निषेधविधिः। बाह्यपूजायामेव ऋषिच्छन्दःप्रभृतिज्ञानपूर्वकम्। आन्तरपूजायां तादात्म्यानुसन्धानात्मिकायां ऋष्यादिज्ञानं नास्त्येव। उपयोगस्तु दूरत एव।[1]

समयाचार में—

१. पुरश्चरण अग्राह्य है।
२. जप अग्राह्य है।
३. बाह्य होम अग्राह्य है।
४. बाह्य पूजा अग्राह्य है।
५. सारी पूजाओं का स्थान हृदय है।

---

१. लक्ष्मीधरी (टीका)

समयिनां मन्त्रस्य पुरश्चरणं नास्ति। जपो नास्ति। बाह्यहोमो नास्ति। बाह्यपूजाविधयो न सन्त्येव। हृत्कमल एव सर्वं यावत् अनुष्ठेयम्। लक्ष्मीधरा (सौ. ल.-३३)

(क) यहाँ समयाचार में पूजा का स्थान बाह्य पीठ नहीं है—समयिनां मते समयस्य सादाख्यतत्त्वस्य सपर्या सहस्रदलकमल एव, न तु बाह्ये पीठादौ।[1]

पूजा का स्थान = सहस्रदल कमल।

(ख) यहाँ सपर्या (पूजा) चतुर्विध-षड्विध देव्यानुसन्धान है—ये तु समयिनो योगश्वराः विजने गुहान्तरे वा बद्धपद्मासनाः निगृहीतेन्द्रियाः सादाख्यतत्त्वध्यानैकनिष्ठाः वर्तन्ते तेषां वक्ष्यमाणचतुर्विधषड्विधैक्यानुसन्धानमेव भगवत्याः सपर्येति अर्थादुक्तं भवति।[2]

(ग) अतः समयपूजकाः समयिनः। तेषां षट्चक्रपूजा न नियता, अपितु सहस्रकमल एव पूजा।

सहस्रकमलपूजा नाम सहस्रकमलस्य बैन्दवस्थानत्वेन तन्मध्यगतचन्द्रमण्डलस्य चतुरश्रात्मना, तन्मध्यबिन्दोः पञ्चविंशतितत्त्वातीतषड्विंशात्मकशिवशक्तिमेलनरूपसादाख्यात्मना च अनुसन्धानम्। अतएव समयिमते बाह्याराधनं दूरत एव निरस्तम्। षोडशोपचाररूपपूजाङ्गकलापाश्च ततोऽपि दूरत एव।

(घ) समयिनां चतुर्विधैक्यानुसन्धानमेव भगवत्याः समाराधनमित्येतत्। केचित्तु षोढा ऐक्यमाहुः।[3]

पञ्चविध साम्य

अधिष्ठानसाम्य | अवस्थानसाम्य | अनुष्ठानसाम्य | रूपसाम्य | नामसाम्य

वामकेश्वरतन्त्र की दृष्टि—वामकेश्वर तन्त्र में भगवती के आयुधों आदि की भी पूजा एवं उनके स्वरूप का चिन्तन बाह्य नहीं; आन्तरिक है—

पाशाङ्कुशौ तदीयौ तु रागद्वेषात्मकौ स्मृतौ।
शब्दस्पर्शादयो बाणाः मनस्तस्याभवद्धनुः।।
करणेन्द्रियचक्रस्थां देवीं संवित्स्वरूपिणीम्।
विश्वाहङ्कारपुष्पेण पूजयेत् सर्वसिद्धिभाक्।।

यही उपासना है (लक्ष्मीधर)।

योगिनीहृदयोक्त पूजा के प्रकार—योगिनीहृदय के तृतीय पटल (पूजासङ्केत) में पूजातत्त्व पर व्यापक दृष्टि से विचार किया गया है—

परा पूजा—

१. परमशिवाद्वैतप्रथात्मकत्वादितरपूजाभ्यामुत्तमत्वम्।

१-३. लक्ष्मीधर

२. न पूजा बाह्यपुष्पादिद्रव्यैर्या प्रथिताऽनिशम्।
स्वे महिम्न्यद्वये धाम्नि सा पूजा या परा स्थिरा।।[१]

परापरा पूजा—

बाह्यस्यान्तरे धाम्न्यद्वये चिल्लयभावनामयी मध्यमा परापरात्मकत्वात्।[२]

तव नित्योदिता पूजा त्रिभिर्भेदैर्व्यवस्थिता।
परा चाप्यपरा गौरि तृतीया च परापरा।।

अपरा पूजा—

पूजा भेदप्रथामात्रसारा ब्रह्मचक्रावरणार्चनरूपा अधमा।[३]

१. परा २. अपरा ३. परापरा—पूजा के तीन प्रकार।

आचार्य अमृतानन्द की दृष्टि—विमर्शरूपिणी शक्ति की पूजा के ये ही तीन प्रकार हैं।

१. परा पूजा—यह अद्वैतप्रथात्मिका पूजा है—

प्रथमाद्वैतभावस्था सर्वप्रसरगोचरा।

२. अपरा पूजा—यह चक्रपूजनगर्भा पूजा है—

द्वितीया चक्रपूजा च सदा निष्पाद्यते मया।

३. परापरापूजा—यह ज्ञानप्रधान पूजा है—

एवं ज्ञानमये देवि तृतीया तु परापरा।

परा पूजा—चिल्लयलक्षणाद्वैतप्रथा परा पूजा है। विज्ञानभैरव में इसी स्वरूप वाली पूजा को उत्तमा पूजा के रूप में परा पूजा स्वीकार किया गया है। इस परा पूजा का सर्वत्र इस प्रकार है—

यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये।
तत्र तत्र परावस्था व्यापकत्वात् क्व यास्यति?।।
तत्र तत्राक्षमार्गेण चैतन्यं व्यज्यते प्रभोः।
तस्य तन्मात्रधर्मित्वाच्चिल्लयाद्भरिता स्थिता।।[४]

चिल्लयलक्षणाद्वैतप्रथा परापूजेत्यर्थः।

अपरा पूजा—द्वितीया पूजा अपरा पूजा है। उसका स्वरूप इत्याकारक है—द्वितीया चक्रपूजा अपरा पूजा चतुरस्रादिवैन्दवान्तश्रीचक्रसदनावरणदेवतार्चनमपरा पूजेत्यर्थः।

---

१. दीपिका (अमृतानन्द)
२. अमृतानन्द
३. दीपिका (३.१)
४. विज्ञानभैरव

परापरा पूजा—यह तृतीया पूजा है, उसका स्वरूप इत्याकारक है—एवं ज्ञानमये पूर्वोक्ताद्वैतभवनामये धाम्नि बाह्यस्य पृथगात्मकावरणार्चनारूपस्य कर्मणो ज्ञानमयता विश्रान्तिस्तृतीया परापरा पूजा—

प्रकाशैकघने धाम्नि विकल्पप्रसरादिकान्।
निक्षिपेत् स्वार्चनद्वारा वह्नाविव घृताहुती:।।
सा ज्ञेया ज्ञानगम्या परापूजा.............।[१]

भास्करराय की दृष्टि—आचार्य भास्करराय अपने प्रख्यात ग्रन्थ 'सेतुबन्ध' में कहते हैं—

(क) परा पूजा—द्वैतभानसामान्याभावे परा।

(ख) अपरा पूजा—अद्वैतभानसामान्याभावे त्वपरा।

(ग) परापरा पूजा—द्वैतविलयाभ्यासदशायां परापरेति। पूजात्रयलक्षलक्षणानि।

१. परा पूजा—उत्तमा सा परा ज्ञेया विधानं शृणु साम्प्रतम्। (योगिनीहृदय -४)

जिसमें द्वैतभाव न हो, वही परा पूजा है—न विद्यते द्वैतं यस्मिन्नेतादृशो भावोऽन्तः-करणवृत्तिविशेषस्तत्र तिष्ठति विषयीभवति। प्रकर्षेण चरन्ति विषयाभिमुखीभवन्तीति प्रचराणीन्द्रियाणि, तेषां गोचरो विषय:। सर्वेन्द्रियजन्येषु ज्ञानेषु ये विषयास्तेषु सच्चिदानन्दानुगतस्य भानम्। तदिदम् 'ऋतम्भरा तत्र प्रज्ञा' इति योगसूत्रसिद्धं ज्ञानम्। सा प्रथमा पूजा परा नाम्नी—

यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये।
तत्र तत्राक्षमार्गेण चैतन्यं व्यज्यते प्रभो।।

२. अपरा पूजा—या पूर्वतन्त्रे भूगृहादिबिन्द्वन्तपूजा वर्णिता या मया प्रत्यहं क्रियते सा द्वितीया। सेयं परपूजाधिकारिणापि कार्येति द्योतनायेत्थमुक्तम्।

३. परापरा पूजा—ज्ञानमये चिदेकस्वभावे ब्रह्मणि स्वस्यात्मन: प्रथा अभेदेन प्रस्फुरणम् उभयाभेदाभ्यास इति यावत्। सा तृतीया—

प्रकाशैकघने धाम्नि विकल्पान् प्रसवादिकान्।
निक्षिपाभ्यर्चनद्वारा वह्नाविव घृताहुती:।।

निष्कर्ष—

१. एतासु परैवोत्तमा ज्ञेया।

२. परापरा तु मध्यमा।

३. अपरा त्वधमेत्यर्थादुक्तं भवति।

---

१. अमृतानन्द : दीपिका

योगिनीहृदयकार की दृष्टि—

(क) पूजासङ्केत के प्रबोधमात्र से जीवन्मुक्ति की प्राप्ति होती है—

पूजासङ्केतमधुना कथयामि तवानघे।
यस्य प्रबोधमात्रेण जीवन्मुक्तः प्रमोदते।।

(ख) पूजा के भेद—

तव नित्योदिता पूजा त्रिभिर्भेदैर्व्यवस्थिता।
परा चाप्यपरा गौरि! तृतीया च परापरा।।
प्रथमाद्वैतभावस्था सर्वप्रसरगोचरा।
द्वितीया चक्रपूजा च सदा निष्पद्यते मया।।
एवं ज्ञानमये देवि तृतीया तु परापरा।
उत्तमा सा परा ज्ञेया विधानं शृणु साम्प्रतम्।।

आचार्य भास्कर की दृष्टि—व्यापिका और समना के मध्य सहस्रदल कमल है, जो कि बहुदलावृत होने के कारण महापद्मवन कहा गया है। उसके मध्य स्थित कर्णिका के मध्यभाग में वाग्भव नामक त्रिकोण स्थित है। वहाँ गुरुपादुका है। यह परमशिव से अभिन्न स्वनाथात्मिका अकुलामृत कुण्डलिनी है। इसने चराचर को अनुप्राणित (आप्यायित) कर रक्खा है। यह निरन्तर चिद्रस की वर्षा करती रहती है। इसी भगवती कुण्डलिनी का परामर्श अपनी आत्मा के रूप में करते हुये गुरुपादुका-परामर्श करते रहना चाहिये। यही गुरु-प्रसाद है। यही परमाद्वैत है। परमशिव के साथ अद्वैत भाव रखकर सैवाऽहं के स्वरूप वाले समावेश की स्थिति में लयीभूत होना ही अमृत है। साधक को उसी अमृत से घूर्णित (मुदित) रहना चाहिये। कहा भी गया है—

स्वप्रकाशवपुषा गुरुः शिवो यः प्रसीदति पदार्थमस्तके।
तत्प्रसादमिह तत्त्वशोधनं प्राप्य मोदमुपयाति भावुकः।।

इस परमशिवाद्वैतभावनात्मक गुरुप्रसाद की प्राप्ति से ही परमानन्द का समुल्लास हुआ करता है। प्रसादस्वीकारानन्तर आन्तर जप करना चाहिये—

दहरं विपाप्मं परवेश्मभूतं हृत्पुण्डरीकं पुरमध्यसंस्थम्।

सहस्रदल कमल की स्थिति—महापद्मवन ही पूजा का सर्वोत्तम स्थान है। ब्रह्मरन्ध्र में अधोमुख श्वेत सहस्रदल वाला अकुल कमल स्थित है, जो कि वन के समान प्रतीत होता है—महापद्मवनं ब्रह्मरन्ध्राधोमुखसितसहस्रदलाकुलकमलं पद्मदलैराकुलत्वाद् वनमिव वनम्। (अमृतानन्द—दीपिका)

स्वच्छन्दतन्त्र में कहा गया है—

यावदूर्ध्वाकुलं पद्मं सहस्रारमधोमुखम्।
श्वेतं च निष्कला शक्तिमध्यं चासंख्यशक्तिकम्।
व्यापिनी केवलं शश्वदमृतौघप्रहर्षिणम्।
महापद्मवनं चैव समना तस्य चोपरि।
तस्यान्तःकर्णिकामध्ये तत्स्थे वाग्भवरूपिणी।।

योगिनीहृदयकार की दृष्टि—इसी परा पूजा की दिशा में योगिनीहृदय में कहा गया है—

महापद्मवनान्तस्थे वाग्भवे गुरुपादुकाम्।
आप्यायितजगद्रूपां परमामृतवर्षिणीम्।।
सञ्चिन्त्य परमाद्वैतभावनामृतघूर्णितः।
दहरान्तरसंसर्पन्नादालोकनतत्परः।
विकल्परूपसञ्जल्पविमुखोऽन्तर्मुखः सदा।
चित्कलोल्लास-दलित-सङ्कोचस्त्वतिसुन्दरः।
इन्द्रियप्रीणनद्रव्यैर्विहितः स्वात्मपूजनः।।

इसमें जिस 'दहर' शब्द का प्रयोग आया है, यह हृदयाब्जमध्यगत आकाश है—हृदयाब्जमध्यगतमाकाशं दहरमित्युच्यते।[1]

इसी दहर के अन्तर में नाद संसर्पित (सञ्चरित) हो रहा है। वहाँ उसी का आलोकन (विभावन) करना चाहिये—दहरान्तरसंसर्पन्नादालोकनतत्परः। शास्त्रों में भी कहा गया है कि—

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः।

अर्थात् आन्तर नादानुसन्धानात्मक जप किया जाना चाहिये—आन्तरं नादानुसन्धानलक्षणं जपं कुर्यात्।[2]

इसके बाद विजातीय प्रत्ययान्तरित सजातीय प्रत्यय-प्रवाह लक्षण वाले ध्यान (प्रत्ययैकतानता ध्यानम्) में लयीभूत होकर परमशिवाद्वैतभावना में निमज्जित हो जाना चाहिये। यहाँ ध्यान का स्वरूप इत्याकाराकारित है—

ध्यानं या निष्कला चिन्ता निराकारा निराश्रया।
न तु ध्यानं शरीरस्य मुखहस्तादिकल्पना।।

---

१. अमृतानन्द (योगिनी-दीपिका)
२. अमृतानन्द—योगिनीहृदयदीपिका पू. सं. (५-६-७)

चित्कलोल्लासदलितसङ्कोचस्त्वतिसुन्दरः ।
चिदम्बुधिमहाभङ्गभिन्नसङ्कोचसुन्दरः ।।

यहाँ इत्याकारक परिपूर्णाऽहंभाव ही स्वीकार्य एवं लक्ष्य है। इस स्थिति में महात्रिपुरसुन्दरी नामधेय परचित्कलोल्लासास्पद परमसुन्दर परमप्रेमास्पद परमशिव से अभिन्न है।

यहाँ 'इन्द्रियप्रीणनद्रव्यैर्विहितस्वात्मपूजनः' वाक्य में अन्तर्निविष्ट आत्मपूजा ही काम्य है। इसका स्वरूप इत्याकारक है—

इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताम् ।
स्वभावेन समाराध्य ज्ञातुः सोऽयं महामखः।।

विज्ञानभैरवोक्त रीति से श्रोत्र आदि इन्द्रियों के विषय शब्दादि के अनुभव से उत्पन्न आनन्द के द्वारा समरसीकरण ही परापूजा है—श्रोत्रादीन्द्रियविषयशब्दाद्यानुभवजनितेन सहानन्देन समरसीकरणं परापूजा इत्यर्थः।[१]

यहाँ न्यास की दृष्टि से षोढ़ा न्यास ही काम्य है—

न्यासं निर्वर्तयेद्देहे षोढान्यासपुरःसरम्।[२]

यहाँ अर्चन एवं यजन का स्वरूप इत्याकारक है—

१. नादेवो देवमर्चयेत्।
२. शिवो भूत्वा शिवं यजेत्।[३]

त्रिपुरोपासना (साम्प्रदायिक धरातल पर)

- कौलमत (६४ आगमों में प्रतिपादित मत)[४] (बाह्यपूजा)
- मिश्रमत (चन्द्रकला, ज्योत्स्नाप्रभृति आठ आगमों में प्रतिपादित मत) (मिश्रित पूजा)
- समयि मत (शुभागमपञ्चक में प्रपञ्चित मत) (आन्तर पूजा) वैदिकमतानुवर्ती।

मिश्रकं कौलमार्गं च परित्याज्यं हि शाङ्करि।

निष्कर्ष—महेश्वरानन्द ने महार्थमञ्जरी में निष्कर्ष के रूप में अपनी वरिवस्या (सपर्या) का स्वरूप इस प्रकार प्रस्तुत किया है—निजबलनिभालनमेव वरिवस्या, सा च दुर्लभा लोके।[५]

आचार्य क्षेमराज की दृष्टि—आचार्य क्षेमराज ने प्रत्यभिज्ञाहृदय में 'बललाभे विश्वमात्मसात् करोति (शक्तिसूत्र १५) की व्याख्या में कहा है कि चिति शक्ति ही बल

१. अमृतानन्द (दीपिका)
२. योगिनीहृदय
३. सेतुबन्ध
४. नित्याषोडशिकार्णव
५. महार्थमञ्जरी

है। चिति शक्ति देह-प्राण आदि आवरणों को निमज्जित करके स्वरूप को उन्मिषित करती हुई बल कहलाती है और चित् रूप बल को अधिष्ठित करके मन्त्र सर्वज्ञत्व आदि बल से अपने अधिकार में प्रवृत्त होते हैं—

१. चितिरेव देहप्राणाद्याच्छादननिमज्जनेन स्वरूपं उन्मग्नत्वेन स्फारयन्ती बलम्।[१]

२. तदाक्रम्य बलं मन्त्राः .... ।।

३. बल-प्राप्ति अर्थात् उदित स्वरूप का आश्रय ग्रहण करने पर योगी पृथ्वी से लेकर सदाशिव-पर्यन्त विश्व को आत्मसात् कर लेता है—अपने स्वरूप से अभिन्न रूप में प्रकाशित करता है—एवं बललाभे उन्मग्नस्वरूपाश्रयणे क्षित्यादिसदाशिवान्तं विश्वम् आत्मसात् करोति स्वस्वरूपाभेदेन निर्भासयति।[२]

क्रमसूत्र की दृष्टि—क्रमसूत्र में कहा गया है कि जिस प्रकार अग्नि उद्बोधित होकर जलाने योग्य को जलाती है, वैसे ही विषयरूपी पाशों को आत्मसात् करना चाहिये—यथा वह्निरुद्बोधितो दाह्यं दहति तथा विषयपाशान् भक्षयेत्।

चिदानन्द की प्राप्ति के पश्चात् देहादिक के अनुभूत होने पर भी चित् शक्ति के साथ एकात्मता-प्रतिपत्ति की दृढ़ता जीवन्मुक्ति है—चिदानन्दलाभे देहादिषु चेत्यमानेष्वपि चिदैकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्तिः।[३]

'मध्य-विकासाच्चिदानन्दलाभः' (१७) अर्थात् सुषुम्णा के विकास से ही चिदानन्द की प्राप्ति होती है। मध्यविकास के उपाय क्या हैं? आद्यन्तकोटिनिभालन ही मुख्योपाय हैं—विकल्पक्षयशक्तिसङ्कोचविकासवाह्यच्छेदाद्यन्तकोटिनिभालनादय इहोपायाः।[४]

प्राणायाम का यथार्थ स्वरूप

एवं सपर्यास्वभावं सामान्यतः परामृश्य तद्विशेषानपि तथा योजयिष्यमाणः प्रथमं प्राणायामस्य पारमार्थ्यं प्रख्यापयति—

विमरिसिउं णिअसत्तं विहवे कज्जम्मुहम्मि थिमिए वि।
वाहिरवुत्तन्ताणं भंगो पाणस्स संजमो णेओ ।।४३।।

(विम्रष्टुं निजसत्त्वं विभवे कार्योन्मुखे स्तिमितेऽपि।
बाह्यवृत्तान्तानां भङ्गः प्राणस्य संयमो ज्ञेयः।।)

अपने सत्त्व का पर्यालोचन (चिन्तन) करने एवं स्वसामर्थ्यरूप विभव में कार्योन्मुख होने या स्तिमित होने पर (वेद्योल्लासरूप) बाह्यवृत्तियों का उच्छेद हो जाने को प्राण का संयम (प्राणायाम) समझना चाहिये।।४३।।

---

१. प्रत्यभिज्ञाहृदयम्
२. प्रत्यभिज्ञाहृदयम् (१५)
३. शक्तिसूत्र (१६)
४. प्रत्यभिज्ञाहृदयम् (१८)

इत्यनेकाम्नायप्रक्रियया सङ्कोचविकासरूपज्ञत्वकर्तृत्वापरपर्यायप्रकाशविमर्शसामरस्यात्मकं यामलोल्लासस्वभावत्वमागमेष्वाम्नायते। तदुक्तमाचार्याभिनवगुप्तनाथपादैः—'तत्र ज्ञाता नामोन्मेषनिमेषलक्षणेन सङ्कोचविकासात्मना ज्ञानक्रियालक्षणेन स्वभावेन स्वपरिस्पन्दनसार एव' इति। अस्य च यामलस्यैका कोटिः परभैरवसंवित्स्वातन्त्र्यपर्यन्तम्, अन्या चात्यन्तजडघटादिप्रकाशपर्यन्तं परिस्फुरति, यत् स्वात्मपरमेश्वरस्योदयविश्रमणस्वभावम्। 'अ इति ब्रह्म तत्रागतमहम्' इत्यैतरेयोपनिषत्प्रक्रियया नित्योदितोद्योगस्वभावं शिवशक्तिमेलापरूपं रुद्रयामलमित्याख्यायते। तदुक्तं श्रीत्रिंशिकाशास्त्रे—'इत्येतद् रुद्रयामलम्' इति। अत्र हेतुस्त्रुटितातङ्ककलङ्कत्वम्। आतङ्को हि शङ्कानिबन्धनं चाकित्यम्। शङ्का च सन्देहविप्रतिपत्त्याद्यनुप्राणनतया सकृद्विभातस्वभावस्वात्मसंविदैकरस्यास्वादं प्रति प्रत्यूहतयाऽनुभूयते। तस्य चैतत् कलङ्कत्वं यत् स्वच्छेऽपि स्वात्मनि मालिन्यशङ्काऽनुप्रवेश्यते। तादृशश्चायमातङ्कस्त्रुट्यति। स्ववासनापर्यन्तं प्रणश्यति। तदा प्रतिपादितसिद्धिलाभ इति तात्पर्यार्थः। तदुक्तमाचार्याभिनवगुप्तपादैः—'न त्वत्र विद्याव्रतादि किञ्चित् सहकारिभावेनोपयोगि। केवलं परीक्षणशङ्कातङ्कत्वमत्रोपयोगि' इति। ओ इत्याश्चर्यद्योतिकया देश्या—

दर्शनान्तरकान्तारकण्टकद्रुमकोटरात् ।
किरातः कोऽपि कूटस्थो दत्ते मन्त्रामृतं मधुः ।।

इति संविदुल्लासस्थित्या व्रतोपवासाद्युपद्रवबहुलोपायप्रयोजकानन्त-शास्त्रान्तरसङ्कटेऽपि प्रपञ्चे श्रीमदनुत्तरक्रमप्रणयनप्रवीणस्य परमेश्वरस्य परम-कारुण्यमात्रोपपादितेयमास्माकीना यामली सिद्धिः, या श्रीकुलगह्वरादिषु—

यत्तदक्षरमव्यक्तं प्रियाकण्ठेऽप्यवस्थितम् ।
ध्वनिरूपमनिच्छं तु ध्यानधारणवर्जितम् ।
तत्र चित्तं विधायैवं वशयेद् युगपज्जगत् ।

इत्यादिना भोगमोक्षसामरस्यात्मकतयोपपाद्यत इत्यासूत्र्यते। तदुक्तं श्री-तन्त्रालोके—

अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः ।
घटकुम्भवेदकार्थाः शब्दा .... ।। इति।

यह संसारस्वरूप सुख (जागतिक सुखातिशय) कितना मादक और विस्मय-गर्भित आनन्द प्रदान करने वाला है। आश्चर्य तो यह है कि यही अनन्त सुखों से गर्भित जगत् सांसारिक (बाह्यमुखी) मनुष्यों के लिये जन्म-मरणादि चक्र के रूप में अत्यधिक दुःखप्रद है। इस प्रकार इसके त्याज्य एवं घृणास्पद रूप में निश्चित किये जाने पर भी प्राणियों द्वारा इसका मोक्षवत् स्वाद ग्रहण किया जाता है।

स्तोत्रावली की दृष्टि—स्तोत्रावली में भी कहा गया है—

दुःखान्यपि सुखायन्ते विषमप्यमृतायते।
मोक्षायते च संसारो यत्र मार्गः स शाङ्करः।।

अर्थात् जहाँ शैवी मार्ग है, वहाँ तो दुःख भी सुख के रूप में तथा विष भी अमृत के रूप में रूपान्तरित हो जाते हैं। उस शांकर मार्ग में तो (बन्धनस्वरूप यह) जगत् भी मोक्ष के रूप में रूपान्तरित हो जाता है।

यह कितने आश्चर्य की बात है कि मोक्षलक्षणात्मक सर्वजनानुसन्धेय एवं परमात्मा की अनुकम्पामात्र से सौभाग्य सभी व्यक्तियों को सरलता से प्राप्य है।

त्रिंशिकाशास्त्र में भी इसी पुरुषार्थ या अध्यवसाय से रहित सुखाप्तिरूप दिव्य भोगों की प्राप्ति का उल्लेख किया गया है—

अदृष्टमण्डलोऽप्येतत् तिलाद्याहुविवर्जितम्।

इसी प्रसंग में महावनमुनि ने भी कहा है—

अलिपिशित पुरन्ध्री भोगपर्याकुलोऽहं,
बहुविधकुलयोगारम्भसम्भावितोऽहम् ।

पशुजनविमुखोऽहं भैरवीसंश्रितोऽहं,
गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम्।।

उक्त गाथा में जो 'त्रुटितातंक' (भयविमुक्त) शब्द का प्रयोग किया गया है, वह इसीलिये किया गया है; क्योंकि भोग-मोक्षसामरस्य में जो सुख है, वह भी शिवात्मक है और जो दु:ख है, वह भी शिवात्मक है; अत: किसी भी स्थिति में कहीं दु:ख है ही नहीं।

यहाँ ध्यान के कृच्छ्रसाधन एवं जप के कठोर अध्यवसाय के बिना तथा शास्त्र-विधियों के पालन के बिना भी भगवान् शिव के अनुग्रह की प्राप्ति हो जाया करती है। उत्पलदेवाचार्य इसकी पुष्टि करते हैं।

उत्पलदेवाचार्य शिवस्तोत्रावली में कहते हैं कि जिसको बिना ध्यान के तथा बिना जप के, विधिरहित रूप से मात्र ईश्वरानुग्रह के शिव का आभास (प्रकाश) प्राप्त हो, उस भक्तिशिरोमणि की हम स्तुति करते हैं।

न ध्यायतो न जपत: स्याद् यस्याविधिपूर्वकम्।
एवमेव शिवाभासस्तं नुमो भक्तिशालिनम्।।

यहाँ प्राणधारण (पूरक, कुम्भक प्राणायाम) आदि के उपरोध (बाधा) से पृथक् (व्यतिरेक) भगवान् शिव के साथ नित्य योग की प्राप्ति होती है और साथ ही प्रकाशात्मा भगवान् शिव के साथ विमर्शात्मक सम्बन्ध भी स्थापित होता है। इस शैव मार्ग में योगियों को जो यामली सिद्धि प्राप्त होती है, वह स्वस्वभाव चमत्काराकारिता स्फुरत्ता से युक्त है और वह यामली सिद्धि कभी भी वेद्य-वेदकद्वय स्वरूप वाली सृष्टि को अतिक्रान्त नहीं करती; क्योंकि कहा गया है—

यस्योन्मेषनिमेषाभ्यां जगत: प्रलयोदयौ।
तदन्त:कालयोगेन सोमसूर्यौ प्रकीर्तितौ।
ज्ञानक्रियात्मनो: शम्भुमरीच्योर्मेलनात्मकम्।।

सारांश यह कि अनेक आम्नायों में प्रतिपादित प्रक्रियाओं के द्वारा जगत् के संकोच-विकास (प्रलय-सृष्टि) रूप ज्ञत्व-कर्तृत्व के अपर पर्याय प्रकाश एवं विमर्श के सामरस्यात्मक यामलोल्लासस्वभाव का सभी आम्नायों में प्रतिपादन किया गया है।

आचार्य अभिनवगुप्त कहते हैं—तत्र ज्ञाता नामोन्मेषनिमेषलक्षणेन संकोचविकासात्मना ज्ञानक्रियालक्षणेन स्वभावेन स्वपरिस्पन्दनसार एव।

इस यामलभाव की केवल एक ही कोटि है और वह परभैरव संवित्स्वातन्त्र्यपर्यन्त स्थित है। अन्य कोटि अत्यन्त जड़ घटादि प्रकाशपर्यन्त स्फुरित होती है। कारण यह है कि स्वात्मस्वरूप परमात्मा का उदय एवं विश्रमण स्वभाव है।

ऐतरेयोपनिषद् में कहा गया है—अ इति ब्रह्म तत्रागतमहम्। इसके अनुसार रुद्र-

यामल शिव-शक्ति मेलाप-स्वरूप और नित्योदितोद्योगस्वभाव है। त्रिंशिकाशास्त्र में भी कहा गया है—इत्येतद् रुद्रयामलम्।

इस गाथा में 'आतंक' शब्द शंकानिबन्धन के अर्थ में प्रयुक्त किया गया है। शंका क्या है? शंका वह है, जिसके द्वारा सकृद्विभातस्वभाव, स्वात्मसंवित् एवं एकरस परा सत्ता का आस्वादन प्रत्यूहों (विघ्नों) के साथ किया जाता है। आस्वाद में विप्रतिपत्ति का अनुप्राणन होने के कारण ही इसे शंका या आतंक (संशय) कहा गया है। उस आतंक का यह कलंक, जो कि स्वच्छ स्वात्मा में भी मालिन्यात्मक शंका के रूप में प्रवेश कर जाती है। वह इत्याकारक 'आतंक' इस शैवी मार्ग में नष्ट हो जाता है। वह स्ववासनापर्यन्त विनष्ट हो जाता है। तब यह प्रतिपादित सिद्धि भी उस साधक को प्राप्त हो जाती है। इसी दृष्टि से आचार्य अभिनवगुप्तपाद ने कहा है—न त्वत्र विद्याव्रतादि किञ्चित् सहकारिभावेनोपयोगि। केवलं परीक्षणातङ्कत्वमत्रोपयोगि। कहा भी कहा है—

दर्शनान्तर-कान्तार-कण्टकद्रुम-कोटरात् ।
किरातः कोऽपि कूटस्थो दत्ते मन्त्रामृतं मधुः।।

संविदुल्लास में कहा गया है—व्रत, उपवास आदि उपद्रवबहुल उपायों के प्रयोजक अनन्त शास्त्रों में मतभेद होने पर भी तो अनुत्तर क्रम प्रणयन में पटु परमात्मा की केवल परम करुणामात्र को ही यामली सिद्धि का कारण माना जाना चाहिये।

श्रीकुलगह्वर में भी इसी स्थापना की पुष्टि की गई है—

यत् तदक्षरमव्यक्तं प्रियाकण्ठेऽप्यवस्थितम्।
ध्वनिरूपमनिच्छं तु ध्यानधारणवर्जितम्।
तत्र चित्तं विधायैवं वशयेद् युगपज्जगत्।।

इस प्रकार यहाँ पर भी भोग-मोक्षसामरस्य का प्रतिपादन किया गया है।

तन्त्रालोक में भी कहा गया है—अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः। घटकुम्भवेदकार्थाः शब्दा इति। अर्थात् शिव-शासन की भूमि में सुख-दुःख, बन्ध-मोक्ष एवं चेतन-जड़ में उसी प्रकार कोई भेद नहीं है, जिस प्रकार घट एवं कुम्भ में। ये दोनों ही शब्द एक ही अर्थ के द्योतक होने से अभिन्न हैं।[१]

अमृतस्वभाव भाव की प्राप्ति का फल

नन्वस्मिन्नकुतोभयसंविदाह्लादोभयस्वभावास्वादवपुषि पुरुषार्थे तदुत्कर्षानुकूलया कालक्रमोपकल्पनीयया कयाचिदत्यन्ततीव्रयोपास्त्या भवितव्यम्। सा चास्मदादेः सद्यो न सम्पद्यत इति श्रूयमाणतामात्रसौभाग्यमेतदर्थोन्मीलनम्, न पुनः स्वहृदयानुभूतिपर्यवसायीत्याशङ्कां क्षपयितुमाह—

१. परिमल

खणमेत्तफंसिएण वि अमअसहावेण णेण भावेण।
सव्वोत्तिण्णो सव्वो सव्वइरं लहइ सव्वसोहग्गं ॥६६॥

(क्षणमात्रस्पृष्टेनाप्यमृतस्वभावेनानेन भावेन।
सर्वोत्तीर्णः सर्वः सर्वचिरं लभते सर्वसौभाग्यम्।।)

क्षणमात्र के लिये भी इस अमृतस्वभावस्वरूप भाव का संस्पर्श होने पर (योगी) सर्वोत्तीर्ण हो जाता है (अर्थात् समस्त बन्धनों से मुक्त हो जाता है) और समस्त सौभाग्य सदा के लिये प्राप्त कर लेता है।।६६।।

योऽयमन्वादिश्यमानो भावः स्वहृदयस्फुरत्तापरपर्याया महासत्ता स खलु—

यस्मिन् काले तु गुरुणा निर्विकल्पं प्रभाषितम्।
तदैव किल मुक्तोऽसौ यन्त्रं तिष्ठति केवलम्।।

इति श्रीरत्नमालामर्यादया गुरुकटाक्षपातलक्षणात् काललेशविशेषात्मनः क्षणादेव सृष्टानुप्रविष्टो भवन्नप्यमृतस्वभावचिदाह्लादद्वितयसामरस्याकारसार-स्वरूपतया जीवन्मुक्त्यात्मा महोपभोगो भवति। अथवा अत एव हेतोरमृतस्वभावो नित्यास्वाद्यतानैयत्ययोगात्। 'अस्योच्चारे कृते' इत्यारभ्य 'फलं यद् वा समीहितम्' इत्यन्तं श्रीत्रिंशिकाशास्त्रस्थित्या मुहूर्तप्रहरवासरादिकालक्रमोत्कर्षकक्ष्यानुवृत्तेरुपर्यु-परिपरामर्शानुस्यूतिदर्शितदार्ढ्ययोगश्च सम्पद्यत इत्यावृत्त्या योजना। तादृशा च भावेन हेतुभूतेन सर्वस्तिर्यक्त्वमनुष्यत्वजीवत्वामृतत्वजडत्वाजडत्वादितारतम्य-शून्यः प्रमातृवर्गः सर्वस्मात्—

समनान्तं पाशजालमुन्मन्यन्ते परः शिवः।

इति स्थित्या विश्वविलासलक्षणाद् बन्धहेतोरुत्तीर्णः शुद्धचैतन्यस्वभावो भवन् सर्वचिरम्

ब्रह्मायुषो दशगुणं विष्णोरायुः परं स्मृतम्।
सहस्रगुणितं तस्माद् रुद्रस्यायुः परं किल।।
तस्माल्लक्षगुणं प्रोक्तमीश्वरस्यायुरुत्तमम्।
तस्मात् सदाशिवस्यायुः प्रोक्तं कोटिगुणं बुधैः।
समुद्रगुणितं तस्माच्छिवयोर्देहधारणम्।

इति श्रीलघुबृंहणीमर्यादोपपादितब्रह्मविष्ण्वादिपुरुषायुषप्रवृत्तिपरिपाटी-रूपकालक्रमोत्खण्डनेन यावत्कालतत्त्वं सर्वं पाषाणादिजडपदार्थस्वभावापत्ति-पर्यन्तमिदन्तासाम्राज्यं परमशिवीभावरूपचैतन्योत्कर्षकाष्ठावधिकमहन्ता-सम्पत्संभोगसर्वस्वं चेति सम्भूय विश्वतदुत्तीर्णत्वसामरस्यास्वादसामानाधिकरण्य-रूपं सौभाग्यमन्तःकरणहरणप्रावीण्यलक्षणं श्लाघ्यत्वातिशं लभते स्वपरिस्पन्दा-

त्मकतया प्राप्नोति। अयं भावः—श्रीमद्देशिकनाथकटाक्षपातसमसमयमेव पुंसां स्वहृदयसंवादसौन्दर्यशालिनो जीवन्मोक्षलक्षणस्य पुरुषार्थस्योपलम्भ इत्यत्र न काचिद् विप्रतिपत्तिः। यदुक्तं श्रीत्रिंशिकाशास्त्रे—'सद्यः कौलिकसिद्धिदम्, सद्यो योगविमोक्षदम्' इति च। यथोक्तमाचार्याभिनवगुप्तपादैः—'एतद् यो लभते स लाभकाल एव न पशुः' इति। तादृशस्यैव च भावस्यान्तः परामर्शः क्रिया-समभिहारे तत्तदणिमाद्यैश्वर्यस्वभावो बहिर्विभूतिपरिस्पन्दोऽनुभूयते। तदुक्तं तत्रैव—

एतदभ्यस्यतः सिद्धिः सर्वज्ञत्वमवाप्यते ।। इति।

यद् व्याख्यातमभिनवगुप्तपादैः—'अभ्यासेन विनापि जीवन्मुक्ता परा कौलिकी सिद्धिः' इति। क्षणमात्रेति। क्षणिक एव हि परामर्शः—

सकृज्ज्ञाते सुवर्णे मा भावनाकरणं व्रजेत् ।

इति श्रीशिवदृष्टिदृष्ट्या बहिष्ठेष्वपि पदार्थेष्वसंशयमर्थक्रियामर्थं प्रयोजयति। किमुत स्वस्वभावात्मनि परमेश्वराख्ये भाव इत्यर्थः। यदुक्तं तत्रैव—

एकवारं प्रमाणेन शास्त्राद् वा गुरुवाक्यतः ।
ज्ञाते शिवत्वे तत्रस्थप्रतिपत्त्या दृढात्मना ।।
करणेन नास्ति कृत्यं क्वापि भावनयापि वा । इति।

अत्र पृथगनेकार्थशालिनां सर्वशब्दानामर्थप्रपञ्चप्रस्तावो विस्तारायेत्यलं ग्रन्थगौरवेण। यत् संभूय सर्वसाम्यस्वभावा महार्थसिद्धान्तोपनिषदुन्मील्यते। यदुक्तमागमे—

समता सर्वभावानां वृत्तीनां चैव सर्वशः ।
समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः ।
भूमिकानां च सर्वासामोवल्लीनां च सर्वशः ।
समता सर्वदेवानां वर्णानां चैव सर्वशः ।। इति।

श्रीरत्नमाला में कहा गया है कि जिस भी काल में गुरु निर्विकल्प तत्त्व का उपदेश देते हैं, उसी काल में उनकी शक्तिपातजन्य अनुकम्पा और उनके लोकोत्तर आत्मबल द्वारा साधक मुक्त हो जाता है। वह अमृतस्वभाव चिदाह्लाद और सामरस्याकार जीवन्मुक्ति के महोपभोग (अप्रतिम परमाह्लाद) का आस्वादन करता है।

श्रीत्रिंशकशास्त्र में 'अस्योच्चारे कृते' से लेकर 'फलं यद् वा समीहितम्' पर्यन्त कथनों में भी इसी तथ्य की पुष्टि की गई है। इसमें कहा गया है कि गुरुकृपा-प्राप्त साधक मुहूर्त, प्रहर, वासर आदि के कालक्रम से अपनी साधना एवं सिद्धि की कक्षा में उत्तरोत्तर सिद्धि-उत्कर्ष के व्योम में आरोहण करता हुआ आत्मपरामर्श की अनुस्यूति

में दार्ढ्य योग (दृढ़ता) प्राप्त करता जाता है। इस दार्ढ्य योग के भाववश वह तिर्यक् भाव, मनुष्यत्व, जीवत्व, अमृतत्त्व, जडत्व, अजडत्व आदि के तारतम्य से मुक्त होकर परप्रमाता परमशिव बन जाता है। स्पष्ट है कि 'समना' तक पाशजाल बिछा हुआ है और उन्मना के अन्त में परमशिव का अवस्थान है—

समनान्तं पाशजालमुन्मन्यन्ते परः शिवः।

आचार्य महेश्वरानन्द पूर्वपक्ष की ओर से यह शंका उठाते हैं कि जब तक साधना में कठोर अध्यवसाय, तीव्र उपासनापूर्वक दीर्घकाल तक अभ्यास एवं तप नहीं किया जाता, तब तक सिद्धि नहीं मिलती; फिर इन उपायों एवं कृच्छ्र अभ्यासों के बिना भला भगवदनुग्रह ही कैसे प्राप्त हो जाएगा एवं उसके द्वारा सरलतापूर्वक यामली सिद्धि (भोग-मोक्षसामरस्यात्मक सिद्धि) ही कैसे प्राप्त हो जाएगी। उत्तर पक्ष में इसी शंका के निराकरणार्थ उन्होंने अगली गाथा में कहा है—

खणमेत्तफंसिएण वि अमअसहावेण णेण भावेण।
सव्वोत्तिण्णो सत्वो सत्वइरं लहइ सव्वसोहग्गं।।

गुरुकृपा-प्राप्त योगी विश्वविलासात्मक बन्धनों से उत्तीर्ण होकर एवं शुद्धचैतन्यस्वभाव होकर ब्रह्मायु, विष्णु की आयु, रुद्रायु, ईश्वरायु, सदाशिवायु को अतिक्रान्त करता हुआ परमकालातीत परशिवत्व को प्राप्त करता है। इन पूर्वकथित देवों की आयु का क्रम इस प्रकार है—

ब्रह्मायुषो दशगुणं विष्णोरायुः परं स्मृतम्।
सहस्रगुणितं तस्माद् रुद्रस्यायुः परं किल।।
तस्माल्लक्षगुणं प्रोक्तमीश्वरस्यायुरुत्तमम्।।
तस्मात् सदाशिवस्यायुः प्रोक्तं कोटिगुणं बुधैः।
समुद्रगुणितं तस्माच्छिवयोर्देहधारणम्।।

श्रीमान् देशिकनाथ के कृपाकटाक्ष से उसी समय शिष्य स्वहृदयसंवादात्मक सौन्दर्य से मण्डित होकर जीवन्मुक्तिलक्षणात्मक पुरुषार्थ प्राप्त कर लेता है। इसमें कोई विप्रतिपत्ति नहीं है—श्रीमद्देशिकनाथकटाक्षपातसमसमयमेव पुंसां स्वहृदयसंवादसौन्दर्यशालिनो जीवनमोक्षलक्षणस्य पुरुषार्थस्योपलम्भ इत्यत्र न काचिद् विप्रतिपत्तिः।[1]

साधक 'परमशिवीभावरूपचैतन्योत्कर्षकाष्ठावधिकमहन्तासम्पत्संभोगसर्वस्वं' से लेकर 'विश्वमुत्तीर्णत्वसामरस्यास्वादसामानाधिकरण्यरूपसौभाग्यमन्तःकरणप्रावीण्यलक्षणा से युक्त स्वपरिस्पन्दात्मक' सिद्धोत्कर्ष के अभ्रंलिह शिखर तक पहुँच जाता है।

त्रिंशिकाशास्त्र में शैवशासनोक्त सिद्धि को सद्यःसिद्ध कहा गया है। 'सद्यः लौकिक-

१. परिमल

सिद्धिदम्' एवं 'सद्यो योगविमोक्षदम्' कहकर सिद्धि की कालनिरपेक्षता प्रतिपादित की गई है।

आचार्य अभिनवगुप्त कहते हैं—अभ्यासेन विनापि जीवन्मुक्ता परा कौलिकी सिद्धिः। अर्थात् विना किसी कृच्छ्र अभ्यास के भी जीवन्मुक्तिसंज्ञक परा कौलिकी सिद्धि प्राप्त हो जाती है। क्षणिक परामर्श भी यह कृतकृत्यता प्रदान कर देता है।

शिवदृष्टि में सोमानन्द कहते हैं—

सकृज्जाते सुवर्णे माभावनाकरणं व्रजेत्।

कहा गया है—

एकवारं प्रमाणेन शास्त्राद् वा गुरुवाक्यतः।
ज्ञाते शिवत्वे तत्रस्थप्रतिपत्त्या दृढ़ात्मना।
करणेन नास्ति कृत्यं क्वापि भावनयापि वा।।

इस शैवशासन में प्रतिपादित 'महार्थ सिद्धान्त उपनिषद्' सर्वसाम्यस्वभाव के रूप में उन्मीलित हुआ है।[१]

आगम में इसी साम्यभाव का प्रतिपादन करते हुये कहा गया है कि यह समत्व भाव सभी भावों एवं वृत्तियों में, सभी समस्त दृष्टियों एवं द्रव्यों में, सभी भूमिकाओं, देवताओं एवं वर्णों आदि सभी में होनी चाहिये—

समता सर्वभावानां वृत्तीनां चैव सर्वशः।
समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः।।
भूमिकानां च सर्वासामोवल्लीनां च सर्वशः।
समता सर्वदेवानां वर्णानां चैव सर्वशः।।

यह सर्वसाम्यस्वभाव ही महार्थसिद्धान्त का रहस्यपक्ष है।

गुरु के शक्तिपात की महिमा

नन्वेवमनायाससाध्यमर्थं प्रति प्रमातॄणां सौलभ्याविशेषात् कथं मुक्तामुक्त-व्यवस्था द्वैविध्यव्यवहार इत्याशङ्क्याह—

गूढादो गूढअरो होइ फुडादो वि फुडअरो एसो।
देसिअकडक्खपादे पक्खो पुढमो ण होइ धण्णाणं।।६७।।

(गूढाद् गूढतरो भवति स्फुटादपि स्फुटतर एषः।
देशिककटाक्षपाते पक्षः प्रथमो न भवति धन्यानाम्।।)

सौभाग्यशाली साधकों का गुरु के शक्तिपातमात्र से गूढ़ से गूढ़तर एवं स्फुट से

१. परिमल

स्फुटतर सारे प्राथमिक उभयात्मक व्यवहार समाप्त हो जाते हैं।।६७।।

एष प्राकरणिकतया परामृश्यमानोऽर्थो यः स्थूलसूक्ष्मप्रकटाप्रकाशव्यक्ताव्यक्तक्षराक्षरेति विष्णुपुराणप्रक्रियया प्राकट्यमप्राकट्यं चेत्यात्मन्यवस्थाद्वयमुद्भावयति। तत्र च यदगूढं स्तम्भकुभादि व्यवहारं प्रति। गूढं वेदान्तादिनिर्णीतिमर्थतत्त्वम्। ततोऽप्ययं गूढतरोऽत्यन्तगुह्यो भवति। यदुक्तं श्रीत्रिंशिकाशास्त्रे—

एतद् गुह्यं महागुह्यं कथयस्व मम प्रभो । इति।

यश्चास्फुटमन्तरिक्षप्रसूनादिं प्रति स्फुटः स्तम्भकुम्भादिः प्रकाशमानः प्रमेयप्रपञ्चः, ततोऽपि स्फुटतरः प्रकृष्टप्राकट्यो भवति। तच्च 'सो कस्स फुटो न होइ कुलणाहो' इत्यत्र वितव्य व्याख्यातम्। एवमुभयस्वभावतायामस्य स्वातन्त्र्यव्यतिरेकेण नान्यः कश्चिदुपाधिरुपपद्यते। कथं तर्हि मुक्तामुक्तव्यवस्थेति चेत्? विषयविभागादिति ब्रूमः। तथाहि—देशिकस्य कुलाचार्यस्य कटाक्षपाते शक्तिपाताविनाभूते संभवति धन्यानामपश्चिमजन्मनां केषाश्चित् प्रमातृणां प्रथमः पक्षः पूर्वार्धप्रस्तुतो गूढाद् गूढतर इत्येवंरूपः कल्पो न भवति, किं तर्हि, स्फुटात् स्फुटतर इत्येवमाकारः।

दीयते शिवसद्भावः क्षप्यते पाशसंचयः ।

इति नीत्या दानक्षपणलक्षणदीक्षाविनाभूतो द्वितीय एव तेषां पक्षः सम्पद्यते। ततश्च देशिककटाक्षपातधन्यानां पुंसां परमशिवीभावलक्षणो मोक्षः, तदन्येषां पाशवावेशस्वभावो बन्ध इति व्यवस्थेति तात्पर्यार्थः। अत्र देशो देशना स्वात्मप्रत्यभिज्ञापनारूपरहस्यार्थोपदेशनात्मा स्वभावोऽस्यास्तीति व्युत्पत्त्या गुरुनाथशरीरानुप्रविष्टः परमेश्वर एव कारुण्यादवच्छिन्नप्रमातृरूपं शिष्यमुत्तारयतीत्युद्भाव्यते। यदुक्तमागमे—

कुलाचार्यमधिष्ठाय देवो दीक्षयिता शिवः । इति।

यच्चोक्तं श्रीतन्त्रालोके—

गुरुहृदयनिविष्टः शङ्करोऽनुग्रहीता । इति।

एतेन—

दीक्षया मुच्यते जन्तुः प्रातिभेन तथा प्रिये!।
गुर्वायत्ता तु सा दीक्षा बद्धबन्धनमोक्षणे।।
प्रतिभा स्वस्वभावस्तु केवलीभावसिद्धिदः।।

इति श्रीकिरणप्रक्रियया पुंसां स्वप्रतिभामात्रनिष्पद्यमानमोक्षानुभावानामपि पर्यन्ततः किञ्चिद्देशिकनाथानुग्रहावश्यम्भाव एवेत्युक्तं भवति। येन परमेश्वर-

स्वातन्त्र्याधीनविजृम्भिते विश्वस्मिन्नेतदाज्ञामन्तरेण तेषां तादृक् प्रतिभैव न संपद्यते। परमेश्वरानुप्रविष्टशरीरस्यैव च भगवतो देशिकनाथस्य दीक्षाद्यलौकिकक्रियो-पक्षेपक्षमत्वमिति। तस्य च कटाक्षपाते सतीत्यनेन केवलं चाक्षुष्येव दीक्षाख्यायते। यावदाणवशाक्तशाम्भवाख्यप्रकारत्रयानुप्रविष्टास्तत्तद्देशकालस्वभावानुगुण्या-द्यन्यतमौचित्यशालिनः सर्वेऽपि तत्प्रकाराः परामृश्यन्ते। यतः कटाक्षो नाम गुरोरनुग्राह्यं प्रत्यनुवेशयितुमिष्टा स्वहृदयसंविन्मयी शाम्भव्याद्यशेषदीक्षानुस्यूता दृक्शक्तिरित्याख्यायते। यदाहुः—

सा च सर्वाध्वसंपूर्णमात्रसंविदभेदिना ।
गुरुणाऽनुग्रहधिया शिष्ये यदवलोकनम् ।। इति।

तत्र गुरोर्मन्त्रोद्भावनद्वारा शिष्यस्य श्रवणमात्रप्राधान्येन स्वरूपसमावेश-दायिनी दीक्षाणवी, कुण्डलिनीशक्त्युल्लेखनात्मिका मनोव्यापारानुसन्धेया शाक्ती, सर्वविकल्पवैमुख्येन स्वस्वरूपाविभिन्नशम्भुसमावेशस्वभावा शाम्भवीति विवेकः। एवं शक्तिपातस्य तीव्रतीव्रतरत्वादयोऽपि भेदाः स्वयमूहनीयाः। सर्वथा देशिकनाथचरणशुश्रूषामात्रानुप्राणनमेतत् कौलिकसिद्धान्तानुसन्धानमिति रहस्यम्। यदुक्तं मयैव श्रीपादुकोदये—

गुरुमत्तैव नः शास्त्रे परमं फलमुच्यते । इति।

यच्चोक्तं श्रीमहाभारते—

ऋतस्य दातारमनुत्तरस्य निधिं निधीनां चतुरन्वयानाम् ।
ये नाद्रियन्ते गुरुमर्चनीयं पापाल्लोकांस्ते व्रजन्त्यप्रतिष्ठान् ।। इति।

विष्णुपुराण की दृष्टि—विष्णुपुराण में यह परामृश्यमान अर्थ स्थूल-सूक्ष्म, प्रकट-अप्रकट, प्रकाशित-अव्यक्त, व्यक्त-अक्षर और इस प्रकार प्रकट एवं अप्रकटरूप में (आत्मा में) दो अवस्थाओं में उद्भावित किया गया है। स्तम्भ एवं कुम्भादिक के प्रति किए गये व्यवहार के प्रसंग में तो यह अर्थ अगूढ़ है। वेदान्त आदि दर्शनशास्त्रों में अर्थों की जो मीमांसा की गई है, वे गूढ़ हैं। यह गूढ़तर अर्थ अत्यन्त गुह्य है।

त्रिंशिकाशास्त्रकार की दृष्टि—एतद् गुह्यं महागुह्यं कथयस्व मम प्रभो। कुलाचार्य (देशिक) के शक्तिपात (कटाक्ष) से प्रथम पक्ष (गूढ़ से गूढ़ से स्फुट से स्फुटतर प्रथमावस्था) की स्थिति मिट जाती है—नहीं रह जाती है।

द्वितीय पक्ष क्या है? दीक्षा (दानक्षपणलक्षणात्मक दीक्षा) ही द्वितीय पक्ष है, जो कि सम्पन्न हो जाती है—दानक्षपणलक्षणदीक्षाविनाभूतो द्वितीय एव तेषां पक्षः सम्पद्यते (परिमल)।

दीक्षातत्त्व

दीक्षा शास्ता की एक शक्ति है शक्तिपात है। इसके दो पक्ष हैं—दान एवं क्षपण—

दीयते शिवसद्भावः क्षप्यते पाशसञ्चरः।

देशिक के कृपाकटाक्षपातजन्य शक्तिपात से धन्य हुये लोगों को परमशिवीभाव-लक्षणात्मक मोक्ष प्राप्त होता है; किन्तु अन्य लोगों को, जो कि पाशवावेशस्वभाव वाले हैं, उन्हें बन्धनपाश में परिबद्ध होना पड़ता है—'देशिककटाक्षपातधन्यानां पुंसां परमशिवीभावलक्षणो मोक्षः तदन्येषां पाशवावेशस्वभावो बन्ध इति व्यवस्था।'

शैवशासन में जो देशना होती है, वह स्वात्मप्रत्यभिज्ञापनात्मक, रहस्यार्थोपदेशनात्मा स्वभावात्मक होती है एवं इसमें परमेश्वर गुरुनाथ के शरीर में अनुप्रविष्ट होते हैं।

परमेश्वर का गुरु में यह प्रवेश शिष्य को बन्धन से मुक्त करने, संसार-सागर से तारने हेतु की गई करुणामात्र होती है—अत्र देशना स्वात्मप्रत्यभिज्ञापनारूपरहस्यार्थोपदेशनात्मा स्वभावोऽस्यास्तीति व्युत्पत्त्या गुरुनाथशरीरानुप्रविष्टः परमेश्वर एव कारुण्यादवशाच्छिन्नप्रमातृरूपं शिष्यमुत्तारयतीत्युद्भाव्यते।

आगम में भी कहा गया है—

कुलाचार्यमधिष्ठाय देवो दीक्षयिता शिवः।

इस कारुण्यनिःसृता दीक्षा से प्राणी मुक्त हो जाता है और उसे केवलीभाव की भी प्राप्ति होती है—

दीक्षया मुच्यते जन्तुः प्रातिभेन तथा प्रिये।
गुर्वायत्ता तु सा दीक्षा बद्धबन्धनमोक्षणे।
प्रतिभा स्वस्वभावस्तु केवलीभावसिद्धिदः।।

जिन योगियों में अपनी विशिष्ट प्रतिभा की शक्ति द्वारा मोक्षानुभव निष्पद्यमान है, उन्हें भी देशिक की कृपा (चाहे थोड़ी मात्रा में ही अपेक्षित क्यों न हो, किन्तु) आवश्यक है—पुंसां स्वप्रतिभामात्रनिष्पद्यमानमोक्षानुभावानामपि पर्यन्ततः किञ्चिद्देशिकनाथानुग्रहावश्यम्भाव एवेत्युक्तं भवति।

कारण यह है कि पारमेश्वरी स्वातन्त्र्य शक्ति के अधीनस्थ एवं उसके विजृम्भण के परिणामरूप इस विश्व में शक्ति की कृपा के बिना प्रतिभा भी प्राप्य नहीं है। परमेश्वरानुप्रविष्ट शरीर वाले देशिकनाथ (गुरु) की दीक्षादिक अलौकिक क्रिया द्वारा ही शिष्य में शक्ति का सञ्चार होता है। चूँकि गुरु के कटाक्षपातमात्र से दीक्षा सम्पन्न हो जाती है; अतः इस दीक्षा को 'चाक्षुषी दीक्षा' कहते हैं—तस्य च कटाक्षपाते सतीत्यनेन केवलं चाक्षुष्येव दीक्षाख्यायते।

चूँकि देशिकनाथ आणव, शाक्त एवं शांभव नामक तीन उपाय-मार्ग से शिष्य

के शरीर में अनुप्रविष्ट होते हैं; अत: दीक्षा भी मुख्यत: तीन प्रकार की होती है— आणवी दीक्षा, शाक्ती दीक्षा एवं शांभवी दीक्षा।

देशिककटाक्षपाते पदावली (गाथा क्र. ६७) में प्रयुक्त 'कटाक्ष' शब्द गुरु द्वारा अनुग्राह्य शिष्य के प्रति अनुवेशाभिलाषिणी, स्वहृदयसंविन्मयी शांभवी दीक्षा शक्ति के स्वरूप में अनुस्यूत है; अत: इसे दृक्शक्ति कहते हैं—

सा च सर्वाध्वसम्पूर्णमात्रसंविदभेदिना।
गुरुणाऽनुग्रहधिया शिष्ये यदवलोकनम्।।

चाक्षुषी दीक्षा—महेश्वरानन्द कहते हैं—

(क) तस्य च कटाक्षपाते सतीत्यनेन केवलं चाक्षुष्येव दीक्षाख्यायते।

(ख) यत: कटाक्षो नाम गुरोननुग्राह्यं प्रत्यनुवेशयितुमिष्टा स्वहृदयसंविन्मयी शाम्भव्याद्यशेषदीक्षानुस्यूता दृक्शक्तिरित्याख्यायते।

(ग) सा च सर्वाध्वसम्पूर्णमात्रसंविदभेदिना।
गुरुणाऽनुग्रहधिया शिष्ये यदवलोकनम्।।

आणवी दीक्षा—गुरु द्वारा मन्त्रोद्भावन-प्रक्रिया से शिष्य को श्रवणमात्रप्रधाना तथा स्वरूपसमावेशदायिनी दीक्षा आणवी दीक्षा कहलाती है। महेश्वरानन्द कहते हैं—तत्र गुरोर्मन्त्रोद्भावनद्वारा शिष्यस्य श्रवणमात्रप्राधान्येन स्वरूपसमावेशदायिनी दीक्षाणवी।

शाक्ती दीक्षा—कुण्डलिनीशक्त्युल्लेखनात्मिका मनोव्यापारानुसन्धेया शाक्ती। यह मनोव्यापारानुसन्धेया है और कुण्डलिनी शक्ति के जागरण एवं ऊर्ध्वारोहण के मार्ग की सम्पादिका है।

शाम्भवी दीक्षा—समस्त विकल्पों के वैमुख्य से युक्त स्वस्वरूप से अपृथक् एवं शम्भुसमावेशस्वभावा दीक्षा ही शाम्भवी दीक्षा है। महेश्वरानन्द कहते हैं—सर्वविकल्पवैमुख्येन स्वस्वरूपाविभिन्नशम्भुसभावेशस्वभावा शाम्भवीति विवेक:।

इन दीक्षाओं में जो शक्तिपात किया जाता है, वह तीव्र, तीव्रतर आदि के भेद से अनेक प्रकार के हैं।

कौलिकसिद्धान्तानुसन्धान का रहस्य तो यही है कि देशिकनाथ के चरणों की सेवा से ही यह दीक्षाशक्ति अनुप्राणित है। इसके अतिरिक्त यह अन्य कुछ भी नहीं है—सर्वथा देशिकनाथचरणशुश्रूषमात्रानुप्राणनमेतत् कौलिकसिद्धान्तानुसन्धानमिति रहस्यम्।

पादुकोदय में भी इसी तथ्य की पुष्टि की गई है—

गुरुमत्तैव न: शास्त्रे परमं फलमुच्यते।

महाभारत में कहा गया है—

ऋतस्य दातारमनुत्तरस्य निधिं निधीनां चतुरन्वयानाम्।
ये नाद्रियन्ते गुरुमर्चनीयं पापाल्लोकांस्ते व्रजन्त्यप्रतिष्ठान्।।

यहाँ चार श्रोत बताये गये हैं। ये चारो भी परमेश्वर-प्रणीत हैं और अन्तर्वेत्ता इनका भी आदर करते हैं। यहाँ अनुत्तराम्नायानुशीलन के प्राचुर्य के कारण पुरुषार्थ के उपाय के रूप में गृहीत किया गया है। शैव शासन में इसका प्रयोजकत्व तो नहीं है; किन्तु फिर भी गाथा क्र. ६८ में इसका उल्लेख अवश्य किया गया है और कहा गया है—

आस्तामन्या विद्या चतु:स्रोतसामपि सागराणामिव।
एनमेवामृतमयं मथ्नाति मन्थानभैरवो देव:।।

बन्धन और मोक्ष—बन्धन क्या है और मोक्ष क्या है? महेश्वरानन्द कहते हैं—

(क) पाशवावेशस्वभाव ही बन्धन है—तदन्येषां पाशवावेशस्वभावो बन्ध इति व्यवस्था।

(ख) गुरु के अनुग्रह से प्राणियों का परमशिवीभाव ही मोक्ष है—ततश्च देशिक-कटाक्षपातधन्यानां पुंसां परमशिवीभावलक्षणो मोक्ष: (परिमल)।

देशिक और देशना—देशिक = गुरु। देशना का स्वरूप क्या है? महेश्वरानन्द कहते हैं—अत्र देशना स्वात्मप्रत्यभिज्ञापनारूपरहस्यार्थोपदेशनात्मा स्वभावोऽस्यास्तीति व्युत्पत्त्या गुरुनाथशरीरानुप्रविष्ट: परमेश्वर एव कारुण्यादवच्छिन्नप्रमातृरूपं शिष्यमुत्तारयतीत्युद्भाव्यते।

आगम में कहा गया भी कहा है—

कुलाचार्यमधिष्ठाय देवो दीक्षयिता शिव:।

अपनी प्रतिभा से प्राप्त मोक्ष के केन्द्र में भी किसी देशिक की शक्ति निहित रहती है—स्वप्रतिभामात्रनिष्पद्यमानमोक्षानुभावानामपि पर्यन्तत: किञ्चिद्देशिकनाथानुग्रहावश्यम्भाव एव।

पारमेश्वरानुग्रह की प्रेरणा से देशिकनाथ साधक के शरीर में प्रविष्ट होकर दीक्षादिक अलौकिक क्रियाओं के द्वारा साधक को मोक्ष प्राप्त कराते हैं। चाक्षुष्य दीक्षा क्या है? 'तस्य च कटाक्षपाते सतीत्यनेन केवलं चाक्षुष्येव दीक्षाख्यायते।' इसी प्रकार आणव, शाक्त, शाम्भव नाम वाली दीक्षायें भी होती हैं।

कटाक्ष—कटाक्ष का क्या अर्थ है? 'यत: कटाक्षो नाम गुरोरनुग्राह्यं प्रत्यनुवेशयितुमिष्टा स्व-हृदयसंविन्मयी शाम्भव्याद्यशेषदीक्षानुस्यूता दृक्शक्तिरित्याख्यायते।' कहा भी गया है—

सा च सर्वाध्वसम्पूर्णमात्रसंविदभेदिना।
गुरुणाऽनुग्रहधिया शिष्ये यदवलोकनम्।।

मन्थानभैरवोक्त अमृतात्मिका विद्या की सर्वोच्चता

ननु स्रोतांसि हि चत्वारि परमेश्वरप्रणीतान्यन्तर्विद्भिराद्रियन्ते। अत्र त्वनुत्तराम्नायानुशीलनं प्राचुर्यात् पुरुषार्थोपायतया प्रत्यपादि। तदत्राप्रयोजकत्वमन्यत्रानाश्वासशङ्का वा प्रसज्येत। येनोभयत्राप्यनौचित्यमित्याशङ्क्याह—

अच्चउ अण्णा विज्जा चउसोत्ताणं वि साअराणं व।
एणं चिअ अमअमअं मन्थइ मन्थाणभेरवो देवो ॥६८॥

(आस्तामन्या विद्या चतुःस्रोतसामपि सागराणामिव।
एनमेवामृतमयं मथ्नाति मन्थानभैरवो देवः॥)

चारों स्रोतों वाले समुद्र के समान ज्ञान, अर्चा, सांख्य, योग, वेदान्त, न्याय, वैशेषिक, मीमांसा एवं अन्य विद्यायें चुपचाप बैठ जायँ (विश्राम करें) या ठहर जायँ। अमृतात्मिका विद्या तो मात्र यही है, जिसका भगवान् मन्थानभैरव (शिव) मन्थन किया करते हैं॥६८॥

परमेश्वरो हि सर्वानुग्राहकतया—

पुष्पे गन्धस्तिले तैलं देहे जीवो जलेऽमृतम्।
यथा तथैव शास्त्राणां कुलमन्तः प्रतिष्ठितम्॥

इति श्रीतन्त्रालोकस्थित्या श्रुतिस्मृत्यादिषु बाह्यविद्यासु कौलिक्येवावगाह्येति, श्रीमत्स्रोतश्चतुष्टये चैनमेवार्थमुपसन्नं जनमनुभावयितुमुद्भावयतीत्यस्मन्निश्चयः। यदाशयेन—

सांख्यं योगं पाञ्चरात्रं वेदांश्चैव न निन्दयेत्।

इत्यागमेष्वाख्यायते। तत्र—

न्यायागमादि मदुपेक्षितमप्यसारं
स्वीकृत्य केचिदधिकं मदमुद्वहन्ति।
निर्माल्यमुज्झितमपि प्रभुणा पृथिव्यां
चेट्यो हि मूर्ध्नि विनिवेश्य परिभ्रमन्ति॥

इति नीत्या बाह्यत्वेनावभासमानत्वादन्यतयाभिमता सांख्ययोगादिस्वभावा विद्या तावदास्ताम्, अनुत्थानमेवास्या भवतु। विद्येति जातावेकवचनम्। अलमत्र श्रुतिस्मृत्यादीनां बाह्यविद्यानां महार्थोपायतया प्रत्यायनप्रागल्भ्येनेति यावत्। तच्च 'सण्णाविसेसणिण्णअ' (श्लोक २) इत्यत्र विस्तीर्य पर्यालोचितम्। यानि पुनरलौकिकानि वैतत्यगाम्भीर्याक्षोभ्यत्वादिसाधर्म्येण समुद्रस्थानीयानि चत्वारि पूर्वदक्षिणादिक्रमेण परमेश्वरमुखचतुष्टयप्रणीतानि स्रोतांसि स्वच्छस्वादुशीतला-

भ्यन्तराह्लादरसोत्तरतया स्वात्मसंवित्प्रवाहरूपा आज्ञाः, तेषां सम्बन्धिनमन्तस्तात्पर्यकक्ष्यारूढतया गूढस्वभावमेनमेवामृतमयं स्वसंविदात्मना केनचिदाह्लादेन प्रकृतमर्थातिशयं मन्थानभैरवात्मा देवो मथ्नाति। तत्तत्स्रोतःप्रतिपाद्यार्थान्तरानादरोत्तरं स्वात्मशक्त्या पृथक् पिण्डीकृत्योत्थापयति। एतदुक्तं भवति—बाह्यविद्यासु नृत्तगीतप्रभृतयोऽपि कलाः स्वस्फुरत्तानुसन्धानावस्थायां सहृदयहृदयसंविदैकाग्र्यलक्षणस्य चमत्कारोत्कर्षस्य प्रयोजकतया पर्यन्ततो महान्तमेवार्थमुन्मीलयन्ति, किमुत वेदशास्त्रेतिहासपुराणादयः। केवलं तेषां पारम्पर्यादुपायभूतत्वमेव भेद इत्यत्र वन्ध्यो वाकोवाक्योपन्यासप्रबन्धः। अलौकिके तु स्रोतश्चतुष्टये ज्ञानयोगक्रियाचर्याप्राधान्येन पृथक् पृथगुपपादितार्थान्तरप्रपञ्चेऽप्यन्ततो गत्वा प्राप्यभूमिकात्वेनायमेवार्थोऽवस्थाप्यते। यदुक्तमागमे—'चतुराज्ञाकोशभूताम्' इति। यच्च व्याख्यातमस्मत्परमगुरुभिः श्रीमदृजुविमर्शिन्याम्—'चतुष्पीठाधिष्ठातृमहासंविदालम्बनेन प्रवृत्तचतुःस्रोतोरूपा महापदवी चतुराज्ञा, तस्याः कोशभूता महाधिष्ठात्री शेवधिस्ताम्' इति। यच्चोक्तं श्रीक्रमकेलौ—'वामदक्षिणतन्त्रादिष्वप्येतन्मयमेव सर्वं निर्वहतीति मन्तव्यम्' इति। एवञ्च सर्वदर्शनसारत्वादमुष्य श्रीमहार्थक्रमस्य सर्वस्रोतोतिशायी कोऽपि श्यालघ्यत्वोत्कर्षं ध्वन्यते। यदुक्तं श्रीमहानयप्रकाशे—

एवंविधं यदधिगन्तुमिहात्मतत्त्वं
मिथ्याविकल्पविभवोद्दलनं च सम्यक्।
युक्तिं महानयमयीं न विहाय शक्यं
सर्वोत्तमोत्तमतमो हि ततो महार्थः।। इति।

अत एव ह्यन्यत्राशरणानामेतदेकशरणत्वमत्यन्तदुर्घटघटनप्रागल्भ्योद्भटमुद्घाट्यते। यदाहुः—

सर्वोपायपरिक्षीणास्ते महार्थार्थिनः किल। इति।
अस्ति नान्या गतिस्तेषां विकल्पग्राससाहसात्। इति च।

'यश्चायमेवंविधार्थमथनप्रगल्भो भगवान्, अत एव सर्वपर्यन्तप्रतिष्ठास्थानरूपो यः कुलेश्वरः, स एव यतः स्वशक्तिं निर्मथ्य सृष्ट्यादिकारी, अत एवंविधं श्रीमन्थानं भैरवं नमामीति सम्बन्धः' इति श्रीक्रमकेलिक्लृप्त्या स्वेच्छामात्रविजृम्भितविश्वक्षोभतयाऽनुभूयते। तस्य कौलिकेषु तन्त्रेषु भैरव इति प्रायो व्यपदेशो भवति। भीरवः संसारचकिताः प्राणिनः, तेषामयमभयप्रदायितया सम्बन्धीति वा, भीः संसारचाकित्यं तन्निबन्धनो रवः प्राणिनामाक्रन्दस्तस्य प्रवर्तक इति वा, प्रतिपादितचाकित्यनिवृत्तये मनसि परामृश्यतया वर्तत इति वा, भियं पशु सम्बन्धिनीमुद्दिश्य

रवणं यच्छ(ब्दं?ब्दनं) तत्स्वभावानां माहैश्वर्यादीनां वर्गाधिष्ठात्रीणां स्वामीति वा, लोकसम्बन्धिनीं भियं रौति दातव्यतया परामृशतीति भीरुर्मृत्युकालादिरवच्छिन्नो भयङ्करवर्गस्तस्यापि भयङ्कर इति वा, भानि नक्षत्रोपलक्षितानि चन्द्रसूर्यादीनि ज्योतींषि तानीरयति प्रेरयतीति भेरः कालस्तं वाययन्ति शोषयन्तीति भेरवाः कालग्रासरसिका महायोगिनस्तेषामधिष्ठातेति वा, विश्वं प्रति भरणरमणवसनानां प्रयोजयितेति वा भैरव इत्युच्यते। यदुक्तं श्रीक्षेमराजेन—

भीरूणामभयप्रदो भवभयाक्रन्दस्य हेतुस्ततो
हृद्धाम्नि प्रथितश्च भीरवरुचामीशोऽन्तकस्यान्तकः।
भेरं वायति यः सुयोगिनिवहस्तस्य प्रभुर्भैरवो
विश्वस्मिन् भरणादिकृद् विजयते विज्ञानरूपः शिवः ।। इति।

स च देवः, दीव्यतेः क्रीडाविजिगीषाद्यनेकार्थाभिधानसामर्थ्यात्। तत्र हेयोपादेयतादिविकल्पवैमुख्येन स्वसंविदेकघनतयोच्चलनं क्रीडा। सर्वोत्कर्षेण वर्तितुमौन्मुख्यं विजिगीषा। निर्विकल्पेऽप्यात्मनि विकल्पप्रथापरामर्शो व्यवहारः। अवभास्याशेषप्रपञ्चावभासनाविनाभूता स्वयम्प्रकाशता द्युतिः। स्वरूपलाभमारभ्य सर्वाम्नायप्रवृत्तिपर्यवसानास्पदत्वं स्तुतिः। सृष्ट्यादिषु कृत्येष्विच्छाज्ञानक्रियात्मकशक्तित्रयाङ्गीकारो गतिरिति। तदुक्तं मयैव—

नैश्चिन्त्योत्कटमुच्चलन्नभिलषन् सर्वोत्तरं वर्तितुं
स्वस्मिन् भेदमभेदितेऽपि विमृशन् स्वात्माविशेषं स्फुरन्।
अर्थानामुदयव्ययप्रकृतिभूरुच्छ्रायवानिच्छया
देवो दृक्क्रिययोः प्रदीप्तमहिमा भावेषु वो दीव्यतु ।।६८।।

तन्त्रालोक की दृष्टि—तन्त्रालोक में कहा गया है कि जिस प्रकार पुष्प में परिमल, तिल में स्नेह (तैल), देह में जीवात्मा और जल में अमृत प्रतिष्ठित है, ठीक उसी प्रकार समस्त शास्त्रों के मध्य कुलशास्त्र (कुलामृत) प्रतिष्ठित है—

पुष्पे गन्धस्तिले तैलं देहे जीवो जलेऽमृतम्।
यथा तथैव शास्त्राणां कुलमन्तःप्रतिष्ठितम्।।

श्रुति-स्मृति आदि बाह्य विद्याओं में मात्र कौलिकी विद्या (कुलामृत) ही अवगाह्य है—श्रुतिस्मृत्यादिषु बाह्यविद्यासु कौलिक्येवावगाह्येति।[1]

वेद-शास्त्र-पुराण आदि उस महार्थ तत्त्व के बाह्यवर्ती एवं पारम्परिक उपाय हैं; किन्तु तुलनात्मक दृष्टि से ये वन्ध्यावत् हैं। अलौकिक स्रोतचतुष्टय ज्ञान-योग की क्रियाओं को प्राधान्य देने के कारण पृथक्-पृथक् अर्थान्तरों को उपपादित करने के कारण अन्त-

१. स्वोपज्ञ परिमल

तोगत्वा प्राप्य भूमिका के रूप में उस महार्थ को प्राप्त कराने में सहायक ही हैं।

ऋजुविमर्शिनी में कहा गया है—चतुष्पीठाधिष्ठातृमहासंविदालम्बनेन प्रवृत्तचतुः-स्रोतोरूपा महापदवी चतुराज्ञा, तस्याः कोशभूता महाधिष्ठात्री शेवधिस्ताम्।

क्रमकेलि में भी कहा गया है—वामदक्षिणतन्त्रादिष्वप्येतन्मयमेव सर्वं निर्वहतीति मन्तव्यम्।

समस्त दर्शनों का सारभाग होने के कारण महार्थक्रम सर्वस्रोतोऽतिशायी है और श्लाघ्योत्कर्ष पर समारूढ़ है।

महानयप्रकाश में भी कहा गया है—

एवंविधं यदधिगन्तुमिहात्मतत्त्वं,
मिथ्याविकल्पविभवोद्दलनं च सम्यक्।
युक्तिं महानयमयीं न विहाय शक्यं
सर्वोत्तमोत्तमतमो हि ततो महार्थः।।

अन्य उपायों की शरण में जाने की अपेक्षा यही उपाय सर्वोत्तम है; क्योंकि महार्थियों के लिये सारे उपाय परिक्षीण हैं—

सर्वोपायपरिक्षीणास्ते महार्थार्थिनः।
किल अस्ति नान्या गतिस्तेषां विकल्पग्राससाहसात्।।

क्रमकेलि में कहा गया है कि—यश्चायमेवंविधार्थमथनप्रगल्भो भगवान् अतएव सर्वपर्यन्तप्रतिष्ठास्थानरूपो यः कुलेश्वरः, स एव यतः स्वशक्तिं निर्मथ्य सृष्ट्यादिकारी, अत एवंविधं श्रीमन्थानभैरवं नमामीति सम्बन्धः।

क्लृप्ति द्वारा स्वेच्छामात्र से विजृम्भित विश्व क्षेमरूप में अनुभूत होता है। ज्ञान के स्रोतचतुष्टय (श्रुति, स्मृति, आगम आदि) में इस कुलामृतात्मक कौलानुशासन के उपसन्न अर्थ का अनुभव कराने हेतु इस ज्ञान की उद्भावना की गई है।

आगमों में भी यह तो कहा ही गया है कि—

सांख्यं योगं पाञ्चरात्रं वेदाश्चैव न निन्दयेत्।

तथापि आगमों में यह भी कहा गया है कि—

न्यायागमादि मदुपेक्षितमप्यसारं
स्वीकृत्य केचिदधिकं मदमुद्वहन्ति।
निर्माल्यमुज्झितमपि प्रभुणा पृथिव्यां
चेट्यो हि मूर्ध्नि विनिवेश्य परिभ्रमन्ति।।

आचार्य महेश्वरानन्द कहते हैं कि सांख्य-योगप्रभृति सभी दर्शन बाह्यवर्ती हैं

और बाह्यत्वेनावभासमान विद्यायें हैं; अत: अब ये रुक जायें—ठहर जायँ; क्योंकि इनका अनुत्थान ही औचित्यपूर्ण होगा। जो श्रुतियाँ एवं स्मृतियाँ हैं, ये भी बाह्य विद्यायें हैं। यद्यपि ये महार्थ के उपाय हैं और महार्थ के प्रत्यायन में सहयोगी हैं तथापि उपायमात्र हैं; उपेय नहीं।

पूर्व, दक्षिण, पश्चिम एवं उत्तर के नाम से प्रथित भगवान् शिव के चारो मुखों द्वारा जो आम्नायचतुष्टयस्वरूप (विद्याओं के चार स्रोतरूपी) महार्णव है, उसमें निर्मल, स्वादिष्ट, शीतल और आभ्यन्तर आह्लाद रसस्वरूप स्वात्मसंवित् प्रवाह विद्यमान है। उस अमृतात्मक पयोनिधि को भगवान् मन्थानभैरव स्वसंवित् रूप मथानी से अतीवाह्लादपूर्वक मथते हैं; वही है—शैवशासन का अमृत।

बाह्य विद्याओं में नृत्य-गीत आदि कलायें सम्मिलित हैं। स्वस्फुरत्तानुसन्धान की अवस्था में सहृदयों के हृदय में विद्यमान संवित् की एकाग्रता के स्वरूप वाले चमत्कारोत्कर्ष के प्रयोजक होने पर ही नृत्य-गीत आदि उत्कृष्ट आनन्द प्रदान करते हैं; अन्यथा नहीं। कौलिक तन्त्रों में प्राय: भैरव शब्द द्वारा ही महार्थ या परासत्ता को द्योतित किया जाता है।

भैरव—भैरव का अर्थ क्या है—

१. भीरव:—संसारचकिता: प्राणिन: तेषामयमभयप्रदायितया सम्बन्धीति वा।

२. भी: संसारचाकित्यं तन्निबन्धनो रव: प्राणिनामाक्रन्दस्तस्य प्रवर्तक इति वा।

३. प्रतिपादितचाकित्यनिवृत्तये मनसि परामृश्यतया वर्तत इति वा।

४. भियं पशुसम्बन्धिनीमुद्दिश्य रवणं यच्छब्दनं तत्स्वभावानां माहैश्वर्यादीनां वर्गाधिष्ठात्रीणां स्वामीति वा।

५. लोकसम्बन्धिनीं भियं रौति दातव्यतया परामृशतीति।

६. भीरुर्मृत्युकालादिरवच्छिन्नो भयङ्करवर्गस्तस्यापि भयङ्कर इति वा।

७. भानि नक्षत्रोपलक्षितानि चन्द्रसूर्यादीनि ज्योतींषि तानीरयति प्रेरयतीति।

८. भेर: कालस्तं वाययन्ति शोषयन्तीति भेरवा:।

९. कालग्रासरसिका महायोगिनस्तेषामधिष्ठातेति वा।[१]

१०. विश्वं प्रति भरणरमणवसनानां प्रयोजयितेति वा भैरव इत्युच्यते।

आचार्य क्षेमराज कहते हैं—

भीरूणामभयप्रदो भवभयाक्रन्दस्य हेतुस्ततो
हृद्धाम्नि प्रथितश्च भीरवरुचामीशोऽन्तकस्यान्तक:।
भेरं वायति य: सुयोगिनिवहस्तस्य प्रभुर्भैरवो
विश्वस्मिन् भरणादिकृद् विजयते विज्ञानरूप: शिव:।।

देव किसे कहते हैं? देव: दीव्यते: क्रीड़ा विजिगीषाद्यनेकार्थाभिधानमानर्थ्यात्।[२]

१-२. परिमल

विश्वात्मिका क्रीड़ा का कर्णधार भी तो शिव है। विश्वरूप क्रीड़ा का स्वरूप क्या है? हेयोपादेयता आदि विकल्पों के वैमुख्य से स्वसंवित्तत्त्व की घनता के स्वरूप में उसका उच्चलन ही क्रीड़ा है—'तत्र हेयोपादेयादिविकल्पवैमुख्येन स्वसंविदेकघनतयोच्चलनं क्रीडा।' इसी प्रसंग में अन्य परिभाषायें लें, यथा—

(क) सर्वोत्कर्षेण वर्तितुमौन्मुख्यं विजिगीषा।
(ख) निर्विकल्पेऽप्यात्मनि विकल्पप्रथापरामर्शो व्यवहार:।
(ग) अवभास्याशेषप्रपञ्चावभासनाविनाभूता स्वयम्प्रकाशता द्युति:।
(घ) स्वरूपलाभमारभ्य सर्वाम्नायप्रवृत्तिपर्यवसानास्पदत्वं स्तुति:।
(ङ) सृष्ट्यादिषु कृत्येष्विच्छाज्ञानक्रियात्मकशक्तित्रयाङ्गीकारो गतिरिति।[1]

इसी भाव को प्रसंगान्तर में इस प्रकार कहा गया है—

नैश्चिन्त्योत्कटमुच्चलन्नभिलषन् सर्वोत्तरं वर्तितुं
स्वस्मिन् भेदमभेदितेऽपि विमृशन् स्वात्माविशेषं स्फुरन्।
अर्थानामुदयव्ययप्रकृतिभूरुच्छ्रायवानिच्छया
देवो दृक्क्रिययो: प्रदीप्तमहिमा भावेषु वो दीव्यतु।।[2]

आवागमनात्मक संसरण से मुक्ति

ननु कथमत्यन्तभिन्नमन्त्रतन्त्रपद्धतिपारम्पर्यादिप्रकारस्याप्यस्य स्रोतश्चतुष्टयस्य फलोत्पत्तिं प्रत्येतदैकरूप्यमित्याकाङ्क्षामधिक्षिपन् प्रक्रान्तस्य महातन्त्रस्य निष्कृष्टमर्थतत्त्वं संग्रहेणोद्घाटयितुमाह—

हन्त रहस्सं भणिमो मूढा! मा भमह गब्भगोलेसुं।
अच्चासण्णं हिअअं पज्जालोएह तस्स उज्जोअं।।६९।।

(हन्त रहस्यं भणामो मूढा! मा भ्रमत गर्भगोलेषु।
अत्यासन्नं हृदयं पर्यालोचयत तस्योद्योगम्।।)

बड़े दु:ख का विषय है कि तुम गर्भचक्र में भटक रहे हो। मैं गूढ़ रहस्यतत्त्व को उद्घाटित कर रहा हूँ। तुम जन्म-मरण के संसरणचक्ररूप गर्भ-गह्वर में मत भटकते रहो।।६९।।

हे मूढा:! मायामोहमालिन्यकज्जलकलुषितात्मान:, तत एव शरीराद्यहन्तानुसन्धानवन्त: प्रमातार:! वयमेते केचन देशिककटाक्षपातप्रत्यक्षितात्यैश्वर्योच्छ्राया: परानुजिघृक्षावेशवैवश्याक्रान्तचित्तवृत्तयश्च सन्त:—

तदेतत् परमं गुह्यं योगिनीनां मुखे स्थितम्।

१-२. परिमल

इति स्थित्या गोप्यमर्थतत्त्वं भणामो वैखरीवाक्पर्यन्तं परामृशामः। अन्याभिमुखीकारादुक्तरूपसंरम्भोपन्यासो हि तन्मनसि तादृक्परामर्शार्पणं विना न सङ्गच्छते। अन्यथा वैखर्या वैयर्थ्यप्रसङ्गादित्यामन्त्र्यमाणान् पुरुषविशेषानर्थतत्त्वं किञ्चित् परामर्शयाम इत्युक्तं भवति। तत्र भणितव्यमर्थमवस्थाप्य मध्ये तदपरिज्ञानोपाधिकमुपद्रवाधिक्यं तत्परिज्ञानप्ररोचनातात्पर्येणोपपाद्यते—मा भ्रमत गर्भगोलेष्विति। किमिति जननीजठरगह्वरान्तर्वासक्लेशमनुभवताऽनायासेन कस्मिंश्चित् तत्प्रतीकारोपाये विद्यमानेऽपीति यावत्। मा भ्रमतेति गर्भगह्वरभ्रमणनिषेधाभिधानेन वक्ष्यमाणस्यार्थस्य तत्प्रतिबन्धपाटवं प्रत्यव्यभिचारो व्यज्यते। गर्भवासो ह्युपद्रवानुभूतीनां परा भूमिः। भ्रमणेन च तस्य 'मातापितृसहस्राणि' इति न्यायादनेककालानुवृत्तत्वमाक्षिप्यते। तच्च जननम्—'जातस्य हि ध्रुवो मृत्युः' इति भगवद्गीतानीत्या, 'विनाशाघ्रात उत्पादः' इति श्रीमत्क्षेमराजोक्त्या च मरणानुभूत्यविनाभूतं तदुभयान्तर्भूतं चाखिलमपि दुःखानुभूतिबाहुल्यमिति जन्ममय्या पीडया सर्वमपि संसारव्यसनमुपसंगृह्यते। यदाशयेनोक्तं श्रीलघुभट्टारके—

ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः। इति।

अथ भणितव्यमेवार्थं भणितुमस्यात्यन्तसुलभत्वोपपादनद्वारा पीठिकां बध्नाति—अत्यासन्नं हृदयमिति। यदिदं षडध्वोल्लासमष्टिरूपस्य स्वशरीरस्यानुप्राणनतयाऽवतिष्ठमानमविकल्पावस्थायां तदुत्तीर्णोल्लेखं च सत्प्रकाशविमर्शद्वितयमेलापलक्षणमन्तस्तत्त्वं हृदयमित्युच्यते, तस्य पर्वताग्रनदीतीरादिवन्न कदाचिदनासत्तिशङ्का सम्भवति, स्वस्वरूपाविभिन्नत्वादेतदासत्तिं प्रत्यतिशयस्यानुभूयमानत्वात्। तादृशस्य चास्य य उद्योगो यतः कुतश्चिदप्याकारादौदासीन्यापहस्तनस्वभावमुद्यन्तृत्वम्, तत् परित इच्छाज्ञानक्रियापरिस्पन्दप्रवर्तिताशेषविश्वव्यवहारप्रथापरामर्शपूर्वकमालोचयत आत्मानुकूल्यादवलोकयध्वम्। यस्मिन्नेकत्रैव साध्ये चतुःस्रोतःप्रवर्तिता मन्त्रतन्त्रादयः प्रभञ्जनाभिव्यञ्जन इव व्यजनवातायनवस्त्राञ्चलभस्त्रिकाफूत्कारप्रभृतयो बहुप्रकारमुपाया उपपाद्यन्ते। येन च क्षणमात्रानुबद्धेनापि जननमरणाद्यशेषोपद्रवव्युदासशाली जीवन्मोक्षलक्ष्मीमहोपभोगः सम्पद्यते। स चोद्योगः कदाचिदिन्द्रियपरिस्पन्दानुबन्धी क्रियाशक्तिस्फाररूपो रूपरसादिविषयग्रहणकौतूहलाद् बहिः प्रमेयशय्यामधिशय्य व्याक्षेपविभ्रममनुभवति, कदाचिच्च ज्ञानशक्त्यवष्टब्धो विषयेभ्यः प्रत्यावृत्त्य स्वात्ममात्रविश्रान्तिस्वभावां प्रत्यगानन्दसम्पदमुपभुङ्क्ते। यदुभयं दण्डमुण्डक्रमात्मकतया शास्त्रेष्वनुशिष्यते। यदुक्तमागमे—

मुण्डनं ज्ञानरूपेण दण्डनं च क्रियात्मना।
मुण्डदण्डक्रमौ तेन मतौ ज्ञानक्रियात्मकौ॥ इति।

स्तैमित्यादिरूपा व्यवस्था हृदयस्य कश्चिदुद्यमप्रकारविशेषः। यदुक्तं लक्ष्मी-तन्त्रे—

स्तिमितं यत् परं ब्रह्म तस्य स्तिमिततास्म्यहम् । इति।

तादृशस्य च हृदयस्योद्योगेनाक्रान्ते लोकव्यवहारे—

तस्मात्तत्त्वमतत्त्वं वा न भानेन विना भवेत् ।
स्वसाम्राज्यवशाद् भानं तत्तत्त्वातत्त्वयोः समम् ।।
यथा यथा प्रथा पुंसः शाम्भवी सा च नापरा ।

इत्यादिनीत्या ग्राह्यं विषयं प्रति निषिद्धत्वमनिषिद्धत्वं वेति तारतम्यचिन्ताया न कस्याश्चिदप्यवकाशः, यतो विधिनिषेधविषययोर्धर्माधर्मयोरालोच्यमानयोः सामान्यविशेषभावादधिकारिविभागवैचित्र्यादन्योन्याविरुद्धानेकशास्त्रमर्यादाभेद-व्यवस्थापनानुप्राणनत्वाच्च न किञ्चिन्नैयत्यमालोक्यत इति सर्वश्राव्योऽर्थः। अषड-क्षीणस्तु—

धीकर्माक्षगतां देवीं निषिद्धैरेव तर्पयेत्।

इति रहस्याम्नायन्यायादन्यशास्त्रविगर्हितानि महिलामद्यमांसादीन्येव द्रव्याण्यस्मदुपास्यानां देवतानां सपर्यासु परिबर्हतयाऽभ्यर्हितानीति। यदुक्तं श्रीमहा-नयप्रकाशे—

अन्यैरावारकत्वेन ये भावाः परिवर्जिताः ।
तैरेव ज्ञानिनामर्थं जाज्वलीति परा चितिः ।। इति।

प्रपञ्चितप्रायं चैतत् प्रागेवेत्यलं रोमन्थनानुबन्धेन। भ्रमतेत्यादि लोट्प्रत्ययेन–

तातेति किञ्चित् तनयेति किञ्चि-
न्ममेति किञ्चिन्न ममेति किञ्चित् ।
तवेति किञ्चिन्न तवेति किञ्चिद्
भौतं स्वयं बहुधा मालपेस्त्वम् ।। इति।

इति श्रीमदालसोक्तियुक्त्या मायाव्यामूढचेतसं पशुजनं प्रति शोचनीयता द्योत्यते। हन्तेत्यनेन तु तन्त्रकृतस्तदपरिमृज्यमन्यं जनं प्रत्यमन्दः कारुण्योत्कर्ष इति।।६९।।

आचार्य शंकर ने—

पुनरपि जननं पुररपि मरणं पुनरपि जननीजठरे शयनम्।
भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढ़मते।।

कहकर प्राणियों को जिस संसरण-चक्र से मुक्त होने की शिक्षा दी थी, उसी की शिक्षा महेश्वरानन्द भी दे रहे हैं।

हन्त = बड़े दुःख की बात है। हृदय = हृदय का सामान्य अर्थ तो हृत्प्रदेश है; किन्तु शैव-शाक्त-परम्परा में हृदय 'शक्ति' का एक पर्याय है।

शैव आचार्य उत्पलदेव प्रत्यभिज्ञाकारिका में कहते हैं—

सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।। (१.४५)

उत्पलदेवाचार्य हृदय की व्याख्या करते हुये प्रत्यभिज्ञाकरिकावृत्ति में कहते हैं— सा विश्वात्मनः परमेश्वरस्य स्वात्मप्रतिष्ठारूपा हृदयमिति तत्र तत्रागमे निगद्यते।।

परमात्मा परम शिव की विमर्श शक्ति के अनेक अभिधान या पर्याय हैं; यथा— चिति, प्रत्यवमर्शात्मा, परावाक्, स्वरसोदिता, स्वातन्त्र्य, ऐश्वर्य, स्फुरत्ता, महासत्ता, सार, हृदय—

चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः।। (४४)

अर्थात् हृदय परमेष्ठी (परमेश्वर) की स्वात्मप्रतिष्ठा या विमर्श शक्ति है। यही अघटनघटनापटीयसी स्वातन्त्र्य शक्ति भी कहलाती है। इसे ही स्फुरत्ता, सार, महासत्ता आदि भी कहते हैं।

महेश्वरानन्द ने अपनी व्याख्या स्वोपज्ञ परिमल में 'हृदय' शब्द का अर्थ इस प्रकार किया है—यदिदं षडध्वोल्लाससमष्टिरूपस्य स्वशरीरस्यानुप्राणनतयाऽतिष्ठमानमविकल्पावस्थायां तदुत्तीर्णोल्लेखं च सत्प्रकाशविमर्शद्वितयमेलापलक्षणमन्तस्तत्त्वं हृदयमित्युच्यते। अर्थात् प्रकाश (शिव) विमर्श (शक्ति)—इन दोनों के सम्मिलन (मेलाप) स्वरूप अवस्थित अन्तस्तत्त्व ही हृदय है।

ईश्वरप्रत्यभिज्ञाविमर्शिनी में अभिनवगुप्तपादाचार्य हृदय की व्याख्या करते हुये कहते हैं—हृदयं च नाम प्रतिष्ठास्थानमुच्यते, तच्च उक्तनीत्या जडानां चेतनं, तस्यापि प्रकाशात्मत्त्वं तस्यापि विमर्शशक्तिः इति विश्वस्य परमे पदे तिष्ठतो विश्रान्तस्य इदमेव हृदयं विमर्शरूपं परमन्त्रात्मकं तत्र तत्र अभिधीयते। सर्वस्य हि मन्त्र एव हृदयम् मन्त्रश्च विमर्शनात्मा, विमर्शनं च परावाक्छक्तिमयम्, तत एवोक्तम्—

न तैर्विना भवेच्छब्दो नार्थो नापि चितेर्गतिः।[१]

हृदय—

१. शिव की स्वातन्त्र्य (विमर्श) शक्ति का पर्याय। (उत्पलदेव)

---

१. ईश्वरप्रत्यभिज्ञाविमर्शिनी (अभिनव गुप्त)

२. उत्पलदेव—हृदय = विश्वात्मा परमेश्वर की स्वात्मप्रतिष्ठा।

३. महेश्वरानन्द—हृदय = प्रकाश-विमर्श का मेलापस्वरूप अन्तस्तत्त्व।

४. अभिनवगुप्त (ई. प्र. वि.)—प्रतिष्ठास्थान।

(क) सभी का हृदय मात्र मन्त्र है। मन्त्र विमर्शनात्मात्मा है। विमर्शन परावाक् शक्ति से संयुक्त है।

(ख) परम पद में विश्रान्त विश्व का परमन्त्रात्मक विमर्श ही हृदय है।

उद्योग—सामान्यत: तो यह शब्द अध्यवसाय, प्रयत्न या प्रयास के अर्थ में गृहीत होता है; किन्तु इसका गुह्यार्थ एवं प्रतीकार्थ भी है, जो कि शैव-शाक्त परम्परा में विशेषार्थ में प्रयुक्त हुआ है। शिवसूत्र (शाम्भवोपाय) का पाँचवाँ सूत्र इस प्रकार है—'उद्यमो भैरव:' (१.५)। इसमें उद्योग तो नहीं, किन्तु उसका पर्याय 'उद्यम' शब्द प्रयुक्त है।

वरदराज ने शिवसूत्रवार्तिक में इसकी व्याख्या इस प्रकार की है—

योग्यं विमर्शरूपाया: प्रेरन्त्या: स्वसंविद:।
झटित्युच्छलनाकारप्रतिभोन्मज्जनात्मक: ।।३३।।

उद्यमोऽन्त:परिस्पन्द: पूर्णाहम्भावनात्मक:।
स एव सर्वशक्तीनां सामरस्यादशेषत:।।३४।।

विश्वतो भरितत्वेन विकल्पानां विभेदिनाम्।
अलं कवलनेनापीत्यन्वर्थादेव भैरव:।।३५।।

अथेदृग्भैरवापत्तेर्बन्धप्रशमकारणात् ।
व्युत्थानं च भेवच्छान्तभेदाभासमितीर्यते।।३६।।

५. आचार्य क्षेमराज शिवसूत्रविमर्शिनी में कहते हैं—योऽयं प्रसरद्रूपाया: विमर्शमय्या: संविदो झगिति उच्छलनात्मकपरप्रतिभोन्मज्जनरूप उद्यम:।

उद्योग = आत्मानुकूल कैवल्य, स्वात्मविश्रान्ति की हृदय का उद्योग है।

मूढ = मूर्ख। मोहग्रस्त। माया-मोह-मालिन्य-कज्जलकलुषितात्मा। शरीरादि में अहन्ता की दृष्टि रखने वाले = शरीर में अहं का सन्धान करने वाले प्रमाता। (महेश्वरानन्द) रहस्यं = अत्यन्त गोपनीय। योगिनियों के मुख में अवस्थित परम गुह्यात्मक तत्त्व।

तदेतत् परमं गुह्यं योगिनीनां मुखे स्थितम्।

महेश्वरानन्द कहते हैं कि मैं महेश्वरानन्द ऐसे ही अत्यन्त गोपनीय अर्थतत्त्व को वैखरीवाक् द्वारा प्रकाशित कर रहा हूँ। गर्भवास तो उपद्रवों की पराभूमि है।[१] भ्रमण शब्द का अर्थ यह है कि यह माया-मोह में भटकता हुआ प्राणी अपने पूर्वजन्मों में हजारों माता-पिता, हजारों पुत्र-पत्नी को व्यर्थ में अपना मानकर और अन्त में सभी को छोड़कर अन्य माता-पिता, पुत्र-पत्नी आदि में अहंबुद्धि रखकर भटक रहा है; किन्तु—

१. परिमल (२)

मातृपितृसहस्राणि पुत्रदारशतानि च।
युगे-युगे व्यतीतानि कस्य ते कस्य वा भवान्?[१]

जन्म का फल तो मृत्यु है ही—जातस्य हि ध्रुवो मृत्युः। अतः ऐसे जन्म को, जो मृत्यु की गोद में हो, उसे मृत्युकवलित क्यों करने दिया जाय? मृत्यु की गोद में रहकर भी भोगैषणा-संवलित जिजीविषा अज्ञान नहीं तो और क्या है? इसीलिये लघुभट्टारक नामक ग्रन्थ में कहा गया है कि जीवन की इस असारता को देखकर ज्ञानी पुरुष जन्म-मरण के चक्र में कभी नहीं पड़ना चाहते—

ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः।[२]

इसी भणितव्य बिन्दु की शिक्षा देने हेतु यह ग्रन्थ लिखा गया।[३]

अत्यासन्नं हृदयम् = यह जो षडध्व के उल्लास का समष्टिरूप अपना शरीर है, उसके अनुप्राणन के निमित्त अवतिष्ठमान अविकल्पावस्था में तदुत्तीर्ण उल्लेख (वर्णन) है और प्रकाश तथा विमर्श (द्वितय) का मेलापस्वरूप जो अन्तस्तत्त्व है, वही तो हृदय है।

पर्वत के अग्रभाग एवं नदी के किनारे की भाँति उसकी अनासत्ति की शंका सम्भव नहीं है; क्योंकि यह स्वस्वरूप से अविभिन्न है; क्योंकि यह आसत्ति के प्रति अत्यधिक अनुभूयमानतापूर्व से ही विद्यमान है। इसका जो उस प्रकार का यह उद्योग है, जिसमें कि—आकारादि से उदासीनता अपहस्तन (गले में हाथ लगाकर बाहर निकालना) के स्वभाव वाला उद्यन्तृत्व है—उसके चतुर्दिक इच्छा-ज्ञान-क्रिया के परिस्पन्द से प्रवर्तित अतिशेष विश्वव्यवहारप्रथा की परामर्शपूर्वक आलोचन करें अर्थात् आत्मानुकूल अवलोकन करें।[४]

इसमें एक ही स्थान पर या एक ही साध्य में मन्त्र-तन्त्र आदि स्रोतचतुष्टय प्रवर्तित हैं। इसके परिणामस्वरूप क्षणमात्र के लिये भी अनुबद्धता हो जाय तो जनन-मरण आदि अशेष उपद्रवों के व्युदास (विनाश, बहिष्करण) स्वरूप जीवन्मोक्ष लक्ष्मी के महोपभोग का सौभाग्य प्राप्त होता है। यह उद्योग कभी तो इन्द्रियों के परिस्पन्द (अनुचर वर्ग) के अनुबन्धी (लगाव रखने वाले) क्रियाशक्ति-स्फारस्वरूप रूप-रसादि विषयों के ग्रहण की उत्कण्ठा के कारण बाह्य पदार्थों की शय्या पर शयन करके व्याक्षेप (विकलता या रुकावट) तथा विभ्रम (उद्विग्नता या भ्रान्ति) का अनुभव करता है तो कभी ज्ञानशक्ति से अवष्टब्ध विषयों से प्रत्यावृत्त होकर स्वात्ममात्र विश्रान्तिस्वभाव प्रत्यगात्मानन्द का उपभोग करता है।[५] दोनों दण्ड एवं मुण्डनक्रम के अनुशासन से अनुशसित हैं। दण्ड-मुण्ड क्या हैं?

आगम में कहा गया है—

मुण्डनं ज्ञानरूपेण दण्डनं च क्रियात्मना।
मुण्डदण्डक्रमो तेन मतौ ज्ञानक्रियात्मकौ।।

१-४. परिमल　५. परिमल (६९)

हृदय की यह व्यवस्था एक विशिष्ट उद्यम है। लक्ष्मीतन्त्र में कहा भी गया है—

स्तिमितं यत् परं ब्रह्म तस्य स्तिमितताऽस्म्यहम्।

उस प्रकार के हृदयोद्योग से आक्रान्त लोकव्यवहार में—

तस्मात् तत्त्वमतत्त्वं वा न भानेन विना भवेत्।
स्वसाम्राज्यवशाद् भानं तत् तत्त्वातत्त्वयो: समम्।
यथा यथा प्रथा पुंस: शाम्भवी सा च नापरा।।

इस समय ग्राह्य विषयों के प्रति निषिद्धत्व एवं अनिषिद्धत्व के तारतम्य की चिन्ता करने के लिये किसके पास समय है? विधि-निषेध से सम्बद्ध एवं आलोचित विषयों (धर्माधर्मों) में अधिकारी-भेद के कारण अन्योन्य विरुद्ध अनेक शास्त्रमर्यादाभेदव्यवस्थापना के अनुप्राणन के कारण कोई नैयत्य (नियत होने का भाव) सम्भव नहीं रह जाता; अत: सभी अर्थों का श्रवण करना चाहिये। कहा भी गया है—

धीकर्माक्षगतां देवीं निषिद्धैरेव तर्पयेत्।

रहस्याम्नाय के न्याय से अन्य शास्त्रों में विगर्हित महिला-मद्य-मांस आदि द्रव्यों को अपने उपास्य देवों की सपर्या में अभ्यर्हित समझना चाहिये। श्रीमहानयप्रकाश में कहा भी गया है—

अन्यैरावारकत्वेन ये भावा: परिवर्जिता:।
तैरेव ज्ञानिनामर्थं जाज्वलीति परा चिति:।।

श्रीमदालसा ने मायाव्यामूढ पशुजनों की शोचनीयता को दृष्टिपथ में रखकर ही कहा था—

तातेति किञ्चित् तनयेति किञ्चिन्ममेति किञ्चिन्न ममेति किञ्चित्।
तवेति किञ्चिन्न तवेति किञ्चिद् भौतं स्वयं बहुधा मालपेस्त्वम्।।

मलों के प्रकारत्रय

आणवमल (अणुत्व चेतना में अहन्ताभिमान)	मायीय मल (भिन्न वेद्यप्रथा)	कार्ममल (शुभाशुभवासना)
संकोच एव हि पुंसामाणवमलमित्युक्तप्रायम्।[1]		शुभाशुभवासनात्मना विविधजन्मायुर्भोगदेन कार्मेण मलेन वलित:।[2]

१. आत्मा में अनात्मा का एवं अनात्मा में आत्मा का बोध कराने वाला अज्ञान (मल) ही तो आणव मल है। मल विपर्यासात्मक है—तात्त्विकरूपविपर्ययसान्मलत्वम्।[3]

१. स्वच्छन्दतन्त्र टीका (५)

२. स्वच्छन्दतन्त्र टीका (३.५.७६)

३. प्र. का. वृत्ति (उत्पलदेव),
नेत्रतन्त्र—मायीयाणवकार्मं तु विसरेद् बन्धकारणम्।

आत्मा में अनात्म का और अनात्म में आत्मा का बोध ही अपूर्ण ज्ञान है और यही आणव मल है।

२. सीमा में परिबद्धता ही आणवमल का प्रधान लक्षण है। सारे मल बन्धन के कारण हैं।

३. निर्गुण, निष्क्रिय, अचल एवं शुद्ध आत्मा में मलत्व कैसे आता है—

> व्यापकः पुरुषः सूक्ष्मो निर्गुणो निष्क्रियोऽचलः।
> किन्त्वाणवस्तथा कार्मो मायीयस्त्रिविधो मलः।।१४५।।
> तत्सम्बन्धात्समलिनो ह्यस्वतन्त्रोऽप्यशक्तिमान्।
> अविशुद्धो ह्यसौ तस्मान्मलत्रयनिरोधतः।।१४६।।

४. चिन्मय के साथ मलयोग कैसा? नेत्रतन्त्र में कहा गया है—

> आणवोऽयं मलः सूक्ष्मः कार्यतो ह्युपपद्यते।
> अभिलाषस्ततः कार्यो भोगादौ स प्रवर्तकः।। (१९.१४९)

बौद्धों का भवचक्र (प्रतीत्यसमुत्पाद) दुःखों एवं भव के कारणों की शृंखला—बन्धन।

अतीत जीवन से सम्बद्ध (Due to the past life)—

(क) अविद्या (ख) संस्कार

वर्तमान जीवन से सम्बद्ध (Due to the present life)—

(क) विज्ञान	(ङ) वेदना
(ख) नाम-रूप	(च) तृष्णा
(ग) षडायतन	(छ) उपादान
(घ) स्पर्श	(ज) भव

भविष्य के जीवन से सम्बद्ध (Concerned with future life)—

(क) जाति (ख) जरा-मरण

बन्धन के कारण

शिवसूत्र	बौद्ध	शंकराचार्य	शैव-शाक्त
अज्ञानं गर्भज्ञानं, ज्ञानं बन्धः	तृष्णा भवचक्र की द्वादश शृंखला (प्रतीत्यसमुत्पाद)	अज्ञान (माया) अविद्या	१. मलत्रय (आणव मायीय कार्म) २. ज्ञानं बन्धः

मुक्त्यर्थ (दुख-ध्वंस के) **उपाय** (बौद्ध दृष्टि)—

१. ज्ञान—(क) सम्यक् दृष्टि (ख) सम्यक् संकल्प

२. शील—

(क) सम्यक् वाणी (ख) सम्यक् कर्म (ग) सम्यक् जीविका

३. समाधि—

(क) सम्यक् प्रयत्न (ख) सम्यक् स्मृति (ग) सम्यक् समाधि

शैव-शाक्त दर्शन (मुक्त्यर्थ समावेश)—

शक्तित्रय और मलत्रय

इच्छाशक्ति का संकोच — आणव मल
क्रियाशक्ति का संकोच — कार्ममल
ज्ञानशक्ति का संकोच — मायीय मल

> स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
> द्विधाणवं मलमिदं स्वस्वरूपापहानितः।। (३.१५)

आणवमल के भेद—

१. बोध के स्वातन्त्र्य की हानि।

२. स्वातन्त्र्य का अबोध।

मलत्रय से मुक्त हो जाने पर जीव भव-चक्र (जन्म-मरण के पाश) स्वरूप संसरण से मुक्त हो जाता है। शिवसूत्रकार ने बन्धन के दो कारण माने हैं।

१. ज्ञान = ज्ञानं बन्धः (अज्ञानात्मक ज्ञान)।

२. मलत्रय = अज्ञान का मूल कारण मलत्रय।

शाक्त दृष्टि के अनुसार जीव मूलतः चित्स्वरूप है। इस जीव का अपने को ब्रह्म से भिन्न मानना ही जीवत्व है। यही उसकी अल्पज्ञता, ससीमता एवं परतन्त्रता का कारण है। यही उसके दुःखों का भी कारण है।

चित् तत्त्व जब चित्त रूप में व्यक्त होता है तब उसकी समस्त दैवी शक्तियाँ एवं उपाधियाँ घट जाती हैं और उसके अशुद्धांश में वृद्धि हो जाती है। ये अशुद्धांश ही आगम की शब्दावली में मल कहे जाते हैं—तात्त्विकरूपविपर्यासान्मलत्वम्।[1]

प्रथम मलावस्था (आणवावस्था) में असीम में ससीमता की भावना का उदय

---

१. उत्पलदेवाचार्य : प्रत्यभिज्ञाकारिकावृत्ति

होता है। फिर वासना जाग्रत् होती है और यह कार्ममल का निर्माण करती है। अन्त में मायीय मल, कारणशरीर, सूक्ष्म शरीर एवं स्थूल शरीर का निर्माण करता है। इन्हें ही—कलाशरीर, पुर्यष्टक शरीर (तत्त्व शरीर) एवं भुवनज शरीर कहा जाता है। समस्त अनुभव इन्हीं मलों के द्वारा हुआ करते हैं। ये तीनों मल जीवात्मा को सदा आच्छादित किये रहते हैं।

समस्त संसारी प्राणी तीनों मलों से संयुक्त रहते हैं और सकल कहलाते हैं। ये शरीर एवं इन्द्रिय-समन्वित हैं। ये अपने कर्मानुसार भिन्न-भिन्न योनियों एवं भिन्न-भिन्न लोकों में जन्म-मृत्यु के चक्र में भटकते रहते हैं।

प्रलयाकल भी मलाविष्ट होता है; किन्तु वह मायीय मल से मुक्त रहता है और समस्त क्रियाओं से मुक्त रहकर माया या प्रकृति के साथ संयुक्तावस्था में विद्यमान रहता है। कर्मसंस्कार एवं मूल अज्ञान से यह भी आच्छादित रहता है। इसे प्रलयाकल या प्रलयकेवलिन कहते हैं। विवेकज्ञान द्वारा कर्म क्षीण होने पर भी और मायोत्तीर्ण होने पर भी यह अणुरूप से तब तक विद्यमान रहता है, जब तक कि भगवती की कृपा न प्राप्त कर ले। अणुत्व का क्षय मात्र भगवती की कृपा से ही हो पाता है।

प्रलयाकल स्तर से उन्नयन प्राप्त करके जीव विज्ञानाकल के सोपान पर आरूढ हो जाता है।

मलों के आधार पर जीवों का विभाजन—

१. विज्ञानाकल : एक मल से आच्छादित।

२. प्रलयाकल : दो मलों से आच्छादित।

३. सकल : तीन मलों से आच्छादित। (मलाच्छन्न का तारतम्य)

वामदेव भट्टाचार्य कहते हैं—असौ भगवान् स्वमायाशक्त्याख्येन अव्यभिचरित-स्वातन्त्र्यशक्तिमहिम्ना स्वात्मनैव आत्मानं सङ्कुचितमिव अवभासयन् विज्ञानाकलः प्रलयाक-कलः सकलश्च सम्पद्यते।

१. विज्ञानाकल—तत्र आणवेन एकेनैव मलेन संयुक्तो विज्ञानाकल उच्यते। विज्ञाना-कल = आणवमल।

२. प्रलयाकल—द्वाभ्याम् आणवमायीयाभ्याम् अपवेद्यः प्रलयाकलः। त्रिभिराणव-मायीयकार्मैः संवेद्यः तैरेव—अयमर्थसर्गः।

३. सकल—कलादिधरण्यन्ततत्त्वमयः सकलः।

मलों के विधायक : पञ्चकञ्चुक

कला तत्त्व | विद्या तत्त्व | राग तत्त्व | काल तत्त्व | नियति तत्त्व

एतत् कञ्चुकषट्कं अन्तर्मलावृतस्य पुद्गलस्य बहिराच्छादकम्।[1]

यदि हम उद्योग शब्द के पारिभाषिक स्वरूप को लें तो इसका स्वरूप सृष्टि के सोपानों से है। चित् शक्ति (स्वातन्त्र्य शक्ति) निरन्तर ही अपने-आपको पञ्चकृत्यों के रूप में प्रकट करती रहती है, जो कि निम्न हैं—

चित् शक्ति की पञ्चकृत्यात्मक आत्माभिव्यक्ति : पञ्चकृत्य

पञ्चकृत्यों का स्वभाव

क्रिया | ज्ञान | इच्छा | उद्योग | प्रतिभा

उद्योग—स्वातन्त्र्य शक्ति ही भासा है। तरंगहीन समुद्र में वायु के आघात से ऊपरी सतह पर चञ्चलता दृष्टिगोचर होने लगती है और उस चञ्चलता से महातरंग एवं और उनसे अनेक तरंगें उत्पन्न होने लगती हैं, उसी प्रकार क्षोभविरहित भासारूपी महासत्ता के वक्षःस्थल पर स्वातन्त्र्योल्लास के कारण उद्योगरूपी आदिस्पन्द का उदय होता है। यही है—सृष्टि की प्रथम कला का आत्मप्रकाश। सृष्टि क्या है? सृष्टि है—

१. उद्योग   ४. आत्मविलापन   ५. निस्तरंगत्व की समष्टि
२. अवभास   ३. चर्वण

प्रत्येक प्राणी में सृष्टि के ये सोपान स्थित हैं। उदाहरण—

कुम्भकार द्वारा घट-निर्माण के सोपान—

१. उद्योग—(आत्मस्वरूप में अभिन्न रूप से विद्यमान घट के भाव को अपने से पृथक् रूप में बाहर निकालने के लिये जो प्राथमिक स्पन्दन होता है, उसे उद्योग कहते हैं (उद्योग = सृष्टि की प्रथम प्रथा)।

२. अवभास—दण्ड, चक्र आदि की सहायता से इस मनोकल्पित घटभाव का बाह्य रूप में घटाकार प्रकाशन। (सृष्टि-क्रिया की द्वितीय प्रथा)।

३. चर्वण—बाह्याकाराकारित घट को अनेक व्यापारों द्वारा बार-बार अपने रूप में अनुभव करना चर्वण है (सृष्टि क्रिया की तृतीया प्रथा)।

---

१. वामदेव भट्टाचार्य : जन्ममरण-विचारः

४. विलापन—उद्देश्य सिद्ध हो जाने पर घट के प्रति उदासीनता का आना विलापन है (चतुर्थ प्रथा)।

५. निस्तरंगत्व—अर्थक्रियाकारित्व अर्थात् घट के निर्माण की क्रिया के प्रति औदासीन्य आ जाने पर जब उसकी स्मृति तक नष्ट हो जाती है तब उस प्रथा को निस्तरंगत्व कहते हैं (सृष्टि की पञ्चम प्रथा)।

(क) परमेश्वर समुद्र है।
(ख) घटादिक प्रत्येक भाव उस समुद्र की तरंगें हैं।
(ग) ये तरंगें समुद्र में उठती हैं और उसी में विलीन हो जाती हैं।

भासा (स्वातन्त्र्य शक्ति) निष्कल होकर भी कलामय है और अक्रम होकर भी सक्रम है। ये सृष्टि-व्यापार की पाँच प्रथायें उसी की कला की क्रीड़ायें हैं। ये इस प्रकार हैं—सृष्टि व्यापार में १० कलायें है। स्थिति में २२ कलायें हैं। संहार में ११ कलायें है अनाख्या में १० कलायें हैं।

भासा = स्वातन्त्र्यशक्तिस्वरूपा चित् शक्ति।
भासा के गर्भ में ही पञ्चकृत्यमय जगत् स्थित है।

आचार्य अभिनवगुप्तपाद की मीमांसा—अपने स्वरूप की हानि ही जिसका स्वरूप है, ऐसी अख्याति ही चैतन्य का आणव मल है। यह उसी प्रकार आन्तर मल है, यथा—सोने में खोट या लोहे में जंग। यह आत्मा का (पशु का) अन्तरंग आवरण है—आन्तर आच्छादन है। यह तदात्मक बनकर रहता है।[1]

माया से विद्या तक के ६ कंचुक आत्मा के सूक्ष्मावरण हैं; यथा—चावल का छिलका (काबुक), जो कि चावल के पीठ पर रहता है। इसी से ज्ञातृत्व एवं कर्तृत्व में भेदमय बोध हुआ करता है। यही है—मायीय मल।

इसकी अपेक्षा बाह्यावरण भूसी की भाँति, प्रकृति-निर्मित शरीर का अस्तित्वस्वरूप आवरण है, जो कि स्थूल है तथा त्वचा-मांस आदि होने के कारण यह तृतीय मल कार्ममल कहलाता है।

मल

परमल	सूक्ष्म मल	स्थूल मल	मलत्रय ही आत्मा के
(आणव मल)	(मायीय मल)	(कार्म मल)	कोशत्रय हैं।

इन तीनों मलों से आच्छादित आत्मा प्रकाशमान होने पर भी घर में प्रतिबिम्बित आकाश की भाँति संकुचित हो जाती है और इसीलिये अणु और पशु कहलाती है।[2]

जिस प्रकार छिलका चावल के दाने को ढक लेता है, उसी प्रकार प्रकृति से लेकर

१. परमार्थसार २. अभिनवगुप्त : परामर्शसार

पृथ्वीपर्यन्त प्रसृत सृष्टि चैतन्य को देहभाव से ढक लेती है—

तुष इव तण्डुलकणिकामावृणुते प्रकृतिपूर्वक: सर्ग:।
पृथ्वीपर्यन्तोऽयं चैतन्यं देहभावेन।।२३।।[१]

परमान्तरंग आवरण मल आणव मल है। मायादिक छ: सूक्ष्म कञ्चुक हैं। बाह्य एवं स्थूल आवरण देहस्वरूप है। आत्मा इनसे तीन कोशों से आच्छादित है—

परमावरणं मल इह सूक्ष्मं मायादिकञ्चुकस्थूलम्।
बाह्यं विग्रहरूपं कोशत्रयवेष्टितो ह्यात्मा।। (२४)

मल है क्या?

१. तन्त्रसार (आ. १)—अज्ञानं किल बन्धहेतुरुदित: शास्त्रे मलं स्मृतम्।

२. तन्त्रालोक (१)—मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्।

३. तन्त्रालोक (६)—

योग्यतामात्रमेवैतत् भावव्यच्छेदसंग्रहे।
मलस्तेनास्य न पृथक् तत्त्वभावोऽस्ति रागवत्।।

४. मालिनीविजयवार्तिक—(काण्ड.१८६)

स्वात्मप्रच्छादनक्रीडामात्रमेव मलं विदु:।

५. मालिनीविजयोत्तरतन्त्र—

मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्। (अधिकार)

माहेश्वरतन्त्र में प्रकृति, माया, मोह, प्रधान आदि को ही अज्ञान कहा गया है—

अज्ञानं प्रकृतिर्माया मोहो व्यक्तं प्रधानकम्
अज्ञानप्रभवं विश्वं वस्तुतो नास्ति किञ्चन।
अज्ञानैव यथा रज्जु: सर्पभूता भयप्रदा।
अविद्यासबलब्रह्मविवर्तोऽयं प्रपञ्चक:।।

(माहेश्वरतन्त्र)

आणव मल का स्वरूप—संकोच एव पुंसामाणवमलमित्युक्तप्रायम् (स्वच्छन्दतन्त्र की टीका)।

आणव के दो भेद हैं—

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
द्विधाणवमलमिदं स्वस्वरूपापहानित:।।

(ईश्वर प्र. का. भास्करी)

---

१. अभिनवगुप्त : परामर्शसार

संविद्रूपे न भेदोऽस्ति वास्तवो यद्यपि ध्रुवे।
तथाप्यावृतिनिर्ह्रासतारतम्यात् स लक्ष्यते।।

मायीय मल (ईश्वरप्रत्यभिज्ञा का. भास्करी)—

१. भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभोगदम्।
२. शरीरभुवनाकारो मायीयः परिकीर्तितः।। (तन्त्रालोक-१.५६)

कार्ममल—

देवादीनां च सर्वेषां भाविनां त्रिविधं मलम्।
तथापि कार्ममेवैकं मुख्यं संसारकारणम्।।[1]

आणव मल = अप्रतिहतस्वातन्त्र्यरूपा इच्छाशक्तिः संकुचिता सती अपूर्णम्यन्यता-रूपम् आणवमलम्।

मायीय मल = ज्ञानशक्तिः क्रमेण संकोचात् भेदे सर्वज्ञत्वस्य किंचिज्ज्ञत्व-प्राप्तेः अन्तःकरणबुद्धीन्द्रियतापत्तिपूर्वम् अत्यन्तं संकोचग्रहणेन भिन्नवेद्यप्रथारूपं मायीयं मलम्।

कार्म मल—क्रियाशक्तिः क्रमेण सर्वकर्तृत्वस्य किञ्चित्कर्तृत्वापत्तेः कर्मेन्द्रियरूप-संकोचग्रहणपूर्वकम् अत्यन्तं परिमिततां प्राप्ता शुभाशुभानुष्ठानमयं कार्ममलम्।
(प्रत्यभिज्ञाहृदयम्)

आणव मल

स्वातन्त्र्य हानिरूप	स्वातन्त्र्य का अबोधरूप
आणव मल = विज्ञानकेवल में	आणवमल = प्रलयाकल में (इनमें कार्ममल भी रहता है एवं विकल्प से मायीय भी)।

देवादि समस्त संसारी प्रमाताओं में त्रिविध मल एवं मुख्यतः कार्ममल पाया जाता है—

अज्ञानतिमिरयोगादेकमपि स्वं स्वभावमात्मनम्।
ग्राह्यग्राहकनानावैचित्र्येणावबुध्यते ।। (२५)

अज्ञान-तिमिर से संयोग के कारण एक होने पर भी अपने आत्मरूप स्वभाव के ग्राह्य (विषय/प्रमेय) एवं ग्राहक (प्रमाता, विषयी) के वैचित्र्य से युक्त समझने लग जाता है।

मालिनीविजयवार्तिक (काण्ड २.१८६) में कहा गया है कि मल स्वात्म-प्रच्छादन-क्रीडामात्र है—स्वात्मप्रच्छादनक्रीडामात्रमेव मलं विदुः। भिन्न वेद्यप्रथा ही मायीय मल है।

अपने स्वातन्त्र्य स्वभाव के कारण परिगृहीत जीवभाव शिव अपने पारमेश्वर स्वभाव

१. ईश्वरप्रत्यभिज्ञाकारिका

की स्वात्मप्रच्छादन क्रीड़ा वाली उक्त कल्पना को जब केवल कल्पना न समझकर यथार्थ समझने लगता है तब यथार्थ समझी जाने वाली वह कल्पना ही उसका बन्धन बन जाती है—इत्थं च मायाशक्त्या पुर्यष्टकादौ गृहीताभिमानोऽयं विश्वभित्तिभूतपरिपूर्णबोधरूपतया स्फुरन्नपि असौ सङ्कोचावभासात्मना तावता अंशेन स्वयमेव बध्यते। यथोक्तं प्राक्—आत्मना बध्यते ह्यात्मा।[१]

शिवस्वरूप का संकोच आणव मल है। अणुता-प्राप्त प्रमाता की भेद-दृष्टि ही मायीय मल है। शुभाशुभ वासना ही कार्ममल है।

कुरुक्षेत्र में उपदिष्ट महार्थ का स्वरूप

अथास्मत्प्रसाधितमौत्तरमर्थतत्त्वमेवान्येषां व्यासादीनामपि महामुनीनामन्तरनुसन्धेया देवता, येन तत्प्रणीतेषु प्रबन्धेषु तात्पर्यपर्यालोचनायां महता कण्ठेनैतदेवार्थरहस्यमुद्घाट्यते। यथा भगवद्गीतासूपनिषत्स्वित्युच्चावचस्यास्य प्रपञ्चवैचित्र्यस्य श्रीमदनुत्तराम्नायसमुद्रशीकरोपस्नेह एवानुप्राणनतयाऽवतिष्ठत इत्यासूत्रयितुमाह—

एणं चेअ महत्थं जुत्थारम्भम्मि पण्डुउत्तस्स।
छोलहसहस्ससत्ती देवो उवदिसइ माधवो त्ति सिवं॥७०॥

(एनमेव महार्थं युद्धारम्भे पाण्डुपुत्रस्य।
षोडशसहस्रशक्तिर्देव उपदिशति माधव इति शिवम्।।)

महाभारत का युद्धारम्भ होने के समय (मोहग्रस्त) पाण्डु के आत्मज अर्जुन को सोलह हजार शक्तियों से सम्पन्न भगवान् रमापति माधव (श्रीकृष्ण) इसी महार्थतत्त्व का उपदेश प्रदान करते हैं।।७०।।

योऽयं महाप्रबन्धेनोपक्रान्तः—

भावार्थः सम्प्रदायार्थो निगर्भार्थश्च कौलिकः।
तथा सर्वरहस्यार्थो महातत्त्वार्थ एव च।।

इत्याम्नायस्थित्या तत्तदशेषार्थतत्त्ववैचित्र्यसमष्ट्यधिष्ठानरूपतया महान् सर्वार्थभेदप्रभेदक्रोडीकारविचक्षणोऽर्थः प्राप्यं तत्त्वम्, यश्च—

न सन्नासन्न सदसन्न च तन्नोभयात्मकम्।
दुर्विज्ञेया हि सावस्था किमप्येतदनुत्तरम्।
नैष ध्येयो ध्यात्रभावान्न ध्याता ध्यानवर्जनात्।
न पूज्यः पूजकाभावात् पूजाभावान्न पूजकः।।

---

१. स्वच्छन्दतन्त्र की टीका (भाग ६.१२ पटल)

इति श्रीतन्त्रालोकस्थित्या विकल्पवार्तासार्थसर्वस्वोत्तीर्णस्वस्वातन्त्र्यैकघनतोपबृंहितस्वभावोऽनुभूयते, तमेनमेव षोडशसहस्रशक्तिः षोडशाधिका(?) विलासलक्षणमकालकलितं श्रीकालसङ्कर्षणीभावमनुभवन् अत एव देवः क्रीडाद्यनेकपरिस्पन्दप्रगल्भो माधवो महालक्ष्मीवल्लभो मधुकुलोत्तंसश्च भगवान् युद्धारम्भे कौरवपाण्डवसेनासंघर्षोपक्रमावस्थायां पाण्डुपुत्रस्यार्जुनस्योपदिशति उपादिक्षदिति यावत्। प्राकृतभाषायां भूतवर्तमानादिलकारनैयत्याभावात्। यद्वा भगवता प्रतियुगमेवमस्य भारतादिव्यापारस्य प्रवर्त्यमानत्वात् प्रवाहनित्यतया वर्तमानत्वमिति लट्प्रयोगः। तत्र युद्धारम्भ इत्यनेन।

तान् समीक्ष्य स कौरव्यः सर्वान् बन्धूनवस्थितान् ।
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।।

इत्युक्रम्य—

अहो बत महत् पापं कर्तुं व्यवसिता वयम्।
यद् राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः।।
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रसो हन्युस्तन्मे क्षेमतरं भवेत्।।

इत्यन्तमर्जुनस्य प्राचीनानेकवासनानुस्यूतात् पाशवावेशात् श्रौतस्मार्तादिबाह्याम्नायनिषिद्धं पितृपितामहादिस्वजनहननलक्षणं पातकं प्रति विचिकित्सा, तत्प्रवृत्तं च राज्यलाभाद्यशेषसौख्यवैराग्यम्, तन्निबन्धनो वैक्लव्योदयश्च ध्वन्यते। माधव इत्यनेनार्जुनेन सहास्य किञ्चिद् यौनं सम्बन्धमुन्मी(लयित्वा?ल्य)—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन! ।
मो क्लैव्यं गच्छ कौन्तेय! नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप! ।।

इति तं प्रति भगवतो रहस्यार्थतत्त्वप्रत्यभिज्ञापनौन्मुख्यम्। अनन्तरमस्यैव—

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।।

इति कार्पण्यलक्षणानाथ्यप्रवृत्तात् शिष्यभावाद् देवस्य कारुण्याक्रान्तहृदयता,

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।।

इत्यादिना भीष्मद्रोणाद्यशेषशरीरान्तर्भूतस्यात्मनो नित्यत्वव्यापकत्वादियो-

गादन्यजनहन्यमानत्वाद्यसम्भवोद्भावनद्वारा लौकिकवत् किं बाह्यशास्त्रबिभीषकया कातर्यमनुभवसीति तस्योपर्यनुग्रहोद्रेकश्चोन्मुद्र्यते। षोडशसहस्त्रशक्तिरित्यनेन बहिष्षोडशस्त्रीसहस्त्रसम्भोगमिवान्तरपि षोडशाधिका(?) परामर्शप्राबल्योपारूढं तत्तदवान्तरशक्तिसहस्त्रसमावेशमावेदयता देवस्य—

दर्शयामास पार्थाय परमं रूपमैश्वरम् ।

इति वैश्वरूप्यप्रदर्शनौचित्यम्,

कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः ।

इत्यात्मनो माहात्म्यप्रख्यापनप्राचण्ड्यम्,

नमो नमस्तेऽस्तु सहस्त्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ।

इत्यर्जुनस्तुतिसहस्त्रसन्धुक्ष्यमाणतेजस्कत्वात्

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।

आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ।।

इति भूयः पूर्वस्वभावप्रत्यानयनम्,

अथ चेत् त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ।

इत्यात्मोक्तार्थाननुष्ठाने महाविपद्रूपप्रत्यवायोपपादनं चेत्यन्यदुष्कराण्याश्चर्याणि कर्माण्याख्यायन्ते। देव इत्येतत् क्रीडाद्यनेकार्थाभिधानमुखेन—

रसोऽहमप्सु कौन्तेय! प्रभाऽस्मि शशिसूर्ययोः।

प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु।।

इत्यादिना प्रपञ्चेन तस्य बहिर्विभूतिपरिस्पन्दाटोपम्,

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।

वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम् ।।

इत्युत्तस्फुरणप्रकारं चाह। माधवपाण्डुपुत्रशब्दाभ्यां भगवदर्जुनयोरुभयोर्बाह्यवासनावैलक्षण्याभावेऽपि—

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।

तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ।।

इत्याद्यस्य सार्वज्ञ्यादिशक्त्यौल्बण्यमन्यस्य तद्विपर्ययश्चेत्यनयोरनुग्राह्यानुग्राहकभावौचित्यमासूच्यते। उपदिशतीत्येतत् सर्वत्राष्टादशाध्यायानुस्यूतमङ्गाङ्गिभावभङ्ग्या बाह्याभ्यन्तरोभयशास्त्रतत्त्वतात्पर्यास्पदं सांख्ययोगवेदान्तादिवैचित्र्यव्यतिरेकेऽपि—

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।

साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ।।

इति,

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे।।

इति च स्वात्मदेवतामात्रोपास्तिप्राधान्यमभिव्यनक्ति। महार्थमित्यनेन—

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि।।
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।।
इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु।।

इति भगवतः फल्गुनप्रबोधनावस्थायां श्रीमदनुत्तरस्रोतःप्रसाधितार्थं प्रख्यापनपाण्डित्यं प्रतायते। माधवः पाण्डुपुत्रायोपदिशतीति गुरुशिष्यभावोद्भावनेन—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप!।।
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।।

इति गुरुपर्वक्रमात्मनः सम्बन्धस्यावश्यानुसन्धेयता द्योत्यते। पाण्डुपुत्रस्येत्यर्जुनस्य कुलीनत्वाद्यविनाभूतं सौजन्यादिगुणयोगमुल्लिङ्गयता—

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति।।

इत्ययोग्यं शिष्यं प्रत्येतदर्थप्रकाशनस्याविहितत्वम्, योग्यं प्रति तु कल्प्यमानस्य पुरुषार्थपर्यवसायित्वं चोपपाद्यत इति।

पाराशर्यो महायोगी धैर्यगम्भीरसागरः।
भारते भगवद्गीतामधिकृत्येदमब्रवीत्।।

यत् कुरुक्षेत्रमाक्रम्य धार्तराष्ट्रेषु धन्विषु ।
पाण्डवेषु च सज्जेषु संगृह्याक्षौहिणीं क्षणात् ।।
पितॄन् पितामहान् भ्रातॄन् पुत्रान् पौत्रान् गुरूनपि ।
हन्तव्यानात्महस्तेन प्रेक्ष्य वैक्लव्यविह्वलम् ।।
त्रस्यन्तं कर्मणः क्रूरादवधूताहवोद्यमम् ।।
बीभत्समानं बीभत्सुं निस्पृहं राज्यसम्पदि ।।
अनुसन्धाय भगवान् मुकुन्दो रुक्मिणीपतिः ।
कारुण्याक्रान्तहृदयः स्यन्दनस्थं तमभ्यधात् ।
हन्त किं तव संवृत्तमकाण्डे कश्मलोत्तरम् ।
वैक्लव्यं त्यज्यतामेतल्लोकद्वयविगर्हितम् ।।
कः पिता तव को भ्राता को गुरुः के च बान्धवाः ।
त्वमेव तावत् को नाम कारुण्यं नाम किं तव ।।
पात्रमेतस्य कश्च स्यात् केन को वाऽभिहन्यते ।
बह्व्यः सामान्यतो भाषाः कल्प्यन्ते लोकशास्त्रयोः ।।
विशेषमपरिज्ञाय ताभ्यो मा भूद् बिभीषिका ।
इति लोकोत्तरामर्थमुद्रामुन्मुद्रयन् क्रमात् ।।
प्रसङ्गानुप्रसङ्गेन विश्वविक्षोभकल्पनाम् ।
अकालकलितस्वच्छस्वच्छन्दानन्दचिन्मयीम् ।।
निश्चिन्वन्निश्चलस्वात्मसंरम्भैकविजृम्भिताम् ।
उपर्युद्रिक्तकारुण्यो वीरेन्द्रः सव्यसाचिनि ।।
कालग्रासैकरसिकां कालसङ्कर्षणीं कलाम् ।
अनुप्रविश्य योगेन खेचरीखचितौजसा ।।
स्वबलाक्रमणाटोपव्याप्तकौलक्रमो भवन् ।
दत्त्वा लोकोत्तरां तस्मै दृष्टिमस्खलितार्चिषम् ।।
प्रांशुः प्रदर्शयाञ्चक्रे वैश्वरूप्यमनुग्रहात् ।
बाहवो मन्त्र कोटीनां कोटयः स्फुरदङ्गदाः ।।
सहस्राणां सहस्राणि मूर्ध्नां च मुकुटस्पृशाम् ।
यदन्तः सागराः सर्वे सर्वे च कुलपर्वताः ।।
काननानि च सर्वाणि सर्वा सर्वंसहाऽप्यभूत् ।
भीष्मद्रोणकृपद्रौणिकर्णदुर्योधनादयः ।।
शलभा इव यद्वक्त्रज्वालामालम्ब्य शेरते ।
तदालोक्य ससन्त्रासं साश्चर्यं च धनञ्जयम् ।।

अभ्रगम्भीरनिर्घोषो भगवानभ्यभाषत ।
पश्य विश्वं मया ग्रस्तमाकीटादापितामहम् ।।
विलीयमानं जिह्वाग्रे ज्योतिर्ज्वालाकलापिनि ।
यत्र क्षणादखण्डानां ब्रह्माण्डानां परम्पराः ।।
समुद्रबुद्बुदन्यायादुन्मिषन्ति त्रुटन्ति च ।
अत्र भीष्ममितो द्रोणमिह शल्यमितः कृपम् ।।
पश्य भस्मीकृतान् बन्धून् मय्यक्षय्यमहार्चिषि ।
मज्ज्वालालीढसारं सच्चराचरमिदं जगत् ।।
प्राचीनं वासनाशेषं दग्धं वस्त्रमिवाश्नुते ।
तदुत्तिष्ठ जहि स्वैरमात्तसारान् महीपतीन् ।।
येन ते तीक्ष्णबाणस्य दोष्णोः शौर्यं प्रथिष्यते ।
इति फल्गुनमाकर्षन्नात्मैश्वर्यविजृम्भया ।।
क्रमादक्रमचिच्छक्तिस्वातन्त्र्योन्मीलनक्षमैः ।
अवधीरितवेदादिबाह्यविद्याविडम्बनैः ।।
आचक्षाणैरवैषम्यं कर्माकर्मविकर्मणाम् ।
विकल्पकल्पनोल्लासग्रासतात्पर्ययोगिभिः ।।
निषिद्धस्याप्यनुष्ठाने विहितस्याप्यतिक्रमे ।
प्रत्यवायं व्युदस्यद्भिः स्वच्छसत्संविदां नृणाम् ।।
लौकिकेऽप्युपयुक्तानां धर्माणामनुमन्तृभिः ।
स्वसंविद्देवतामात्रसपर्यापारदृश्वभिः ।।
चित्तस्यान्तर्निषिञ्चद्भिरद्वैतामृतचन्द्रिकाम् ।
उन्मूलयद्भिरामूलं मायामालिन्यवासनाम् ।।
सञ्छिद्य संशयातङ्कमर्पयद्भिरहंप्रथाम् ।
स्थापयद्भिरनाहार्यं प्रातिभं स्थैर्यमाशये ।।
चित्स्वभावतया स्थातुं स्मारयद्भिः स्वमुद्यमम् ।
प्रमाणैर्युक्तिभिस्तर्कैरनुवादैर्निदर्शनैः ।।
आशङ्कोत्तरचर्चाभिरन्यैश्च गमकैः क्रमैः ।
प्रकाशयद्भिर्विश्वस्य प्रतिष्ठामौत्तरं क्रमम् ।।
स्पष्टैरव्याकुलैर्वाक्यैरन्योन्यान्वयबन्धुरैः ।
बहुधा पुण्डरीकाक्षः पाण्डवं प्रत्यबोधयत् ।।
सोऽपि तत्क्षणमारभ्य स्वविमर्शविचक्षणः ।
लक्ष्मीमनुभवन् साक्षाज्जीवन्मोक्षप्रथामयीम् ।।

क्षपयित्वा विपक्षं तं चिच्छक्त्या तीव्रविक्रमः ।
अग्रजं च प्रतिष्ठाप्य स्वस्य राज्ये युधिष्ठिरम् ।।
स्वसंरम्भानुगुण्येन स्वैरं व्यवहरन् बहिः ।
कालं महान्तं निश्चिन्तो विजहार विशृङ्खलः ।।
एतद् वितत्य विख्यातैः क्रमकेलौ कुलागमे ।
नाथाभिनवगुप्तार्यैः पर्यालोचितमादरात् ।।
एवं रामायणे काव्ये वाल्मीकीयेऽपि धीमता ।
प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम् ।।
इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः ।
इत्यादिस्वात्मविस्फूर्तिप्रधानं स्वयमूह्यताम् ।। इति।

शिवमिति। **यदिदं गाथासप्तत्यनुक्रान्तम् उपसर्गनिपाताद्यवान्तरव्यापारोपस्कृताभिधाव्यञ्जनाद्यनेकशब्दशक्तिवैचित्र्यार्पितं संक्षेपविस्तरत्वान्यतरोपपत्त्या यादवधिगताम्नायप्रपञ्चतात्पर्यार्थपिण्डीभावगर्भमत एव विश्ववृत्तान्तव्यतिकरक्रोडीकारकोविदमौत्तरमतिमहत् प्रमेयमिति शब्देनोद्भाव्यते। तदखिलमपि शिवं शिवपरामर्शोपायभूतत्वात् शिवस्वरूपादुत्पन्नत्वात् शिवस्वभावाविभिन्नत्वाच्च शिवमयमेव। अत्र च 'णमिऊण णिच्चसुद्धे गुलुणो चलणे' (श्लोक १) इत्यारभ्य 'देवो उवदिसइ माहवो त्ति सिवम्' इत्युपसंहृते तन्त्रे नत्वा शिवमिति पदात्मकः कश्चित् प्रत्याहारो नवमित्यक्षराकारश्च परिस्फुरतीति सर्वथा विश्वव्यवहारवर्तिप्रमातृरूपमेतदधीनसंरम्भमन्यद् वा वस्तु कर्तृभूतं शिवमुपपादितस्वभावं स्वात्मदेवतात्मानं नत्वा प्रकर्षकाष्ठाप्राप्ततया परामृश्य नवं प्राचीनजाड्यवासनापर्युदासादुन्मीलदमन्दसंवित्स्वस्पन्दसौन्दर्यसारं सदलौकिकस्वभावं सम्पद्यत इत्यर्थतत्त्वतात्पर्योपनिषदिति।।७०।।**

महार्थमञ्जरी के महार्थ ज्ञान एवं भगवद्गीता के तत्त्वज्ञान में सामञ्जस्य का प्रतिपादन—भगवान् श्रीकृष्ण ने अर्जुन से कहा था कि मैंने इस अविनाशी महायोग को सूर्य से कहा था। सूर्य ने अपने पुत्र वैवस्वत मनु से कहा एवं मनु ने इसे अपने पुत्र इक्ष्वाकु से कहा था। इस प्रकार यह योग परम्परानुसार राजर्षियों तक पहुँचा। वही योग मैं तुमसे पुनः कह रहा हूँ—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।। (४.१)
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप।। (४.२)
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।। (४.३)

भगवान् श्रीकृष्ण ने युद्ध-विरत एवं सन्तप्तहृदय अर्जुन के अज्ञान-निवारणार्थ जो योगोपदेश किया था, वही महार्थमञ्जरी का प्रतिप्राद्य विषय है।

यह महार्थ (एनमेव महार्थं युद्धारम्भे पाण्डुपुत्रस्य) समस्त रहस्यार्थों का प्रतिपादक महातत्त्वार्थ है।

मन्त्रों के अर्थ—महार्थमञ्जरीकार ने परिमल में यह प्रतिपादित किया है कि भावार्थ, सम्प्रदायार्थ, निगर्भार्थ, कौलिकार्थ, सर्वरहस्यार्थ, महातत्त्वार्थ आदि जो अर्थभेद हैं, उनमें महार्थमञ्जरी का महार्थ इसी महातत्त्वार्थ को निरूपित करता है। महार्थमञ्जरीकार ने परिमल में एक उद्धरण उल्लिखित किया है, जो निम्नांकित है—

भावार्थः सम्प्रदायार्थो निगर्भार्थश्च कौलिकः।
तथा सर्वरहस्यार्थो महातत्त्वार्थ एव च।।

इसका सम्बन्ध तान्त्रिक अर्थ-विज्ञान से है। भास्करराय मखिन ने मन्त्रों के अनेक अर्थ बताये हैं, जो निम्नांकित हैं—

प्रतिपाद्यार्थ, भावार्थ, सम्प्रदायार्थ, निगर्भार्थ, कौलिकार्थ, रहस्यार्थ, महातत्त्वार्थ, नामार्थ, शब्दरूपार्थ, नामैकदेशार्थ, शाक्तार्थ, सामरस्यार्थ, समस्तार्थ, सगुणार्थ, महावाक्यार्थ = १५ अर्थ। (पञ्चदशी मन्त्र में जितने वर्ण हैं, उतने ही अर्थ हैं। चूँकि पञ्चदशी में १५ वर्ण हैं; अतः भास्करराय ने १५ अर्थ बताये हैं (वरिवस्यारहस्यम्)।

महार्थमञ्जरीकार कहते हैं कि भावार्थ, सम्प्रदायार्थ, निगर्भार्थ, कौलिकार्थ एवं सर्वरहस्यार्थ, महातत्त्वार्थ इत्यादि जो अर्थ आम्नाय में उपदिष्ट हैं, उन सभी अर्थों के तत्त्ववैचित्र्य की समष्टि के अधिष्ठानस्वरूप समस्त अर्थभेदों को क्रोडीकृत करके इस महार्थ को महार्थमञ्जरी में प्रस्तुत किया गया है।

महार्थतत्त्व—महार्थ तत्त्व न तो सत् है, न असत् है, न तो सदसत् है; प्रत्युत यह उभयात्मक होने के कारण अनुत्तर—द्वैताद्वैतविवर्जित, दुर्विज्ञेय एवं अनिर्वचनीय तत्त्व है। ध्याता के न होने से यह ध्येय भी नहीं है और ध्यान का विषय न होने से इसका कोई ध्याता भी नहीं है। पूजक के अभाव के कारण यह पूज्य भी नहीं है और पूजा के अभाव के कारण इसका कोई पूजक भी नहीं है।

तन्त्रालोककार की दृष्टि—

न सन्नासन्न सदसन्न च तन्नोभयात्मकम्।
दुर्विज्ञेया हि सावस्था किमप्येतदनुत्तरम्।।
नैष ध्येयो ध्यात्रभावान्न ध्याता ध्यानवर्जनात्।
न पूज्यः पूजकाभावात् पूजाभावान्न पूजकः।।[१]

---

१. तन्त्रालोक

इन समस्त विकल्पों की वार्ता एवं उनके समस्त अर्थों आदि सर्वस्व से उत्तीर्ण, स्वस्वातन्त्र्यैकघन होने से संवर्द्धित महान् स्वभाव वाले महार्थ की जो ध्यानैकगम्य अनुभूति होती है, वही है—महार्थ तत्त्व। ग्रन्थकार का कथन है कि १६ हजार शक्तियों से मण्डित एवं क्रीडाद्यनेकपरिस्पन्दप्रगल्भ महालक्ष्मीवल्लभ भगवान् श्रीकृष्ण ने श्रीकालसङ्कर्षणीभाव की अनुभूति करते हुये कुरुक्षेत्र के युद्धस्थल में युद्धारम्भ के समय कौरव-पाण्डव सेना के मध्य होने वाले संघर्ष की उपक्रमावस्था में पाण्डु के पुत्र अर्जुन को उसी महार्थतत्त्व का उपदेश दिया था, जिसका कि इस महार्थमञ्जरी में प्रतिपादन किया गया है।

ग्रन्थकार ने कहा है कि इस गाथा में 'उपदिशति' शब्द का प्रयोग करने के पीछे भी एक उद्देश्य निहित है। माना कि भगवान् ने भूतकाल में यह उपदेश दिया था; अत: लट् लकार का प्रयोग न करके लङ् लकार का प्रयोग करना था, किन्तु उनके द्वारा उपदिष्ट महार्थतत्त्व तो कभी भूत का विषय बन ही नहीं सकता, क्योंकि वह तो नित्य-नवीन है, शाश्वत है और अक्षर होने के कारण आज भी विद्यमान है।

एक बात यह भी कि ये गाथायें (महार्थमञ्जरी की गाथायें) मूलत: प्राकृत (महाराष्ट्री प्राकृत) में लिखी गई हैं और प्राकृत भाषाओं में भूत-वर्तमान-द्योतक लकारों का प्रतिबन्ध नहीं है।

वैसे तो प्रत्येक युग में महाभारत आदि युद्धों के व्यापार मानवाचार में नित्य प्रवाहित हैं; अत: भगवान् के द्वारा इस उपदेश को वर्तमानकालिक मानकर भी यहाँ लट् लकार का प्रयोग किया जाना संगत है।

युद्धारम्भ में गीता में कहा गया है—

तान् समीक्ष्य स कौरव्य: सर्वान् बन्धूनवस्थितान्।
कृपया परयाविष्टो विषीदन्निदमब्रवीत्।।

यहाँ से प्रारम्भ करके अर्जुन निम्न श्लोकों के द्वारा अपने निराशा एवं विषाद की बातें करता है—

अहो बत महत् पापं कर्तुं व्यवसिता वयम्।
यद् राज्यसुखलोभेन हन्तुं स्वजनमुद्यता:।।
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणय:।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्।।[१]

ग्रन्थकार का कथन है कि अर्जुन इस प्रकार अपने पुरातन संस्कारों से अनुस्यूत पाशवावेश के कारण श्रौत-स्मार्तादि बाह्याम्नाय से निषिद्ध पिता-पितामह एवं स्वजनों

१. स्वोपज्ञ परिमल

की हत्या से होने वाले पातकों को सोचकर श्रीकृष्ण के 'युध्यस्व विगतज्वरः' का आदेश न मानकर मन में अनेक विचिकित्साओं का शिकार बन जाता है और राज्य-सौख्य आदि से विरत होकर युद्ध न करने का निर्णय करता है। श्रीकृष्ण उसे समझाते हुये कहते हैं—

कुतस्त्वां कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ।।
मा क्लैव्यं गच्छ कौन्तेय! नैतत् त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।[१]

इसके परिणामस्वरूप अर्जुन के हृदय में रहस्यार्थ-ज्ञान एवं तत्त्वप्रत्यभिज्ञान का औन्मुख्य प्रकट होता है और वह भगवान् श्रीकृष्ण से निवेदन करता है—

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसमूढ़चेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।[२]

भगवान् श्रीकृष्ण अर्जुन को कार्पण्यदोष से मुक्त करने हेतु अर्जुन से कहते हैं—

य एनं वेत्ति हन्तारं यश्चैनं हन्यते हतम्।
उभौ तौ न विजानीतौ नायं हन्ति न हन्यते।।[३]

और युद्ध के अन्तराल में मारे जाने वाले भीष्म, द्रोण आदि अशेष स्वजनों के शरीर में विद्यमान आत्मा के नित्यत्व-व्यापकत्व आदि का वर्णन करके श्रीकृष्ण अर्जुन को युद्ध करने हेतु तार्किक उपपत्तियाँ प्रस्तुत करके उसे युद्धार्थ आदेश देते हैं; किन्तु इतने पर भी अर्जुन के न मानने पर भगवान् उसे दिव्य दृष्टि प्रदान करते हुये यथार्थ सत्य से अवगत कराते हुये कहते हैं—

दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्।

और अन्त में—

दर्शयामास पार्थाय परमं रूपमैश्वरम्।[४]

भगवान् श्रीकृष्ण अपने वैश्वरूप (विराट् स्वरूप) को प्रकट करते हैं और कहते हैं कि हे अर्जुन! मारता तो काल है; किन्तु मैं तो स्वयं काल हूँ—

कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।[५]

इससे अर्जुन भगवान् को प्राणिपात करते हुये कहता है—

नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते।[६]

और फिर—

१-६. स्वोपज्ञ परिमल

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा।।

फिर भगवान् श्रीकृष्ण अपने को जल में रस, सूर्य-चन्द्र में प्रभा, वेदों में प्रणव, आकाश में शब्द आदि रूप में प्रतिष्ठित कहते हुये कहते हैं कि—

बहूनि ते व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप।।

और अन्त में कहते हैं—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे।।[१]
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।[२]

'शिष्यस्तेऽहं शाधिं मां त्वां प्रपन्नम्' कहकर शिष्यभावावस्थित शिष्य अर्जुन को श्रीकृष्ण गुरु के रूप में अपना स्वरूप समझाते हुये कहते हैं कि मैंने ही इस उपदेश को (योगोपदेश को) सूर्य से कहा था और यही सूर्य-मनु-इक्ष्वाकु-राजर्षि तक आकर फिर लुप्त हो गया था और इसे ही तुम्हें बता रहा हूँ—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप।।
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।।[३]

ग्रन्थकार का कथन है कि यह महार्थमञ्जरी 'णमिऊण णिच्चसुद्धे गुलुणो चलणे महप्पआसस्स' से प्रारम्भ होकर 'देवो उवदिसइ माहवो त्ति सिवम्' गाथा पर अन्त होती है और समापन 'इति शिवम्' कहकर किया गया है। ग्रन्थकार का कथन है कि सब कुछ शिव ही तो है। इस शिवत्व का परामर्श भी शिवपरामर्श ही तो है। सभी कुछ के शिवस्वरूप से उत्पन्न होने के कारण एवं सभी कुछ के शिवस्वभाव से अभिन्न होने के कारण सब कुछ शिवमय है—तदखिलमपि शिवं शिवपरामर्शोपायभूतत्वात् शिवस्य रूपादुत्पन्नत्वात् शिवस्वभावाविभिन्नत्वाच्च शिवमयमेव।[४]

ग्रन्थकार सोमानन्दपाद एवं उनकी पुस्तक शिवदृष्टि से प्रभावित है। आचार्य सोमानन्दपाद ने शिवदृष्टि में सर्वशिववाद को प्रतिष्ठित किया था। इस ग्रन्थ के प्रणेता गोरक्षनाथ ने भी इससे अत्यधिक प्रभावित होने के कारण उसका प्रतिपादन किया है।

१-३. स्वोपज्ञ परिमल ४. स्वोपज्ञ परिमल (गाथा-७०)

सोमानन्दपाद का सर्वशिववाद—आचार्य सोमानन्द अपने को शिवस्वरूप (शिवैक्य-प्राप्त) कहकर शिव का अभिवादन करते हुये शिवदृष्टि का उपक्रम करते हैं—

अस्मद्रूपसमाविष्टः स्वात्मनात्मनिवारणे।
शिवः करोतु निजया नमः शक्त्या ततात्मने।।१।।

उत्पलदेवाचार्य कहते हैं—योऽहं नमस्करोमि स शिवोऽस्मद्रूपेणैक्यं प्राप्तः। वस्तुस्थित्या हि सर्वतत्त्वविग्रहो वक्ष्यमाणनीत्या शिवः।[१] सोमानन्द कहते हैं—

१. न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथा भावानिच्छया कर्तुमीहते।।
२. शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते।
३. शक्तिमानेव शक्तिः स्याच्छिववत्करणार्थतः।।५।।
शक्तेः स्वातन्त्र्यकार्यत्वाच्छिवत्वं न क्वचिद्भवेत्।[२]
४. सर्वं शिवात्मकं यद्वत्कथनीयमिहाग्रतः।।६१।।
५. शक्तिशक्तिमतामुक्ता सर्वत्रैव ह्यभेदिता।।
६. तस्मात्सर्वं स्थितः शिवः तस्मात् सर्वं शिवात्मकम्।
७. अथेदानीं प्रवक्तव्यं यथा सर्वं शिवात्मकम्।
८. एक एव स्थितः शक्तः शिव एव तथा तथा।।
९. यत्सत्तत्परमार्थो हि परमार्थस्ततः शिवः।
सर्वभावेषु चिद्व्यक्तेः स्थितैव परमार्थता।।[३]
१०. जगत्यैक्ये स्थितः शिवः।
११. अतएव शिवः सर्वमिति योगोऽथ चेतसि।
१२. शिवः कर्ता शिवः कर्म शिवोऽस्मि करणात्मकः।
शिव एव कलावस्था व्यापार इति साधुषु।।

महेश्वरानन्द जी कहते हैं कि यह समस्त महार्थमञ्जरीप्रोक्त ज्ञान—

१. भगवान् श्रीकृष्ण द्वारा कुरुक्षेत्र में दिये गये उपदेश से रसार्द्र है।
२. यह स्वप्नोपलब्ध है।
३. यह योगिनियों द्वारा दिया गया उपेदश है।

इस उपदेश में सारे अर्थों का सन्निवेश है।

अर्थों के प्रकार—अर्थों के अनेक प्रकार हैं; यथा—

भावार्थः सम्प्रदायार्थो निगर्भार्थश्च कौलिकः।
तथा सर्वरहस्यार्थो महातत्त्वार्थ एव च।।

२-३. शिवदृष्टिवृत्ति

इन समस्त अर्थों से गर्भित है—यह महार्थमञ्जरी का उपदेशामृत।

महार्थमञ्जरी का सारांश—सर्वशिववाद—अखिलमपि शिवं शिवपरामर्शोपाय-भूतत्वात् शिवस्वरूपादुत्पन्नत्वात् शिवस्वभावाविभिन्नत्वाच्च शिवमयमेव।[1]

स्वप्न में उपदेश देने वाली सिद्धा योगिनी
कालसङ्कर्षिणी को अभिवादन

एवमारब्धमखिलमपि तन्त्रमव्याकुलं परिसमाप्य तदवतरणक्रममासूत्र्यमाणः सिद्धसङ्कल्पतालघुभूतभाववृत्तिस्तन्त्रकृत् तत्प्रयोजिकां स्वप्नसमयोपलब्धां सिद्ध-योगिनीमनुस्मरन्नाह—

इत्थं पाअडसुत्तसत्तइसमुल्लासेक्कसन्धाइणिं
जग्गत्तक्खणणिव्विसेससविणोइण्णं पइण्णोत्तरं।
लोउल्लङ्घनजोग्गसिद्धिपअवीपत्थाणबद्धुज्जमं
कन्थासूलकपालमेत्तविहवं वन्दामि तं जोइणिं॥७१॥

(इत्थं प्राकृतसूत्रसप्ततिसमुल्लासैकसन्धायिनीं
जाग्रत्तत्क्षणनिर्विशेषस्वप्नावतीर्णां प्रतिज्ञोत्तराम्।
लोकोल्लङ्घनयोग्यसिद्धिपदवीप्रस्थानबद्धोद्यमां
कन्थाशूलकपालमात्रविभवां वन्दे तां योगिनीम्॥)

इस प्रकार सत्तर प्राकृत भाषामयी गाथाओं के आविर्भाव में उल्लास प्रदान करने वाली, जाग्रत् अवस्था में स्वाभाविक (निर्विशेष) स्वप्न में अभिव्यक्त होने वाली, पूजोपकरण (दक्षिणादिक उपकरण) आदि से परे रहने वाली, स्वहस्तमुद्रा द्वारा ही अपने हृदय की करुणा को व्यक्त करने वाली, अलौकिक योगैश्वर्य से सम्पन्न और कन्था, शूल एवं कपालमात्र धारण करने वाली योगिनी की मैं वन्दना करता हूँ॥७१॥

इत्थमुपपादितेन प्रकारेण यानि प्राकृतानि संस्कृतव्यतिरेकेण महाराष्ट्राद्यन्य-भाषामयानि सूत्राणि सूचनप्रधानानि गाथात्मकानि वाक्यानि तेषां सप्ततिं प्रति य उल्लासः समुत्पत्तिः प्रसृतिश्च, तत्रैकां सन्धायिनीमनन्यसापेक्षतयोत्पादयित्रीं तां स्वपरामर्शचमत्कारसारैकगोचरीभूतां योगिनीम् अलौकिकैश्वर्यात्मकयोगशक्ति-सम्पन्नां परमेश्वरीं वन्दे स्तौमि अभिवादये च। सर्वथा तादात्म्येन तामनुप्रविशामीति यावत्। तदुक्तं श्रीक्रमकेलौ—'वन्दनं हि तदनुप्रवेशः' इति। तस्याश्च तादृक्तन्त्र-प्रयोजकतया वन्दनीयताया हेतवस्तत्तद्विशेषणद्वारेण परामृश्यन्ते। तथाहि—
जाग्रदित्यादि। **जाग्रदात्मा यः क्षणोऽवस्थाविशेषः। जाग्रदिति कर्तृत्वोपचारेण जागरैवावस्थोच्यते। तया सह निर्विशेषो वैलक्षण्यशून्यो यः स्वप्नस्तत्रावती-**

१. परिमल

र्णामशङ्कितमन्तर्यागमनुप्रविष्टाम्। स्वप्नो हि स्फुटास्फुटरूपः। जागरा हि स्फुट-रूपा। तत्र स्वप्नस्यास्फुटत्वांशव्यतिरेकेण केवलं स्फुटतयोपलभ्यमानायाम-वस्थायाम् अपरोक्षितामिति यावत्। प्रतिज्ञोत्तरां पूजोपकरणदक्षिणाद्यधिक्षिप्य स्वहस्तोपकल्पिता मुद्रैव केवलमन्वर्थीक्रियतामिति येयमागूः, तया महान्तमुत्कर्ष-मश्नुवानाम्। अथ च लोकस्य वेद्यवर्गलक्षणस्य यदुल्लङ्घनं वेदितृस्वभावमात्र-पारिशेष्येणावस्थानम्, तत्र योग्याया औचित्यवत्याः कौलिकैश्वर्यानुभूतिरूपायाः सिद्धेर्या पदवी दुर्गमत्वदीर्घत्वादिपरिहाण्या सद्गुरूपदर्शिता शुद्धा लघ्वी च सरणिः, तत्रत्ये प्रस्थाने विश्वातिशायित्वस्वभावे बद्धोद्यमामुत्सङ्गितोद्योगशक्तिम्। विश्वो-ल्लङ्घनप्रगल्भामपि स्वाच्छान्द्यादिदन्ताभूमिमवरुह्य व्यवहरन्तीमित्यर्थः। किं च, कन्थाशूलकपालमित्येतन्मात्रैश्वर्याम्। अत्रैव विश्ववृत्तान्तस्यान्तर्भूतत्वादन्यस्या-सत्कल्पत्वमनुपयुक्तत्वं चेति भावः। तत्र कन्था नाम भेदप्रभेदवैचित्र्यवत्तायामपि पर्यन्तत एकानुसन्धानसाध्यो विश्वव्यवहारः। शूलं पुनः—

इत्थमिच्छाक्रियाज्ञानशक्तिशूलाम्बुजाश्रयः ।

इति न्यायादिच्छाज्ञानक्रियात्मकं शक्तित्रयम्। कपालं च शरीराहन्ताधिवा-सितात्मा परिमितः प्रमाता। यश्चित्तमयो मायाप्रमातेत्युच्यते। तादृशीमेनां श्रीकाल-सङ्कर्षणीरूपां योगिनीं वन्द इत्यक्षरार्थः। प्राकृतेति। संस्कृतं हि प्रकृतिरशेषस्य भाषान्तरस्य। तत्प्रकृतेः संस्कृतादुत्पन्नं प्राकृतमित्यनेन भाषान्तरात्मकविकृति-शिल्पवैदग्ध्यस्वीकारः, प्रकृतिसौष्ठवपरिचयापरि त्यागश्चेत्युभयथा चमत्कारौ-चित्यमासूच्यते। ननु 'न म्लेच्छितवै नापभाषितवै' न म्लेच्छितव्यं यज्ञादौ इति श्रुतिस्मृतिभ्यां संस्कृतव्यतिरिक्तभाषा प्रयोज्यतायां प्रतिषिध्यते, अपभ्रंशात्मकत्वात् तस्याः। संस्कृतव्यतिरेकेणान्या सर्वापि भाषाप्यपभ्रंशाः—

शास्त्रेषुसंस्कृतादन्यदपभ्रंशतयोच्यते ।

इत्युक्तत्वादिति चेत्? न। स्वात्मपरमेश्वरपरामर्शमपहायान्यत्र चमसचषाला-दिपर्यालोचने भ्रश्यत्पङ्किलस्थलस्खलितकुसुमकिसलयादिस्थानीयः शब्दोऽप-भ्रंशः। अन्यादृशस्तु यत्किञ्चिद्भाषोपरूषितोऽपि मन्त्राक्षरवदत्यन्तसौष्ठवास्पदम्। यत्प्रयोगात् 'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवति' इति श्रुत्युपपादितां स्वर्गगुडजिह्विकामुल्लङ्घ्य स्वपरामर्शाह्लादलक्षणो महोपयोग उपलभ्यत इत्यन्तर्विद्भिर्व्यवस्थाप्यमानत्वात्। स्वप्नसमयसाक्षात्कृताया योगिन्या-स्तद्भाषैकपक्षपातित्वाच्च। किञ्च, अस्मदुपास्यविद्यानुसन्धाने प्रायः प्राकृतस्यैवौ-चित्यमुज्जृम्भते। यदुक्तमस्मत्परमगुरुभिः श्रीमदृजुविमर्शिन्याम्—'इह हि विद्यायां त्रिष्वपि बीजेष्वन्तस्थातृतीयामस्ति, सम्प्रदायस्य काश्मीरोद्भूतत्वात्, प्राकृतभाषा-

विशेषत्वाच्च यथासम्प्रदायं व्यवहार इत्युपदेशः' इति। सूत्रेति। सूचनमात्रमेव ह्यर्थरहस्यानां गाथास्वालोक्यते। येन परिमलाह्वयस्य व्याख्याग्रन्थस्यावश्यम्भावः। अन्यथा 'सन्तो हिअअपआसो' इत्यादौ सन्नित्यादेः प्रकृतिप्रत्ययोभयांशप्राबल्यानुसन्धानाद् विमर्शपर्यवसायिनी तात्पर्यकाष्ठा कथङ्कारमवधार्येत। प्राकृतसूत्रेति सूत्राणां वैशिष्ट्योपन्यासेन संस्कृतादपि तत्तदनेकार्थतत्त्वसूचनासामर्थ्यमेषामस्तीत्यासूत्र्यते। तथाहि—'चित्तं ण लिहइ चित्तं' इत्यत्र चित्रं चित्तमित्यालेख्यान्तःकरणचैतन्यरूपमर्थत्रयं चित्तशब्देनोच्यते। एवम 'अत्थं एत्ताण सोमसुज्जाणं' इत्यत्र अस्त्रमास्थामर्थमस्तमिति प्राग्व्याख्यानुगुण्याद् अत्थं इत्यनेनानेकार्थोऽभिधीयते। एवमन्यदप्यूह्यम्। पाअडेत्यनेनानुरणनशक्त्या प्रकटशब्दपर्यायेण सूत्राणां सूचनप्राधान्येऽपि नात्यन्तमव्यक्तार्थतेत्यभिव्यज्यते। सप्ततीति। योगिन्यो हि सर्वमपि विषयमवगाह्य व्यवहरन्ति। तत् श्रीमत्सप्तकोटीश्वरीविद्यानुसन्धानवासनानुस्यूतेः—

सप्तकोटिर्महामन्त्रा महाकालीमुखोद्गताः ।

इत्याम्नायन्यायादेकैककोटिक्रोडीकारसूचनार्थमेकैकदशकस्वीकार इति तस्याः सिद्धयोगिन्याः सप्तसंख्यात्मकमुद्रानिबन्धतात्पर्यात् सप्ततिसंख्यानिर्बन्ध इति तात्पर्यार्थः। किञ्च, श्रीमन्महार्थक्रमप्रपञ्चः सर्वोऽपि वृन्दचक्रे विश्राम्यति। तच्च चतुष्षष्टिशक्तिसमष्ट्यात्मकमिति व्याख्यातम्। तत्र—

धाममुद्रावर्णकलासंविद्भावस्वभावतः ।
पातानिकेतदृष्ट्या च .... ।।

इत्युपवर्णितया भङ्ग्या शाम्भसिद्धादिषु व्योमेश्यादीनां पात इति पातक्रमेण व्योमेश्यादिपञ्चकस्वीकारस्यापरिहार्यत्वम्। तद्वत् सर्वानुस्यूतिसाम्राज्यशालिन्याः श्रीरुद्ररौद्रेश्वर्याः सर्वथाऽवश्यम्भाव इति सप्ततिः सम्पद्यत इत्यत्र न विप्रतिपत्तिः। समुल्लास इति। लासो हि सूत्राणां स्फुरत्ता। तत्रोल्लासः शब्दार्थयोरुत्पत्तिमाचष्टे। समुल्लासस्तु स[illegible]तादुद्भूतात्मिकामनयोः प्रसरद्रूपताम्। सन्धायिनीमिति। सूत्राणामुत्पत्तिं प्रति तन्त्रकारचित्ते पुष्पादीनामिव वृन्तादौ सन्धानम्, प्रसृतिं प्रति तु शिलीमुखपुङ्खादीनामिव कार्मुकादाविति विशेषः। एकेति। एकैव शक्तिः साधकहृदयमाक्रम्य प्रकाशविमर्शस्वभावा भवन्ती वाच्यवाचकात्मकशाखाद्वयप्रसरपरिपाटीपल्लवितोल्लासां प्रपञ्चवैचित्र्यसम्पदमुज्जृम्भयति। जाग्रदित्यादि। तादृश्यां ह्यवस्थायामेतादृश्याः परमेश्वर्याः साक्षात्कारौचित्यम्। यदुक्तं श्रीविज्ञानभैरवे—

अनागतायां निद्रायां विनष्टे बाह्यगोचरे ।
यावस्था मनसा गम्या परा देवी प्रकाशते ।। इति।

प्रतिज्ञोत्तरामिति। एतदेव हि तत्प्रतिज्ञाया दार्ढ्यं यत् स्वविवक्षितस्य तन्त्रविशेषस्य स्वकारुण्यविषयभूतात् कुतश्चिदुद्भावनं तदुपरि तद्विवरणोद्घाटनं

चेति। लोकोल्लङ्घनेत्यादि। तादृशी हि योगिनीनां स्थितिः साधकान् प्रत्यभिमत-मुपस्थापयति। अन्यथा साक्षात्कारासम्भवो वरप्रदानसामर्थ्याभावो वेत्येकतरकोटौ वैयाकुल्यं स्यात्। कन्थेत्यादि। स्वयमपरिमितप्रमातृभावावलम्बिनी योगिनी यावदिच्छाज्ञानादिशक्तित्रितयवत्तया विश्वविलालक्षणं वेद्यवैचित्र्यं परिमितप्रमातृव्यवधानरूपादुपायबलादाकृष्यान्तश्चर्वणीयतयाऽनुसन्धत्ते। एवमन्यानुजिघृक्षायामपि तेनैव शक्तित्रयेण तत एव परिमितप्रमातृव्यवधानादुपायात् तामेव विश्वविस्तार-सम्पदं तत्तदभिलाषानुगुण्यादुपसन्नानामुद्वमतीति व्याख्यातरूपाणां शूलकपाल-कन्थाशब्दानां तात्पर्यमत्र पर्यालोचनीयम्। एवंभूतां च तामात्मोपास्यदेवतास्व-भावाविभिन्नामुद्वेलकारुण्यकल्लोलकोलाहलाक्रान्तस्वान्ततया स्वस्वरूपसाक्षात्कार-यितृत्वरूपालौकिकसिद्धिसम्पत्प्रदानप्रदर्शिताशेषनिष्कारणौदार्योत्कर्षां कुलाचार्य-चरणपरिचर्याफलप्राप्तिपर्यायभूतामार्यां सिद्धयोगिनीं वन्दे। तादृशीनां हि स्वोपास्यदेवतैकरूपाणां वन्दनमखिलभुवनमङ्गल्यतयाम्नायते। यदुक्तमस्मत्पर-मगुरुभिः श्रीत्रिपुरसुन्दरीमन्दिरे स्तोत्रे—

लक्ष्मीमहोदयमहोत्सवपुण्यलग्नं
वाणीविशेषपरिमेलनपूर्वपर्व ।
त्वद्वन्दनं त्रिपुरसुन्दरि! विश्ववन्द्यं
तद्वत् परं विजयते महानीयसारम् ।। इति।।७१।।

आयातिरथ तन्त्रस्य कथ्यते कौलिकोदिता ।
यामाकर्ण्य पुमानत्र विमर्शौचित्यमश्नुते ।।
पुरा कदाचिद् भगवान् भैरवो विश्वभावनः ।
संविदाकाशमास्थाय महान्तं मणिमण्डपम् ।।
स्वचित्तचषकापूर्णमापिबन् विषयासवम् ।
स्वानन्दभोगलहरीं स्वसंवेद्यां परामृशन् ।।
सदाशिवादिभिः शिष्यैः सेव्यमानो मदोज्झितैः ।
आसाञ्चक्रे चिरं कालं निर्विकल्पे निजे पदे ।।
तत्र क्रियायां सुप्तायां विश्रान्तायां च संविदि ।
इच्छाशक्तिरभूदेका प्रबुद्धा परमेष्ठिनः ।।
प्रशान्तबाह्यसंरम्भं चक्रमालक्ष्य सा तदा ।
तत्त्वमर्थस्य निश्चेतुं जग्राहान्तः कुतूहलम् ।।
अथ पुष्पाञ्जलिं क्षिप्त्वा सौरभोद्भ्रान्तषट्पदम् ।
पाणिभ्यां पद्मताम्राभ्यां पस्पर्श पदयोः प्रभुम् ।।

देवोऽपि किञ्चिदुन्मील्य चमत्कारोत्तरं ज्वलन् ।
कारुण्यवर्षिभिर्नेत्रैः प्रेयसीं तामुदैक्षत ।।
प्रणिपत्य च सा भूयः कल्पिताञ्जलिकुड्मला ।
शुचिस्मिता स्मरारातिं बभाषे शशिभूषणम् ।।
देव! त्वद्वदनादेव गोपितान्यन्यदर्शने ।।
प्राक्प्रत्यगुत्तरावाञ्चि स्त्रोतांसि श्रुतवत्यहम् ।।
किन्तु प्रष्टव्यमेतन्मे कारुण्यं यदि ते हृदि ।
किं तत्त्वमत्र सर्वत्र यज्ज्ञानात् पूर्णता भवेत् ।।
इति श्रुत्वा गिरं देव्याः श्रीमान् स्वच्छन्दभैरवः ।
मानयन् माननीयां तां पृष्टं सुमुखि! सुष्ठिवति ।।
पवित्रं स्वहविश्शेषं ग्राहयित्वा स्मितोत्तरम् ।
अन्तर्लक्षे पदे तिष्ठन् बभाषे तत्त्वमौत्तरम् ।।
यथा स्यात् स्वात्मनः स्फूर्तिर्यथा तस्य बहिः प्रथा ।
यथा च मोहः प्रभ्रश्येद् देशिकेन्द्रे प्रसीदति ।।
प्रक्षालितमलश्चासौ विशुद्धिं स्वां परामृशन् ।
यथा च नित्यं भुञ्जीत जीवन्मुक्तिचमत्क्रियाम् ।।
तथा तथा शिवस्तस्याश्चैतन्यमुपबृंहयन् ।
अर्थतत्त्वमुपादिक्षदौत्तराम्नायसंविदाम् ।।
क्रमशः शृण्वती सा च रहस्यं तत्त्वनिश्चयम् ।
विमृशन्ती च विशदं स्वस्पन्दानन्दचिन्मयीम् ।।
विश्वस्य स्वात्मानश्चैक्यं प्रत्यभिज्ञाय वास्तवम् ।
तेन भैरवनाथेन तादात्म्यामोदभागभूत् ।।
अथ सा कालयोगेन शिवानन्दस्य धीमतः ।
शिष्यस्योपादिशद् देवी चिदद्वैतस्य निश्चयम् ।।
क्रमेण तच्च नाथानां परिपाट्या भुवः स्थलम् ।
दिव्यसिद्धमनुष्यौघप्रविभागादवातरत् ।
अवतीर्णाऽप्यसौ विद्या महार्थक्रमगर्भिणी ।
योगिनां वदनेष्वेव तिष्ठत्यत्यन्तदुर्लभा ।।
अथ कालक्रमवशाच्चोलदेशशिरोमणिः ।
महाप्रकाशो नामासीद् देशिको दृक्क्रियोत्तरः ।।
तस्य शिष्योऽभवद्धीमान् गोरक्षो नाम वश्यवाक् ।
महेश्वरानन्द इति प्राप्तपूज्याह्वयो महान् ।।

अर्चयन् देवतां नित्यं जपन् ध्यायंश्च निश्चलम् ।
पर्यटंश्च दिशामन्तान् कालं कश्चिदवाहयत् ।।
अथैकदा निशीथिन्यामासीनो यागमण्डपे ।
तर्पयित्वा परां देवीं गन्धपुष्पाक्षतासवैः ।।
आस्वाद्यानन्दपात्राणि त्रीणि तीव्राणि तन्मनाः ।
स्वसंरम्भपरामर्शभव्यामनुभवन् प्रथाम् ।।
जागरास्वप्नयोर्मध्यमध्यास्य महतीं दशाम् ।
दूत्याः स्तनतटोत्सङ्गमपराङ्गेन पीडयन् ।।
प्रदीपैः कुशलैरेव प्रदीप्तैरपरोक्षितः ।
आस्ते स्म विस्मयाक्रान्तः कह्लारोत्फुल्ललोचनः ।।
अत्रान्तरे स्त्रियं काञ्चित् कन्थाशूलकपालिनीम् ।
स ददर्श किलोल्लोकां सिन्दूरालंकृतालिकाम् ।।
आलोक्य च स तां सिद्धां कुर्वन्नासन्नमासनम् ।
उपाहरदुदारश्रीः पूजोपकरणं क्रमात् ।।
दक्षिणां च यथाशक्ति दातुं दूतीं समादिशत् ।
क्रुद्धेव योगिनी सा च किमेभिरिति निःस्पृहा ।।
महाराष्ट्रभुवं भाषां प्रयुञ्जाना स्मितोत्तरम् ।
सप्तसंख्योचितां मुद्रां बध्नती हस्तपल्लवे ।।
अलमथैंरियं कन्था वसोर्धारां हि वर्षति ।
प्रदीयतामियं मुद्रा फलं च प्रतिपाद्यताम् ।।
इत्थमाभाषमाणैव सकपालेन पाणिना ।
स्पृशन्ती मस्तकं तस्य निश्शङ्कं सा तिरोदधे ।।
अथ तन्महदाश्चर्यमश्नुवानो महामनाः ।
आरचय्यार्चनाशेषमशेषामनयन्निशाम् ।।
प्रातर्गुरुकुलं गत्वा प्रणम्य चरणौ गुरोः ।
रात्रिवृत्तान्तमाचख्यौ प्राञ्जलिः प्रश्रितैः पदैः ।।
देशिकेन्द्रोऽपि सञ्चिन्त्य निश्चित्यार्थं च तत्क्षणम् ।
पुण्योत्सव इति प्रीतः शिष्यं श्रीमानभाषत ।।
अलमर्थप्रपञ्चेन पिण्डितोऽर्थः प्रकाश्यते ।
अलमथैंरिति प्राह यदियं सिद्धयोगिनी ।।
यच्च सप्तोचितां संख्यां कुर्वाणा करकुड्मले ।
सफलीक्रियतामेषा भावज्ञेनेत्यभाषत ।

तदार्थीं सृष्टिमुल्लङ्घ्य शाब्दीं सा काञ्चिदिच्छति ।
येन मन्त्रात्मकैः शब्दैः परमेश्वर्युपास्यते ।।
सप्तकोटीश्वरी देवी तया नूनमुपास्यते ।
अन्यथा तादृशीमेव मुद्रां न प्रतिपादयेत् ।।
तत् त्वयात्र विधातव्या स्फीतसारस्वतश्रिया ।
सूत्राणां सप्ततिस्तन्त्रे महार्थे मन्त्रगर्भिणी ।।
सद्यस्त्वद्वदनात् तस्मात् पादुकोदयशोधितात् ।
पुरातनागमप्रख्यो ग्रन्थः प्रख्यायतां महान् ।।
किञ्च भाषा तदीयैव माधुर्यामृतवर्षिणी ।
औचित्यं पोषयत्यत्र महामन्त्रानुसारिणी ।।
इत्याज्ञां देशिकेन्द्रस्य दयालोर्मूर्ध्नि धारयन् ।
महार्थमञ्जरीं नाम संविद्दर्पणमण्डलम् ।।
तन्त्रं दिनैः कतिपयैः प्रवबन्ध स्वतन्त्रधीः ।
कार्यारम्भो हि महतामविलम्बेन सिध्यति ।।
तच्च तत्त्वविदं लोके वेदशास्त्रकलास्वपि ।
महार्थसिन्धुमन्थानं श्रावयामास देशिकम् ।।
स्वयमेव च तां विद्यां स्वविमर्शकुतूहलात् ।
शिष्याणामपि निर्बन्धाद् व्याचचक्षे विचक्षणः ।।
यथा हि पुष्पमञ्जर्यां ग्राह्यः परिमलो भवेत् ।
तद्वदस्यामपि ग्राह्या व्याख्या परिमलाह्वया ।।
अस्यामर्थस्थितिः सैव या सर्वत्र कुलागमे ।
किन्तु शब्दस्य शय्याऽन्या नात्यन्तं सा विभिद्यते ।।
शुद्धो जन्मस्वनेकेषु यः कश्चिज्जायते कृती ।
एनामुपदिशन्त्यस्मै योगिन्यो भाग्यशालिने ।।
अनयैव शिवो विष्णुर्ब्रह्मान्येऽपि महौजसः ।
अन्तर्विमृष्टया शुद्धाः स्वाधिकारेषु जाग्रति ।।
इमामेव विमृश्यान्तर्वामदेवशुकादयः ।
अध्यतिष्ठन् परां काष्ठां प्रतिष्ठां सर्वसम्पदाम् ।।
इमामेव च संग्रामे बन्धुहत्यापराङ्मुखम् ।
मुकुन्दो बोधयामास स्यन्दनस्थं धनञ्जयम् ।।
क्षणमालोचिताऽप्येषा जीवन्मुक्तिं प्रयच्छति ।
उपर्युपर्यनुस्यूतास्तत्तदैश्वर्यसम्पदः ।।

न चैनामर्हति प्राप्तुं क्रूरः कौटिल्यवान् खलः ।
प्रमत्तो मत्सरी भीरुरामयावी मदोद्धतः ।।
नास्तिकः स्वल्पधीर्दुःखी दर्शनान्तरतत्परः ।
गुरुभक्तिविनिर्मुक्तः कृतघ्नो दुर्मनाः शठः ।।
अश्रद्धालुरहङ्कारी रागद्वेषोपरूषितः ।
चपलप्रकृतिः पापो निष्कृपः कृपणोऽलसः ।।
प्राप्नुयाद् यदि मौर्ख्येण गुरोरेतादृशः पुमान् ।
उभौ तौ कुलयोगिन्यः शपन्ति क्षुभिताः क्रुधा ।।
अकृत्वा कौलिकीं तृप्तिं विष्टरादुद्धरन्निमाम् ।
उद्घाटयन् पठन् शृण्वन् व्याचक्षाणश्च नेष्यते ।।
अमन्त्रबिन्दुसंस्पर्शं कोशमस्याः परामृशन् ।
योगिनीनां प्रचण्डानामापानेष्वामिषायते ।।
मूलसंवित्कलामात्रमधिगम्यार्चयन्निमाम् ।
अश्नुते सिद्धिमखिलामविनश्वरसम्पदम् ।।
सिद्धान्तानां यथान्येषां सारं स्यादौत्तरः क्रमः ।
तथा तस्याप्यशेषस्य सारमेषाऽवधार्यताम् ।।
बाह्यानामान्तराणाञ्च मन्त्राणामुज्ज्वलार्चिषाम् ।
वीर्यमेषैव बोद्धव्या पराहन्तामयी कला ।।
ज्ञातव्यानां परा काष्ठा कर्तव्यानां परा क्रिया ।
भाव्यानां च परा भूमिरियमीशेन कथ्यते ।।
सहस्रशोऽपि सन्त्वाज्ञाः शिवभट्टारकप्रभोः ।
इयं तु तस्य चैतन्यसर्वस्वमिति निर्णयः ।।
इयमेव शिवेनोक्ता श्रुतिस्मृत्यादिविस्तरे ।
अन्यथाकरणे हेतुर्व्याख्यातॄणां मतिभ्रमः ।।
अन्यत्र पारम्पर्येण साक्षादत्रार्थनिश्चयः ।
इति वैषम्यमप्यूचे भगवानिन्दुशेखरः ।।
आस्थाय धैर्यमवधूय विकल्पचिन्ता-
मालूय संशयमुपास्य च देशिकेन्द्रम् ।
ग्राह्येयमौत्तरमहाक्रमतन्त्रगर्भा-
दार्यैरुदन्वदुदरान्मणिमञ्जरीव ।।
आदिवाक्यमुपक्षेपः प्रतिपाद्यस्य वस्तुनः ।
प्रयोजनादेः प्रथमं प्रमाणातिक्रमः प्रभोः ।।

अधिकारिण्यनियमस्थितिर्विधिनिषेधयोः ।
परीक्षा संसृतेः स्वस्य स्फुटास्फुटतया प्रथा ।।
स्वविमर्शस्य साध्यत्वं तत्स्वरूपविमर्शनम् ।
षट्त्रिंशत्तत्त्वनिर्णीतिस्तदुत्तीर्णा विचारणाः ।।
अन्तर्भावः प्रपञ्चस्य स्वप्रकाशविमर्शयोः ।
शिवशक्त्योरभिन्नत्वं शक्त्युत्कर्षश्चिदात्मनः ।।
संहृतावपि विश्वस्य स्वस्मिन्नव्याकुला स्थितिः ।
प्रमात्रादित्रयस्यैक्यं सदसद्भेदभञ्जनम् ।।
उल्लोकता सपर्याया महार्थक्रमवासना ।
पूजास्वरूपनिष्कर्षो देवताया निरूपणम् ।।
चिन्तनं मन्त्रतत्त्वस्य वाग्वृत्तिस्फूर्तिनिश्चयः ।
मुद्रारूपपरामर्शो विमर्शस्यात्मवर्तिनः ।।
प्रागल्भ्यं भोगमोक्षश्रीसामरस्यफलार्पणे ।
जीवन्मुक्तेरुपन्यासः क्षणभङ्गतिरस्क्रिया ।।
स्वस्यानन्दस्वभावत्वमाणवादित्रयं क्रमात् ।
विवेचनमुपायानां नैश्चिन्त्यं योगशालिनाम् ।।
विमर्शस्याविलम्बत्वं फलस्य प्रतिपादने ।
गुरुकारुण्यनिघ्नत्वं स्वपरामर्शसम्पदः ।।
सर्वदर्शनसारत्वमुपक्रान्तस्य वस्तुनः ।
उक्तसर्वार्थसंक्षेपो भारताद्यविरुद्धता ।।
उपपत्तिप्रयोगश्च तन्त्रावतरणक्रमे ।
इति स्वस्पन्दसंसिद्ध्यै गृह्यतां तन्त्रसंग्रहः ।।
इति गुरुमुखाम्नायन्यायान्महाक्रममञ्जरी-
परिमलमिमं शिष्यप्रेम्णा बबन्ध महेश्वरः ।
कनकसदसो मध्ये नृत्यन्निव प्रभुरद्भुतं
यदिह सुलभः साक्षात्कर्तुं विमर्शमयः शिवः ।।
गाथानामनुभाषणं तदनु तच्छाया ततो व्याकृति-
र्ग्रन्थार्थग्रथनक्रियासु गहनो हृद्यश्च कश्चित् क्रमः ।
संवादोक्तिसहस्रसङ्कलनया तत्त्वार्थचर्चोत्सवः
सौभाग्यञ्च विमर्शसम्पद इति प्रस्थानमध्यक्ष्यताम् ।।
चोलास्ते सततोत्सवा जनपदाः श्लाघ्यो गुणैर्माधवो
रेतोधाः स्फटिकावदातहृदयो नाथः प्रकाशो महान् ।

स्रोतः स्वच्छमनुत्तरं परिणतं पाण्डित्यमास्थाधिका
वश्या वागिति हन्त तन्त्रकृदसौ सर्वोत्तरो वर्तते ।।
सत्संवित्समयमहाब्धिकल्पवृक्षानाचार्यानभिनवगुप्तनाथपादान् ।
आमूलादमलमतीनुपघ्नयन्त्या वाग्वल्याः प्रचुरफलो ननु प्ररोहः ।।
साहित्याब्धौ कर्णधारोऽहमासं काव्यालोकं लोचनं चानुशील्य ।
तद्वत् स्वच्छं लब्धवानस्मि बोधं पान्थो भूत्वा प्रत्यभिज्ञापदव्याम् ।।
यो मे वामचमत्क्रियोद्यममयः स्तब्धोऽपि सन्नश्नुते
विश्वं व्याप्नुवतश्चिदद्वयमहश्चन्द्रोदयाद् विक्रियाम् ।
तस्याह्लादमहार्णवस्य न कथं वर्धेत कूलङ्कषो
वाग्विक्षोभविजृम्भया बहुमुखं कल्लोलहल्लोहलः ।।
कावेर्या इव माधुर्यं कह्लारस्येव सौरभम् ।
नटेशस्येव तन्नृत्तमस्य ग्रन्थस्य गौरवम् ।।
विश्वोत्पत्तिविपत्तिभूः स भगवानत्र प्रवक्ता शिव-
स्तस्याहं प्रतिशब्दपर्वतगुहा यन्मे न गर्वग्रहः ।
तद्दोषोऽस्तु गुणोऽपि वा न खलु तत् स्वायत्तमित्थं स्थिते
मात्सर्यं महतामुदेतु यदि वा वात्सल्यमुज्जृम्भताम् ।।
अधिवासयतु सदा मुखमन्यकथालेपलब्धदौर्गन्ध्यम् ।
कर्पूरशकल इव मे शिव शिव इति शीतलः शब्दः ।।

इति शिवम्

इति श्रीमहाप्रकाशशिष्यस्य गोरक्षापरपर्यायस्य श्रीमन्महेश्वरानन्दस्य
कृतिर्महार्थमञ्जरीपरिमलः सम्पूर्णः

कालचक्रघटीयन्त्रकल्पनामूलशिल्पिने ।
नमः स्वच्छन्दचिन्मात्रपरिबर्हाय शम्भवे ।।
पादुकोदयमहार्थमञ्जरीकोमलास्तवपरास्तुतिक्रमैः ।
स्फारयन् भुवि महार्थसंविदं देशिको विजयते महेश्वरः ।।
जयत्यमूलमम्लानमौत्तरं तत्त्वमद्वयम् ।
स्पन्दास्पन्दपरिस्पन्दमकरन्दमहोत्पलम् ।।

शुभमस्तु

इत्थं = इस प्रकार। प्राकृत = महाराष्ट्री आदि प्राकृत भाषा। सूत्र = सूचनाप्रधान गाथात्मक वाक्य। सप्तति = ७० गाथायें। उल्लास = आविर्भाव। समुत्पत्ति। प्रसृति।

सन्धायिनी = अनन्यसापेक्षतयोत्पादयित्री। योगिनी = स्वपरामर्शचमत्कारसारैकगोचरीभूता, अलौकिकैश्वर्यात्मक योगशक्तिसम्पन्ना परमेश्वरी। स्तौमि = अभिवादन करता हूँ। वन्दे = वन्दनं हि तदनुप्रवेशः—श्रीक्रमकेलि (अभिवादये)। जाग्रत् = जागरावस्था। कर्तृत्वोपचारितावस्था। निर्विशेष = वैलक्षण्यशून्य। सामान्य। अवतीर्ण = अन्तर्यागानुप्रविष्ट। स्वप्न = स्फुटास्फुटरूपावस्था। लोक = वेद्यवर्ग। प्रतिज्ञोत्तरा = स्वहस्तोपकल्पिता मुद्रा। लोकोल्लंघन = वेदितस्वभावमात्रपारिशिष्येणावस्था। योग्य = औचित्यपूर्ण। कौलिक ऐश्वर्यानुभूतिरूप सिद्धि के योग्य। पदवी = सद्गुरुदर्शिता शुद्धा लघ्वी सरणि। प्रस्थान = विश्वातिशायित्वस्वभाव। बद्धोद्यम = उत्संगितोद्योग शक्ति वाला। विश्वोल्लंघन प्रगल्भ होने पर स्वाच्छन्द्यपूर्वक इदन्ता की भूमि में आरोहण करके व्यवहार करने वाली। कन्था = भेदप्रभेदवैचित्र्यवत्ता की स्थिति में भी एकानुसन्धान-साध्य विश्वव्यवहार। शूल = इत्थमिच्छाक्रियाज्ञानशक्तिशूलाम्बुजाश्रयः। इच्छा-ज्ञान-क्रियारूप शूल। कपाल = शरीराहन्ताधिवासितात्मा परिमल प्रमाता। माया = प्रमाता। योगिनी = श्रीकालसङ्कर्षणीरूपा योगिनी।

देवी का जो प्राकट्य रात्रि में निद्रा के समान हुआ, उसका भी एक कारण है—

अनागतायां निद्रायां विनष्टे बाह्यगोचरे।
यावस्था मनसा गम्या परा देवी प्रकाशते।। (विज्ञानभैरव)

गाथानुक्रमणी